Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारस्वती सुषमा

वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

[त्रैमासिकी]

015mN
J6.11

एकादशवर्षे ३–४ अङ्कौ

संवत् २०१३

प्रकाशनतिथिः
मार्गशीर्षपूर्णिमा, संवत् २०१५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

O15mN
J6.11
8767

Dwivedi, Brajavallabh, ed.
Saraswati sushma.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

015ण्णः N
J6.11
Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS
8161
S.J.V.S. PRATISHTHAN LIBRARY Varanasi

SHRI JAGADGURU VISHWARADHYA JNANAMANDIR
(LIBRARY)
JANGAMAWADIMATH, VARANASI

Please return this volume on or before the date last stamped
Overdue volume will be charged 1/- per day.

एकादशवर्षे ३–४ अङ्कौ

संवत् २०१३

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

O15mN
J6.11 8767

Dwivedi, Brajavallabh,
ed.
Saraswati sushma.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारस्वती सुषमा

वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

[त्रैमासिकी]

प्रधानसम्पादकः

श्रीकुबेरनाथशुक्लः, एम० ए०, व्याकरणाचार्यः

सहसम्पादकः

श्रीव्रजवल्लभद्विवेदो दर्शनाचार्यः

एकादशवर्षे ३—४ अङ्कौ

संवत् २०१३

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

015mN
J6.11

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDAL
LIBRARY
Jangamwadi Math, Varanasi
ACC No. 8767

S.J.V.J. PRATISHTHAN
LIBRARY
Jangamawadimath, Varanasi
Acc. No.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषय-सूची

भक्तिप्रपत्तिविवेकः— देशिकतिरुमलैताताचार्यः, एम० ओ० एल० । १–६

भक्तिप्रपत्तिमतभेदविचारः— स्वामिश्रीभगवदाचार्यः, वेदोपनिषद्ब्रह्मसूत्रभाष्यकारः । ७–१३

पुष्टिभक्तिस्वरूपम्— श्रीवासुदेवशास्त्री वागेवाडीकरः, साहित्याचार्यः, काव्यवेदतर्कतीर्थः । १४–२५

श्रीमद्भागवततात्पर्यनिर्णयः— श्रीजयमन्तमिश्रः, व्याकरणसाहित्याचार्यः । २६–३२

लिङ्गायतसिद्धान्तबिन्दुः— श्रीसिद्धरामेश्वरशास्त्री, न्यायाचार्यः, काव्यतीर्थः । ३३–४४

विज्ञानाद्वयब्रह्माद्वैतवादयोः साधर्म्यवैधर्म्ये— श्रीपो०सु०शास्त्री, प्राध्यापकः । ४५–५२

अद्वैत वेदान्त के अनुसार व्यक्ति और समाज का संबन्ध— श्रीराममाधवचिंगले, एम० ए० । ५३–६०

न्यायवैशेषिकसंबन्धि शाङ्करमतालोचनसलोचनम्— श्रीवी०सुब्रह्मण्यशास्त्री, प्राध्यापकः । ६१–७१

न्यायवैशेषिकयोर्भेदकतत्त्वानि— श्रीकेदारनाथत्रिपाठी, न्यायवेदान्तसांख्ययोगाचार्यः । ७२–७६

व्याप्तिप्रसारनिरूपणम्— श्रीढुण्ढिराजशास्त्री, न्यायाचार्यः । ८०–८७

रविभूम्योश्चलत्वाचलत्वसाधनार्थमुपस्थापितानां प्रमाणानां नैयायिकदृष्ट्या समीक्षणम्— श्रीविभूतिभूषणभट्टाचार्यः, न्यायाचार्यः । ८८–९६

अवयविस्वरूपविमर्शः— स्व० प० केशवद्विवेदी, न्यायाचार्यः । ९७–१०६

बुद्धमार्क्सयोर्वादसाम्यम्— महापण्डितराहुलसांकृत्यायनः । १०७–११२

किलेसविद्धंसननयो— भदन्त-तिलोकआणो, शासनश्रीप्रवरधर्माचार्यः । ११३–११८

सिद्धाचार्यों के दार्शनिक तथा योग संबन्धी मत— श्रीहर्बर्ट वी० गुएन्थरः । ११९–१२६

नाथयोगदर्शनम्— श्रीअक्षयकुमारवन्द्योपाध्यायः, एम० ए० । १२७–१३५

भागवतीयं दर्शनम्— श्रीअनन्तशास्त्री फडके, पुराणेतिहासाचार्यः । १३६–१४५

पुराणेतिहासयोः सांख्यदर्शनम्— श्रीश्रीकृष्णमणित्रिपाठी, व्याकरणपुराणेतिहाससांख्ययोगाचार्यः । १४६–१६१

सर्वज्ञविचारः— श्रीदेवदत्तशर्मोपाध्यायः, व्याकरणवेदान्ताचार्यः । १६२–१६६

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संस्कारतत्त्वम्—श्रीरामशङ्करभट्टाचार्यः, व्याकरणाचार्यः, एम० ए० । १६७–१७६
सत्यसिद्धिसम्प्रदायः—स्व० श्रीमामराजदत्तः कापिलः, एम० ए० । १७७–१८०
मानाधीना मेयसिद्धिर्मेयाधीना वा मानसिद्धिः—श्रीआनन्दझा न्यायाचार्यः । १८०-१८५
" " —श्रीशोभितमिश्रः, न्यायव्याकरणाचार्यः । १८६–१८९
" " —श्रीरामानुज ओझा, व्याकरणवेदान्ताचार्यः । १८९–१९७
" " —श्रीरामलक्ष्मणाचार्यः, न्याय-व्याकरण-मीमांसा-वेदान्ताचार्यः । १९७–२००
" " —श्रीजगन्नाथ उपाध्यायः, वेदान्तबौद्धदर्शनाचार्यः । २००–२०४
ज्ञानस्य निराकारत्वेऽद्वैतवादिबाह्यार्थसत्त्ववादिनोर्विशेषः—श्रीजगन्नाथ उपाध्यायः, वेदान्तबौद्धदर्शनाचार्यः । २०५–२११
" " —श्रीमंछारामद्विवेदी । २११–२१५
दृष्टिसृष्टिवादः—श्रीकेदारनाथ ओझा, व्याकरणन्यायाचार्यः । २१६–२२३
" —श्रीमहानन्दठक्कुरः, न्यायवेदान्तव्याकरणसाहित्याचार्यः । २२३–२३१
" —श्रीनृसिंहदेवशास्त्री, व्याकरणसर्वदर्शनाचार्यः । २३१–२३४
आभासप्रतिबिम्बावच्छेदवादाः—श्रीत्रिलोकधरद्विवेदी, व्याकरणवेदान्ताचार्यः । २३५–२४०

चयनिका

विविधपत्रिकाभ्यः संचिता संस्कृतवाङ्मयसंबद्धा लेखसूची—ब्र० व० द्वि० । २४१–२५१

दर्शनपरिषद्

दर्शनपरिषदो लक्ष्यं स्वरूपं च—श्रीजगन्नाथ उपाध्यायः, दर्शनपरिषन्मन्त्री । २५२–२५६
दर्शनपरिषदः कार्यविवरणम् २५७–२६७
शुभाशंसनानि २६८–२६९

सम्पादकीयम्

दर्शनाङ्कविषये किञ्चित् २७०–२७२

———

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारस्वती सुषमा

काशिकराजकीयसंस्कृतमहाविद्यालयमुखपत्रिका

दर्शनपरिषदङ्कः

११ वर्षः	मार्गफाल्गुनौ २०१३	३-४ अङ्कौ

भक्तिप्रपत्तिविवेकः

देशिकतिरुमलैताताचार्यः, वैष्णवविश्वविद्यालयः, वृन्दावनम् ।

मुमुक्षूणां त्रीणि तत्त्वानि ज्ञातव्यानीत्याहुः—चिदचिदीश्वर इति । तत्र चित् चेतनो जीवात्मा । अचित् त्रिगुणात्मकं प्रकृतिसंज्ञं जडद्रव्यम् । इदं जडद्रव्यं शरीरेन्द्रियप्राणरूपेण परिणतं सज्जीवं बध्नाति । जीवः स्वयं तथा निर्मलः, तथा सर्वज्ञः, तथा आनन्दरूपः, यथा साक्षात् सर्वेश्वरः । तथापि सोऽनादिकालप्रवृत्तकर्मसंचयवशेनानुवृत्तशरीरसंबन्धतया संकुचितज्ञानः, तिरोहितस्वस्वरूपः, तत्तच्छरीरानुरूपौ हर्षविषादावनुभवन् वर्तते । अज्ञानान्धतया कामक्रोधाभिभूतः पापानि कुर्वन्नुत्तरोत्तरं तीव्राणि दुःखान्यनुभवति । विवेकलाभे सति पापेभ्यो भीतः पुण्यान्याचरन् सुखी भवति । परं त्विदं सुखं नश्वरं भूयिष्ठदुःखमिश्रं चेति तत्त्वं जानन् कश्चिद्यद्यत्यन्तं निर्विण्णो विरक्तश्च भवति, तेन च हेतुना जननमरणप्रबन्धरूपं संसारमत्यन्तं हातुमिच्छति, तस्य तदनुगुणं पन्थानं प्रदर्शयन्ति शास्त्राणि—"सर्वज्ञः सत्यसंकल्पः सर्वशक्तः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सर्वेश्वरः कश्चिदस्ति। अस्मदीयेन सुकृतेन प्रीतः स तत्फलत्वेन सुखं प्रयच्छति, दुष्कृतेन कुपितस्तत्फलत्वेन दुःखं च। यस्तस्याऽस्मत्सुखोत्पादनसंकल्पः, तदेव पुण्यमित्युच्यते। यो दुःखोत्पादनसंकल्पः, तदेव पापमिति। अनयोः पुण्यपापयोर्निःशेषनिवृत्तिर्यदा भवति तदा वयं मुक्ता भविष्यामः। पुनः कदापि शरीरसंबन्धो न भविष्यति। तदभावे जननमरणप्रसङ्ग एव नास्ति। न परमेवं दुःखस्यात्यन्तिकी निवृत्तिः, अपि तु नित्ये उत्तमोत्तमे लोके भगवता नित्यसूरिभिश्च सह निरतिशयमानन्दमनुभवन्तो वर्तिष्यामहे। ईदृशस्याऽखण्डमोक्षसाम्राज्यस्य पूर्वभाविनी सर्वपुण्यपापनिःशेषनिवृत्तिर्भगवत्प्रसादलभ्या। केनोपायेन भगवान् प्रसीदतीति चेत् भक्त्या प्रपत्त्या वा। तस्मान्मुमुक्षुभिर्भक्तिः प्रपत्तिर्वाऽनुष्ठेया" इति।

तत्र भक्तिर्भगवतो निरन्तरध्यानम्। प्रातः प्रबोधकालात् प्रभृति कर्तव्यतया विहितानि यानि नित्यनैमित्तिकानि कर्माणि, तानि यथावदनुष्ठाय भगवन्तमाराध्य तन्निवेदनपरिशुद्धेनान्नेन शरीरधारणं कुर्वता स्वाध्यायकाले सति संभवे कालान्तरे च शुचौ देशे स्थिरसुखमासनमध्यास्य मनो यथार्हं भगवत्स्वरूपरूपगुणानुसन्धानतत्परं कर्तव्यम्। इदमविच्छेदेन क्रियमाणमत एव ध्यानपदाभिधेयमनुसन्धानं यदा प्रीतिरूपापन्नं भवति, तदा भक्तिपदेनाभिधीयते। यस्यां दशायां तस्मिन्ननुसन्धाने मनः सोत्साहं प्रवर्तते, रमते, तस्माद्विरतिं नेच्छति, सा दशाऽनुसन्धानस्य प्रीतिरूपापन्नता।

इयमेवंरूपा भक्तिर्योगशब्दघटनेन भक्तियोग इत्युच्यते। इयं भक्तिरहरहरभ्यस्यमाना तथा परिपक्वा भवति यथा तदर्हे काले दर्शनसमानाकारता तस्याः संपद्यते। अनुसन्धानं स्वयं स्मृतिरूपमपि वैशद्यातिशयात् साक्षात्कार इव भवति। इयं दर्शनसमानाकारता। इमां दशां प्राप्ता भक्तिः परभक्तिरित्युच्यते। इयमेव साक्षान्मोक्षसाधनभूता भक्तिः।

सामान्यतो भगवति या प्रीतिस्तस्याम्, श्रवणकीर्तनादौ च भक्तिव्यवहारसत्त्वेऽपि मुक्तिसाधनतया निर्देशस्थले सर्वत्र उक्ता परभक्तिरेव भक्तिपदेन ग्राह्या। ज्ञानान्मुक्तिरिति ज्ञानादिशब्दप्रयोगस्थलेष्वपि सामान्यवाचिनो ज्ञानादिशब्दा उक्तपरभक्तिरूपविशेषपर्यवसायिनो भवन्तीति ज्ञेयम्।

भक्तिर्न सुलभा। मनो हि स्वतन्त्रम्, अस्माकं वशे न वर्तते। बलाद्भगवच्चिन्तने प्रवर्त्यमानमपि क्षणेन किमपि विषयान्तरमनुधावति। तस्मादादौ मनसो वशीकरणे यतितव्यम्। तत्रोपायः कर्मयोगः। विहितेषु कर्मसु स्ववर्णाश्रमानुगुणं किमपि परिगृह्य फलाभिसन्धिं विना भगवदाराधनतया तस्यानुष्ठानं कर्मयोग इति व्यवह्रियते। यथावदनुष्ठितेनानेन निर्मलीभूतं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मनोऽस्माकं वश्यं भवति। ततः परं तेन, शरीरेन्द्रियप्राणज्ञानव्यतिरिक्तं चिन्मयमणुपरिमाणं भगवत्परतन्त्रं यदस्मदात्मस्वरूपम्, तद्ध्यानं कर्तव्यम्। अयमेव ज्ञानयोग इत्युच्यते। चिराभ्यस्तो ज्ञानयोगोऽस्मदात्मस्वरूपसाक्षात्कारं जनयति। कर्मयोग एव सम्यगनुष्ठितो मध्ये ज्ञानयोगमनपेक्ष्याऽऽत्मसाक्षात्कारं जनयितुमलम्। एवं कर्मयोगेन ज्ञानयोगद्वारा वा साक्षाद्वाऽऽत्मसाक्षात्कारे लब्धे स्वस्वरूपस्य यथावद्विशदमुपलब्धत्वाद् यस्य वयं परतन्त्राः, योऽस्माकं निरुपाधिकः स्वामी, यस्य कैङ्कर्यकरणमेवास्माकमनुत्तमः पुरुषार्थः, तस्मिन् भगवति प्रावण्यं मनसः स्वयं संपद्यते। ततो भक्तियोगानुष्ठाने नास्ति श्रमः।

कर्मयोगोऽपि बहूनां दुष्करः। अस्मिन् काले सर्वेषामेव दुष्करः। तेन मोक्षं प्रत्याशैव न कर्तव्येत्यापतति। किन्त्वशक्तानामभिप्सितसर्वफलसाधनतया शास्त्रैर्विहिता प्रपत्तिर्मोक्षमपि साधयतीति मुक्तिकामानां कर्मयोगादिष्वशक्तानां प्रपत्तिरित्ययमपरो लघुरुपायो भवति।

'त्वमेवोपायभूतो मे भव' इति प्रार्थना प्रपत्तिरित्युच्यते। इदमुक्तं भवति—भगवन्तमुपसृत्य "अहं मुक्तिं कामये। परं तु तदुपायतया विहितां कर्मयोगज्ञानयोगसाध्यां भक्तिं कर्तुं न शक्नोमि। तस्मात् त्वमेव भक्तिस्थाने स्थित्वा मदभिमतां मुक्तिं दातुमर्हसि" इति प्रार्थनं प्रपत्तिरिति। अस्या विशदनिरूपणे प्रवृत्ता आचार्याः—"अङ्गानि पञ्च। तदतिरिक्तमेकमङ्गि। आहत्य षडंशा प्रपत्तिः" इत्याहुः। इतः परं त्वदभिमताचरणमेव करिष्यामीत्यानुकूल्यसंकल्पः, त्वदनभिमताचरणं सर्वथा न करिष्यामीति प्रातिकूल्यवर्जनसंकल्पः, त्वां विना कर्मयोगादिरूपगत्यन्तरं किमपि मे नास्तीति कार्पण्यम्, त्वमेवोपायान्तरस्थाने स्थित्वा मदभिमतसिद्धिरूपरक्षां करिष्यसीति सुदृढं प्रत्येमीति महाविश्वासः, त्वमेवोपायान्तरस्थाने स्थित्वा मदभिमतसिद्धिरूपरक्षां कुरुष्वेति गोप्तृत्ववरणमितीमानि पञ्चाङ्गानि। योऽहं यच्च मदीयं किञ्चित् तत्सर्वं त्वदीयमेव न मदीयम्, मदभिमतसिद्धिरूपरक्षानिष्पादनभरस्त्वदीय एव न मदीयः, अनया रक्षया जनिष्यमाणं यत् फलं तदपि तवैव न ममेति स्वात्मनः स्वरक्षाभरस्य तत्फलस्य च भगवति समर्पणमङ्गि। उक्तेनाङ्गपञ्चकेनेदमङ्गि समुच्चित्य "षड्विधा शरणागतिः" इति वदन्ति।

"मुमुक्षुर्वै शरणमहं प्रपद्ये", "सकृदेव प्रपन्नाय तवास्मीति च याचते। अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम॥", "मामेकं शरणं व्रज। अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि" [भग० १८।६६] इत्येवमादिभिः प्रमाणवचनैः सिद्धां प्रपत्तेर्मोक्षोपायतां सम्यग् ज्ञातवतामपि, दुष्करकर्मयोगज्ञानयोगसाध्यचिराभ्यस्तभक्तियोगलभ्या अनादिकालसञ्चितानन्तपापराशिविध्वंसपूर्वकनिरतिशयाऽऽनन्दावाप्तिरूपा मुक्तिः कथं कतिपयक्षणमात्रनिर्वर्त्यात्यन्तलघुभूतप्रपत्तिलभ्या

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भवितुमर्हतीति शङ्कोन्मिषन्ती प्रपत्तौ विश्वासं विघटयेत्। इदमभिप्रेत्य—"उपायः सुकरश्चायं दुष्करश्च मतो मम" इत्युक्तं तत्त्वज्ञैः। इमां शङ्कां तत्त्वनिरूपणेनाऽपुनरुदयं निरस्य दृढो विश्वासः संपाद्यः। अनेन हेतुनाऽङ्गेषु महाविश्वासोऽन्तर्भावितः।

भक्तिर्वा प्रपत्तिर्वा साक्षादस्मदभिमतफलं न ददाति, अस्थायित्वादचेतनत्वाच्च। किन्तु ताभ्यां प्रीतः प्रसन्नः सर्वेश्वरो ददाति। स यथा शक्तैः स्वाधिकारानुरूपमनुष्ठितया बह्वायाससाध्यया भक्त्या प्रीयते, तथैवाऽशक्तैः स्वाधिकारानुरूपमनुष्ठितया प्रपत्त्या प्रीयते। स हि सर्वज्ञः, तस्य तस्याधिकारं यथावदुपलब्धुमीष्टे। परमकारुणिकः स्वप्रयोजनं किमप्यनुद्दिश्य स्वतः सर्वोपकारकरणप्रवणः। समः प्रबलेषु पक्षपातं वा दुर्बलेषूपेक्षां वा न करोति। अवाप्तसमस्तकामोऽस्मदीयबह्वायाससाध्यं किञ्चिन्नापेक्षते, न वा प्रयासाल्पत्वे सति केनचिद्धीयते। सर्वशक्तः सर्वस्वतन्त्रः क्षमानिधिरपारवात्सल्यजलधिः सोऽस्माभिर्दीनमभ्यर्थितोऽस्मदभीप्सितं केन हेतुना न दास्यति? इत्यनया प्रक्रियया सम्यगुपसन्नसदाचार्यकृपाकटाक्षसन्धुक्षितबुद्धिवैशद्यैस्तत्त्वविमर्शे क्रियमाणे स महाविश्वासो मनुष्याणां न न भविष्यति।

भक्त्या वा प्रपत्त्या वा प्रसन्नः सर्वेश्वरः फलं ददातीत्युक्तम्। भक्त्यादिर्भगवत्प्रसादं जनयति। प्रसन्नो भगवान् फलं ददाति। अत उभयोः फलसाधनत्वमस्ति, भक्त्यादेश्च भगवतश्च। तत्र भक्त्यादेरस्मत्प्रयत्नसाध्यत्वात् साध्योपायत्वव्यवहारः, भगवतस्तु स्वतःसिद्धत्वात् सिद्धोपायत्वव्यवहारः। एवमुभयोरुपायत्वेऽपि चेतनत्वात् साक्षात् फलप्रदत्वाच्च सिद्धोपायस्य प्राधान्यम्, अन्यस्याप्राधान्यं चेत्येतत् सुगमम्।

यदा वयं भक्तिं प्रपत्तिं वाऽनुतिष्ठामः, तदा 'अहमिदं करोमि' इत्यहङ्कारस्य, 'अनेन मे फलं सेत्स्यति' इति साध्योपायस्यैव फलदायित्वाभिमानस्य चास्ति प्रसङ्गः। एतन्निरोधाय साध्योपाय उपायत्वबुद्धिं परित्यज्य भगवत्येव सा कार्येत्याचार्या उपदिशन्ति—

निजकर्मादिभक्त्यन्तं कुर्यात् प्रीत्यैव कारितः।
उपायतां परित्यज्य न्यस्येद्देवे तु तामभीः॥ [गीतार्थ० ३१] इति।

भक्तौ वा प्रपत्तौ वाऽनुष्ठीयमानायां यदस्माकं कर्तृत्वं तद्वस्तुतः "परात्तु तच्छ्रुतेः" [२।३।४१] इति ब्रह्मसूत्रोक्तरीत्या भगवदायत्तमिति भगवत एव मुख्यमुपायत्वम्। अन्यदनुपायमेवेति स्थितम्।

अत्र केचिदाचार्याः "उपायतां परित्यज्य" इत्यस्मिन्नर्थे शिष्याणां दृढां प्रतिपत्तिमुत्पादयितुमिच्छन्तो भक्तिप्रपत्त्योरुपायत्वमेव नास्तीत्यतिवादमाश्रित्यावोचन्। तत्तु तदनुयायि-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सन्ततिभवा यथाश्रुतमेव प्रत्यपद्यन्त। ऊचुश्चैवम्—भक्तिस्तावत्स्वरूपविरुद्धा, प्रपत्तिः स्वभावविरुद्धेति। एवंवादिन इमे रामानुजीयेषु दक्षिणकलाभिधानावान्तरसंप्रदायविशेषावलम्बिनः।

उपायत्वेऽपि भक्तिस्तावदधुना न केनचिदनुष्ठातुं शक्यते। अतस्तस्या अननुष्ठानं सार्वत्रिकम्। प्रपत्तेरनुपायत्वे तस्या अपि अननुष्ठानप्रसङ्गो भवति। केचिदत्रेष्टापत्तिं कुर्युरपि। परन्तु ते न संप्रदायमर्मज्ञाः। श्रीवैष्णवलोके प्रपन्नसंतानकूटस्थतया सुप्रसिद्धः खलु शठकोपमुनिः। श्रीमद्यामुनमुनिर्भगवद्रामानुजमुनिश्च प्रपत्तिमन्वतिष्ठतामिति निश्चप्रचमिदम्। तस्मादननुष्ठानापत्तिरेवं परिहर्तव्या। अनुपायत्वं वदतां सर्वथाऽनपेक्षितत्वं नाभिमतम्। प्रपत्तिरनुपाय इति हि वदन्ति, न त्वनपेक्षितेति। यदि प्रपत्तिमनपेक्ष्य भगवान् केभ्यश्चिन्मोक्षं दद्यात्, तस्य वैषम्यनैर्घृण्ये प्रसज्येयाताम्। अतोऽस्त्येव प्रपत्तेरपेक्षा। सा तु नोपायतया, अपि त्वधिकारसम्पादकतया। यः प्रपन्नः स भगवत्प्रदेयमुक्त्यधिकारी। तस्मै भगवान् मुक्तिं ददाति। तस्माद्युक्तमुभयं प्रपत्तेरनुपायत्वं चानुष्ठानं च। सेयं श्रीमल्लोकाचार्यप्रदर्शिता सरणिः। परं त्वस्मिन् काले एतत्संप्रदायानुसारिणो बहवो न वयं प्रपत्तिमनुतिष्ठाम इति वदन्तस्तत्र हेतुमाहुः—यदा भगवद्रामानुजमुनिः प्रपत्तिमन्वतिष्ठत्, तदा भगवता न परं तस्मै मोक्षः प्रतिश्रुतः, अपि तु ये साक्षाद्वा परम्परया वा त्वत्संबन्धभाजः, तेभ्योऽपि सर्वेभ्यो मोक्षं दास्यामीति वरो दत्तः। तेन तस्यामेव प्रपत्तौ रामानुजसंबन्धवतामस्माकमन्तर्भूतत्वान्न पृथक् प्रपत्त्यपेक्षेति। अस्मिन्नैतिह्ये विस्रम्भार्हं किमपि मूलं नास्ति।

आचार्यसंबन्धादेव मोक्षसिद्धेर्न प्रपत्त्यनुष्ठानमपेक्षितमित्यन्ये। कर्मयोगज्ञानयोगभक्तियोगप्रपत्तिभ्यश्चतुर्भ्य उपायेभ्यो व्यतिरिक्तः पञ्चमोपायो ह्याचार्यसंबन्ध इति। अत्रेदं वाच्यम्। प्रपत्तिर्द्विविधा—स्वनिष्ठा, आचार्यनिष्ठा चेति। स्वमुक्त्यर्थं स्वेनानुष्ठीयमानाऽऽद्या। स्वकीयत्वेन परिगृहीतानां शिष्यादीनां मुक्त्यर्थमाचार्येणानुष्ठीयमाना द्वितीया। तत्राचार्यसंबन्धः पञ्चमोपाय इति वदतामयमभिप्रायः—आचार्यसंबन्धे सति कारुणिक आचार्यः शिष्यमुक्त्यर्थां प्रपत्तिं स्वयमनुतिष्ठति। तेन तस्य मुक्तिर्भवतीति। तदत्राप्याचार्यानुष्ठिता प्रपत्तिरेव मुक्तिहेतुः, न तु केवलः शिष्यभावः। यस्त्वाचार्यः शिष्यमुक्तये प्रपत्तिं नानुतिष्ठति, तत्संबन्धमात्रेण तच्छिष्यस्य नास्त्येव मुक्तिः। अस्तीति मन्यमानाः केवलं भ्रान्ताः।

कश्चिदाह—पञ्चसंस्कारकाले यद् द्वयोच्चारणानूच्चारणं क्रियते, तेनैव प्रपत्तिसिद्धेर्न पृथगनुष्ठानापेक्षेति, तदप्ययुक्तम्; श्रीमदष्टाक्षरमन्त्रोच्चारणानूच्चारणवद् द्वयानूच्चारणमपि केवलं मन्त्रप्राप्तिमात्रफलकमिति तत्र प्रपत्तिप्रसङ्गस्य सर्वथा विरहात्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इदं पुनरत्र तत्त्वम् । तापपुण्ड्रनाममन्त्रयज्ञरूपपञ्चसंस्कारानुष्ठानकाले भगवदाराधनरूपं यज्ञमुपदिशन्तोऽभिज्ञा आचार्या भगवत्सन्निधौ शिष्यमादाय "लोकविक्रान्तचरणौ शरणं तेऽव्रजं विभो" इत्यादि वाचयित्वा प्रपत्तिं कारयन्ति । पञ्चसंस्कारकाल एव शिष्यमुक्त्यर्थं तेनैव प्रपत्तिमनुष्ठापयन्त्याचार्या इत्युक्तं भवति । आचार्यसंबन्धान्मुक्तिरिति वदतामयमप्यभिप्रायो भवितुमर्हति । तस्मादस्मिन्नपि संप्रदाये प्रपत्तिरनुष्ठीयत एव । एवं विविच्य विषयनिरूपणे ये न प्रगल्भन्ते, ते प्रपत्त्यनुष्ठानं स्वसंप्रदायबहिर्भूतं मन्यमाना आत्मनो लोकस्य चाऽहितं बह्वाचरन्ति ।

उत्तरकलाभिधानसंप्रदायान्तरस्थास्तु श्रीमद्वेदान्तदेशिकव्यवस्थापितां सर्वसंशयच्छेदिनीं व्यवस्थामनुसरन्तोऽङ्गपञ्चकसंपन्नायाः प्रपत्तेर्विशिष्याचार्यनिष्ठारूपाया अनुष्ठाने बद्धश्रद्धा भवन्ति । स हि प्रपत्तेरनुपायत्ववादिनां पूर्वाचार्याणां सिद्धोपायप्राधान्यप्रतिपादने तात्पर्यमिति प्रदर्शयन् शास्त्रविहितोपायानुष्ठाने स्वरूपविरोधो वा स्वभावविरोधो वा न कथमपि प्रसज्यत इत्युपपादयन् "प्रपन्नादन्येषां न दिशति मुकुन्दो निजपदम्" इति शास्त्रसिद्धां स्थितिमातिष्ठमानश्च बहुभिर्ग्रन्थैः संभावितसर्वशङ्कासमाधानपुरस्सरं प्रपत्तितत्त्वं सुनिरूपितवान् ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भक्तिप्रपत्तिमतभेदविचारः

श्रीभगवदाचार्यः, अहमदाबादनगरम् ।

अपारो हि संसारपारावारः । विषमिव विषमं हि जगच्चक्रचङ्क्रमणम् । रामो वा रमा वा कृष्णो वा कृष्णा वाऽपरे वा महापुरुषाः के येऽत्रागत्य नान्वभूवन्विषमां विषादभूमिम् । अवसन्ना हि त इतः प्रयाताः । अनात्मविद्भिः सविद्भिर्वा जगदालिङ्गिभिरिच्छाद्वेषप्रयत्नादिलिङ्गैः प्राप्यत एवात्रत्यं निखिलमवाप्तव्यम्, सेव्यत एव सकलं सेवनीयम्, दृश्यत एव दर्शनीयम्, श्रूयत एव श्रवणीयम्; तथापि किञ्चिदवशिष्टमिव प्राप्तव्यं वा सेवितव्यं वा द्रष्टव्यं वा श्रोतव्यं वा तैरनुभूयते, अननुभूय च तत्किञ्चिद्वर्णनीयं न हि दुरितदुरन्ताकूपारं कथमपि वयं शक्नुमो दर्शनीयतां नेतुमिति सर्व एव मानवा दानवाश्च सुरा असुराश्च ऋषयो महर्षयश्च कृतविद्या अविद्याश्च नितरामनुभवन्ति । अनुभवन्ति च स्वीयां निस्सहायामवस्थितिम् ।

विविधानुभूतीनि परमानुकम्पापारावाराणि खलु शास्त्राणि । अविज्ञातेऽतिविषमे पथि प्रयातुकामानां महामानवानां तान्येव नेतृपदं स्वीकुर्वन्ति,

आश्रयः सर्वजीवानां स्वयं चाथ निराश्रयः ।
आश्रयो जीवजातेन सततं परमेश्वरः ॥

इति परमकल्याणीं वाणीं चोच्चारयन्ति । एवं च परमेश्वर एव सर्वप्रथमं विवेचनीयः, पश्चाच्चाश्रयणप्रकारः ।

"स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् । कविर्मनीषी'''" [ईशा० ८]

इति रीत्या परमेश्वरं व्याचष्टे महन्महनीयोऽविदितवेदयिता भगवान् वेदः । एवं च परमेश्वरो काय इति श्रूयते । अकायो निराकारः, अशरीरो वा । न ह्यशरीरे शरीरिणां सामान्यतः प्रवृत्तिः संभवतीत्याकलय्येत्थं शासितुं जीवानुपक्रमते भगवच्छास्त्रम्—

भावयति विभुतां परमेश्वरः । विभुता व्यापकता । तस्य व्यापकत्वं च त्रिधा—स्वरूपतो धर्मभूतज्ञानतो विग्रहतश्चेति । आनन्त्यनायकोऽपि च सः । त्रिविधपरिच्छेदराहित्यं ह्यानन्त्यम् । परिच्छेदस्य त्रैविध्यं तु देशात्कालाद्वस्तुतश्चेति विज्ञेयम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवंविधोऽपीश्वरः परव्यूहविभवान्तर्याम्यर्चावताररूपेण पञ्चप्रकारः। सर्वविधोपाधिरहित ईश्वरः परसंज्ञकस्त्रिपाद्विभूताववस्थितः। 'उपासकानुग्रहार्थं जगतो रक्षणाय च' इति वचनादुपासनार्थं जगद्रक्षणार्थं च व्यूहश्चतूरूपः। स च वासुदेवसङ्कर्षणप्रद्युम्नाऽनिरुद्धरूपः। परस्त्वनन्तगुणो नीरूपत्वाद्ध्यानानर्हं इति केवलमुपासनासिद्ध्यर्थमेव परस्माद्भिन्नानां वासुदेवादिव्यूहानां चतुर्णां कल्पनम्। एवं च वासुदेवः षड्गुणकः। ते च षड् गुणा ज्ञानबलैश्वर्यवीर्यशक्तितेजोरूपाः। सर्वेषां विषयाणां प्रकाशकः स्वप्रकाशश्च गुणविशेषो ज्ञानम्। समस्तवस्तुधारणसामर्थ्यं बलम्। समस्तवस्तुनियमनसामर्थ्यमैश्वर्यम्। जगदुपादानत्वेऽपि स्वरूपविकाराभावो वीर्यम्। अघटितघटनासामर्थ्यं शक्तिः। सहकारिनैरपेक्ष्यं तेजः। ज्ञानबलाभ्यां पूर्णः सङ्कर्षणः। ऐश्वर्यवीर्याभ्यां पूर्णः प्रद्युम्नः। शक्तितेजोभ्यां पूर्णोऽनिरुद्धः। सङ्कर्षणादीनां त्रयाणां कार्यमपि शास्त्रे निर्दिष्टम्। तथा हि—

बलेन हरतीदं स गुणेन निखिलं मुने।
ज्ञानेन तनुते शास्त्रं सर्वसिद्धान्तगोचरम्॥
ऐश्वर्येण गुणेनासौ सृजते तच्चराचरम्।
वीर्येण सर्वधर्माणि प्रवर्तयति सर्वशः॥
शक्त्या जगदिदं सर्वमनन्ताण्डं निरन्तरम्।
बिभर्ति पाति च हरिर्मणिसानुरिवाणुकम्॥
तेजसा निखिलं तत्त्वं ज्ञापयत्यात्मनो मुने।

प्रथमश्लोके स इति सङ्कर्षणः। द्वितीयेऽसाविति प्रद्युम्नः। तृतीये हरिरित्यनुरुद्धः। एवं च सङ्कर्षणस्य कार्यं शास्त्रप्रवर्तनं संहारश्च। प्रद्युम्नस्य धर्मनयनं सृष्टिश्च। अनिरुद्धस्य तत्त्वबोधनं रक्षणं चेति। षड्गुणपूर्णो वासुदेव एवोपास्योऽनुसन्धातव्यश्च। एवं च वैष्णवा न पररूपमुपासते। चतुर्व्यूहादेव तेषां सकलार्थसिद्धिः। इत्थमपि बोद्धव्यम्—परस्य शास्त्रप्रवर्तनशक्तिः संहरणशक्तिश्च संकर्षणाख्या। धर्मनयनशक्तिः सृष्टिशक्तिश्च प्रद्युम्नाख्या। तत्त्वबोधनशक्तिः संरक्षणं चानिरुद्धाख्या। व्यूहादीनां वर्णनमन्यत्रापि। यथा विष्वक्सेनसंहितायाम्—

मम प्रकारा पञ्चेति प्राहुर्वेदान्तपारगाः।
परो व्यूहश्च विभवो नियन्ता सर्वदेहिनाम्॥
अर्चावतारश्च तथा दयालुः पुरुषाकृतिः।
इत्येवं पञ्चधा प्राहुर्मां रहस्यविदो जनाः॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भक्तिप्रपत्तिमतभेदविचारः

तत्तत्सजातीयरूपेणाविर्भावो विभव उच्यते। मुख्यो गौणश्चेति तस्य द्वौ भेदौ। मत्स्याद्यवतारो मुख्यो विभवः। आवेशाद्यवतारश्च गौणः। गौणेषु विभवेषु नोपास्यत्वम्, उपास्यत्वं च मुख्येषु विभवेषु रामकृष्णनरसिंहादिषु। पर ईश्वरो नोपास्यते। सर्वत्रावतारा एवोपास्यन्ते। ईश्वरावतारत्वात्तत्राऽीश्वरत्वं विश्राम्यत्येव। समाप्तेयमीश्वरकथा। ईश्वर एवेश्वरावताररूप उपास्यः।

उपासकश्च जीवः। जीवः स्वभावादेवानन्दस्वरूपो भवन्नप्युपाधिवशात् संसारित्वं प्राप्तः। बद्धमुक्तनित्येत्याख्यास्त्रयो भेदास्तस्य। संसारान्निवृत्तः परे धामनि निवासशीलो मुक्तः। हनुमदङ्गदादयो भगवत्पार्षदा नित्यमुक्तजीवत्वेन व्यवह्रियन्ते। संसारचक्रमारूढा बद्धाः। बद्धा एव जीवा ईश्वरप्रसादं प्राप्य मुक्तिं कामयन्ते। अत एत एवोपासकाः परमेश्वरस्य। एत एवेश्वरमधिगम्य मोक्षमभिलषन्ति।

उपासनप्रकारः क इत्युच्यते—भक्त्या प्रपत्त्या च स ईश्वरः प्रसादनीय इति। ईश्वरमाश्रित्य भक्तिः प्रपत्तिश्च प्रवर्तेते। नेष्टं कस्यापि कदापि कष्टम्। सर्व एव जीवाः सुखमेवाभिलषन्ति, मानवजीवस्तु नितरां सुखमेवेहते। सामान्यं सुखं सर्वेषामेव जीवानां सुलभं पुत्रकलत्रादिरूपम्। सत्यपि भौतिके प्राप्ते सुखे न शाम्यति सुखाभिलाषः। अतोऽनुमीयते नेदं भौतिकं सुखं सुखम्। वास्तविकं सुखं तु तदेव यत्प्राप्तौ न पुनः सुखेच्छायाः प्रादुर्भावो भवेत्। तादृशं सुखं मोक्षाख्यम्। सर्वदुःखात्यन्तप्रहाणावस्था हि मोक्षः। ईश्वरसामीप्यं हि मोक्षः। ईश्वरसायुज्यं हि मोक्षः। ईश्वरसारूप्यं हि मोक्षः। स्वरूपसंवित्तिरेव मोक्षः। मोक्षस्वरूपमाश्रित्य बहवो वादाः प्रवर्तन्ते। ईश्वरसायुज्यमेव मोक्ष इति विशिष्टाद्वैतवादिनः। तत्सायुज्यं भक्त्या प्रपत्त्या वा सिध्यति।

नन्वनुपपन्नमेतत्। 'ऋते ज्ञानान्न मुक्तिः', 'तमेव विदित्वातिमृत्युमेति' [श्वेता० ३।८] इत्यादिवचनैर्ज्ञानमेव मुक्तिसाधनं वैदिकैरभ्युपगतम्। सत्यम्। स्वीकृतमेतद्विशिष्टाद्वैतवादिभिरपि। परं ज्ञानस्वरूपेक्षणे विवादः। अहमेव ब्रह्मेति ज्ञानमेव ज्ञानपदवाच्यमिति केचित्। अहं ब्रह्मशरीरमस्मीत्यपरे ज्ञानस्वरूपं विवृण्वते। जीवः शरीरम्, ब्रह्म शरीरी। जीवो धार्यो ब्रह्म धारकम्। ब्रह्मैवेश्वरो नानयोर्भेदः। ईश्वरो नित्यमुक्तस्वरूपः। जीवस्तु बद्धोऽपि। यद्यपि शरीरशरीरिणोरभेदस्वीकारादीश्वरस्य मुक्तत्वाज्जीवस्यापि मुक्तिर्नित्यसिद्धैव स्यात्, तथापि न वास्तविकोऽयमभेदः। भेदसहिष्णुरभेदः। अतो मुक्त्यवाप्तये जीवस्य प्रयासोऽपेक्षितः। सन्ति बहवः प्रयासाः। तेषु भक्तिप्रपत्ती मुख्यतां भजेते। भक्तिरपि ज्ञानविशेषः। प्रपत्तिरपि ज्ञानविशेषः। उभे अपि ज्ञानमेव। अतः 'ऋते ज्ञानान्न-मुक्तिः' इत्यादिवचनैर्न विरोधः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भक्तिरेव परमप्राप्त्युपाय इति साम्प्रदायिकाः। अविच्छिन्नेश्वरस्मृतिसन्तानमेव भक्तिस्वरूपम्। यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयो भक्तेरष्टाङ्गानि। नियमासनप्राणायामानां भक्तेरकिञ्चित्करत्वात्पञ्चैवाङ्गानि। ध्यानसमाध्योरैक्याच्चत्वार्येवाङ्गानि। यमध्यानयोरेव मुख्याङ्गत्वमिति विवेकिनः। तस्याः साधनानि सप्त विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेत्याख्याः। अत्र विवेको नामाऽऽत्मातिरिक्तं सर्वमनित्यमित्यध्यवसायः, किन्तु जात्याश्रयनिमित्तत्रिविधदोषरहितान्नादिभिः कायशुद्धिः। कल्याणान्यार्जवदयादानाहिंसादीनि। अनवसादो दैन्याभावः। तुष्ट्यभावोऽनुद्धर्षः। उद्धर्षोऽतिसन्तोषः। तस्याभावोऽनुद्धर्षः। एभिः साधनैर्जन्या साधनभक्तिर्भवति। ईश्वरकृपाजन्या साध्यभक्तिर्भवति। सैव फलभक्तिरित्यप्युच्यते। इयं भक्तिर्वैदिकभक्तिः।

पूर्वमुक्तं प्रपत्तिरपि ज्ञानरूपैव। एवं तर्हि भक्तिः प्रपत्तिरिति न द्वे साधने, किन्त्वेकमेव। यदि प्रपत्तिर्ज्ञानकक्षातो बहिष्कृता स्यात्तदा भक्तेरेव ज्ञानस्वरूपाया ज्ञानविशेषरूपाया वा मुक्तिसाधनत्वं न प्रपत्तेरिति महती विप्रतिपत्तिः।

एवं समाधीयतेऽत्र। ज्ञानरूपत्वं तु द्वयोरेव समानम्। किन्तु भक्तेर्वैदिकविद्यात्वान्नियताधिकारिणः। प्रपत्तेरवैदिकविद्यात्वादनियताधिकारिणः। एवं चेत् प्रपत्तेरवैदिकत्वापत्तिः स्यात्। स्यान्नामावैदिकत्वं तस्याः, नो नः क्षतिः। ईश्वरप्राप्तिरिष्टा। सा च वैदिकेन पथाऽवैदिकेन वा प्राप्ता स्यान्न तत्र विचारः। नावैदिकेन पथा साधित ईश्वरोऽवैदिको भवति। स तु न वैदिको न वाऽवैदिकः। स तु केवल ईश्वरः। अथवा वेदेन वेदाविरोधिना शास्त्रेण च गम्यत्वं वैदिकत्वम्। एवं चोभयोरपि वैदिकत्वमक्षुण्णम्। अन्तरिक्षविद्यान्तरादित्यविद्यादहरविद्याभूमविद्याद्या एव ब्रह्मविद्या भक्तिशब्दाभिलप्याः। न हि सर्वा एता विद्याः सम्भूय ज्ञानध्यानभक्तिशब्दवाच्या भवन्ति। प्रत्येकं विद्यायां ज्ञानं ध्यानं भक्तिश्च विश्राम्यति। एकयापि यया कयाचिद्विद्यया भवत्येवेश्वरप्राप्तिः। एवं च 'ऋते ज्ञानान्न मुक्तिः' इत्यत्र ज्ञानादित्येकवचनस्यापि सार्थक्यमुपपादितं भवति।

अत्र वैदिकीषु विद्यासु न शूद्राणामधिकार इति साम्प्रदायिकाः। अतस्तदर्थसिद्धये प्रपत्तेरङ्गीकारः। न्यासविद्या हि प्रपत्तिः। सा चाङ्गपञ्चकयुक्ता। अङ्गानि च तानीमानि—

आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम्।
रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा॥
आत्मनिक्षेपकार्पण्यम्... ... .। इति।
प्रपत्तिं तां प्रयुञ्जीत स्वाङ्गैः पञ्चभिरावृताम्॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इत्यादिवचनानि प्रपत्तेः पञ्चाङ्गत्वे प्रमाणम् । प्रपत्तेर्लक्षणं तु—

निश्चितेऽनन्यसाध्यस्य परत्रेष्टस्य साधने ।
अयमात्मभरन्यासः प्रपत्तिरिति चोच्यते ॥

अनन्यसाध्यस्येष्टस्य निश्चिते साधने परत्र परमात्मन्यात्मभरन्यासः प्रपत्तिरित्यर्थः । प्रपत्तेरेवेश्वरप्रसत्तये मुख्यसाधनत्वम् । तथा ह्युक्तम्—

प्रशासितुरशेषाणामात्मनां परमात्मनः ।
न हि प्रसादनं विष्णोरन्यदात्मार्पणादृते ॥

सा च 'अहमस्मि तवैव' इति निश्चयात्मकेन शब्दराशिना सिध्यति । विविधविद्याभिधा भक्तिर्नियताधिकारेत्युक्तम् । प्रपत्तिश्च सर्वाधिकारा । तथा चोक्तम्—

न जातिभेदं न कुलं न लिङ्गं न गुणक्रियाः ।
न देशकालौ नावस्थां योगो ह्ययमपेक्षते ॥

अयं योगः प्रपत्तियोग इत्यर्थः । अत एव 'श्रूयतां संप्रवक्ष्यामि न्यासाख्यं योगमुत्तमम्' इति चोक्तम् । उत्तममित्यस्य भक्तियोगादप्यधिकमित्यर्थः । अन्यच्च—

अनेनैव हि कर्माद्या योगाः सिध्यन्ति योगिनाम् ।
ब्रह्मक्षत्रविशः शूद्राः स्त्रियश्चान्तरजास्तथा ।
सर्व एव प्रपद्येरन् सर्वधातारमच्युतम् ॥

एतेन स्पष्टमेवाभिहितं सर्वाधिकारा प्रपत्तिरिति ।

ननु व्यर्थेयं प्रपत्तिः । भगवता कृष्णेन भक्तिरपि सर्वाधिकारेत्युक्तं भगवद्गीतायाम् । तथा हि—

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥
किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा । [९।३२-३३] इति ।

व्यपाश्रित्य समाश्रित्य । न चेदमपि वचनं प्रपत्तिमेवाहेति विवदितव्यम्; 'न मे भक्तः प्रणश्यति' [९।३१], 'भक्ता राजर्षयस्तथा' [९।३३], 'अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्' [९।३३], 'मन्मना भव मद्भक्तः' [९।३४] इत्यादिपूर्वापरवचनानुसन्धानेन भक्तेरेव लाभात् । अतो निरर्थिका प्रपत्तिरित्यव्याहतम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अत्रोच्यते। पूर्वमेकापि भक्तिः पश्चाद् द्वैविध्यं गता—वैदिकी, पौराणिकी चेति। मोक्षस्तु सर्वैरेव कामितः। ब्राह्मणा अपि चाण्डाला अपि च सर्व एव त्रिविधदुःखात्यन्तनिवृत्तिमभिलषन्ति। ईश्वरप्राप्तिरपि दुःखात्यन्तनिवृत्तय एव कामिता भवति। तथा ह्युक्तम्—

अहं भीतोऽस्मि देवेश संसारेऽस्मिन्भयावहे।
त्राहि मां पुण्डरीकाक्ष न जाने शरणं परम्॥
सर्वभोग्यमनायासमप्रमादमनूपमम्।
प्रणतार्तिहरं विष्णुं शरणं गन्तुमर्हसि॥ इति।

ईश्वर एव सर्वेषां जनकः। न हि जनकः कमपि स्वपुत्रं दुःखदावदग्धमवलोकयितुं क्षमते। ये भगवत्पुत्रा न शक्नुवन्ति वैदिकीं भक्तिं स्प्रष्टुं ते पौराणिकीं तां शरणमुपयन्ति। पौराणिकी भक्तिः प्रपत्तिरेव, केवलं नामान्तरं न वस्त्वन्तरम्। ब्राह्मणा अपि न शक्नुवन्ति वैदिकीं भक्तिमनुष्ठातुम्। यमनियमादिसेवनसाहाय्येनैव यदि भवेत्प्राप्तिरीश्वरस्य तर्हि का दयालुता तस्य परमपितुः परमदयालोश्च। साधनसंपन्नास्तु सर्व एव साध्यं वशीकर्तुं सक्षमा भवन्ति। अत एव—

न धर्मनिष्ठोऽस्मि न चात्मवेदी न भक्तिमांस्त्वच्चरणारविन्दे।
अकिञ्चनोऽनन्यगतिः शरण्यं त्वत्पादमूलं शरणं प्रपद्ये॥ [आल० २५]

इति यामुनाचार्या आहुः। वैदिकीं भक्तिं परिहापयितुमेव भागवतकारैर्नवधा भक्तिरुपपादिता। यद्यपि प्रोक्तं मया पूर्वं वैदिकीषु भक्तिषु यां कामप्याश्रित्य सम्पादयितुं शक्य ईश्वरप्रसादः, अत्र तु नवप्रकारा भक्तिः संसेवनीया स्यात्, एवं च साधनवृद्धिः स्यात्, तच्च न समीचीनम्; तथापि "श्रवणं कीर्तनं विष्णोः" इति श्लोके न भक्तेर्नवधात्वम्। श्रवणं कीर्तनं स्मरणं पादसेवनमर्चनं दास्यमित्यादीन्यष्टौ साधनानि न भक्तिः। किं त्वेतत्साधनाष्टकजन्यत्वात्साधनभक्तिरेव न साध्यभक्तिः। आत्मनिवेदनमेव साध्यभक्तिः। साध्यकृपाजन्या भक्तिः साध्यभक्तिः। आत्मनिवेदनमित्यस्यात्मभरार्पणमीश्वर इति भावः। एवं च न सामीचीन्यभङ्गः। यदा भक्तेर्द्वैविध्यं स्वीकृत्य विवेकविमोकाभ्यासादिसाधनजन्याया भक्तेः साधनभक्तित्वं ध्यानवेदनादिशब्दवाच्याया भक्तेः फलभक्तित्वं च स्वीक्रियते स्म, तदैतद्द्वितयभिन्नायाः प्रपत्तेः स्वीकारस्यावश्यकत्वमासीदेव। नेदानीं विशिष्टाद्वैतवादिभिरपि साधनभक्तिः स्वीक्रियते, अतः प्रपत्तिस्थानीयात्मनिवेदनाख्या भक्तिराचार्यैः प्रवर्तिता। ईदृशी प्रपत्तिस्वरूपा भक्तिर्भक्तस्वरूपा वा प्रपत्तिरेतच्छरीरावसान एव जीवानीश्वरस्वरूपतामीश्वरसायुज्यं वा नयति। तथा हि—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भक्तिप्रपत्तिमतभेदविचारः

साधनं भगवत्प्राप्तौ स एवेति स्थिरा मतिः ।
साध्यभक्तिस्तथा सैव प्रपत्तिरिति गीयते ॥
उपायो भक्तिरेवेति तत्प्राप्तौ या तु सा मतिः ।
उपायभक्तिरेतस्याः पूर्वोक्तैव गरीयसी ॥
उपायभक्तिः प्रारब्धव्यतिरिक्ताघनाशिनी ।
साध्यभक्तिस्तु सा हन्त्री प्रारब्धस्यापि भूयसी ॥

यत्र भगवानेव तत्प्राप्तौ साधनतामेति सा साध्यभक्तिरित्युच्यते । तस्या एव प्रपत्तिरित्यपरं नाम । उपायभक्तिः साधनभक्तिः । साधनभक्तेः प्रारब्धव्यतिरिक्तपुण्यपापविनाशकतया साध्यभक्तेश्च प्रारब्धस्यापि परासकतया साध्यभक्तेरेव प्रपत्तेरेव ज्यायस्त्वमिति पिण्डितार्थः । एवं च प्रपत्तेर्नानर्थक्यम् ।

प्रपत्तिविषये किञ्चिदन्यत् । केषाञ्चिदाचार्याणां मते प्रपत्तिः पञ्चाङ्गा, केषाञ्चिन्मते च सा षडङ्गा । निष्कर्षस्तु 'न्यासः पञ्चाङ्गसंयुक्तः' इति निर्णायकवचनबलात् पञ्चाङ्गिकैव सा, न षडङ्गिका । 'षड्विधा शरणागतिः' इति षाड्विध्यत्वोक्तिरौपचारिकी । वस्तुतस्तु पञ्चाङ्गवादः षडङ्गवादोऽन्योऽपि कश्चन वादो नादर्तव्यः प्रपत्तिविषये । अत एवोक्तम्—

अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम् ।
तदेकोपायतायाच्ञा प्रपत्तिः शरणागतिः ॥ इति ।

अनेन वचनेन तदेकोपायतायाच्ञारूपा प्रपत्तिरेकैवेति प्रतिपादितं भवति । एवं च "आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनम्" इति वचने आनुकूल्यसंकल्पप्रातिकूल्यवर्जनयोरेकतरस्यैव स्वीकारे कार्यसिद्धौ किमिति द्वयोर्ग्रहणमिति शङ्कापि निरवकाशैव ।

आनुकूल्यस्य सङ्कल्पो नाम सत्याऽहिंसासदाचारसेवनम् । प्रातिकूल्यस्य वर्जनं नाम असत्यहिंसाऽनाचारसेवनपरिहारः । अनयोरेकतरस्यैवाङ्गीकारे परमेश्वरप्राप्तिरूपा मुक्तिर्निर्बाधा भवति । तथा च "रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा" इत्यादिः प्रपत्तिप्रपञ्चो निरर्थक एवेति । प्रारब्धव्यतिरिक्तकर्मनाशकज्ञानापेक्षया प्रारब्धस्यापि निरासिकायाः प्रपत्तेर्भक्तेर्वा गरीयस्त्वमिति तु ध्येयम् ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुष्टिभक्तिस्वरूपम्

श्रीवासुदेवशास्त्री बागेवाडीकरः, शोलापुरम् ।

जगति प्रचलितेषु नानामतेष्वद्वैत-विशिष्टाद्वैत-द्वैत-शुद्धाद्वैताख्यानि चत्वार्येव श्रुत्युपजीव्यानि विचारार्हाणि प्रमाणकोटिमवगाहन्ते । तेषु शुद्धाद्वैतगतं पुष्टिभक्तिस्वरूपं निरूपयितुकामेन मया प्रथमं शुद्धाद्वैततत्त्वज्ञानस्य स्वरूपं संग्रहेण प्रतिपादनीयम् ।

शुद्धाद्वैतपदनिर्वचनम्

तत्र को वा शुद्धाद्वैतशब्दस्यार्थ इति विचार्यमाणे शुद्धाद्वैतमार्तण्डस्थौ श्लोकौ प्रस्फुरतः—

शुद्धाद्वैतपदे ज्ञेयः समासः कर्मधारयः ।
अद्वैतं शुद्धयोः प्राहुः षष्ठीतत्पुरुषं बुधाः ॥
मायासंबन्धरहितं शुद्धमित्युच्यते बुधैः ।
कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम् ॥ इति ।

शुद्धाद्वैतपदे समासद्वयं वक्तुं शक्यते । तच्च यथा—'शुद्धं च तद् अद्वैतं च' इति कर्मधारयः, 'शुद्धयोरद्वैतम्' इति षष्ठीतत्पुरुषो वा । अत्र गतमद्वैतं शुद्धं मायासंबन्धरहितं विद्यते । तेन शुद्धं नाम मायासंबन्धरहितं यद् अद्वैतं तत् शुद्धाद्वैतम्, अथवा शुद्धयोर्मायासंबन्धरहितयोर्जगद्ब्रह्मणोर्यद् अद्वैतं तत्, किं वा शुद्धस्य मायासंबन्धरहितस्य ब्रह्मणो यद् अद्वैतं तदिति । शुद्धमद्वैतं यस्मिन्, शुद्धस्य वाऽद्वैतं यस्मिन्निति बहुव्रीहिरपि बोद्धव्यः ।

ब्रह्म-जीव-जगतां स्वरूपम्

अत्र हि ब्रह्म सर्वशक्तिमत् सत्त्वादिगुणोपेतं च, "यः सर्वज्ञः सर्वशक्तिः सर्वकर्ता सर्वकामः" [छां० ३।१४।२] (?) इति वेदे दर्शनात् । एवं च वेदोक्ताः सर्वे धर्माः "सर्वधर्मोपपत्तेश्च" [ब्र० २।१।३७], "सर्वोपेता च तद्दर्शनात्" [ब्र० २।१।३०] इत्यादिसूत्रादिभिर्ब्रह्मणि सिद्धाः । तथा च "उभयव्यपदेशात्त्वहिकुण्डलवत्" [ब्र० ३।२।२७], "प्रकाशाश्रयवद्वा तेजस्त्वात्" [ब्र० ३।२।२८], "अणोरणीयान् महतो महीयान्" [श्वेता० ३।२०] इत्यादिसूत्रश्रुत्यादिप्रमाणबलात् तस्मिन् विरुद्धधर्मा अपि सन्ति । सर्वकर्तृत्वे ब्रह्मणि विद्यमानेऽपि वैषम्यनैर्घृण्ययोरनवकाशः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुष्टिभक्तिस्वरूपम्

जगद्ब्रह्मणोरभेदः

"तदनन्यत्वमारम्भणशब्दादिभ्यः" [ब्र० सू० २।१।१४] इति सूत्रप्रामाण्याज्जगद्-ब्रह्मणोरभेदः सिध्यति । न जगन्मायामयं किन्तु तद् ब्रह्मण आधिभौतिकं शरीरम् । अत्रेदं बोध्यम्—ब्रह्म आधिदैविकाध्यात्मिकाधिभौतिकभेदेन त्रिविधम् । ब्रह्मण आधिदैविकं स्वरूपं परब्रह्म, आध्यात्मिकं स्वरूपम् अक्षरब्रह्म, आधिभौतिकं स्वरूपं च जगत् । त्रिविधमपीदं रूपमभिन्नम् । यथा संवेष्टितः प्रसारितश्च पट एक आकारभेदेन भिन्नतया प्रतीयमानोऽभिन्न एव, तथाऽऽविर्भावतिरोभावाभ्यां ब्रह्मजगतोरनन्यत्वम् । आविर्भावदशायां जगत्, तिरोभावदशायां तदेव ब्रह्म । अपि च यथा नियमनाऽनियमनाभ्यां न प्राणभेदस्तथाऽऽविर्भावतिरोभावाभ्यां न ब्रह्मजगतोर्भेदः । न चैवं ब्रह्मणा सह जगतोऽनन्यत्वेन भोक्तृभोग्यभावाभावप्रसङ्ग इति वाच्यम् ; यथोर्णनाभिः स्वयं लालाद्वारा जालं निर्माय तत्र विहृत्य तत् पुनरात्मनि समावेशयति, अथवा यथा योगी बहुरूपाणि निर्माय तत्तद्रूपेण क्रीडित्वैक एवावतिष्ठते; तथा ब्रह्मत्वसाम्येऽपि भोक्तृरूपं न भोग्यत्वं प्राप्नोति न वा भोग्यरूपं भोक्तृत्वम् । आप्तकाममपि ब्रह्म जगद्रूपेण विपरिणम्य तदनन्यत्वेन विविधा लीला विदधाति । एवं ब्रह्मणोऽनवगाहमाहात्म्यं विलसति । अत्रैवं कार्यकारणयोः शुद्धमेवाद्वैतम् । नात्रेतरवत् तत्कृते मायारोपाद्याश्रयणमपेक्ष्यते ।

अक्षरब्रह्म

अक्षरब्रह्म तु ब्रह्मण आध्यात्मिकं रूपम् । तच्च ज्ञानिभिर्ज्ञानेन लभ्यम् । ब्रह्मणो यद् आधिदैविकं रूपं तत्परब्रह्म । तच्च भक्त्यैकलभ्यम् । परब्रह्मरूपः पुरुषोत्तमः पूर्णप्रकटसच्चिदानन्दोऽक्षरब्रह्मणः श्रेष्ठः । "अतो ज्यायांश्च पूरुषः" [यजु० ३१।३], "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" [भग० १५।१७], "अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" [भग० १५।१८] इत्यादिश्रुतिस्मृतिप्रामाण्यात् । तैत्तिरीयोपनिषत्सु—"सैषानन्दस्य मीमांसा भवति" [तै० २।८] इत्युपक्रम्य मानुषमानन्दमेकं गणयित्वा तस्मादुत्तरोत्तरं शतगुणमानन्दं गन्धर्वानारभ्य प्रजापतिपर्यन्तस्योक्त्वा कथ्यते—"ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः" [तै० २।८] इति श्रुत्याम् । अपि च "इयदामननात्" [ब्र० सू० ३।३।३४] इति सूत्रे चेयत एतावदक्षरानन्दस्य सावधिकत्वेन कथनाद् आनन्दमयत्वेन निरवध्यानन्दात्मकत्वस्य पुरुषोत्तमे कथनाद् गणितानन्दत्वेन किञ्चिदानन्दांशतिरोभावादक्षरं परब्रह्मस्वरूपात् पुरुषोत्तमान्न्यूनम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जीवः

"(एकोऽहं) बहु स्यां प्रजायेय" [तै० २।६] इति श्रुत्युक्तदिशा क्रीडार्थं ब्रह्म स्वीयं पूर्णानन्दं तिरोभावयित्वा जीवस्वरूपं स्वीकरोति। तत्र च नास्ति स्वल्पोऽप्यविद्यासंबन्धः। जीवः प्राकृतेन्द्रियैरग्राह्यः। परं योगेन, भगवद्दर्शनसंपादयित्र्या दृष्ट्या, ज्ञानदृष्ट्या चेति त्रिधा ग्रहीतुं शक्यते। स चोत्पत्त्यभावान्नित्यः। यत्र च नामरूपसंबन्धस्तत्रैवोत्पत्तिः। जीवस्य तु तथाविधः संबन्धो नास्ति, तस्य विस्फुलिङ्गवदुच्चरणकथनात्। उच्चरणं हि नोत्पत्तिः। "(अयम्) आत्माऽजरोऽमरोऽमृतः" [बृ· ४।४।२५], "न जायते म्रियते वा कदाचित्" [भग० २।२०] इत्यादिश्रुतिस्मृतिभ्यस्तस्य नित्यत्वम्। जननमरणादिकं च सर्वं तस्य लाक्षणिकम्।

वालाग्रशतभागस्य शतधा कल्पितस्य च।
भागो जीवः स विज्ञेयः·········॥ [श्वेता० ५।६]

इति श्रुत्या जीवोऽणुः। "ज्ञोऽत एव" [ब्र० सू० २।३।१८] इति सूत्रप्रामाण्या-जीवो ज्ञाता धर्मी, ज्ञानं तद्धर्मः। ज्ञानरूपधर्मस्य ज्ञातृरूपधर्मिणश्च सूर्यप्रकाशयोरिवाभेदः। "अंशो नानाव्यपदेशात्" [ब्र० सू० २।३।४३], "ममैवांशो जीवलोके जीवभूतः सनातनः" [भग० १५।७] इति सूत्रस्मृतिप्रमाणबलाज्जीवो ब्रह्मणोंऽशः।

यतः सर्वधर्मविशिष्टं ब्रह्म कर्तृ भोक्तृ च, ततस्तदंशो जीवोऽपि कर्ता भोक्ता चेत्येतत् "कर्ता शास्त्रार्थवत्त्वात्" [ब्र० सू० २।३।३३] इति सूत्रेण सिद्धम्। तस्य कर्तृत्वभोक्तृत्वे मुख्ये, न च शाङ्करमतवदौपाधिके।

ब्रह्म पूर्णप्रकटानन्दम्। जीवस्तु तिरोहितानन्द इति द्वयोर्भेदः। यदा जीवे आनन्दांश आविर्भवति तदा जीवब्रह्मणोः साम्यादैक्यं सुलभम्। तेन तयोरभेदग्रहणे जहदजहल्लक्षणादिकं न स्वीकर्तव्यं भवति। अंशांशिभावेनैव तयोरभेदः श्रुत्या बोध्यते। तेनैकविज्ञानात् सर्वविज्ञानं सम्यक् संगच्छते। न च "तत्त्वमसि" [छा० ६।८।७] इत्येव महावाक्यम्, किन्तु सर्वं प्रकरणम्। विरुद्धधर्माश्रयतयाऽप्यंशांशिभावेनैक्यम्। आनन्दांशप्रादुर्भावे जीवो ब्रह्मरूप एव। तेन चाभेदः सुलभः। उक्तं च—

आनन्दांशाभिव्यक्तौ तु तत्र ब्रह्माण्डकीटयः।
प्रतीयेरन् परिच्छेदो व्यापकत्वं च तस्य तत्॥ इति।

यथा बाल्ये विद्यमानं पुंस्त्वं यौवने प्रादुर्भवति, तथा जीवे विद्यमान एवानन्दांशो भक्त्यादिभिः प्रकटीभवतीत्येतत् "संपद्याविर्भावः स्वेनशब्दात्" [ब्र० सू० ४।४।१] इति सूत्रेण सिद्धम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुष्टिभक्तिस्वरूपम्

जीवस्यावस्थात्रयम्

शुद्धसंसारिमुक्तभेदाज्जीवस्यावस्थात्रयम्। विस्फुलिङ्गवद् व्युच्चरणोत्तरमानन्दांशतिरोधानेऽविद्यासंबन्धात् पूर्ववर्तिन्यामवस्थायां शुद्धजीव इति व्यवहारः। जीवस्य शुद्धत्वं नामाविद्यासंबन्धरहितत्वम्। ततो जीवरूपेऽस्मिन् भगवदंशे ऐश्वर्यादिषड्गुणांशभूतानामैश्वर्यादीनां भगवदिच्छया तिरोभावः।

केषुचिज्जीवेषु रमणेच्छया संकल्पितस्य बहुत्वभवनस्य सिद्ध्यर्थमुच्चैर्भाविच्छाविषयीभूतं मुक्त्यधिकाररूपं सूक्ष्मसद्वासनाविशिष्टं दैवत्वं भगवान् संपादयति "दैवी संपद् विमोक्षाय" [भग० १६।५] इति भगवद्वाक्यात्, तदैव जीवा मुक्तियोग्या भवन्ति। ततोऽविद्यासंबन्धाद् बन्धः। देहेन्द्रियान्तःकरणप्राणाध्यासाः स्वरूपविस्मृतिश्चेत्यविद्यायाः पञ्च पर्वाणि। तैर्बद्धो दुःखित उच्यते। ततः सूक्ष्मस्थूलदेहसंबन्धात् संसारिधर्मान् जन्ममरणादीननुभवन् भगवत्कृपया सत्संगादि प्राप्य पञ्चपर्वात्मिकां विद्यामधिगम्य परमानन्दलक्षणां मुक्तिं लभते। तथा चोक्तम्—

वैराग्यं सांख्ययोगौ च तपो भक्तिश्च केशवे।
पञ्च पर्वेति विद्येयं यया विद्वान् हरिं विशेत्॥ इति।

पञ्चपर्वात्मिकाया विद्यायाः प्राप्तिं यावत् संसारीति व्यवहारः। ततो मुक्त इति व्यवहारः। स च मुक्तजीवो द्विविधः—जीवन्मुक्तः, मुक्तश्चेति। सनकादयोऽविद्यानिर्मुक्ता इत्युच्यन्ते। ये तु व्यापिवैकुण्ठेतरभगवल्लोकनिवासिनस्ते मुक्ता इत्युच्यन्ते। अपरं च दैवा आसुराश्चेति जीवा द्विविधाः। तत्र दैवा अपि द्विविधाः—मर्यादामार्गीयाः, पुष्टिमार्गीयाश्चेति। द्विविधानामेतेषां मुक्तौ भेदो वर्तते।

जगतः सत्यत्वम्

"सदेव सोम्येदमग्र आसीत्" [छा० ६।२।१], "यदिदं किञ्च तत्सत्यमित्याचक्षते" [तै० २।६] इत्यादिश्रुतिभिर्जगत् सत्यमिति साध्यते। 'यत्सत्यं तदेवोपलभ्यते' इति जगत उपलभ्यमानत्वात् सत्यत्वबोधिका युक्तिरपि दर्श्यते। मृत्तिकाप्रकारत्वाद् यथा घटस्तथा ब्रह्मप्रकारत्वाज्जगदपि सत्यम्। तत् प्रथममव्याकृतमासीत्। ततो व्याकृतमभवत्। पूर्णादेव ब्रह्मणो जगत उदञ्चनम्। पूर्णस्य पूर्णत्वं गृहीत्वापि तस्य पूर्णत्वमवशिष्यते। एवंविधमगम्यमाहात्म्यं ब्रह्मेति ईशावास्यश्रुतिर्निगदति। किञ्च "सर्वं खल्विदं ब्रह्म तज्जलान्" [छा० ३।१४।१] इति श्रुत्या ब्रह्मण एव जगदाविर्भावादिकं प्रतीयते। तस्माज्जगतः सत्यत्वम्। अभेदबोधक-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu_Trust. Funding by MoE-IKS

वेदवचनैरिदमेव साध्यते । अन्यथा सत्यासत्ययोर्जगद्ब्रह्मणोरभेदाभावप्रसङ्गः । यतः सत्यासत्ययोरभेदो युक्तिपरास्तः ।

जगत्संसारयोर्भेदः

जगद् भिन्नं संसारश्च भिन्नः । ईदृशो भेदो न कस्मिन्नपि मते । श्रीवल्लभाचार्यैरेवायं भेदः श्रुतिसूत्रादिभिः साधितः । ईश्वरेणेच्छया चिदानन्दांशतिरोभावेन सदंशात् प्रादुष्कृतं यत् तज्जगत् । पञ्चपर्वात्मिकयाऽविद्यया जीवेन कल्पितोऽहंताममतात्मकः संसारः । अविद्याकल्पितत्वात् संसारस्य ज्ञानेन नाशः न तु जगतः, ब्रह्मरूपत्वात् । न द्वैतमविद्याजन्यम्, किन्तु 'अस्मादहं भिन्नः', 'इदं वास्माद् भिन्नम्' इति द्वैतज्ञानमविद्याजन्यम् । अतस्तदेव नष्टं भवति । एतेनाविद्याजन्येन द्वैतज्ञानेन जीव एव बाध्यते, न तु ब्रह्म । यत उक्तं च--

"अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" [भग० ५।१५] इति ।

अपि च कारणभेदादपि जगत्संसारयोर्भेदः । तथा हि जगत उपादानकारणं ब्रह्म, निमित्तकारणं ब्रह्मशक्तिः । किं वा शक्तिशक्तिमतोरभेदादुभयविधमपि कारणं ब्रह्मैव । संसारस्य तूपादानकारणं नास्ति, कल्पितत्वात् । तस्य निमित्तकारणमविद्या । संसारे विनष्टे न कापि जगतो हानिः, न वा विपरिवृत्तिः । संसारो ज्ञानोत्पत्तिपर्यन्तमवतिष्ठते, मुक्तौ तद्विलयः । जगतस्तु नाशः परमात्मेच्छानुसारेण तिरोभावदशायाम् । पञ्चपर्वात्मकविद्ययाऽविद्यानिवृत्तौ तज्जन्यसंसारस्य निवृत्तिः । संसारनिवृत्तौ जीवन्मुक्तिः । तस्यां संसारजन्यानां देहेन्द्रियप्राणान्तःकरणाध्यासानामेव निवृत्तिः । देहादीनां तु न नाशः, यतस्ते जगदन्तःपातिनः । संसार एव सुखदुःखात्मकः, न तु जगत् । तेन हि जीवन्मुक्तौ जगतः सत्यत्वेऽपि न सुखदुःखानुभवः ।

भक्तिरेव गरीयसी

केवलज्ञानापेक्षया केवलभक्तिर्गरीयसी । ज्ञानयुक्तभक्तेः परममहत्त्वम् । एवं-च भक्तिरेव गरिष्ठा । यथैकस्यैव सच्चिदात्मकस्य ब्रह्मणो रमणार्थमाधिभौतिकाध्यात्मिकाधिदैविकभेदाद्रूपत्रयं तथा रमणार्थमेवोक्तत्रयभेदान्मार्गत्रयं वर्तते । तथा ह्याधिभौतिकमार्गः कर्म, आध्यात्मिकमार्गो ज्ञानम्, आधिदैविकमार्गो भक्तिः ।

"अयं पुरुषः (शारीर आत्मा) एभ्योऽङ्गेभ्यः संप्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैव" [बृ० ४।३।३६], "तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च" [बृ० ४।४।२], "प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे ॥"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इत्यादिवचनप्रामाण्यात् प्रथमेन कर्मणाऽऽधिभौतिकमार्गेणाऽऽधिभौतिके जगति भूयोभूय आवृत्तिर्विषयानन्दप्राप्तिश्च । "अनावृत्तिः शब्दादनावृत्तिः शब्दात्" [ब्र० सू० ४।४।२२] इति सूत्रप्रामाण्याद् द्वितीयेनाऽऽध्यात्मिकमार्गेण ज्ञानेन ब्रह्मण आध्यात्मिकस्वरूपेऽक्षरब्रह्मणि जीवस्य लयः पुनरावृत्तेरभावश्च। सर्वोत्तमेन तृतीयेनाऽऽधिदैविकमार्गेण भक्तिरूपेणाऽऽधिदैविक-रूपेण परब्रह्मणा पुरुषोत्तमेन सह भावपूर्वककृपानन्दप्राप्तिः। भगवदिच्छया पुनरुद्धरणं प्राप्तानामक्षरब्रह्मणि लीनानां ज्ञानिजीवानामपि समावेशोऽत्र भवति । यद्यपि संसारे ज्ञानिनामना-वृत्तिस्तथाप्यक्षरब्रह्मणोऽपि श्रेष्ठेन परब्रह्मणा सह कृपानन्दलाभार्थं भगवदिच्छया गमनं भवति। अक्षरब्रह्मैव परमं फलं सच्चिदानन्दत्वदेशकालापरिच्छिन्नत्वस्वयंप्रकाशत्वगुणा-तीतत्वादिधर्मवदस्तीति ज्ञानिनो मन्यन्ते। भक्तास्तु 'अक्षरब्रह्म परब्रह्मणः पुरुषोत्तमस्य धाम' इत्यवगच्छन्ति। "अहं ब्रह्मास्मि" [बृ० १।४।१०] इति रूपेणाक्षरब्रह्म ज्ञानिनो जानन्ति। "आक्षिप्तचित्ताः प्रमदा रमापतेस्तास्ता विचेष्टा जगृहुस्तदात्मिकाः" [१०।३०।२] इति भागवतोक्तदिशा सकला भगवल्लीला भक्तास्तु तन्मनस्काः, तदालापाः, तद्विचेष्टाः, तदात्मका भूत्वा स्वयमेव कुर्वन्ति ।

मार्गत्रयवर्तिनाममीषां जीवानां व्युच्चरणमार्गोऽपि भिन्नः। कर्ममार्गीया मूलेच्छातो व्युच्चरन्ति, ज्ञानमार्गीया वाणीतः, भक्तिमार्गीया जीवास्त्वाधिदैविकस्वरूपस्य भगवतः शरीरात्। 'भगवान् सर्वं सम्यगेव करिष्यति' इति सम्यग्विवेकेन चित्तप्रसादो लम्भनीय इति कर्ममार्गीयाणाम्, आमरणं दुःखत्रयं सोढव्यं सर्वत्राखण्डं शुद्धाद्वैतमनुभवनीयमिति ज्ञानमार्गीयाणाम्, ऐहिकपारलौकिकसर्वकर्मसु कर्मणा वाचा मनसाऽपि श्रीभगवानेव शरण्यतां नेयः, स चानन्यत्वेनाश्रयणीयः। तस्माद् भगवतः श्रीकृष्णात् प्रसादः प्राप्तव्य इति भक्तिमार्गीयाणां निष्ठा। कर्ममार्गे विवेको ज्ञानमार्गे धैर्यगुणः। एतावङ्गभूतत्वाद् भक्तेः पोषकौ। ज्ञानाद् भक्तिर्गरीयसी। यतो ज्ञानेनाक्षरब्रह्मणः प्राप्तिः। भक्त्या तु परब्रह्मणा श्रीकृष्णेन सह रममाणः क्रीडारसमनुभवति। श्रवणभक्तिस्तु मुक्त्यर्थं सोपाधिकत्वाद् उत्कटस्नेहाभावाच्च मर्यादामार्गान्तर्गतैव। तेषां भगवति मुक्तिदातृत्वेनैव स्नेहः। निरुपधि-प्रेमाभावाद् मुक्तिरेव तेषां फलं न तु क्रीडारसानुभवः। अक्षरब्रह्मणि ज्ञानेन प्राप्ते भगवदिच्छया तस्य भक्तौ प्रवेशो भवति। एवंविधा भक्तिः श्रेष्ठा।

"माहात्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः। स्नेहो भक्तिरिति प्रोक्तः", "ब्रह्मविदा-प्नोति परम्" [तै० २।१], "मुक्तोपसृप्यव्यपदेशाच्च" [ब्र० २।३।१], "मुक्तानामपि

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ।।", जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ।। आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे । कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ।।" इत्यादिश्रुतिस्मृतिसूत्र-वचनबलादीदृशो ज्ञानिभक्तः केवलज्ञानिनो गरीयान् । अयमेवाशयः श्रीमदाचार्यैः—

"ज्ञानी चेद्भजते कृष्णं तस्मान्नास्त्यधिकः परः"

इति वचनेन प्रकटीकृतः । एवं ज्ञानेनाक्षरब्रह्मणः प्राप्तिः । ततोऽविद्यानिवृत्तौ पुरुषोत्तमप्राप्तौ योग्यता प्राप्यते । ब्रह्मज्ञाने प्राप्तेऽपि न सर्वेषां भगवद्भक्तिलाभः । यमिच्छति स्वयं भगवान् तस्यैव प्राप्तिः । उक्तं च श्रुतौ—"यमेवैष वृणुते तेन लभ्यः" [कठो० २।२३] इति । "मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम्" इति वचनाद् भगवत्प्रसादं विना कदाचिदपि नैव भक्तिप्राप्तिः । भक्तिरपि भगवतो वासुदेवस्यैव गरिष्ठा, तस्यैव चित्ता-धिष्ठानत्वात् ।

"ब्रह्मैव सन् ब्रह्माप्येति" [बृ० ४।४।६], "अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" [कठो० ६।१४] इति श्रुतिवचनबलाद् भक्ता भक्तिमार्गाश्रिता भगवत्समीपं गच्छन्ति । तत्र भगवत्प्राकट्ये जाते प्रथमं नेत्राभ्यां मनसा च श्रीमुखारविन्दसुधापानेन भक्तानां चेतस्सु परमः प्रमोद आविर्भवति । ततोऽनिर्वचनीयस्य कस्यापि भावस्य समुत्पत्तिर्भवति । सकलैरिन्द्रियैर्भग-वत्स्वरूपेण सह संलापादिसमागमेच्छा जायते । भगवता भक्तानां तथाविधो मनोरथः पूर्यते । गणितानन्दत्वाभावादयं रसानुभवः श्रेष्ठः । "ते ये शतं प्रजापतेरानन्दाः" [तै० २।८] इति श्रुत्यादिना गणितानन्दत्वादक्षरब्रह्मानन्दस्तु निकृष्टः ।

अन्यच, भक्तौ प्रसादानन्दो रसपानं च फलम् । ज्ञाने दुःखाभावमात्रं फलम् । भक्तौ पूर्णानन्दानुभवः, ज्ञाने स्वरूपेण प्रकर्षतः फलम् । भक्तौ भेदस्थित्याऽऽनन्दानुभवः, ज्ञाने न भेदाभावस्थितेरानन्दानुभवः । भक्तौ मूलत एव निरतिशयानन्दः, ज्ञाने प्रथमं कष्टम्, अन्ते दुःखाभावो गणितानन्दश्च । भक्तौ तन्मनस्का इत्यादिस्वरूपेण "आक्षिप्तचित्ताः प्रमदाः" [भाग० १०।३०।२] इत्युक्तदिशा स्वयं तल्लीलाकरणम् । ज्ञाने तु "अहं ब्रह्मास्मि" [बृ० १।४।१०] इत्यादिवाक्यैः केवलमक्षरब्रह्मभावना । ज्ञाने कामक्रोधादयः प्रतिबन्धकाः, भक्तौ तु न ते तथा प्रत्युत सहायकाः । यत उक्तं च—

कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च ।
नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ।। इति ।

[भाग १०।२६।१५]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुष्टिभक्तिस्वरूपम्

किञ्च—

गोप्यः कामाद् भयात् कंसो द्वेषाच्चैद्यादयो नृपाः ।
संबन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो ॥ [भाग० ७।१।३०]

इत्येवं कामक्रोधादिभ्योऽपि भगवत्साम्यं प्राप्ताः । अपि च भक्तौ तथा भयसंभावनैव नास्ति, "आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचन" [तै० २।४], "आत्मप्रदः प्रियश्चापि किमर्थं मोहयिष्यति", "न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह" इत्येवं केवलज्ञानवैराग्यादीनामश्रेयस्करत्वं प्रदर्श्य "केवलेन हि भावेन गोप्यो गावः खगा मृगाः" इत्यनेन केवलभक्त्या तिरश्चामपि भगवत्प्राप्तिकथनाद् ज्ञानादपि तस्या गरीयस्त्वं सुप्रतीतं भवति ।

ननु द्वैतं विना भक्तेरसंभवात् "यत्र हि द्वैतमिव भवति" [बृ० २।४।१४] इत्यादिश्रुतिवचनैर्द्वैतस्य निषेधादिदं भक्तिशास्त्रं श्रुतिविरुद्धमिति चेन्न; तादृशश्रुतेर्द्वैताभावबोधकत्वाभावात् । तत्र द्वैतज्ञानमेव निषिध्यते । अतो नानया श्रुत्या पुरुषोत्तमभक्तेर्विधिर्निषेधो वा प्रतिपाद्यते । पुरुषोत्तमदर्शने जाते न च द्वैतोत्पत्तिः । तेन हि तत्र नोक्तश्रुत्यवकाशप्रसङ्गोऽपि । प्रत्युत—"स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्" [छा० ७।१५।४] इत्यादिश्रुत्यन्तरे भगवद्दर्शनविधिरेव दृश्यते । "मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु" [भग० ९।३४] इति भगवद्गीतोक्तिरप्यत्रानुसंधीयते । ब्रह्मभावानन्तरमपि परा भक्तिरनुष्ठीयते । इदमेव भगवतोऽनवगाहमाहात्म्यम् । भक्तिरेवोत्कृष्टं फलम् । साधनमपि तदेव । साध्यसाधनयोरत्रापूर्वमैक्यम् । सूरय एवंविधया भक्त्यैव भगवत आत्मानं समर्प्य रसपूर्णा भवन्ति । नास्ति येषु भगवत्कृपा ये वा कर्म ज्ञानं श्रवणादिनवविधां भक्तिं च कष्टतमां मन्यन्ते, तैरपि "सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज" [भग० १८।६६] इति भगवद्वचनमेवोररीकृत्य स एव भगवान् शरण्यः करणीयः । तस्मादेव परमं फलमनुभवेयुः परमानन्दं चावाप्नुयुः । "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" [भग० ७।१४], "कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति" [भग० ९।३१] इति भगवद्वचनानुरोधादशरणा भगवच्छरणा जीवा न कदापि मुह्यन्ति ।

पुष्टिभक्तेर्विवेचनवशात् तादृशीं भक्तिं प्रतिपादयतां श्रीमद्वल्लभाचार्याणां तत्त्वज्ञानं भक्तिप्रधानतमं तदुपादेयत्वान्मया प्रथमं विवेचितम् । एतावतैव तद्भक्तेर्विवेचनस्य गतार्थतेति सुधियां ममेव मतिर्जायेतेति निवेद्य सप्रश्रयं संप्रति पुष्टिभक्तिर्विविच्यते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुष्टिभक्तेः स्वरूपम्

"पोषणं तदनुग्रहः" [२।१०।४] इति श्रीमद्भागवते द्वितीयस्कन्धे पुष्टिलक्षणं कथितम्। तेन पुष्टिर्नाम भगवदनुग्रहः। विषयात्मकपोषणे न तत्तात्पर्यम्। उक्तं च श्रीमदाचार्यैः—मर्यादापुष्टिभेदेन वरणं द्विधोच्यते। तत्र सहकार्यन्तरविधिस्तु मर्यादापक्षेणोच्यते। पुष्टौ तु नान्यापेक्षा। कृतिसाध्यं साधनं ज्ञानभक्तिरूपंशास्त्रेण बाध्यते। ताभ्यां विहिताभ्यां मुक्तिर्मर्यादा। तद्रहितानामपि स्वस्वरूपबलेन स्वप्रापणं पुष्टिरित्युच्यते। साधनक्रमेण मोचनेच्छा हि मर्यादामार्गीया मर्यादा। विहितसाधनं विनैव मोचनेच्छा पुष्टिमार्गमर्यादा। पुष्टिमार्गोऽनुग्रहैकसाध्यः प्रमाणमार्गाद्विलक्षणः। एतेन च नायं मार्गो विषयपोषक इत्यवगम्यते,

"विषयाक्रान्तदेहानां नावेशः सर्वथा हरेः" [नि० ल० ६],

"संसारावेशदुष्टानामिन्द्रियाणां हिताय वै।
कृष्णस्य सर्ववस्तूनि भूम्न ईशस्य योजयेत् ॥" [नि० ल० १२]

इत्यादिवचनैश्चास्मिन् मार्गे विषयिणां न समावेश इति प्रतीयते। नापि कामपोषकोऽयं मार्गः। गोपीलीलायां सर्वथा कामसंबन्धो नास्ति, "संत्यज्य सर्वविषयांस्तव पादमूलम्" [भाग० १०।२९।३१] इति श्रीमद्भागवत उक्तत्वात्। अस्मिन्मार्गे साधनान्तरं नापेक्षितम्।

भक्तिमार्गे यद्यपि शमादिसाधनत्वं तथापि "आत्मन्येवात्मानं पश्यति" [सुबालो०९।१४] इत्युक्तदिशा ज्ञानमार्गीयस्य ज्ञानाङ्गत्वेनैव शमादिविधानाद् ज्ञानमार्गे तेषामवश्यानुष्ठेयत्वम्। भक्तिमार्गे तु स्वत एव संभवान्न तथात्वम्। भक्तेन श्रवणादीन्यनुष्ठेयानि। परं यदा वर्णाश्रमादिकर्माणि श्रवणादीनि च युगपत् प्राप्नुवन्ति, तदा "अन्या वाचो विमुञ्चथ" [मुण्डको० २।२५] "शृण्वन्ति गायन्ति" इति श्रुतिस्मृतिलिङ्गात् श्रवणादीन्येवानुष्ठेयानि। यतः "सर्वं पाप्मानं तरति" [बृ० ४।४।२३] इति श्रुतिः कर्माननुष्ठानजैर्दोषैर्भक्तस्यानभिभवं दर्शयति। प्रधानतया भगवद्धर्मा एव विधेयाः। न ते च ये पुरुषोत्तमदृष्टीनामन्तराया भवन्ति।

मुक्तानां देहेन्द्रियाद्यभावेन केवलात्मस्वरूपेणैव ब्रह्मानन्दानुभवः। एतद् मुक्त्यपेक्षया भक्तस्य श्रेष्ठत्वम्। पुष्टिमार्गीयभक्तानां भगवद्दर्शनं नित्यम्। यदि पुष्टिमार्गे कर्मठाग्रणीर्जैमिनिरपि तदीयत्वं भजेत् तदा पुष्टिमार्गीयभगवद्भावं प्राप्तस्य तस्याप्युक्तभावतिरोधानं न कदापि स्यात्, किमुतान्यस्य। पुष्टिमार्गीयस्य गृहादित्यागस्य साधनत्वेन नाङ्गीकारोऽपेक्षित इति भक्तिमार्गसिद्धान्तज्ञस्याऽऽत्रेयस्य मतम्। भगवदर्थं तत्त्याग औडुलोमिनाऽपेक्षितः। "भक्तिरस्य भजनम्" [गो० पू० ता० १।३] इत्यस्याः श्रुतेरिदमेव तात्पर्यम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुष्टिभक्तिस्वरूपम्

भक्तिमार्गप्रचारैकहृदयो बादरायणः ।
मानं भागवतं तत्र तेनैवं ज्ञेयमुत्तमैः ॥

ननु "यमेव" [मुण्ड० ३।२।३] इति श्रुतिः साधनान्तरनिषेधपूर्वकं वरणस्यैव साधनत्वं प्राह । परं "तस्मादेवंविच्छान्तो दान्तः" [बृ० ४।४।२३] इति श्रुतिः साधनान्तरं प्रतिपादयति । श्रुतित्वस्याविशेषादस्मिन् विरोधे किं वाऽऽदरणीयमिति संशये, उच्यते—मर्यादापुष्टिभेदेन वरणं द्विविधम् । तत्र सहकार्यान्तरविधिस्तु मर्यादापक्षमाश्रित्य कथितः । पुष्टिपक्षे तु नान्यसाधनापेक्षा । तेन न लेशतोऽपि विरोधः । अन्यच्च—कायिकं वाचिकं मानसिकं चेति साधनत्रयम् । तत्र "मनसैवाप्तव्यम्" [कठो० ४।११] इति श्रुत्युक्तदिशा तृतीयं साधनं मुख्यम् । परं तस्य तन्मानसिकं साधनमपि विध्यादिवज्ज्ञेयम् । यथा पुष्टिमार्गीयस्य भक्तस्य भगवद्भजने प्रवृत्तौ विधिर्वाऽर्थवादो वा न युज्यते स्वयं प्रवृत्तत्वात्, तथा मानसिकं साधनमप्यप्रयोजकम् ।

परमपुरुषार्थरूपफलप्राप्तिपर्यन्तं बाह्याभ्यन्तरत्वानुसंधानरहितावस्था नित्या । ततः परं सायुज्यमपि न । तत्रापि पूर्ववद्भगवता सह आलापादिकं तस्य दृष्टमेव फलम्, नादृष्टं सायुज्यादिकम् । बाह्यज्ञानस्याधिगमे सत्युत्तरपापस्य न संबन्धः, पूर्वपापस्य च विनाशो भवति । एवमेवेतरस्य पुण्यस्यापि गतिः । भगवद्भावाच्च्युतावेवमेव पुण्यपापयोरश्लेषविनाशौ भवतः । प्रारब्धेतरसंचितक्रियमाणसुकृतदुष्कृते एव नश्यतः । तत्प्रारब्धकर्मणामदहनं कार्यमात्रपूर्वावधिरूपभगवदिच्छातो ज्ञेयम् । एवं मर्यादामार्गीयभक्तस्य मर्यादयैव मुक्तिप्रतिबन्धसंभवः । तयैव तन्नाशः ।

पुष्टिभक्तानां प्रारब्धाप्रारब्धयोः सुकृतदुष्कृतयोरुपभोगेन विनैव नाशः । "यदेव विद्यया करोति" [छां० १।१।१०] इति श्रुतिवचनाद् भगवज्ज्ञानशक्तेरंशभूताया जीवनिष्ठाया विद्यायाः संबन्धाज्जीवकृतं कर्म यदि वीर्यवत्तरं ततः साक्षात् तत्कृपया प्रारब्धं नश्यति । "सोऽश्नुते सर्वान् कामान् सह विपश्चिता" इति श्रुतेः पुष्टिभक्तो लिङ्गस्थूलशरीरे क्षपयित्वा भगवल्लीलोपयोगिनोऽलौकिकस्य देहस्य संप्राप्त्यनन्तरं भोगसंपत्तिं लभते ।

भक्तस्य सूक्ष्मशरीरस्य यत् क्षपणमुक्तं तत् किं तत्स्वरूपनाशनम्, उताहो स्पर्शमणिसंयोगाल्लोहस्य सुवर्णत्वमिव भगवदनुग्रहात् तस्यालौकिकत्वसंपादनमिति प्राप्ते, उच्यते—उत्तरपक्ष एव साधीयान् । तथा हि—यथा पूर्वं संसारिण एव जीवस्य भगवदनुग्रहात् पूर्वावस्थापगमो मुक्त्यवस्थेति कथ्यते, तथैवात्रापि वक्तुमर्हति । "न तस्मात् प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते" [बृ० ४।४।६] एषा श्रुतिर्जीवस्य सायुज्यमुक्तिसमये तत्प्राणादीनामपि कारण-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भूते सत्स्वरूपे लयमाह । तस्मादेव "ब्रह्मैव सन् ब्रह्माप्येति" [बृ० ४।४।६] इत्युक्तम् । पुष्टिमार्गीयस्य तथाविधमुक्तेरभावान्नेयं तद्विषयिणीति प्राप्ते ब्रूमः—ब्रह्मांशत्वेन जीवस्यानन्दात्मकत्वात्, निर्दोषस्वरूपत्वात्, नित्यत्वाच्च; दोषाणां चागन्तुकत्वात् तदपगमे तस्य पुष्टिभक्तस्यानन्दात्मकत्वमुचितम् । प्राणादयस्तु न जीववद् ब्रह्मांशाः, अतो जीवदृष्टान्तेन प्राणेन्द्रियादिष्वप्यानन्दरूपत्वं न वक्तुं शक्यम् । लौकिकत्वविशिष्टदेहादिरत्र निषिध्यते इति चेन्न; सामान्यनिषेधे बाधकाभावात् । न च वैकुण्ठवासिगतो देहेन्द्रियाद्यनुभव एव बाधक इति वाच्यम्; भगवत इव तदीयानामपि देहेन्द्रियाणामानन्दरूपत्वे बाधकाभावात् ।

नन्वनैसर्गिकत्वमेव बाधकमिति चेन्न; यथा व्यापिवैकुण्ठस्याक्षरात्मकत्वेनानैसर्गिकत्वेन नैसर्गिकतद्गताखिलवस्तुरूपत्वेन सामीप्यादिमुक्तिं प्राप्नुवतां मर्यादामार्गीयभक्तानां देहेन्द्रियादिरूपमपि नैसर्गिकमेव वैकुण्ठप्राप्तिमात्रेण शुद्धजीवानामाविर्भवति । भक्तसंबन्धित्वेन देहेन्द्रियादि फलति, तथा पुरुषोत्तमलीलयापि पुरुषोत्तमात्मकत्वात् तत्राङ्गीकारमात्रेण प्राचीनाशेषप्रावाहिकधर्मनिवृत्तौ शुद्धजीवस्य पुरुषोत्तमलीलात्मकदेहेन्द्रियादिरपि पुष्टिमार्गीयभक्तसंबन्धित्वेनाविर्भवति । अतो नात्र किञ्चिदप्यनुपपन्नम् ।

"अथ कामयमानः" इत्युपक्रम्य "आप्तकाम आत्मकामो (भवति) न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते । ब्रह्मैव सन् ब्रह्माप्येति" [बृ० ४।४।६] श्रुतिरसाविदमेव समर्थयते । अत्र प्राणशब्देन प्राणाः सर्वेन्द्रियाणि चोच्यन्ते । आत्मकामो नाम पुरुषोत्तमकामः, न तु मुक्तिकामः । तेन हि भक्तस्य स्नेहातिशयजनितप्रभुदर्शनोत्कण्ठता प्रतीयते । भगवत्प्राकट्ये क्षणमपि विलम्बो जायेत चेन्मरणमेव प्राप्येत । एवं च भगवतः प्राकट्येनैवात्मस्थितिः । भक्तिमार्गे भगवत्प्राकट्यस्यैव परमफलत्वेन तद्दर्शनेनात्मकामो भवति । तत आलिङ्गनादिकामनायां प्राचीनदेहादीनामालिङ्गनाद्ययोग्यत्वादन्तःप्रकटीभूते पुरुषोत्तम एव लयो भवति । बहिः प्रकटीभूतस्यान्तरपि प्रकटत्वादुत्क्रमणाभाव उक्तः । आत्मातिरिक्तानां गतिमुक्त्वा तस्य तामेवाह—"ब्रह्मैव सन् ब्रह्माप्येति" [बृ० ४।४।६] । उक्तरीत्या पुरुषात्मकतल्लीलोपयोगिदेहेन्द्रियादिसंपत्त्या ब्रह्मैव सन् न तु ब्रह्मातिरिक्तदेहादिमानपि, तथाविधो बृहत्वाद् बृंहणत्वाद् ब्रह्म पुरुषोत्तमस्वरूपं प्राप्नोति । जीवो ब्रह्मैव न तु तस्य लीलाप्रवेश इत्यर्थकरणे जीवस्य ब्रह्मांशत्वेनाऽऽनन्दांशाविर्भावेन च ब्रह्मत्वे सिद्धे सति प्राणादिलयोक्त्या ब्रह्म प्राणेन्द्रियातिरिक्ततद्धर्मव्यवच्छेदे चानुक्तसिद्धे सति "ब्रह्मैव सन्" इति श्रुतिरग्रे "मर्त्योऽमृतो भवति" [बृ० ४।४।७] इत्येव वदेत्, न तु "अत्र ब्रह्म समश्नुते" [बृ० ४।४।७] इति । मृति-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुष्टिभक्तिस्वरूपम्

धर्मवच्छरीरं मर्त्यम्, तद्गतत्वेन जीवोऽपि मर्त्य उच्यते। अयं पुष्टिलीलाप्रवेशात् पूर्वं मर्त्य एव। पुष्टिलीलाप्रवेशानन्तरमेवममृतो भवति। तत आनन्दमयशरीर एव ब्रह्म सम्यगश्नुते। भगवता क्रियमाणलीलारसं सम्यगनुभवति। सूत्रकृता भगवता बादरायणेनापि—"वाङ्-मनसि दर्शनाच्छब्दाच्च" [ब्र० ४।२।१] इत्यस्मिन् सूत्र इदमेव निर्णीतम्।

भक्तेः स्नेहात्मकत्वात्तस्य च प्रभुप्राकट्यफलकत्वात् तदौत्कण्ठ्ये तस्यावश्यकत्वात् 'अयं मां पश्यतु' इति प्रभोः कृपया तस्मिन् संपन्ने चक्षुर्भ्यां मनसा च तद्रूपामृतमनुभवतस्तस्य भक्तस्य कोऽप्युत्कटो भावः संजायते। तेन च प्रभुणा सह सर्वेन्द्रियव्यापारकृतीच्छाः संभवन्ति। तत्र तेषामसामर्थ्याद् भगवदानन्दसंबद्धेन मनसा तं प्राप्स्यामीति तत्रैव संगतस्तेनानन्देन संगतो भवति। एवं च मनसा वाक् संगता सती भगवदानन्देन संपन्ना भवति। अपि च दर्शनाभावेऽपि वेण्वादिध्वनिश्रवणादपि तथैव संपद्यते। एवं सर्वेन्द्रियवैशिष्ट्ययुक्तं मनः प्राणे संपद्यते, न तु केवलम्। यतः—"प्राणबन्धनं हि सौम्य मनः" [छां० ६।८।२] इत्यत्र हेतुमाह। सर्वेन्द्रियविशिष्टमनोविशिष्टः प्राणः पुरो हृदये वा प्रकटे भगवति लीनो भवति, तदभ्युपगमत्वाद् भगवद्वशीकरणक्षमस्नेहादिवत्त्वाच्च। मर्यादामार्गीयाणां तु वागादीनामेवं लयो नैव भवति।

विषयसृष्ट्युत्पन्ना जीवाः प्रावाहिकाः। तेभ्यः पुष्टिमार्गीयाणां वैलक्षण्यम्। अत्रानन्दभेदोऽपि वर्तते। प्रावाहिकजीवानामानन्दः प्राकृतः, पुष्टिमार्गीयाणां तु न तथा। स चालौकिकः। अस्मिन् पुष्टिमार्गे "रसो वै सः" [तैत्ति० २।७] इत्यादिश्रुतिवचनाद् रसरूपः पुष्टिपुरुषोत्तमः प्रमेयम्। रसात्मकसर्वात्मभावप्रदानं साधनम्। साक्षाद् भगवदधरामृतं फलम्। पुष्टिस्थो भगवान् पुरुषोत्तमः साक्षाद् दृश्यमानो गोकुले निवसति। व्यापिवैकुण्ठाद् गोकुलस्य माहात्म्यमधिकतरम्। यस्मिन् भगवत्कृपा स पुष्टिभक्तिमार्गाधिकारी। सा च तद्भक्तेः संपद्यते। पुरुषोत्तमप्राप्तौ मुख्यतया निगदितो नित्यलीलान्तःप्रवेशः शुद्धपुष्टिभक्तेः फलम्। सर्वात्मभावरूपो भगवद्विषयको निरुपधिस्नेहो भक्तिविशेषः। स एव पुरुषोत्तमप्राप्तौ मुख्यं साधनम्। एवं च पुष्टिमार्गस्थपुरुषोत्तमदर्शने स्वतन्त्रस्य रसिष्ठभक्तस्याधिकारः। पुष्टिस्थः पुरुषोत्तमः स्वयं प्रादुर्भूय स्वान्तस्थभक्ताननुगृह्य स्नेहेन स्वलीलारसमनुभावयति।

इति शम्॥

——

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीमद्भागवततात्पर्यनिर्णयः

श्रीजनमन्तमिश्रः, मुजफ्फरपुरम् ।

अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः ।
गायत्रीभाष्यभूतोऽसौ श्रीमद्भागवताभिधः ॥

इति गरुडपुराणे भगवान् बादरायणः ।

भगवद्भक्तिरससुधासागरस्य श्रीमद्भागवतस्य तात्पर्यनिर्णयात् पूर्वमस्य महत्त्वप्रामाण्यादेर्विचारो नासमीचीन इति तदेव पूर्वं विविच्यते ।

वेदान्तप्रस्थानेषु श्रीमद्भागवतस्य स्थानम्

श्रुतिप्रस्थानोपनिषद्भ्यः, स्मृतिप्रस्थानश्रीमद्भगवद्गीतायाः, तथा सूत्रप्रस्थानश्रीबादरायणसूत्रेभ्योऽनन्तरं श्रीमद्भागवतस्यैव स्थानं वर्तत इति प्रमाणैर्निश्चीयते । तत्रोपनिषद्गीताब्रह्मसूत्ररूपां प्रस्थानत्रयीं निखिलवेदान्ताचार्याः प्रस्थानरूपेणाङ्गीकुर्वतेतराम् । सकलवेदान्ताचार्याणां निखिलविचारधारा अस्या एव प्रस्थानत्रयीरूपाया गिरित्रय्याः समुद्भूताः सत्यो ब्रह्मसागरं प्रविशन्ति । तत्र प्रस्थानत्रयीविषये तु न कस्यापि विमतिः, परन्तु श्रीमद्भागवतस्य चतुर्थप्रस्थानत्वे न सर्व आचार्या एकमताः । श्रीवल्लभाचार्यचरणाः, पूज्यपादाः श्रीचैतन्यमहाप्रभवः, अन्ये च गौडीयवैष्णवाचार्या भागवतं चतुर्थप्रस्थानरूपत्वेनाङ्गीकृत्य प्रस्थानचतुष्टयीं मन्यन्ते ।

महाभारत-योगवासिष्ठ-पुराणान्तरेषु बहुषु सत्स्वपि श्रीमद्भागवतस्यैव प्रास्थानिकत्वमिति पूर्वोक्ताचार्याणां सिद्धान्तः । यथा वेदान्तैकप्रवणसर्वाधिकाध्यात्मप्रधानतया, पक्षपातशून्यप्रतिपादनतया, साक्षाद्भगवदुक्ततया, श्रीव्यासदेवस्याधिकाधिकप्रीतिविषयतया च भगवद्गीतैव वेदान्तप्रस्थानेषु गृह्यते नान्या, तथैव पूर्वोक्तहेतुचतुष्टयेन श्रीभागवतस्यैव प्रास्थानिकत्वं नान्येषाम् ।

श्रीबादरायणस्याप्यत्यन्तप्रियस्य पक्षपातरहितस्य श्रीमद्भागवतस्य पक्षपातशून्यसूक्ष्मविचारेण निर्विवादमेतद् यदुपनिषद्गीताब्रह्मसूत्रेषु ये ये विषया येन रूपेण परिगृहीता ये च हेयतया परित्यक्तास्ते सर्वेऽत्रापि श्रीमद्भागवते तेनैव रूपेण परिगृहीताः परित्यक्ताश्च ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अतोऽस्य प्रास्थानिकत्वे न शङ्कावकाशः। श्रीमद्भागवतस्यानुबन्धश्लोक एव पूर्वोक्तविषयं प्रमाणीकर्तुमलम्। तथा हि—

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि॥

[भाग० १।१।१]

अर्थाद् अस्य विलक्षणाकारस्य जडजीवात्मकप्रपञ्चस्य यतः कारणभूतात् परमात्मनो जन्मादि जन्मस्थितिलयादि भवति। एतेन—"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्मेति" [तैत्ति० ३।१] इति श्रुतिरपि परिचिन्तिता भवति, "जन्माद्यस्य यतः" [ब्र० सू० १।१।२] इति ब्रह्मसूत्रस्य जन्माद्यधिकरणमपि च विचिन्तितं भवति।

ननु वेदेष्वपि—"सदेव सौम्येदमग्र आसीत्" [छा० ६।२ १], "असद्वा इदमग्र आसीत्" [तैत्ति० २।७], "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते" [तैत्ति० ३।६], "आकाशादेव खल्विमानि भूतानि जायन्ते" [नृ० पू० ३।१] इत्यादिषु क्वचित् सतः, क्वचिदसतः, क्वचिदानन्दस्य, क्वचिदाकाशादेः कारणत्वकथनेन, जैमिनीयैर्वेदान्तवाक्यानामपि कर्मशेषत्वाभ्युपगमेन कर्मण एव जगत्कारणत्वस्वीकारेण, कपिलेन प्रधानस्य कणादादिभिः परमाणुवादीनां च कारणत्वाङ्गीकारेण नैकान्ततः परमसत्यस्य ब्रह्मणो जगत्कारणत्वमिति चेत्; न, इतरेषामपि कारणवाक्यानां तत्रैव समन्वयात्। इत्येवाशङ्क्योक्तम्— अन्वयादितरत इति। एतेन "तत्तु समन्वयात्" [ब्र० सू० १।१।४] इति ब्रह्मसूत्रोक्तं समन्वयाधिकरणं चिन्तितं भवति। यतश्च सर्वेषां कारणवाक्यानां तत्रैव ब्रह्मणि समन्वयः, अतस्तत्र कश्चिद् विरोधो नास्ति। एवं चानेनैवाऽविरोधाध्यायस्यापि सङ्केतो भवति।

'अर्थेष्वभिज्ञः' इत्यंशेन च सांख्योक्तत्रिगुणात्मकप्रधानस्य जगत्कारणत्वखण्डनं भवति। न ह्येतस्य सुव्यवस्थितस्य जगतः कारणमचेतनं प्रधानं भवितुमर्हति, अपि तु—"यः सर्वज्ञः सर्ववित्" [मुण्डको० १।१।६] इति श्रुतिप्रतिपाद्यः परमात्मैवैतस्य कारणम्।

यथा लोके कर्ता कुलालादिरुपादानादिकारणकलापेन कार्यमारभते, तथैवायमपि स्वभिन्नेनैव कारणेन जगतो निर्माता स्यादित्याशङ्क्याह - स्वराडिति। अर्थात् स्वेनैव निज-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्वरूपमहिम्नैव राजते, स्वरूपतः कार्यतश्च द्योतत इति स्वराट्। तस्य ब्रह्मणः कारणत्वे नास्ति कारणान्तरापेक्षेति भावः। अत एव श्वेताश्वतरोपनिषत् प्रतिपादयति—"न तस्य कार्यं करणं च विद्यते न तत् समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ॥" [६।८] इति। एतेन ब्रह्म स्वात्मकसर्वशक्त्युपेतमिति प्रतिपादितं भवति। एवं च 'स्वराट्' इति पदेन "सर्वोपेता च तद्दर्शनात्" [ब्र० सू० २।१।३०] इति ब्रह्मसूत्रोक्तं विचारितं भवति।

'यश्च आदिकवये ब्रह्मणे ब्रह्म वेदमुपदिदेश' इति कथनेन 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥" श्वेताश्वतरोपनिषत्, ६।१८], "यो ब्रह्माणं विदधाति पूर्वं यो वै विद्यास्तस्मै गापयति स्म कृष्णः। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणममुं व्रजेत् ॥" [गोपालपूर्वतापिनी, ५] इत्याद्युक्त-विषयस्य प्रतिपादनं भवति।

यत्र यस्मिन् ब्रह्मणि, त्रिसर्गः सृष्ट्यादिः, अमृषा सत्यम्। यतो हि जगत्तु ब्रह्मात्मना सत्यमेव, "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" [छा० ६।१।४] इति श्रुतेः। अत एव "—इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसम्भवाः" [भा० १।५।२०] इति संगच्छते। तत्र यथा लोके तेजोवारिमृदां विनिमयः = अन्यत्रान्यावभासो भवति, अर्थाद् मार्तण्डतेजसि जलभ्रमः, करकादौ पृथिव्यंशशिलादिभ्रमः, तथा स्थलविशेषे जलभ्रमः। वस्तुतस्तु पदार्थः स्वरूपेण भिन्न एव, तथैव ब्रह्मस्वरूपतो जगत् सर्वथा नित्यमेव। अथवा 'अमृषा' इति स्थाने 'मृषा' इति। ततश्च यथा तेजोवारिमृदां विनिमयो मृषा, तथैव परमेश्वरे त्रिसर्गो भौतिकत्वादिबुद्धिर्मिथ्या। एतेन च "संज्ञामूर्त्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्" [ब्र० सू० २।४।२०] इति, "तदनन्यत्वमारम्भणशब्दादिभ्यः" [ब्र० सू० २।१।१४] इत्यादि च व्याख्यातं भवति।

एवं च पूर्वोक्तप्रकारं स्वेन धाम्ना सदा निरस्तकुहकं परं सत्यं धीमहि। अर्थात् स्वेनैव स्वरूपेण न तु जीववद् उपासनादिना निरस्तं दूरीकृतं कुहकं तमःपटलमविद्यास्मिता-रागद्वेषादिमलं येन तादृशं यत् परं सत्यज्ञानानन्दलक्षणं ब्रह्म तद् वयं मुमुक्षवो ध्यायेम सर्गविसर्गादिभिर्नवभिर्लक्षणैर्वक्ष्यमाणैर्विचारयेम। अत्र 'परम्' इत्यनेन तस्य ब्रह्मणः सर्वातिशायित्वं स्वसमानाधिकशून्यत्वं च प्रतिपाद्यते। एतेन "न तत्समश्चाभ्यधिकश्च दृश्यते" [श्वेता० ६।८] इति श्रुत्युक्तविषयः संसूच्यते। अत एव च वक्ष्यते—"निरस्तसाम्यातिशयेन

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

राधसा स्वधामनि ब्रह्मणि रंस्यते नमः'' [भा० २।४।१४] इति। त्रिकालाबाध्यत्वबोधकेन सत्यशब्देन च "सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्'' [बृ० २।१।२०] इति श्रुतिप्रतिपादितार्थोऽपि सूचितो भवति। एतस्यैव सत्यशब्दस्य व्याख्यानभूताः "सत्यात्मकं त्वां शरणं प्रपद्ये'' [भा० १०।२।२६] इत्यादिवक्ष्यमाणश्लोकाः।

'सत्यं परं धीमहि' इत्यंशेन च "अथातो ब्रह्मजिज्ञासा'' [ब्र० सू० १।१।१] इति जिज्ञासाधिकरणं व्याख्यातं भवति। अत्र जिज्ञासापदस्थाने 'धीमहि' इति कथनेन भागवतस्य गायत्रीभाष्यभूतत्वमभिव्यक्तं भवति। एवं च ब्रह्मसूत्रकृता स्वयमेव बादरायणेन मङ्गलश्लोकेऽस्मिन् समग्रवेदान्तार्थो ब्रह्मसूत्रार्थश्च सूच्यते। अत एवाग्र उच्यते—

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥ [भा० १।१।२]

अर्थाद् अस्मिन् श्रीमद्भागवतेऽर्थवादादिशून्यो भगवत्साक्षात्कारलक्षणो धर्मः प्रतिपादितोऽस्ति। अयमेव च धर्मः परमो धर्मः, "अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्'' [१।८] इति याज्ञवल्क्यस्मृतेः। आत्मनि ईश्वरे दृष्ट एव तु लोकस्य हृदयग्रन्थिर्भिद्यते, सर्वसंशयाश्छिद्यन्ते, कर्माणि च सर्वाणि क्षीयन्ते [भा० १।२।२१]।

निर्मत्सराणां साधूनां यद् वास्तविकं ज्ञेयं वस्तु वर्तते, यच्चानन्दप्रदं तथाऽऽध्यात्मिकाधिदैविकाधिभौतिकरूपतापत्रयस्य समूलविनाशकं तस्यैव प्रतिपादनमत्राभूत्। महामुनिश्रीव्यासरचितेऽस्मिन् भागवते भक्त्या श्रुते सत्येव भगवान् सद्यस्तत्क्षण एव कृतिनां शुश्रूषूणां हृदयेऽवरुद्धो भवति। अत्र 'वास्तवम्' इत्यनेन सत्, 'वेद्यम्' इत्यनेन चित्, तथा 'शिवदम्' इत्यनेन आनन्द इत्युच्यते। तेन सच्चिदानन्दघनरूपं वस्त्वत्र प्रतिपादितमित्यपि सूचितं भवति।

अत एवेदं भागवतं वेदरूपकल्पवृक्षस्य सुन्दरं सुपक्वममृतमयं फलम्, यत् साक्षात् परमहंसश्रीशुकदेवमुनेर्मुखाद् विगलितमस्ति। एतच्च रसालयं भागवतं भावुकरसिकैर्निरन्तरं पातव्यम् –

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः॥
[भा० १।१।३]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं च श्रीमद्भागवतं मुख्यतयाऽर्थवादादिविवर्जितं साक्षाद् भगवत्स्वरूपप्रतिपादकं परममोक्षैकफलमुपनिषद्ब्रह्मसूत्रसारभूतं वर्तते । यदपि

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥ [भा० २।१०।१]

इत्यादिना सर्गविसर्गादीनामपि वर्णनं वर्तते, तदपि

दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् ।
वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा ॥ [भा० २।१०।२]

इत्युक्त्या दशमस्य आश्रयतत्त्वस्य परब्रह्मण एव प्रतिपादनाय । अत एवात्र सर्गादीनां न बृहद्रूपेण वर्णनम् । आश्रयस्य स्वरूपं प्रतिपादयता श्रीवेदव्यासेनोक्तम्—

आभासश्च निरोधश्च यतश्चाभ्युपपद्यते ।
स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते ॥ [भा० २।१०।७]

अर्थाद् यतो यस्मात्, अस्य जगतः, उत्पत्तिः प्रलयादिश्च भवति स एवाश्रयः । स एव परब्रह्म परमात्मेत्यादिनोच्यते । तमेवाभिलक्ष्योक्तम् -

वदन्ति यत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ [भा० १।२।११]

एवं च—

अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः ।
गायत्रीभाष्यभूतोऽसौ श्रीमद्भागवताभिधः ॥
तद(वेदा)र्थानां निर्णयाय ब्रह्मसूत्रमकल्पयत् ।
तद्भाष्यभूतं पुराणं भागवतं वै विदुर्बुधाः ॥

इति गरुडपुराणे श्रीव्यासोक्ते न कश्चित् शङ्कावसरः ।

एवं च भक्तिद्वारा तस्य परमेश्वरस्य भगवतः[1] श्रीकृष्णस्य साक्षात्करण एव भागवतस्य तात्पर्यम् । अत एव महर्षिनारदोपदेशद्वारा प्रतिपादितं श्रीव्यासदेवेन—

तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद् भ्रमतामुपर्यधः ।
तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा ॥
[भा० १।५।१८]

१. एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ॥ [भाग० १।३।२८]।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अर्थात् तस्यैव प्रेमवशीकृतपरमेश्वरसाक्षात्काररूपमोक्षस्य हेतोर्मनीषिभिः प्रयतनीयम्, यत् तादृशं वस्तु चतुर्दशसु भुवनेषु भ्रमतां जनानां न लभ्यते। "कालक्रमेण जगतः परिवर्तमाना चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः" [स्वप्न० १।४] इति नियमेन लौकिकसुखं त्वनभिलषितदुःखवत् प्राप्यत एव। अतो लौकिकसुखार्थं जनानां प्रयत्नस्तु व्यर्थ एव।

एवं च ब्रह्मसूत्रभाष्यभूतस्य सर्वेष्वपि पुराणेषु श्रेष्ठस्य श्रीमद्भागवतस्य तात्पर्यं तु परापरस्य परमेश्वरस्य साक्षात्कार एव वर्तते। स च साक्षात्कारस्तस्यैवानन्यभक्तितो जायते। यतः—

न साधयति मां योगो न सांख्यं धर्म उद्धव।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता॥
"भक्त्याहमेकया ग्राह्यः"

इत्यादिकथनेन तस्यैवार्थस्य पुनः पुनः प्रतिपादनं भवति। एवं च—

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥

इति तात्पर्यनिर्णायकैरपि स एव पूर्वोक्तार्थो निर्णीयते। अत एव श्रीवल्लभाचार्यैरुक्तं स्वकीये निबन्धे—

वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि।
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम्॥
उत्तरं पूर्वसन्देहवारकं परिकीर्तितम्॥ ७–८॥
अविरुद्धं तु यत्त्वस्य प्रमाणं तच्च नान्यथा।
एतद्विरुद्धं यत् सर्वं न तन्मानं कथञ्चन॥ ९॥ इति।

एतेन वेदगीताब्रह्मसूत्रश्रीमद्भागवतानामेव चतुर्णां प्रामाण्यं नान्यस्येति प्रतिपादितम्। अत्रापि च पूर्वपूर्वापेक्षयोत्तरोत्तरस्य सन्देहवारकत्वेनाधिकमुपयोगित्वम्। एवं चास्य प्रामाण्यं प्रतिपाद्य प्रयोजनं प्रतिपादयद्भिस्तैरुक्तम्—

प्रेम्णोऽन्यत् साधनं लोके नास्तिमुख्यं परं महत्।
श्रीभागवतमेवात्र परं तस्य हि साधनम्॥ ३२०॥
अधिकारमभिप्रायं ज्ञात्वा भक्तमुखेन हि।
सकृच्छ्रवणमात्रेण कृष्णे प्रेम भवेद् ध्रुवम्॥ ३२१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विरक्तो विपरीतादिभावनारहितः सुहृत् ।
लीलामात्रश्रुतौ तस्य भवेत् प्रेमाखिले किमु ॥ ३२२ ॥
श्रीभागवततत्त्वार्थमतो वक्ष्ये सुनिश्चितम् ।
यज्ज्ञानात् परमा प्रीतिः कृष्णे शीघ्रं फलिष्यति ॥ ३२३ ॥

गौडीयवैष्णवसम्प्रदायेऽप्येवमेवोक्तम्—

आराध्यो भगवान् व्रजेन्द्रतनयस्तद्धाम वृन्दावनं
रम्या काचिदुपासना व्रजवधूवर्गेण या कल्पिता ।
श्रीमद्भागवतं प्रमाणममलं प्रेमा पुमर्थो महान्
श्रीचैतन्यमहाप्रभोर्मतमिदं तत्राग्रहो नः परः ॥ इति ।

एवं च संक्षिप्तेनापि पूर्वोक्तविचारेण स्थालीपुलाकन्यायादिदं निश्चितं भवति यदुपनिषद्गीताब्रह्मसूत्रभाष्यभूतस्य पुराणेषु श्रेष्ठस्य श्रीमद्भागवतस्य तात्पर्यं प्रेमभक्तिद्वारा परात्परस्य भगवतः श्रीकृष्णस्य साक्षात्कार एव वर्तते । स एव साक्षात्कारः परमः पुरुषार्थ इति निश्प्रचमिति शम् ॥

—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लिङ्गायतसिद्धान्तबिन्दुः

श्रीसिद्धरामेश्वरशास्त्री, कुटोजोमठाधीशः, स्वर्णपुरी ।

सन्ति किल भारतवर्षे निगमागमसंप्रदाया नानाविधा येनेयं भूमिर्धर्मभूमिरिति प्रतीतिमासादिता । एषां संप्रदायानामन्योन्यसंपरिचयेन भारतजनानां समाजव्यूहन इदानीं दृश्यमानानवस्थानिवारणे च भवेन्महानुपकारः . अतोऽत्र लिङ्गायतमतपरिचय उपस्थाप्यते लघुनाऽनेन निबन्धेन ।

सुगृहीतनामधेयः श्रीबसवः खिस्ताब्दानां द्वादशे शतके कर्णाटकदेशं स्वाविर्भावावदानैरलञ्चकार । स महात्मा खिलीभूतां शिवभक्तिपद्धतिमवलोक्य ज्ञात्वा च तस्याः सारं जनतोद्धारैकसाधनतां च कूडलसंगमेशाभिधानं सद्गुरुमासाद्य तल्लब्धलिङ्गदीक्षस्तदुपदेशसंस्कृतमतिः सर्वोपनिषच्छिवागमरहस्यसंपेटिकां लिङ्गायतपद्धतिं प्रस्थापयामास । अस्या अध्यात्मविद्याधर्माचरणसमाजव्यूहनानि यथामति निवेद्यन्ते ।

विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशिनी श्रुतौ ।
तत्र पञ्चाक्षरी तस्यां शिव इत्यक्षरद्वयम् ॥

इत्यादिप्रमाणैरुपबृंहितमहिमा प्रणवपूर्वः पञ्चाक्षरीमनुरस्य धर्मस्य स्थापनशिलायते । नमःशब्देन आत्मा, शिवशब्देन शिवः, अयशब्देन च तयोरन्योन्यसामरस्यरूपः संबन्धः प्रतिपाद्यते । तत्त्वमस्यादिमहावाक्यानि चेममेवार्थं प्रतिपादयन्ति । श्वेताश्वतराद्युपनिषदः शिवागमाश्च शिवभक्तेर्मोक्षैकसाधनतां प्रति प्रमाणानि । अस्यार्थस्य संसिद्धये तनाविष्टलिङ्गधारणं मनसि च शिवरूपानुसन्धानं भावे च तत्सामरस्यसमाहितिरित्येतत् साधनमिति तत्त्वसंग्रहः ।

इष्टलिङ्गस्य धारणे जीवगतप्रारब्धादिकर्मप्रापितजाड्यनिवारणद्वारा 'अयमहमेतज्जातिसंभवः' इत्यादिसंकोचभावान्निरस्य शिवांशोऽहं न मे यज्ञादिपूर्वकाण्डोक्तकर्मभिः प्रयोजनम् , भगवतः शिवस्य भक्तैकपक्षपातितया तद्भक्तिरेव सकलकर्मबन्धनोद्धाराय प्रभवति, शिवस्य सर्वात्मसमवेतत्वाद् । वस्तुतः सर्वान्तरात्मत्वादात्मज्ञाने सर्वस्याप्यधिकृतत्वात् शिवधर्मानुसरणे लिङ्गधारणे च न कोऽपि जात्यादिकृतः प्रतिबन्धः शक्नोति वर्तितुम् । सर्वकर्मणां शिवाराधनत्वेन

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्सेवाबुद्ध्या कृतानामभ्यर्हितत्वात् सर्वेषामेव शिवभक्तानां लिङ्गधारणपवित्रीकृततनूनां न किञ्चिदपि जातितारतम्यं वर्णतारतम्यं वा विद्यते। शिवभक्तिलालसाः सर्वेऽपि द्विजास्तदितरे वा लिङ्गधारणसंस्कारमर्हन्ति। लिङ्गाभिज्ञतैः सर्वैः शिवभक्तैर्जन्मारभ्य लिङ्गधारणं कर्तव्यम्। स्वसमुचितकर्माणि शिवाराधनबुद्ध्या शिवसमाजसेवाधिया च कर्तव्यानि। शिवमन्त्रोपदेशेन शिवलिङ्गधारणेन च स्वगुरुः स्वात्मनो मन्त्रदेहस्य समुत्पादयिता। तस्मात् सर्वे एवास्मिन्समाजेऽप्राकृतद्विजाः। प्राकृतत्वं नाम प्रकृतिर्जनितानां देहादीनां वशवर्तित्वेनात्मनस्तन्मयत्वं तद्धर्मानुधावित्वं च। अप्राकृतत्वं त्वात्मनश्चित्सुखानुबन्धित्वेन सदैव शिवधर्मानुष्ठानेनात्मशिवसामरस्यानुसन्धानम्। अत्र ज्ञानक्रिययोर्न भिदा संमता। किन्तु तयोः सामरस्यमेवाङ्गीकृतम्। जानामीति व्यवहारे ज्ञानस्य क्रियाऽभिन्नत्वात् करोमीत्यत्र कर्तृताया अपि स्फुरद्रूपत्वाज्ज्ञानक्रिययोः सामरस्यम्। एतेन केवलज्ञानानुष्ठानाय प्राप्तकर्मसंन्यासेन यज्ञोपवीतत्यागवत् तनुधृतशिवलिङ्गत्यागो न प्राप्नोति, यस्य कस्यचित् कर्मणः प्रागुक्तरीत्या शिवाराधनरूपत्वात् शिवाराधनस्य चात्मज्ञानसमवेतत्वाद् लिङ्गायतो न पुनर्जन्मने कल्पते, तेन तस्येयं तनुश्चरमा।

इतीयं संक्षेपतो लिङ्गायततत्त्वज्ञानपद्धतिः

अधुना लिङ्गायतधर्मक्रियानुष्ठानं वर्ण्यते। शिवभक्तेः सर्वमानुषसुखहेतुत्वादत्र स्त्रियोऽप्यधिक्रियन्ते। यथा पुरुषास्तथा स्त्रियोऽपि लिङ्गधारणमर्हन्ति। शिवधर्मकांक्षा तु शिवानुग्रहादेव स्यादिति लिङ्गायतसिद्धान्तः। एतस्य धर्मजातस्य श्वेताश्वतराद्युपनिषदः कामिकाद्यागमोत्तरभागाश्च प्रमाणत्वेन परिगृहीताः। तद्वर्त्मना प्राप्तधर्मसंग्रहं परिशोध्य श्रीबसवेश्वरः स्वोपदिष्टधर्मस्याष्टावरण-पञ्चाचाररूपं धर्मकलापं प्रावीवृतत्। तदित्थम्—गुरु-लिङ्ग जङ्गम-पादोदक-प्रसाद-भस्म-रुद्राक्ष-मन्त्रात्मकमष्टावरणम्। लिङ्गाचार-शिवाचार-सदाचार-भृत्याचार-गणाचाराः पञ्चाचाराः। अष्टावरणानि चैवं बोधितानि—

स्वात्मस्थविवेकोदयो गुरुः, येन शिव एव रतिरन्यरतिनिरासपूर्विका प्रादुर्भवति। स्वात्मस्थः शिव एव लिङ्गम्। शुद्धान्तःकरणेन्द्रियप्रसृतिरेव जङ्गमः। शिवसुखरसास्वाद एव शिवपादोदकम्। सर्वेन्द्रियस्पर्शानां मायामोहदूरत्वमेव प्रसादः। शिवतेज एव भस्म। सर्वत्र शिवदर्शित्वमेव रुद्राक्षः। सर्वदा सर्वावस्थासु प्राकृतस्य देहोऽहमिति, मूढोऽहमिति, अज्ञोऽहमिति प्रकाशवत् स्वस्य शिवात्मप्रतीतिरेव मन्त्रः। एतेषां प्रतिबिम्बान्येव स्वाचार्यस्वतनुधृतलिङ्गशिवयोगिगुरुलिङ्गजङ्गमपादजललिङ्गार्पितशेषधार्यमाणभस्मरुद्राक्षजप्यमन्त्राः। उभयरूपमष्टावरणं सेव्यम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लिङ्गायतसिद्धान्तविन्दुः

स्वतनौ सर्वदा लिङ्गधारणं तथैव पुत्रकलत्रादीनां लिङ्गाचारः। धृतलिङ्गेषु विहिताचारसंपन्नेषु तत्पूर्वजातिं न स्मरामीति दृढः संकल्पः शिवाचारः। येनाचारेण सन्त आचरितवन्तस्तदाचारप्रमाणीकरणं सदाचारः। शिवनिन्दां न शृणोमि, शिवाचारपद्धतिगर्हणां न कर्णे करोमि, निन्दां कृतवतो दण्डने यदि समर्थस्तदनुतिष्ठामि नो चेदन्यत्र गच्छामीति निश्चयो गणाचारस्तदनुरूपवर्तनं च। शिवभक्तानां किङ्करोऽहं तत्सेवैव शिवसेवा, काञ्चिज्जीविकां गृह्णामीति मत्या स्वस्ववृत्तावलुब्धेनैव वर्त्मना संतोषजीवनं शिवभक्तानुवर्तनं च भृत्याचारः।

अहरहः सायंप्रातः स्वधृतलिङ्गार्चनमनुष्ठेयं न प्रमदितव्यं तस्मात्। शिवभक्तानामातिथ्यं कर्तव्यं सन्मार्गान्न च्यवितव्यम्। दया सर्वेषु भूतेषु कर्तव्या, हिंसा परिहर्तव्या, इत्यादि धर्माचरणम्।

अनेन प्रकारेण संहतानां जनानां समाज ऐक्याभिवृद्धिः संपदुत्कर्षश्चात्मनैव समासीदतः। इयं जातिरधिका हीनेयं जातिरितीयं कल्पना परस्पराऽमर्षहेतुः। स्वस्ववर्णानुरूपकर्मसु लाभालाभसमबुद्ध्या प्रवर्तनं भगवद्गीतासूपदिष्टमेव। सोऽयं धर्मो लिङ्गायतधर्मप्रत्यासन्नः। तथापि वर्णतारतम्यं भगवद्गीतास्वङ्गीकृतम्। श्रीबसवप्रभुस्तु लिङ्गायतधर्मे जातितारतम्यं न सहते। अस्य धर्मस्य प्रभावेण बह्वो जातयः शूद्रत्वाद् बिभत्यो लिङ्गायतधर्मं स्वीकृतवत्यः। ब्राह्मणाश्चास्य धर्मस्य सरलतामवेत्य लिङ्गिनो बभूवुः। राजानश्चानेकश इमं धर्ममादृतवन्तः। व्यवहारोद्यमाश्चास्य समाजस्याभ्याशमीयुः। अधुनापि लिङ्गायतसमाजः कर्णाटकदेश इतरसमाजान् संख्ययातिशेते। अस्य धर्मस्योत्कर्षकाल आब्राह्मणचर्मकारं ये ये जना अष्टावरणपञ्चाचारसंपन्ना बभूवुः, ते सर्व आत्मानमेकमेव मेनिरे। हन्त कालोऽयं न सदसद्विवेकं जानीते, नास्य गुणस्य पक्षपातः। एतादृशस्यापि धर्मस्य ग्लानिर्नानेन दुष्करा जाता। अधुना लिङ्गायतसमाजे स्मार्तवैदिकसमाजवज्जातितारतम्यं यद्यपि नातीव तीव्रं तथापि केनाप्यंशेनोपलभ्यते। काश्चिज्जातयो लिङ्गधर्मात्परिभ्रष्टा न तासां दोषेण किन्तु वयमुच्चैस्तमा वयमुच्चैस्तमा इति मन्यमानानामहङ्कारेण। कैश्चिदधुनाप्यस्मिन् समाजे स्मार्तधर्मानुसारेण वर्णतारतम्यं प्रतिष्ठापयितुमिष्टम्।

किन्तु श्रीबसवप्रभाषिततत्त्वानां तादृशं बलं येन तान्येतादृशैर्मोघैः प्रयत्नैर्न निष्फलीभवितुमर्हन्ति, कालश्चायं सर्वजातीनां स्वाभिमानोत्थापकः। तदाशंसामि लिङ्गायततत्त्वानां हिन्दुसमाजसंघटने मार्गदर्शिताम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अधुना श्रीवसवेशवचांसि कानिचित् संस्कृतगिरा परिणम्यन्ते। येन तत्प्रसारित-धर्मतत्त्वानि केनाप्यंशेन समुल्लसेयुर्विदुषां हृदि।

शिवात्मनोरविभाज्यस्थितिः सृष्टिप्रसरश्च

हृदयस्था भावना स्तिमिताग्निरिव, अङ्कुरास्वाद इव, कुड्मलसौरभमिव, बालकानुराग इव वा भवेत् कूडलसंगमदेव।

कूडलसंगमदेव इति श्रीबसवेशस्य गुरुः, यन्नामाङ्कितानि तद्वचांसि। अयमाशयः—सिसृक्षुर्भगवान् शिवः स्वलीनमात्मानं वासनानुगुण्येन तत्तत्सुखदुःखनिःश्रेयसानुभवा-मेकामपि सृष्टिं विधित्सते। कस्यचिद्रागादिदोषयुजस्ता वासनाः स्तिमिताग्निरिव संतापगर्भाः। अन्यस्य दयादिभावस्याम्राद्यङ्कुरगतस्वादुत्वनिभाः। ततोऽप्यन्यस्य भगवद्भक्तिसनाथस्य कुमारी-गतवल्लभानुरागतुल्या अनुद्बुद्धास्तिष्ठन्ति प्राक् प्रपञ्चोल्लासात्। भगवता कृते सृष्ट्युन्मेषे प्राप्तविकासा लब्धस्वाभिव्यक्तिसाधनाः सत्यः सृष्टिं संतापमयीं सुखमयीमानन्दमयीं वा आत्मनोऽनुभावयन्ति।

शिवभक्तयोरनादिः संवन्धः सामरस्यरूपः

प्राक् काल्याः कङ्कणधारणात्, प्राक् त्रिपुरसंहृतेः, प्राक् हरिविरिञ्चयोः, प्रागप्युमा-सहायत्वाद् अहं सदा वर्षीयांस्त्वं च यवीयान् महादानिकूडलसंगमदेव।

इदमत्राकूतम्। भक्तशिवयोरनादिरनन्तः संबन्धः सामरस्यात्मकः, येनानादिरात्मा नवनवोल्लासं शिवं हृदये निरुह्यादरेण पश्यति।

भक्ताधिकरणे शिवस्थितिः

भक्तस्य मुखदर्पणे शिवः प्रतिफलति। यतः शिवो भक्तदेहैकदेहो न निमिषमपि पृथग्भूतः। भक्तस्य वाग्वृन्दे देवः समृध्यति।

भावानुगुण्येनास्य लोकस्यैवानन्तलोकता

देवलोकमर्त्यलोकौ न पृथग्भवतः। अयमेव लोकोऽनन्तलोकात्मकः। शिवधर्माचार एव शिवलोकः, शिवभक्तस्थानमेव देवलोकः, शिवभक्तगृहाजिरमेव वाराणसी, शिवभक्तकाय एव कैलासः कूडलसंगमदेव।

नाविचार्य लिङ्गदीक्षा दातव्या

मृत्पिण्डमयविनायकस्य चम्पककुसुमापचिती रञ्जनायाऽलं न तस्य वैमल्याय,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मृत्पश्चालिका प्रभूतजलक्षालिता कर्दमायते, न रजस्त्यजति। तथैव दुराचारस्य लोकायतिकस्य लिङ्गधारणं शुद्धभक्त्ये न कल्पते।

लिङ्गधारी नाव्यवसितबुद्धिर्भवेत्

तनौ लिङ्गधारणं मनस्यन्यचिन्तनमित्यसाम्प्रतम्। तथा मा धारि लिङ्गम्। अन्यचिन्तको न रोचते कूडलसंगमदेवाय। अन्तः कुटिलान् बहिरार्जवान् नाङ्गीकरोति लिङ्गदेवः। ते न शिवपथमर्हन्ति, एतादृशान् विषयैर्मोहयित्वा चेद्धिप्यते कूडलसंगमदेवः।

वर्णविचारः

नान्यो मारकान्मातङ्गः। नान्यः कल्मषाशनाच्चाण्डालः। कस्य वा को वर्णः सकलजीव-हितैषिणः। कूडलसंगमशरणा एव कुलजाः। "द्यावाभूमी जनयन् देव एकः" [ऋ० १०।८१।३] इति सर्वे वेदा यं शिवं शंसन्ति तच्छरणाः शिवभक्ता वर्णाधिकाः कूडलसंगमदेव।

शिवभक्तेषु विनीतेन भवितव्यम्

यो वा को वा भवतु। यदि महादेवे भक्तः, तस्य मुखगलितं ताम्बूलं मम सेव्यम्, तत्त्यक्तानि वासांसि वस्तव्यानि मम, तत्पादुके गोपाय्य जीवामि कूडलसंगमदेव।

नीतिपद्धतिः

दंदशतः सर्पाद् बिभेमि न, नो वा दंदह्यमानात् पावकात्। परधनकलत्राद् बिभेमि, अभिभ्यद्रावणो मृतिमासाद्यत।

कर्मयोगः

कृषिं करोमि गुरुसेवार्थम्। वाणिज्यमनुतिष्ठामि लिङ्गार्चनाय। परसेवामाद्रिये जङ्गम-परिचर्यार्थम्। यद्यत कर्म करोमि तत्तत्फलभोगं त्वद्विहितमेव जानामि। तेन त्वया दत्तं धनं नान्यस्मा उपयोक्ष्ये। त्वद्वचनं प्रमाणयामि कूडलसंगमदेव।

लिङ्गधर्मस्यैकान्तिकता

न सुगः शिवाचारः। भयमत्र प्रभूतम्। सुतोषो न लिङ्गदेवः। नापि शिवयोगिनः, स्पृहयित्वा शिवप्रसादाय लिङ्गायत्तः स्यात्। संसृज्य वियोगं न रोचयते कूडलसंगमदेवाय।

ध्यानयोगः

देव पृथिव्यप्तेजोवाय्वाकाशैस्तद्गुणैर्वा न त्वमश्चितः। तव महिमा प्रणवलीनचित्तैक-गम्यः। ज्ञानज्योतिर्ध्यानेन शुद्धसर्वनाडीद्वारस्त्वामाराध्य दृष्टवानहं कूडलसंगमदेव

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ज्ञानयोगः

घनगम्भीरमहाघने घनेभ्योपि घनोऽहं ज्योतिः प्रकाशलीनः शब्दमुग्धः कूडलसंगमदेव। सकलतामसवृत्तीनां पारे सद्वस्तु प्रकाशसिंहासने प्रकाशते। प्रकाशः प्रकाशेन समसृष्ट। कूडलसंगमदेव एव प्रमाणम्।

अयं धर्म अत्याश्रमधर्मः शब्दस्यास्यार्थः कः? "न पूजनात्" [५।४।६९] इति पाणिनि-सूत्रेण, "स्वतिभ्यामेव" [वा० ५।४।६९] वार्त्तिकेन पूज्याश्रम एवार्थः। "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" [वा० १।४।७९] इति वार्त्तिकेन चातुर्वर्ण्यातीतोऽत्याश्रमो धर्मः। विषयेऽस्मिन् शिवागमानां प्रामाण्यम्—

विशुद्धाः प्राकृताश्चेति द्विविधा मानुषाः स्मृताः।
शिवसंस्कारिणः शुद्धाः प्राकृता इतरे मताः॥
वर्णाश्रमादिधर्माणां व्यवस्था हि द्विधा मता।
एका शिवेन निर्दिष्टा ब्रह्मणा कथितापरा॥
शिवोक्तधर्मनिष्ठा तु शिवाश्रमनिषेविणाम्।
शिवसंस्कारहीनानां धर्मः पैतामहः स्मृतः॥
नानाविधानि काष्ठानि वह्नियोगाद्यथैकताम्।
तथानेकविधा मर्त्या गुरुतः शिवतामियुः॥
काञ्चनं राजतं ताम्रं रसयोगात् सुवर्णताम्।
यथा शिवज्ञानरसाच्छूद्रादिः शिवतां व्रजेत्॥
यस्यैवं शाम्भवी दीक्षा संजाता गुरुकृपावशात्।
पूर्वजात्यादिकं तस्य न स्मरेत् प्राकृतं हि तत्॥

श्वेताश्वतरे—

अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टम्।

कैवल्योपनिषदि—

अत्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य।

सूतसंहितायाम्—

अतिवर्णाश्रमी साक्षाद् गुरूणां गुरुरुच्यते।
तत्समो नाधिकश्चास्मिँल्लोकेऽस्त्येव न संशयः॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

य: शरीरेन्द्रियादिभ्यो विभिन्नं सर्वसाक्षिणम् ।
पारमार्थिकीव (?) ज्ञानसुखात्मानं स्वयंप्रभम् ।
परतत्त्वं विजानाति सोऽतिवर्णाश्रमी भवेत् ॥
यो वेदान्तमहावाक्यश्रवणेनैव केशव ।
आत्मानमीश्वरं वेद सोऽतिवर्णाश्रमी भवेत् ॥
वर्णाश्रमादयो देहे मायया परिकल्पिताः ।
नात्मानो बोधरूपस्य मम ते सन्ति सर्वदा ॥
इति यो वेद वेदान्तैः सोऽतिवर्णाश्रमी भवेत् ।

याज्ञवल्क्ये स्मृतौ—

जात्युत्कर्षो युगे ज्ञेयः पञ्चमे सप्तमेऽपि वा । [१।९६]

मिताक्षरायां टीकायाम्—

"व्यवस्थितश्चायं विकल्पः । व्यवस्था च—ब्राह्मणेन शूद्रायामुत्पादिता निषादी, सा ब्राह्मणेनोढा दुहितरं काञ्चिज्जनयति, सापि ब्राह्मणेनोढान्यामित्यनेन प्रकारेण षष्ठी सप्तमं ब्राह्मणं जनयति" इति ।

महाभारते—

भार्याश्चतस्रो विप्रस्य द्वयोरात्मा प्रजायते ।
आनुपूर्व्याद् द्वयोर्हीनौ मातृजात्यौ प्रसूयतः ॥

मतस्यास्य परिपुष्ट्यर्थं केचन संस्कृतग्रन्थाः केचन कर्णाटकवचनग्रन्थाश्च प्रामाणिकत्वेन परिगृहीताः सन्ति । एतेन पर्यालोचनेन संक्षेपोपन्यासेन च लिङ्गायतधर्मः स्पष्टीकृतः सिद्धान्तितश्च । इति सर्वं शिवम् ॥

—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परिशिष्टम्

लिङ्गायतशब्दस्य व्युत्पत्तिः

'यती प्रयत्ने' [भ्वा० ३०] अथवा 'यत उपस्कारे' [चु० १७३६] इति धातुः। "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" [३।१।१३४] इति सूत्रेण पचादिभ्योऽच्प्रत्ययः। पचादिराकृतिगणः। तस्माद् आयतते, आयतीति वा आयतः, 'यम उपरमे परिवेषणे' [भ्वा० ९८४, चु० १६२६] इति वा धातुः। परिवेषणमिह परिवेष्टनम्, तस्मात् क्तप्रत्ययः। निष्ठायाम्—"अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति" [६।४।३७] इति। ततो यत इति रूपसिद्धिरभिव्याप्तौ। अभिव्याप्तिश्च सर्वावयवसंबन्धः, साकल्यं वा। लिङ्गाय आयतते, लिङ्ग आयतो यस्य सः, लिङ्गेन आयत इति वा लिङ्गायतः। तदुक्तं सूक्ष्मागमे—

"लिङ्गमसमन्ततो यतं यस्य स लिङ्गायतः, लिङ्गमायतिर्यस्य सः लिङ्गायतः" इति।

इष्टलिङ्गधारणविषये प्रमाणानि

वातुलागमे—

यस्त्वत्यन्ततपोनिष्ठास्त्विष्टलिङ्गधरा यदि।

वीरशैवाचारप्रदीपिकायाम्—

मन्त्रैश्च परिपूतस्य लिङ्गं दर्शयते गुरुः।
तस्माच्छिष्योऽथ भो देवि लिङ्गायत इति स्मृतः॥

सिद्धान्तशिखामणौ—

लयं गच्छति यत्रैव जगदेतच्चराचरम्।
पुनः पुनः समुत्पत्तिं तल्लिङ्गं ब्रह्म शाश्वतम्॥

सूक्ष्मागमे—

लिकारो लयबुद्धिस्थो बिन्दुना स्थितिरुच्यते।
गकारात् सृष्टिरित्युक्तं तस्माल्लिङ्गमुदाहृतम्॥

पारमेश्वरागमे—

गुरुणा दत्तलिङ्गं तु करपीठेऽपि वा यजेत्।
प्रमादात्पतिते लिङ्गे नष्टे दग्धे हृतेऽपि वा॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परिशिष्टम्

विरोधिना तस्करेण येन केन च दूषिते ।
गुरुपादाम्बुजं स्मृत्वा जप्त्वा घोरं तदाज्ञया ।
तल्लिङ्गमेव वान्यद्वा धारयेत् पूजयेत् पुनः ॥

सिद्धान्तशिखामणौ—

वेदशास्त्रपुराणेषु कामिकाद्यागमेषु च ।
लिङ्गधारणमाख्यातं वीरशैवस्य निश्चयात् ॥

पारमेश्वरागमे—

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये चान्यजातयः ।
लिङ्गधारणमात्रेण शिव एव न संशयः ॥

शिवरहस्ये—

शिवसंस्कारसंयुक्तो जातिभेदं न कारयेत् ।
शिवलिङ्गे शिलाबुद्धिं कुर्वाण इव पातकम् ॥

सिद्धान्तागमे—

श्रुतिस्मृतिपुराणेषु वैदिकानां वरानने ।
लिङ्गधारणमाख्यातं सर्वसिद्धिप्रदायकम् ॥

ऋग्वेदे—

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तस्तत् समाशत ॥ [९।८३।१]

स्कन्दपुराणे—

ब्रह्मणस्पतिरीशोऽयं ब्रह्म तल्लिङ्गमुच्यते ।

श्रीशङ्कराचार्यकृतशिवापराधक्षमापनस्तोत्रे—

"ज्योतीरूपे पराख्ये । लिङ्गाख्ये ब्रह्मरूपे..." इति लिङ्गं तद्ब्रह्म संज्ञितम् ।

सिद्धान्तशिखामणौ—

ब्रह्मेति लिङ्गमाख्यातं ब्रह्मणस्पतिरीश्वरः ।
लिङ्गं ब्रह्म सनातनं तल्लिङ्गं ब्रह्म शाश्वतम् ॥

भस्मजाबालोपनिषदि—

"लिङ्गरूपिणं मां संपूज्य चिन्तयन्ति योगिनः सिद्धाः सिद्धिं गता मामेव ज्योतिःस्वरूपं लिङ्गं मामेवोपासितव्यम्" इति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्वेताश्वतरोपनिषदि—

तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिः ।

योगशिखोपनिषदि—

सूक्ष्मत्वात्कारणत्वाच्च चलनाद् गमनादपि ।
लक्षणात्परमेशस्य लिङ्गमित्यभिधीयते ॥

शिवागमे—

ब्रह्मेति लिङ्गमाख्यातम् ।

शिवगीतायाम्—

अलिङ्गमेकमव्यक्तं लिङ्गं ब्रह्मेति निश्चितम् ।

सूतसंहितायाम्—

मयोदितो लिङ्गमिति ।

भगवद्गीतायाम्—

क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।

वातुलागमे—

इष्टलिङ्गं तु बाह्याङ्गे प्राणलिङ्गं तथान्तरे ।
भावलिङ्गं तथैवास्ति आत्माङ्गे सुप्रतिष्ठितम् ॥

प्रभुलिङ्गलीलायाम्—

प्राणलिङ्गं यदि ध्यायेदामकुम्भजलं हि तत् ।

महाभारते—

किमाहुर्भरतश्रेष्ठ पात्रं विप्राः सनातनम् ।
ब्राह्मणं लिङ्गिनं चैव ब्राह्मणं वाप्यलिङ्गिनम् ॥

सिद्धान्तसारावल्याम्—

नमः पीठमिति प्रोक्तं शिकारं मध्यमीरितम् ।
वाकारं गोमुखं वृत्तं यकारं गोलकं स्मृतम् ॥
ॐकारं लिङ्गमाख्यातं षड्वर्णं लिङ्गमुच्यते ।

शङ्करसंहितायाम्—

धारयेदवधानेन लिङ्गं सद्गुरुणार्पितम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परिशिष्टम्

काशीखण्डे—

श्रीशैलजं कण्ठधृतं मदीयं प्रातस्तथा सायमिति प्रवीणाः ।
कराम्बुजे न्यस्य यजन्ति भक्तास्तद्भक्तिभावेन च सामि देवि ॥

शङ्करसंहितायाम्—

"यो हस्तपीठे निजलिङ्गमिष्टम्" इति ।

लिङ्गायतमतस्थापकः कः ?

स्कन्दपुराणे—

यदा यदा हिं धर्मस्य ग्लानिर्भवति भूतले ।
तदा तदाऽवतारोऽयं गणेशस्य महीतले ॥

योगजागमे—

अनादिभक्तरूपेण भगवान् परमः शिवः ।
पञ्चाचारांश्च षड्रूपाण्यष्टावावरणानि च ।
लिङ्गाङ्गसामरस्यं च मुक्तिमाह जगद्गुरुः ॥

शिवतत्त्वरत्नाकरे—

धर्मप्रवृत्तिं शिथिलां विलोक्य च समन्ततः ।
अवतीर्य दयावश्यो भगवान् बसवेश्वरः ॥
धर्मं संस्थापयामास सर्वमेव महीतले ।

सूक्ष्मागमे —

पुरा कल्पावसाने च सर्वं संहृत्य शङ्करः ।
कृत्वेमां साक्षिणीं तस्मिन्नेक एव चचार ह ॥
दृष्ट्वा धर्मस्तथाभूतं सर्वसंहारकारणम् ।
नाशयेन्मामिति भयात्तं रुद्रं शरणं गतः ॥
अनुगृह्य तु तं देवो वाहनत्वे नियुक्तवान् ।
तस्य नित्यत्वमाज्ञाप्य तेनायं वृषवाहनः ॥

गुरुराजकृते महिमाप्रकरणवादे—

श्रीवीरशैवधर्मस्य सरणिं परमेश्वर ।
अविच्छिन्नां स्थापयितुं को वा शक्तो महीतले ॥ ५६ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वीरमाहेश्वरोदारमहिमानं समुन्नतम् ।
को वा प्रतिष्ठापयितुं क्षमते भुवि शङ्कर ॥ ५७ ॥
को वा नाशयितुं शक्तो वीरमाहेश्वराहितान् ।
वीरमाहेश्वरान्प्रीत्या कः संमानयितुं क्षमः ॥ ५८ ॥
श्रीमत्प्रमथवर्गस्य प्राणस्त्वं परमेश्वर ।
बसवेन्द्रस्य तु प्राणाः प्रमथा एव केवलम् ॥ ७३ ॥
तस्याखिलेन्द्रियव्रातं प्रसादेन्द्रियवृन्दकम् ।
अशेषाङ्गकलास्तस्य प्रसादाङ्गकलाः पुनः ॥ ७४ ॥
इष्टलिङ्गस्य किरणाः करणान्यखिलान्यपि ।
विमुक्तकान्ताजननसदने चरणाम्बुजे ॥ ७५ ॥
भक्तिबीजानि बसवाधिपतेरखिला गुणाः ।
चित्राणि तच्चरित्राणि गुरूणां गुरवो भुवि ॥ ७६ ॥

इत्यादिप्रमाणेन बसवकल्याणपत्तनस्य भगवान् बसवेश्वर एव स्थापको लिङ्गायतमताब्धि-राकोदयः सिद्धान्तीकृतः खलु ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विज्ञानाद्वयब्रह्माद्वैतवादयोः साधर्म्यवैधर्म्ये

श्री पो॰सु॰शास्त्री, सागरविश्वविद्यालयः।

"विज्ञानमात्रक्षणभङ्गनैरात्म्यादिवादानामप्युपनिषत्प्रभवत्वम्"[१] इति वदद्भिः कुमारिलभट्टपादैस्तत्र तत्र शून्यादिवादेभ्योऽपि पापीयानयं ब्रह्माद्वैतपक्ष[२] इत्यपि सूचितम्। बौद्धा ब्रह्माद्वैतिनश्च श्रौतस्मार्तकर्मादिकं न मोक्षदायीति वदन्ति, न क्वाप्यनीदृशं विश्वमित्यादिवादान् तिरस्कुर्वन्ति च। प्रपञ्चातीततत्त्वावगतिसिद्ध्यर्थमेव संप्रवृत्ता मध्यमकयोगाचारब्रह्माद्वैतसिद्धान्ताः। श्रूयते हि—"सर्वं तत् प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितम्"[३] इति प्रज्ञानस्य सर्वालम्बनत्वम्। विज्ञानशब्देन ब्रह्मणो निर्वचनमुपलभ्यते तत्र तत्रोपनिषत्सु। "न विज्ञातेर्विज्ञातारं विजानीयाः"[४] इति ग्राह्यग्राहकद्वयविनिर्मुक्तं तत्त्वमेव विज्ञानमिति श्रुतिर्दर्शयति। तदेतद्विज्ञानं चित्तशब्देन विज्ञानशब्देन च योगाचारदर्शने परमार्थसदिति व्यपदिश्यते। पञ्चेन्द्रियमनोविज्ञानानामालयमेकमालयविज्ञानमिति विज्ञानवादिभिः प्रतिपादितम्। ब्रह्माद्वैतदर्शने पुनर्विज्ञानब्रह्मणोः सामानाधिकरण्यं प्रस्तूयते।

"ये तु मध्यमास्ते ज्ञानमात्रास्तित्वेन शून्यतायामवतार्यन्ते, ये तु प्रकृष्टमतयस्तेभ्यः साक्षादेव शून्यतातत्त्वं प्रतिपाद्यते"[५] इति वाचस्पतिमिश्राः। विज्ञानाद्वयवादिनो ज्ञानमेव सदिति वदन्ति। सच्छब्दार्थं तु ब्रह्माद्वैतसच्छब्दार्थाद्विलक्षणमिति न विस्मर्तव्यम्। विज्ञानं क्षणिकमिति वदद्भिः सच्छब्दः क्षणिकपर्यायेण गृह्यते। तेषां नये स्वलक्षण एव क्षणिकः। तदर्थक्रियाकारीति व्यपदिश्यते। अर्थक्रियाकारित्वं सत्पदार्थस्य न घटत इति ब्रह्माद्वैतवादिनः। दर्शनेऽस्मिन् जातिविरहितं स्वलक्षणं न समीचीनमिति विस्तरेणाभिहितम्। क्षणिकवादोऽप्यद्वैतिभिरनङ्गीकृत एव। यदि क्षणिकविशिष्टः सत्पदार्थस्तर्हि स्मृतिप्रत्यभिज्ञादयो न संभवेयुस्तात्त्विकाः। देशकालाद्युपाध्यनवच्छिन्नमेव तत्त्वं नित्यशुद्धबुद्धमुक्तस्वभावमिति

---

१ तन्त्रवार्त्तिके १.३.२

२ श्लोकवार्त्तिके १.१.२.१४३, १५८; शून्य ८, ९.

३ ऐतरेयोपनिषदि ३.३

४ बृहदारण्यके ३.४.२

५ भामत्याम् २.२.१८

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्रह्माद्वैतिन एकमेवाद्वितीयं ब्रह्म सदिति वदन्ति। एतद्वादमुद्दिश्य—"तेषामल्पापराधं तु दर्शनं नित्यतोक्तितः"[1] इति शान्तरक्षिताचार्या विज्ञानाद्वैताद् ब्रह्माद्वैतवादस्य वैलक्षण्यं वर्णयाञ्चक्रुः। नैष अल्पापराधः। अस्ति महद्वैलक्षण्यमिति हि पद्मपादाचार्याः क्षणिकविज्ञानवादखण्डनाय संप्रतस्थुः।

परमार्थसत् चित्तशब्देन व्यवह्रियते लङ्कावतारसूत्रे। तदेव तथता, सत्यता, धर्मधातुः, निर्वाणः, नित्यः, समता, अद्वयम्, शून्यतेत्यपि प्रपञ्चितम्। औपनिषदाः पुनर्नित्यैकज्ञान-स्वभावमात्मानं स्वीकुर्वन्ति पारमार्थिकसत्यमिति। क्षणिकाक्षणिकवादयोर्भेदो न परि-माष्टुं शक्यते।

तथापि परमार्थस्वरूपोपपादने महत्साम्यं दृश्यते। सततं द्वयेन रहितं तत्त्वमप्रपञ्चात्मक-मित्यार्यासङ्गः[2]। ग्राह्यग्राहकादिद्वयराहित्यमुपेत्य धर्मधातौ धीमान् संतिष्ठते[3]। "प्रज्ञापार-मिता ज्ञानमद्वयं सा तथागतः"[4] इति दिङ्नागाचार्याः। प्रमातृप्रमेयादेरनुपलम्भेन धर्म-धातुरुपलभ्यते, तदुपलम्भेन स्याद्विभुत्वोपलम्भतेति वसुबन्धुः[5]। त्रैधातुकप्रतिपक्षोऽविपर्यास-निष्प्रपञ्चनिर्विकल्पतया च निर्विकल्पं लोकोत्तरं परमार्थसद्वित्यप्यसङ्गेन व्यरचि[6]। सर्व-मेतदद्वैतब्रह्मण्यपि संगच्छते। सच्चिदानन्दलक्षितं ब्रह्म एकमेवाद्वितीयमिति ब्रह्माद्वैतः। चिद्रूपोऽयमात्मा स्वयंज्योतिरिति गीयते। "भावैरसद्भिरेवायमद्वयेन च कल्पितः। भावा अप्यद्वयेनैव तस्मादद्वयता शिवा"[7] इति गौडपादाचार्या ऊचुः।

तदेतदद्वयतत्त्वं प्रपञ्चातीतमवाच्यं चेति वेदान्तिनः, अनभिलाप्यमिति विज्ञानवादिनः। "न तत्र चक्षुर्गच्छति न वाग् गच्छति" "यद्वाचाऽनभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि" [१।३-४] इति केनश्रुतिः। ब्रह्मणो निर्विशेषत्वादेव "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह" [२।४] इति तैत्तिरीयके श्रूयते। तदनुसारेण "अथात आदेशो नेति नेति" [२।३।६] इति बृहदारण्यकश्रुतिः। निर्विशेषं ब्रह्म अनिर्वाच्यं भवति। "बाष्कलिना च बाध्वः पृष्टः सन्नवचनेनैव ब्रह्म प्रोवाचेति श्रूयते—'स होवाचाधीहि भो इति। स तूष्णीं बभूव। तं ह

१ तत्त्वसंग्रहे ३३।
२ महायानसूत्रालङ्कारे ११.१३
३ तत्रैव द्रष्टव्यम्—पृ। २४.
४ प्रज्ञापारमितापिण्डार्थे
५ त्रिस्वभावनिर्देशे ३७
६ अभिधर्मसमुच्चये, पृ १९
७ माण्डूक्यकारिकायाम् २.३३

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्वितीये वा तृतीये वा वचन उवाच । ब्रूमः खलु त्वं तु न विजानासि । 'उपशान्तोऽयमात्मा' इति"[1] श्रीशङ्करभगवत्पादैरभाणि । प्रत्यात्मवेद्यत्वाद् ब्रह्म न केनाप्युपदेष्टुं क्षम इत्यसङ्गेनापि प्रपञ्चितम्[2] । यस्य न वर्णो न रूपं न संस्कारस्तत्कथं दृश्यत इति नैरात्म्यपरिपृच्छावाक्यमत्र संगच्छते । "न सन्न चासन्न तथा न चान्यथा न जायते व्येति न चावहीयते । न वर्धते नापि विशुद्ध्यते पुनर्विशुद्ध्यते तत्परमार्थलक्षणम् ॥"[3] इत्यसङ्गेनानिर्वचनीयत्वमेव प्रतिपादितम् । नेति नेतीति श्रुतिवाक्यानुरोधेनैव—"न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥"[4] इति गौडपादाचार्याः ।

यद्यप्येवं सुमहत् सादृश्यं दृश्यते, तथापि ब्रह्माद्वैते सत्तैव बोधः, बोध एव च सत्तेत्यङ्गीक्रियते । सत्तया निर्देश्यं ब्रह्म ज्ञानादभिन्नमिति निश्चयः । विज्ञानवादे पुनः क्षणिकं हि सद्विज्ञानं क्षणिकत्वादभिन्नमिति गम्यते । त्रैकाल्याबाध्यो हि ब्रह्माद्वैतिनः सत्पदार्थः ।

आत्मब्रह्मणोरभेदो ब्रह्माद्वैतवादसारांशः । षड्विज्ञानातिरिक्तमालयविज्ञानं योगाचार-दर्शने दृश्यते । ब्रह्माद्वैतवादिनामात्मैव विज्ञानाद्वयवाद आलयविज्ञानरूपेण गृहीत इति भामतीकारैः[5], लङ्कावतारसूत्रकारैश्च प्रतिपादितम् । आत्मवादं प्रशंसत् "नैरात्म्यवादिनोऽ-भाष्याः" इत्यपि लङ्कावतारसूत्रं[6] स्पष्टं चकार । एतत्सूत्रप्रतिपादितस्तथागतगर्भ एवौ-पनिषद आत्मा । प्रभास्वरं बोधिचित्तं निःस्वभावं निरालम्बं सर्वशून्यं निरालयं प्रपञ्च-समतिक्रान्तमिति नैरात्म्यपरिपृच्छायामुद्घोषितम् । नैरात्म्यशब्देन पञ्चस्कन्धादिविशिष्ट-पुद्गल एव विज्ञानवादिभिर्निराक्रियते । एष पुद्गलोऽद्वैतवादेऽहङ्कारशब्दवाच्यः कर्ता भोक्ता प्रमातेति द्रष्टव्यम् । आत्मशब्देन न क्षणिकविज्ञानं नापि विज्ञानसंततिः परा-मृश्यते । स्वयंसिद्धप्रत्ययो ह्ययमात्मा सर्वालम्बनो भवति । तदेनमात्मानं निराकर्तुं न कोऽपि क्षमः । सर्वो ह्यात्मास्तित्वं प्रत्येति, न नाहमस्मीत्याचार्यपादैर्विस्तरेण प्रपञ्चितम् । य एव हि निराकर्ता तदेव तस्य स्वरूपमित्यपि भगवत्पादानामादेशः । विज्ञानाद्वयवादिभि-र्गवेषितोऽयमात्माऽऽलयविज्ञानरूपेण, तथागतगर्भरूपेण च प्रादुरभूत् ।

---

१ शारीरकभाष्ये ३.२.१७
२ महायानसूत्रालङ्कारे १९.२
३ तत्रैव ६.१
४ माण्डूक्यकारिकायाम् २.३२
५ भामत्याम्, पृ ५२५
६ लङ्कावतारसूत्रे १०.७६५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यदि तत्त्वमद्वयं तर्हि का गतिः प्रपञ्चस्य। तत्समाधानपूर्वकं द्विरूपं हि ब्रह्मावगम्यत इति श्रीशङ्करभगवत्पादैः[1] शारीरके भाष्ये स्पष्टतया सत्ताद्वैविध्यमुपनिषद्वाक्यानुरोधेन तर्कानुसारेण च प्रतिपादितम्। ब्रह्मसूत्रभाष्य आचार्यैः पारमार्थिकव्यावहारिकत्वाभ्यां द्वैविध्यमेव सत्ताया अङ्गीकृतम्। सत्तालक्षणो ब्रह्मस्वभावः, आकाशादिष्वनुवर्तमानत्वात्[2], नामरूपविकारभेदोपाधिविशिष्टं ब्रह्म व्यावहारिकसत्यत्वमित्यवगम्यते।

विज्ञानवादिभिः पुनः सत्तात्रैविध्यमङ्गीक्रियते। तथा हि—परिकल्पित-परतन्त्र-परिनिष्पन्नभेदेन त्रयः स्वभावा दृश्यन्ते। यद् यथाख्याति तत्परिकल्पितस्य लक्षणम्। कल्पनामात्रभावतः परिकल्पितमत्यन्तं न विद्यते। तदेव प्रातिभासिकमित्यपि वसुबन्धुना[3] स्वीकृतम्। रज्जुः सर्पस्वभावेनाऽसत्यपि सतीव प्रतिभाति। अतः सदसल्लक्षणः परिकल्पित इत्युच्यते। शाङ्करवेदान्ते परिकल्पितस्वभाव एव प्रातिभासिकसत्तेत्युच्यते। तथापि ब्रह्माद्वैतदर्शने प्रातिभासिकरजतं न सदसल्लक्षणात्मकमिति प्रतिपादयद्भिस्तदनिर्वचनीयरजतमित्यभ्युपगम्यते।

यत्ख्याति तत्परतन्त्रमित्युच्यते। प्रत्ययाधीनवृत्तित्वात् परतन्त्रो नैमित्तिकस्वभावः। परमार्थेनासदपि व्यवहारे भ्रान्तिभावेन सदिव वर्तते। तत् संवृतिरिति बौद्धैः, व्यावहारिकसत्तेत्यद्वैतिभिः कीर्त्यते। नामरूपात्मकं हि जगद् व्यवहारसदिति समयः। विज्ञानवादे परिकल्पितपरतन्त्रयोर्विशेषवैलक्षण्यं न दृश्यते। कल्पितं संवृतिर्ह्युक्तमिति लङ्कावतारः[4]। रज्ज्वां भासमाना सर्पाकृती रज्ज्वधीनत्वात् परतन्त्रा। ब्रह्मणि यद्भासते जगदाकारः परतन्त्रो व्यावहारिकः, समस्तस्य वस्तुजातस्य ब्रह्मप्रकृतिकत्वाभ्युपगमात्[5], कृत्स्नस्य जगतो ब्रह्मकार्यत्वात्तदनन्यत्वाच्चेति[6] भगवत्पादाः। कार्यमाकाशादिकं बहु प्रपञ्चं जगत्, कारणं परं ब्रह्म, तस्मात् कारणात् परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः कार्यस्यावगम्यत इत्यपि जगद्गुराचार्याः[7]। एष सिद्धान्तस्तु परिपूर्णतया नाद्रियते बौद्धैः संवृतिसत्यत्वं वदद्भिः।

पारमार्थिकसत्यत्वं ब्रह्मण एवेत्यद्वैतिनः। नित्यशुद्धबुद्धमुक्तस्वभावं हि ब्रह्म एकमेवाद्वितीयमिति गीयते। तदेव परिनिष्पन्नस्वभावं विज्ञानवादिभिराद्दतम्। अद्वयधर्मता हि परि-

१ शारीरकभाष्ये, पृ० १७६
२ तत्रैव, पृ. ४४३
३ त्रिस्वभावनिर्देशे ८
४ लङ्कावतारसूत्रे २,१८३
५ शारीरकभाष्ये, पृ ४४४
६ तत्रैव, पृ. ४७१
७ तत्रैव, पृ. ४५४

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निष्पन्नस्वभावता। द्वयात्मना या न ख्याति तदद्वयता। कल्पितात् परतन्त्राच्चाप्यभिन्नो विकल्पद्वयनिर्मुक्तः[1] सम्यग्ज्ञानमेव[2] परिनिष्पन्नः। "अभूताभिनिवेशोऽस्ति द्वयं तत्र न विद्यते। द्वयाभावं स बुद्ध्वैव निर्निमित्तो न जायते॥"[3] इति, "अभूताभिनिवेशाद्धि सदृशे तत्प्रवर्तते। वस्त्वभावं स बुद्ध्वैव निःसङ्गं विनिवर्तते॥"[4] इत्यपि च संप्रदायविद्भिराचार्यैः परिनिष्पन्न एव निरुच्यते।

प्रातिभासिकव्यावहारिकसत्ये द्वे अपि संविदभिन्ने एवेति विवरणकारैरावेदितम्। ब्रह्मव्यतिरेकेण सर्वो ह्ययमभाव इत्याचार्यपादाः[5]। "त्रयोऽप्येते स्वभावा हि अद्वयालम्बलक्षणाः"[6] इति वसुबन्धोरादेशः।

आवरणविक्षेपशक्तिभ्यां संवलिताऽविद्याशक्तिर्द्वैतप्रपञ्चाभासस्य हेतुरिति ब्रह्माद्वैतवादिनः। प्रतीत्यसमुत्पादेऽपि द्वादशाङ्गचक्रमविद्ययाऽऽरभ्यते। असदृष्टिवाच्या ह्यविद्याशक्तिर्विज्ञानवादिभिरभावरूपत्वेन व्याख्यायते। अद्वैतदर्शने पुनरविद्या भावपदार्थत्वेन स्वीकृता। तत्त्वान्यत्वाभ्यामनिर्वचनीयेति सा कथ्यते।

अविद्यात्मकोऽयं प्रपञ्च उभयत्र। अनुभवैकवेद्यं हि परमार्थसत्। तदतिरिक्तं ज्ञेयं वस्तुतो नास्ति। जगदाभासस्य ब्रह्माधिष्ठानवत्त्वात्, निष्प्रपञ्चस्य ब्रह्मण एव प्रपञ्चाकारेण गृह्यमाणत्वाच्च सत्यानृते मिथुनीकृत्य 'अहमिदम्, ममेदम्' इत्यादिव्यवहारे पतिता वयमिति ब्रह्माद्वैतिनः। तदध्यासशब्दवाच्यं लोकव्यवहारहेतुभूतमिति गृह्यते। ब्रह्मकार्यं हि जगत् कारणात्मत्वं प्रतिपद्यते, न तु कारणस्य कार्यात्मत्वम्[7]। ततः—"एक एव परमेश्वरः कूटस्थो नित्यो विज्ञानधातुरविद्यया मायया मायाविवदनेकधा विभाव्यते"[8] इत्याचार्यैरुक्तम्। माया च परमेश्वराश्रयेति च गम्यते। सद्विविक्तत्वं वा मिथ्यात्वमिति [9]वदद्भिर्ब्रह्मभिन्नत्वेनैव जगतो मिथ्यात्वं दर्शितम्।

---

१ लङ्कावतारे २.२..२
२ तत्रैव, २.१३४
३ माण्डूक्यकारिकायाम् ४.७५
४ तत्रैव, ४.७१
५ शारीरकभाष्ये पृ० ४१६
६ त्रिस्वभावनिर्देशे २६
७ शारीरकभाष्ये. पृ० ४४६
८ तत्रैव १.३. १९
९ अद्वैतसिद्धौ, पृ० १९५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्रह्माद्वैतदर्शने केचन गौडपादाद्या मध्यमका इवाजातिवादिनः। केचनाभासवादिनः सुरेश्वरादयो दृश्यन्ते। वेदान्तसिद्धान्तमुक्तावलीकारैर्दृष्टिसृष्टिवादः प्रपञ्चितः। द्वावप्येतौ विज्ञानाद्वयवादे दृश्येते। बाह्यार्थनिराकरणपरायणा विज्ञानवादिनः। बाह्यं न विद्यते दृश्यमिति लङ्कावतारः[१]। "विज्ञानपरिणामोऽयं विकल्पो यद्विकल्प्यते। तेन तन्नास्ति तेनेदं सर्वं विज्ञप्तिमात्रकम् ॥"[२] इति वसुबन्धुरुवाच। विज्ञानमेवार्थाभासमुत्पद्यत इति तात्पर्यः। तदनुरोधेनैव—"यदन्तर्ज्ञेयरूपं तद्वहिर्वदवभासते" इत्युक्तमालम्बनपरीक्षायामाचार्यदिङ्नागेन। असदर्थावभासनादिदं सर्वं विज्ञप्तिमात्रं यदि भवेत्तदा का वार्ता लोकस्य। "तदाकृतिश्च तत्रास्ति तद्भावश्च न विद्यते"[३] इत्यार्यासङ्गो बाह्यार्थान् प्रतिषेधति। लोकः खपुष्पसन्निभः। "माया स्वप्ननिभा भावा गन्धर्वनगरोपमाः"[४] इति लङ्कावतारः। यथा स्वप्नमायागन्धर्वनगरा दृष्टास्तथा विश्वमिदं दृष्टमिति गौडपादाचार्या अप्यूचुः[५]।

शाङ्कराद्वैते नेदं समीचीनमिव भाति। "देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः। लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात् ॥" इत्याचार्या वदन्ति। "यावदेव हि स्थाणाविव पुरुषबुद्धिं द्वैतलक्षणामविद्यां निवर्तयन्न प्रतिपद्यते तावज्जीवस्य जीवत्वम्"[६] इति निर्धार्यते। "परमार्थावस्थायामेव सर्वव्यवहाराभावं वदन्ति वेदान्ताः सर्वे"[७]।

ग्राह्यग्राहकौ विज्ञानप्रतिबिम्बाविति वदन्ति विज्ञानाद्वयवादिनः। मनोदृश्यमिदं द्वैतम्। "मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यते" इत्यपि गौडाचार्याः[८]। ग्राह्यग्राहकादिद्वयमत्यन्ततो नास्तीति वसुबन्धुः[९]। वस्तुमालम्बनीकृत्य चित्तं संजायते। यतोऽवस्तुकत्वमेव तात्त्विकम्, कथं चित्तस्यापि तात्त्विकत्वम्[१०]। एवं विज्ञानाद्वयवादिनो बाह्यार्थास्तित्वं निरा-

---

१ लङ्कावतारसूत्रे १०.४४२
२ विंशिकायाम् १७
३ महायानसूत्रालङ्कारे ११.१९
४ लङ्कावतारसूत्रे १०.८७५
५ माण्डूक्यकारिकायाम् २.३१
६ शारीरकभाष्ये पृ० ३.३
७ तत्रैव, पृ० ४६२
८ माण्डूक्यकारिकायाम् ३.३१
९ त्रिस्वभावनिर्देशे २९
१० लङ्कावतारे १०. ५६३-५६४

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कुर्वन्ति । ब्रह्माद्वैतवादे बाह्यार्थनिराकरणपक्षं श्रीशङ्करभगवत्पादैः सम्यङ् निरस्तमेव । गौडपादैरप्यसतो मायया जन्मेति[1] तदेव सिद्धान्तितमिति प्रतिभाति ।

विज्ञानाद्वयवादिन आत्मख्यातिपक्षमवलम्बन्ते । आलयाख्यं विज्ञानं प्रमेयमिव बाह्याकारेण विपरिणमत इति तेषामभिप्रायः । भ्रमज्ञानकारणमधिष्ठानं च विज्ञानं भवतीति त्रिंशिकाभाष्ये स्थिरमत्याचार्यः । ब्रह्माद्वैतदर्शने पुनरनिर्वचनीयख्यातिरेव स्वीकृता ।

कल्पनापोढमविसंवादि ज्ञानं प्रमाणमिति योगाचाराः । बाह्यालम्बनरूपज्ञेयवस्त्वभावात्, ज्ञानस्य क्षणिकत्वाच्च बाह्येन न केनचिदपि वस्तुना ज्ञानं संबध्यते । "नार्थो बाह्योऽस्ति केवलः"[2] इति वदद्भिर्धर्मकीर्तिपादैः, "भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये"[3] इति, "सहोपलम्भनियमादभेदो नीलतद्धियोः" इत्यपि च स्पष्टतरमावेदितम् । वस्त्वभावे नीलवस्त्वपि कथं भासेत । तत एव—"चित्तमात्रोपलम्भेन ज्ञेयार्थानुपलम्भता । ज्ञेयार्थानुपलम्भेन स्याच्चित्तानुपलम्भता ॥"[4] इत्याहाचार्यो वसुबन्धुः । चित्तमात्रमेव ग्राह्यग्राहकद्वयप्रतिभासमिष्यते[5] । व्यवहारे भट्टनय इति वदद्भिर्ब्रह्माद्वैतवादिभिरेतत्सर्वं विपरीतमिवाधः क्रियते ।

अनिन्द्रियत्वं मनस उभयत्रापि सिद्धमेव ।

स्वलक्षणविषयं प्रत्यक्षम्, सामान्यविषयमनुमानमिति वस्तुद्वैविध्येन प्रमाणद्वित्वमेव विज्ञानवादिभिर्व्यवस्थाप्यते । अद्वैते वस्त्वेकात्मकमेव । नामरूपात्मना परिदृश्यमानं जगत् प्रमेयम् । तत्प्रमेयाधिगतिसाधनानि प्रमाणानि षडङ्गीक्रियन्ते । अनधिगताऽबाधितार्थविषयत्वं प्रमात्वमिति व्याचक्षाणैरद्वैतिभिः प्रत्यक्षप्रमा त्वत्र चैतन्यमेवेति प्रतिपादितम् । तदेतन्निर्विकल्पकं प्रत्यक्षं विज्ञानवादेऽपि संगच्छते । प्रमाणव्यवस्थायामस्ति महद्वैलक्षण्यम् । प्रामाण्यविचारेऽपि प्रामाण्यमेव स्वतः, अप्रामाण्यं परत इत्यङ्गीक्रियते ब्रह्माद्वैतदर्शने ।

विरुद्धधर्मसंसर्ग एव जगल्लक्षणमिति प्रतिपादयता मध्यमकेन शून्यतातत्त्वं प्रतिष्ठापितम् । स्वयंसिद्धविज्ञप्तिमात्रतैव सत्यतेति वदता विज्ञानवादिना संबन्धनिरास एव प्रधानाभिसमयत्वेन स्वीक्रियते । अबाध्यं तत्त्वं सन्मात्रवाच्यमिति प्रपञ्चयद्भिरद्वैतिभिः सत्तैव

---

१ माण्डूक्यकारिकायाम् ३.२८
२ प्रमाणवार्तिके २ ३३६
३ तत्रैव, २.३७९
४ त्रिस्वभावनिर्देशे ३६
५ महायानसूत्रालङ्कारे पृ. ६३

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDAL
LIBRARY
Jangamwadi Math, Varanasi
No. 8767
CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ज्ञानज्ञेयविचारे प्रधानतयाऽङ्गीक्रियते। अतः संबन्धनिरासाद्वैतो विज्ञानाद्वैते, अविरोधाद्वैतो मध्यमके, सत्ताद्वैतो ब्रह्माद्वैते च परिदृश्यन्ते।

ब्रह्मज्ञानयोरभेदः, मोक्षज्ञानयोश्चाप्यभेदो ब्रह्माद्वैते सुप्रतिष्ठितः। बोधिसत्त्वैर्मैत्रेयनाथैर्निर्वाणमेव परमार्थसदिति[1] प्रदर्शितम्। अस्मिन् सर्वे विकल्पा निर्वान्तीति निर्वाणशब्दो व्याख्यायते। मोक्षोऽपि निर्विकल्पानुभव एवेति॥

—

1 मध्यान्तविभागे १.१९

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDAL
LIBRARY
Jangamwadi Math, Varanasi

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अद्वैत वेदान्त के अनुसार व्यक्ति और समाज का संबन्ध

श्रीराममाधवचिंगले, तत्त्वज्ञानमन्दिरम्, अमलनेरः।

अद्वैत वेदान्त के विषय में विदेशों तथा स्वयं भारत में भी अनेक भ्रान्त धारणाएँ प्रचलित हैं। उनमें से एक यह भी है कि यह दर्शन व्यक्तिगत मोक्ष पर जोर देने के कारण समाज विमुख है। इसके विपरीत ऐसे दर्शनों तथा धर्मों का हवाला दिया जाता है, जिनमें सामाजिक मुक्ति वैयक्तिक मुक्ति से अधिक महत्त्वपूर्ण मानी गई है। उदाहरणार्थ बुद्ध-धर्म की बोधिसत्त्व की कल्पना का उल्लेख किया जा सकता है। कहा जाता है कि अद्वैत दर्शन के प्रमुख सिद्धान्तों के अनुसार समाज-जीवन का कोई मूल्य नहीं। स्वगत, सजातीय, विजातीय भेदरहित अद्वितीय ब्रह्म में किसी भी प्रकार का द्वैत संभव नहीं। तब भला नानात्व से युक्त समाज को उसमें अवकाश कहाँ? इसी प्रकार मिथ्याजगदन्तःपाती, अत एव मिथ्या समाज का क्या मूल्य और महत्त्व? इसी प्रकार जीव का जब ब्रह्म के साथ मुख्यार्थ से ऐक्य है, गौणार्थ से नहीं, तब व्यक्ति की दृष्टि से समाज का क्या महत्त्व हो सकता है? ऐसी स्थिति में कोई आश्चर्य नहीं कि इस दर्शन का व्यावहारिक परिणाम वैयक्तिक स्वार्थ में और समाज-विमुखता या समाज-जीवन की घोर उपेक्षा में हो।

थोड़ा सा विचार करने पर भी यह दीख पड़ेगा कि उक्त धारणा नितान्त भ्रान्त है। वस्तुतः वेदान्त दर्शन के अनुसार व्यक्ति तथा समाज के बीच जितने उदात्त, स्वस्थ एवं शुचि संबन्ध हैं, उतने अन्य किसी भी दर्शन के अनुसार नहीं। अद्वैत वेदान्त के सैद्धान्तिक एवं व्यावहारिक पक्ष को लेकर ही हम इस निष्कर्ष पर पहुँचते हैं। किन्तु इस प्रकार का विचार करने से पूर्व हमें यह देख लेना चाहिये कि 'समाज' किसे कहते हैं। आजकल समाज-विषयक व्यक्ति-निरपेक्ष अमूर्त कल्पना आवश्यकता से अधिक महत्त्व पा रही है, जिसके कारण व्यक्ति का महत्त्व जाकर उसे समाज यन्त्र के एक निर्जीव पुर्जे का रूप प्राप्त हो गया है। इस विचारधारा के समर्थक प्रायः यह भूल जाते हैं कि व्यक्ति ही समाज का अधिष्ठान है और उसका समाज में पूरा पूरा महत्त्व है। आखिर समाज उस व्यक्तिसमूह का ही तो नाम है

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जो जीवन विषयक अनुगत ध्येयों, आदर्शों तथा आचार-विचारादि रूप प्रेरणाओं द्वारा सुसंगठित या सुव्यवस्थित हुआ हो। किसी भी सुव्यवस्थित समाज में व्यक्ति तथा समाज के परस्पर संबन्ध सुनिर्धारित, सामंजस्यपूर्ण और दोनों के हितसंवर्धक होते हैं या होने चाहिये। इसके लिए समाज के घटक व्यक्तियों के कर्तव्य, उनकी प्रकृति, योग्यता, अवस्था भेदादि बातें ध्यान में लेकर नियत किये जाने चाहिये। समाज में व्यक्ति को कुछ अधिकार होते हैं; इस अधिकार के साथ अन्य व्यक्तियों के अधिकारों की रक्षा की दृष्टि से कुछ कर्तव्य भी होते हैं, किन्तु जहाँ समाज की अमूर्त कल्पना को अधिक महत्त्व दिया जाता है वहाँ व्यक्ति के अधिकारों की प्रायः उपेक्षा की जाती है। कहने की आवश्यकता नहीं कि व्यक्ति तथा समाज दोनों की दृष्टि से इसके परिणाम इष्ट नहीं हो सकते।

समाज की उक्त अमूर्त कल्पना के साथ ही आज के प्रचारयुग में हम समाजहित की भी लम्बी-चौड़ी बातें सुनते हैं। किन्तु सच्चा समाजहित या व्यक्ति का हित किस बात में है इससे ये लोग सर्वथा अनभिज्ञ ही रहते हैं। इतना ही नहीं, देहात्ममूलक साधनरूप अवान्तर बातों में ही एकमात्र सुख मानकर सच्चे साध्यरूप सुख को दृष्टि से ओझल करके वस्तुस्थिति का विपर्यास भी किया जाता है। उपनिषदों की "अन्धेनैव नीयमाना यथान्धाः" [कठो० २।५] वाली उक्ति यहाँ चरितार्थ होती है।

अब हम वेदान्तशास्त्र के अनुसार इन बातों का विचार करें। इस संबन्ध में पहिली ध्यान देने योग्य महत्त्व की बात यह है कि वेदान्त दर्शन अन्य अनेक दर्शनों की तरह अनेकविध दोषों की वास्तविकता या संभावना से ग्रस्त किसी पुरुषविशेष का कल्पनाविलास-मात्र नहीं है। वह अपौरुषेय ज्ञानराशि वेद का अन्तिम साररूप सर्वोच्च भाग है, वह इस ज्ञानरूपी हिमालय का गौरीशङ्कर शिखर है। वेद अनन्त हैं, किन्तु उनका पर्यवसान साक्षात् या परंपरया एक ही 'पद' में होता है। वह है अद्वितीय ब्रह्मपद। "सर्वे वेदा यत्पदमामनन्ति" [कठो० २।१५] महावाक्योपदेश द्वारा जीव को उसके वास्तविक ब्रह्मस्वरूप से परिचित कराने में ही काण्डत्रयात्मक वेद चरितार्थ होते हैं। व्यक्ति तथा समाज जीवन का यही एकमेव ध्येय है, या होना चाहिये। इसी में दोनों का आत्यन्तिक हित है। इसके अतिरिक्त अन्य सब बातें 'आर्त' अर्थात् दुःख-या विनाश से पीड़ित हैं—"अतोऽन्यदार्तम्" [बृ० ३।४।२]। यही परम पुरुषार्थ है, जिसके द्वारा व्यक्ति तथा समाज जीवन का साफल्य होता है। अन्य पुरुषार्थों का महत्त्व न हो यह बात नहीं, किन्तु प्रथम तीन पुरुषार्थ साधनरूप हैं, साध्यरूप

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नहीं। धर्म, अर्थ, काम, इनका अन्तिम या एकमात्र उद्देश्य मोक्षरूप चतुर्थ परम पुरुषार्थ की प्राप्ति कराना है। इसीलिए इसे 'परमो धर्मः' कहा गया है। भगवान् याज्ञवल्क्य ने अपनी स्मृति के उपोद्घात प्रकरण में ही इस बात को स्पष्ट कर दिया है—

इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम्।
अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्॥ [१।८]

इसी प्रकार भगवान् मनु ने महर्षियों द्वारा 'धर्म का स्वरूप क्या है'? पूछे जाने पर इस प्रश्न का उत्तर सीधे-सीधे न देकर जगत्कारण रूप ब्रह्म के प्रतिपादन से प्रारम्भ किया है। यह क्यों? क्या यह अप्रस्तुत अभिधान नहीं है? इस शंका को उत्थापित करके टीकाकार ने समाधान किया है कि यह अप्रस्तुत अभिधान नहीं, कारण आत्मज्ञान भी 'धर्म' शब्द से निर्दिष्ट है। यही सच्चा साध्यरूप धर्म है। स्मृति ग्रन्थों में प्रतिपादित अन्य सब संस्कारादि रूप धर्म इसी के साधन हैं तथा इसी में पर्यवसित होते हैं—"आत्मज्ञानरूप-परमधर्माविगमाय प्रथमाध्यायं कृत्वा संस्कारादिरूपं धर्मं तदङ्गतया द्वितीयाध्यायादिक्रमेण वक्ष्यतीति न कश्चिद्विरोधः।" [मन्वर्थमुक्तावली, १।५]। किन्तु आत्मज्ञान या ब्रह्मज्ञान प्राप्त करना कोई खेल नहीं। आवरण-विक्षेप शक्ति से युक्त अनादि अविद्या एक दिन में तो दूर नहीं की जा सकती। "बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते" [गीता० ७।१९], "अनेकजन्मसंसिद्धस्ततो याति परां गतिम्" [गीता० ६।४५] इत्यादि स्मृतिवचनों से यह बात स्पष्ट है। प्रथम तो वेदान्तशास्त्र का अधिकारी मिलना ही कठिन बात है, बिना साधन-चतुष्टय संपत्ति को प्राप्त किए महावाक्य से भी अप्रतिबद्धज्ञान उत्पन्न नहीं हो सकता। प्रथम निषिद्ध कर्मों के परित्याग एवं विहितकर्माचरण द्वारा अन्तःकरण के मल दूर करके उसे शुद्ध करना पड़ता है। वेदोक्त कर्मकाण्ड का यही मुख्य प्रयोजन है। फिर उपासना द्वारा विक्षिप्त चित्त को एकाग्र करना पड़ता है। वेद के उपासना काण्ड की सार्थकता इसी में है। साधन-चतुष्टय संपन्न अधिकारी ही ज्ञानकाण्ड का रहस्य समझकर उससे समुचित लाभ उठा सकता है।

अब यह देखते देर न लगेगी कि वेदान्तशास्त्र की दृष्टि से व्यक्ति-जीवन का समाज-जीवन के साथ क्या संबन्ध है। महावाक्य जन्य चरम वृत्ति तक मनुष्य समाज में रहकर ही अपना आध्यात्मिक विकास कर सकता है। पारमार्थिक दृष्टि से जगत् मिथ्या होने पर भी उसकी व्यावहारिक सत्ता का निषेध नहीं किया जाता। जगत् ब्रह्म-प्रमा से अतिरिक्त

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अबाध्य ही है। अविद्या काल में तथा अविद्यावान् के लिए ही समस्त प्रमाण-प्रमेयादि व्यवहार तथा लौकिक एवं वैदिक उपदेश हैं। कहा भी है न—

देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः।
लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात्॥

भगवान् भाष्यकार ने यही बात अध्यास-भाष्य में स्पष्ट कर दी है। ज्ञान के अनन्तर ज्ञानी का समाज-जीवन के साथ किस प्रकार का संबन्ध होता है, यह हम कुछ आगे चलकर देखेंगे। अभी हमें इतना ही बतलाना है कि कर्म तथा उपासनादि समस्त व्यवहार द्वैतमूलक हैं, फिर यह द्वैत तत्त्वदृष्टि से मिथ्या ही क्यों न हो। यह सब व्यवहार करते समय व्यक्ति का संबन्ध समाज के साथ आता हैं। व्यक्ति का समाज के अन्य व्यक्तियों के साथ संघर्ष न हो, इस दृष्टि से यह आवश्यक है कि प्रत्येक व्यक्ति अपने अपने नियत कर्मों का ही आचरण करे। सनातन वैदिक धर्म के वर्ण विभाग का रहस्य इसी में है। यदि प्रत्येक मनुष्य अपना नियत कर्म शास्त्रोपदिष्ट मार्ग से करता रहे तो संघर्ष को अवकाश ही नहीं मिलता। साथ ही स्वधर्माचरण द्वारा सबका लौकिक एवं पारमार्थिक कल्याण का मार्ग भी सुकर हो जाता है। अब चूँकि अवस्थाभेद से भी मनुष्य के धर्म बदलते हैं, इस लिए मुख्य ध्येय का पोषक होने की दृष्टि से हम आश्रम धर्म की योजना का भी महत्त्व समझ सकते हैं। व्यक्ति और समाज का संबन्ध निर्धारित करनेवाली यह सुन्दर वर्णाश्रम-व्यवस्था वेदोक्त होने के नाते वेदान्तशास्त्र को भी पूर्णतया संमत है। वेदान्तशास्त्र का इस विषय में अपना कोई स्वतन्त्र मत नहीं और न इस प्रकार का स्वतन्त्र मत इस शास्त्र के मनीषियों की दृष्टि से कोई मूल्य ही रखता है। वेदान्तशास्त्र की दृष्टि से भी उक्त व्यवस्था पूरा पूरा महत्त्व रखती है, क्योंकि इस प्रकार की व्यवस्था के बिना वेदान्तशास्त्र-संमत ध्येय की प्राप्ति संभव ही नहीं। इस प्रकार हम देखते हैं कि वेदान्तशास्त्र की दृष्टि से भी व्यक्ति जीवन के विकास के लिए समाज पूरा पूरा महत्त्व रखता हैं। इस विषय में इस शास्त्र का सिद्धान्त प्रसिद्ध यूनानी दार्शनिक अरस्तू के इस मत से भिन्न नहीं कि मनुष्य सामाजिक प्राणी है तथा वह समाज के बिना नहीं रह सकता, समाजविमुख या तो पशु या फिर ईश्वर ही हो सकता है। हमारे यहाँ भी संदर्भ भेद से कहा गया है—'स वै मुक्तोऽथवा पशुः'।

परन्तु वेदान्त-दर्शन प्रसिद्ध जर्मन दार्शनिक कांट के समान इस बात पर भी पूरा-पूरा जोर देता है कि मनुष्य समाज-यन्त्र का केवल एक पूर्जा ही नहीं है। समाज के प्रति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उसके कर्तव्य अवश्य हैं, किन्तु उसका सबसे बड़ा कर्तव्य अपने ही प्रति है। इस कर्तव्य का निर्वाह न करने वाले को 'आत्महा' (आत्मघात करने वाला) कहा गया है। आत्मलाभ से बढ़कर दूसरा लाभ नहीं—"आत्मलाभान्न परो लाभः"। हमारे यहाँ की ऋणत्रय की कल्पना इसी बात को सिद्ध करती है। मनुष्य को देवादि के ऋणों से उऋण होना पड़ता है। इन ऋणों से उऋण होने के प्रयत्न में ही उसका अपना आध्यात्मिक हितसाधन परम्परया होता ही रहता है। किन्तु इनसे उऋण होने पर उसे सबसे बड़े ऋण से उऋण होना पड़ता है, जो अपने ही प्रति होता है। इसी में व्यक्ति तथा समाज-जीवन दोनों का सार्थक्य या साफल्य है। आदर्श समाज व्यवस्था वही होती है जिसमें व्यक्ति तथा समाज-जीवन के संबन्ध सामंजस्य से भुक्त होकर परस्पर के सच्चे आध्यात्मिक हितसंवर्धन में सब तरह से सहायक हो। भारतीय यानी सनातनधर्म प्रणीत समाज-रचना इस दृष्टि से आदर्शभूत ही है, यद्यपि आज वह आधुनिकता के रंग के कारण बहुत कुछ शिथिल हो गई है। लेकिन केवल आदर्श की ओर ध्यान दें तो भगवान मनु की निम्न स्वाभिमानपूर्ण उक्ति सत्य ही मालूम होती है—

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥ [२।२०]

वही राष्ट्र श्रेष्ठ होता है जिसकी सामाजिक व्यवस्था इस प्रकार की हो जो अधिक से अधिक संख्या में जीवन के विविधक्षेत्रों में महापुरुषों को जन्म दे सके। इस प्रकार के नररत्न ही किसी भी राष्ट्र की सच्ची संपत्ति हैं, न कि उस राष्ट्र के कल-कारखाने या अन्य भौतिक अभ्युदय की निदर्शक बातें। भारत की यह पुण्यभूमि इस दृष्टि से भी अग्रपूजा की अधिकारिणी है।

आजकल समाज हित की बात तो सर्वत्र सुनाई पड़ती है, किन्तु जैसा कि हम ऊपर कह आये हैं, समाज का सच्चा हित किसमें है इसको जानने का यत्किंचित् भी प्रयत्न नहीं किया जाता। प्रायः इस विषय में साध्य-साधन का विपर्यास ही सर्वत्र दीख पड़ता है। भौतिक सुख साधनों में चाहे कितनी ही वृद्धि क्यों न हो, इनसे मनुष्य के समस्त दुःखों की आत्यन्तिक निवृत्ति तथा परमानन्द की प्राप्ति कदापि संभव नहीं। इसके विरुद्ध ये सुखसाधन मर्यादित होने से इनके कारण संघर्ष ही बढ़ेगा और देहात्मवाद की प्रवृत्ति बलवती होकर मनुष्य सच्चे सुख से अधिकाधिक दूर रहेगा। आध्यात्मिक सुख-शान्ति ही अमर्याद एवं निर्विरोध हो

८

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सकती है। ऐहिक ऐश्वर्य की समृद्धि में भी पाश्चात्य राष्ट्रों की जो आज आध्यात्मिक मूल्यों की दृष्टि से दयनीय स्थिति हो रही है, वह सबको विदित ही है। इन देशों में आज वैज्ञानिक प्रगति का तो बोलबाला है, किन्तु आध्यात्मिकता का दिवाला है। कारण स्पष्ट है। वैज्ञानिक प्रगति का अन्तिम लक्ष्य निर्धारित न होने से साधन ही साध्य का स्थान ले बैठा है, जिसके दुष्परिणाम कटु अनुभव द्वारा सबको विदित ही है। व्यक्ति तथा समाज दोनों के हित में साध्यसाधन-विषयक भारतीय वेदान्त-दर्शन का आदर्श निर्दोष है –

अत्राहारार्थं कर्म कुर्यादनिन्द्यं कुर्यादाहारं प्राणसंधारणार्थम्।
प्राणाः संधार्यास्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन भूयो न दुःखम्॥

सकल दुःख की आत्यन्तिक निवृत्ति एवं परमानन्द की प्राप्ति रूप मोक्ष ही मानव मात्र का ध्येय है। इसके लिए एकमात्र साधन तत्त्वज्ञान है। तत्त्वज्ञान के लिए ही धर्माचरणादि शेष बातें हैं। साध्य-साधन के इस प्रकार नीरक्षीर-विवेक से न तो व्यक्ति और न समाज अपने पथ से भ्रष्ट होता है और न सामुदायिक संघर्ष के ही कोई कारण उत्पन्न होते हैं। तात्पर्य यह कि वेदान्त-दर्शन साध्य-साधन या उपाय-उपेय के योग्य विवेक द्वारा व्यक्ति तथा समाज के परस्पर संबन्धों को भी निर्धारित करने में सहायक होता है।

अब हम यह देख लें कि ज्ञानोत्तर अवस्था में ज्ञानी का समाज के साथ किस प्रकार का संबन्ध होता है। इस विषय में भी अनेक भ्रान्त धारणाएँ प्रचलित हैं। ज्ञानोत्तर अवस्था में ब्रह्मभिन्न सब मिथ्या है, इसका साक्षात् (केवल यौक्तिक नहीं) अनुभव हो जाता जाता है। अत एव प्रश्न यह है कि ज्ञानी स्वप्नतुल्य मिथ्या जगत् की भलाई के लिए क्यों कुछ करे। इसका समाधान अद्वैत-दर्शन के जीवन्मुक्ति के सिद्धान्त में मिलता है। भगवान् भाष्यकारने सूत्रभाष्य में विशेषरूप से जीवन्मुक्ति का समर्थन किया है। यदि जीवन्मुक्ति न मानी तो ब्रह्मविद्या संप्रदाय कैसे चले और अविद्यापिशाचिनी से ग्रस्त जीवों का उद्धार भी किस प्रकार हो? जीवन्मुक्त दशा में ज्ञानी के सब व्यवहार 'बाधित अनुवृत्ति' से चलते हैं। फिर ज्ञान की भी विभिन्न भूमिकाएँ हैं। जब तक ज्ञानी का स्वतः या परतः, स्वरूप स्थिति से व्युत्थान संभव है, तब तक ज्ञानी स्वयं ही आत्मज्ञान या ब्रह्मविद्या का उपदेश करता है। किन्तु तुर्य भूमिका पर आरूढ़ होने पर ऐसे मनुष्य का जीवन ही मावन जीवन के अत्युच्च ध्येय की प्राप्ति का मूर्तिमान् उदाहरण बन जाता है। कारण यह है कि जिस जगत् को एकमात्र सत्य समझ कर संसारी जीव रात-दिन ऐहिक बातों में ही फँसे रहते हैं, उसकी ऐसे

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

महाभाग को तनिक भी सुध बुध नहीं होती। किसी भी अवस्था में ज्ञानी पुरुषों का जीवन ही दुनिया की आँखें खोलनेवाला सबसे बड़ा उपदेश बन जाता है। फ्रेंच दार्शनिक बर्गसाँ ने यथार्थता के साथ कहा है कि विश्वबन्धुत्व के सदृश आदर्श गुण सामान्य जनों को साक्षात्कारी सन्तों के आचरण में ही देखने को मिल सकते हैं तथा उनसे प्रभावित होकर सामान्य जन उन्हें आदर्श के रूप में स्वीकार करते हैं। यदि ऐसे पुरुषों का जीवन हमारे संमुख न हो तो ये आदर्श केवल कल्पनारम्य ही रह जायँ।

किन्तु ज्ञानी समाजहित के कार्य कर्तव्यबुद्धि से नहीं करता। ज्ञानप्राप्ति के साथ ही समस्त कर्तव्यों की परिसमाप्ति हो जाती है। यदि कोई कर्तव्य है तो समझ लीजिये वह पुरुष ज्ञानी नहीं—'अस्ति चेन्न स तत्त्ववित्'; 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' [भग० ४।३३] इत्यादि, परहित तो ज्ञानी का स्वभाव ही हो जाता है। यह भूमिका कर्तव्यपालन की भावना से किये गये कार्य से उच्चतर है। श्रीभगवत्पूज्यपाद ने अपने 'विवेकचूडामणि' नामक प्रकरण ग्रन्थ में इस भूमिका का निम्न दो श्लोकों में बहुत ही सुन्दर विवरण किया है—

> शान्ता महान्तो निवसन्ति सन्तो वसन्तवल्लोकहितं चरन्तः।
> तीर्णाः स्वयं भीमभवार्णवं जनानहेतुनाऽन्यानपि तारयन्तः ॥ ३९ ॥
> अयं स्वभावः स्वत एव यत्परश्रमापनोदप्रवणं महात्मनाम्।
> सुधांशुरेष स्वयमर्ककर्कशप्रभाभितप्तामवति क्षितिं किल ॥ ४० ॥

समाज हित में प्रायः लौकिक बातों का ही समावेश किया जाता है, किन्तु इस प्रकार के तात्कालिक हित में ज्ञानी को कोई रुचि नहीं रहती; यद्यपि मनुष्यता के नाते वह यह भी कर सकता है। ज्ञानी तो सकल दुःख की आत्यन्तिक निवृत्ति तथा दुःखासंभिन्न निरतिशय सुख की प्राप्ति तत्त्वज्ञानोपदेश द्वारा कराता है—

> "कारुण्यात्तामवोचं जनिमृतिनिवहध्वस्तये दुःखितेभ्यः"
> [नैष्कर्म्यसिद्धिः, ४–७६]

अब हम प्रस्तुत निबन्ध के प्रारम्भ में उत्थापित आक्षेपों का समाधान देख लें। वेदान्त-दर्शन के जगन्मिथ्यात्व के सिद्धान्त से दुनिया की किसी भी प्रकार हानि न होकर भला ही होगा। हमारे समस्त मूल्य, कृति, भावना इत्यादि ज्ञानाधीन हैं। ज्ञान में परिवर्तन होते ही ये भी आमूलाग्र बदल जाते हैं। वस्तु होकर भी हम उसे अज्ञानवश 'नहीं है' ऐसा समझ सकते हैं; विपरीत ज्ञानवश सत्य वस्तु को मिथ्या समझ सकते हैं और मिथ्या

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वस्तु को सत्य। सदोष ज्ञान के कारण हमारे सारे मूल्य उलट पुलट हो जाते हैं। आज जगत् के अधिकांश अनर्थों ने मूल में अज्ञान तथा विपरीत ज्ञान मूलक जगत्सत्यत्व-बुद्धि तथा देहात्मभावना ही है। इन दोनों बातों ने जगत् का जितना अनर्थ किया है उतना और किसी ने नहीं। जब तक ये दोनों भ्रान्त धारणाएँ दूर न होंगी, तबतक इनके ऊपर स्थित हमारे विपरीत मूल्य भी न बदलेंगे। वेदान्त का जगन्मिथ्यात्व का सिद्धान्त हमारा ध्यान निम्न श्रेणी की वस्तुओं से हटाकर शाश्वत वस्तु की ओर आकर्षित करता है। इसी प्रकार 'देह आत्मा नहीं' यह सिद्धान्त देहात्मबुद्धिपूर्वक किये जाने वाले समस्त व्यवहारों को भी मूल्यों की दृष्टि ये बदल देता है। इसके फलस्वरूप हमारी जगत् तथा देह विषयक आसक्ति दूर होकर हममें नित्यानित्य-वस्तु-विवेक जाग्रत होकर त्यागवृत्ति जाग्रत होने लगती है और समाज सुखी होने लगता है। हड़पने की वृत्ति, परिग्रह की वृत्ति, दूसरों को पशुबल से दबाने की वृत्ति तब तक दूर न होगी, जब तक जगत्सत्यत्व-बुद्धि तथा देहात्म-बुद्धि दूर न होगी। भारतीय समाज व्यवस्था शाश्वत सिद्धान्तों पर स्थित होने के कारण उसमें उक्त दोष कम देखने को मिलते हैं। वह त्याग, शान्ति तथा विश्वमंगल की कामना से प्रेरित है। वेदान्त-दर्शन ही उसकी ठोस नींव है।

ब्रह्मसत्यत्व का सिद्धान्त इस दर्शन को अभावात्मक होने से बचाता है। फिर यह अमर्याद तत्त्व सबको समानरूप से प्राप्त होने के कारण संघर्ष का अवकाश ही नहीं रहता। संघर्ष तो मर्यादित भौतिक वस्तुओं को लेकर ही संभव है।

इसी प्रकार 'अहं ब्रह्मास्मि' के कारण स्वार्थी वृत्ति उत्पन्न होना संभव ही नहीं, कारण इसमें स्वार्थी वृत्ति का एकमात्र अधिष्ठान परिच्छिन्न और क्षुद्र अहं (अंतःकरण) ही निकल जाता है। इसलिए आत्मज्ञानी सबमें अपने सच्चे 'स्व' को देखता है। अत एव वह स्वभावतः ही निःस्वार्थ एवं परदुःखकातर हो जाता है। जहाँ आत्मौपम्य-बुद्धि है, वहाँ स्वार्थ भला कैसे संभव है ?

उपसंहार में हम इतना ही कहना चाहते हैं कि वेदान्त-दर्शन में व्यक्ति तथा समाज के संबन्ध प्रत्येक अवस्था में अत्यन्त सामंजस्यपूर्ण, सुमधुर तथा शुचि हैं। हमारा तथा दुनिया का भला वेदान्त-सिद्धान्त के अनुसार आचरण करने में ही है।

—इति शुभम्—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न्यायवैशेषिकसंबन्धि शाङ्करमतालोचनालोचनम्

श्री वी० सुब्रह्मण्यशास्त्री, अन्नमलाईविश्वविद्यालयः, अन्नमलाईनगरम् ।

न्यायदर्शने वैशेषिकदर्शने च प्रतिपादितं ब्रह्माद्वैतवाददूषणं श्रीमच्छङ्करभगवत्पादसंमतमार्गेण यथामति समालोचयितुमुपक्रम्यते । यदि स्याद् गुणलेशोऽत्र तदनुमोदनेन जनोऽयमनुग्राह्य इति गुणग्राहिणोऽन्तर्वाणिकुलाग्रेसरानभ्यर्थये ।

(१) न्यायदर्शने चतुर्थाध्याये—"संख्यैकान्तासिद्धिः कारणोपपत्त्यनुपपत्तिभ्याम्" [४।१।४१ इति सूत्रेणाद्वैतवादो दूषितः । "यदि तावदद्वैतसिद्धौ प्रमाणमस्ति, तर्हि तदेव द्वितीयमिति नाद्वैतम् । अथ नास्ति प्रमाणम्, तथापि नतरामद्वैतम् । अप्रामाणिकायाः सिद्धेरभावात्" [प्रमे० पृ० ६८] इति तत्सूत्रार्थं वर्णयन्ति न्यायमञ्जर्यां श्रीजयन्तभट्टाः ।

अत्रेदमालोचनीयम्—अद्वैतसिद्धावुपनिषदेव प्रमाणमित्यौपनिषदा मन्यन्ते । न च तेन प्रमाणेन सद्वितीयत्वं ब्रह्मण आपतति । ब्रह्मैवैकं परमार्थसत्यम्, उपनिषच्च न परमार्थसत्या; "वेदा अवेदाः" [बृह० ४।३।२२] इति श्रुत्यैव स्वयं निरस्तत्वात् । अपि तु ब्रह्मज्ञानातिरिक्ताबाध्यत्वाद् व्यावहारिकं सत्यमनिर्वचनीयम् । ब्रह्मभिन्नस्य प्रमाणस्य पारमार्थिकत्वाभावात् पारमार्थिकद्वितीयशून्यत्वस्यैवाद्वैतवादतात्पर्यविषयत्वात् । न चासत्यादनिर्वचनीयाद् वेदात् कथं परमार्थसत्याद्वैतब्रह्मसिद्धिरिति शङ्कनीयम्, अत्र रजतमित्यनाप्तवाक्यस्य पररीत्या सत्यस्यापि रजतरूपार्थासाधकत्वेन सत्यत्वस्य साधकतायामप्रयोजकत्वात् । न चासत्यादपि तात्त्विकार्थसिद्धिस्वीकार आरोपितेन धूमेन तात्त्विकवह्निः सिद्ध्येदिति वाच्यम्; साधकतावच्छेदकरूपवत्त्वं साधकतायां प्रयोजकम्, नारोपितत्वमनारोपितत्वं वा । धूमाभासे साधकतावच्छेदकव्याप्तेरभावान्न साधकत्वम्, न त्वसत्त्वात् । यथा सत्यत्वाविशेषेऽपि चक्षुषा रूपमेव ज्ञाप्यते, न रसः; एवमसत्त्वाविशेषेऽपि "यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शने ॥" [छान्दो० ५।२।६] इति श्रुत्यनुरोधात्, स्वप्नाङ्गनया सत्या कर्मसमृद्धिः, प्रतिबिम्बेन तात्त्विकं बिम्बम्, सवितृसुषिरेण तात्त्विकं मरणम्, रेखातादात्म्येनारोपितवर्णैः सत्यार्थश्च सिद्ध्यति; धूमाभासादिना तु न तात्त्विकवह्निः सिद्ध्यति । ज्ञायमानलिङ्गस्य करणत्वात् तात्त्विकबिम्बानुमितिकरणस्य प्रतिबिम्बस्येव तात्त्विकब्रह्माद्वैतप्रतिपादकस्य वेदस्य परमार्थभिन्नत्वमुपपद्यते । न च स्वाप्नाङ्गनाज्ञानमेव

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सत्यसमृद्धेर्ज्ञापकम्, एवमेव प्रतिबिम्बज्ञानं सवितृसुषिरज्ञानं रेखातादात्म्येनारोपितवर्ण-ज्ञानं च तात्त्विकतत्तदर्थबुद्धिजनकम्; ज्ञानं च स्वरूपतः सदेवेति नासतस्तात्त्विकार्थसिद्धिकरणत्वं संप्रतिपन्नमिति वाच्यम्; केवलज्ञानत्वेन स्वाप्नाङ्गनाज्ञानस्य न कर्मसमृद्धिज्ञानजनकत्वमति-प्रसङ्गात्, किन्तु स्वाप्नाङ्गनावच्छिन्नज्ञानत्वेन। कारणतावच्छेदकमिथ्याभूतस्वाप्नाङ्गना-वच्छिन्नत्वेन रूपेण मिथ्याभूतस्य ज्ञानस्य स्वरूपतः सत्त्वमसत्त्वपर्यवसितमेवानुपयोगात्। वस्तुतो भ्रमज्ञानस्याविद्यावृत्तिरूपत्वेन भ्रमविषयपदार्थसमसत्ताकमिति भ्रमज्ञानं स्वरूपतोऽपि मिथ्यैव। तदुक्तम्—"स्वरूपतो बाधाभावे विषयतोऽप्यबाधप्रसङ्गात्" इति।

एनेन—"सर्वत्रोपायस्य स्वरूपेण सत्त्वादसतः खपुष्पादेरुपायत्वाभावात्। रेखागकारा-दीनां तु वर्णरूपतया सत्त्वं यद्यपि नास्ति, तथापि स्वरूपतो विद्यत एव। ननु गकारोऽयमिति गृह्यमाणो रेखासंनिवेशोऽर्थप्रत्यायको भवति, न चासौ तेन रूपेणास्ति। मैवम्, स्वरूपेणा-सतोऽर्थस्य रूपान्तरेणापि गृह्यमाणस्य कूटकार्षापणादेरिव व्यवहारहेतुता दृश्यते च युक्ता च। यस्तु स्वरूपत एव नास्ति तस्य स्वात्मना परात्मना वा व्यवहाराङ्गता समस्ति। रेखासंनिवेशश्च स्वरूपेण सन्निति वर्णात्मत्वेनासन्नपि तत्कार्याय पर्याप्नुयात्। न त्वयमविद्यायां न्यायः, स्वरूपासत्त्वात्तस्याः।...एवं वनगुहाकुहरादेष निस्सृतः केसरी सरोषमित एवाभिवर्तत इत्यसत्येऽ-प्युक्ते यद् भीरूणां भयपलायनादि...सत्यं कार्यमुपलभ्यते, तत्र सिंहज्ञानस्य तत्कार्यत्वात्, तस्य च स्वरूपसत्त्वान्नासत एवोपायत्वम्" [प्रमे० पृ० ६८] इति सन्दर्भेणाविद्या विद्योपाय इत्यंशस्य दूषणाभिधानं न्यायमञ्जरीकाराणां परास्तं वेदितव्यम्।

अर्थप्रतीतिजनकतावच्छेदकवर्णात्मकत्वेन मिथ्याभूतस्य रेखासंनिवेशस्य भयजनकता-वच्छेदकसिंहावच्छिन्नत्वरूपेण मिथ्याभूतस्य सिंहज्ञानस्य च स्वरूपतः सत्त्वमसत्त्वान्नातिरिच्यते, अनुपयोगात्। तदुक्तं खण्डनकृद्भिः—"अन्यदा सत्त्वं तु पाटच्चरलुण्ठितवेश्मनि यामिक-जागरणवृत्तान्तमनुसरति" इति। किञ्चान्यत्। अविद्याया आविद्यकस्य च पदार्थस्य नाद्वैतिनां मते शशविषाणवन्निःस्वरूपत्वरूपमसत्त्वं स्वीक्रियते। किन्तु ख्यातिबाधान्यथानुपपत्त्या सदसद्विलक्षणस्वरूपत्वम्। एवं च निःस्वरूपत्वमसत्त्वमविद्यादीनामभिप्रेत्यासतः खपुष्पादे-रुपायत्वाभावादित्यादिदूषणाभिधानमद्वैतमतरहस्यानालोचननिबन्धनमिति सुधीभिर्वि-भावनीयम्।

(२) ब्रह्मैकं परमार्थसत्यम्, द्वैतप्रपञ्चस्तु ब्रह्मणो विवर्त इति वादो न्यायदर्शने चतुर्थाध्याय ईश्वरोपादानताप्रकरणे—"ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्" [४।१।१९] इति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सूत्रेणोपक्षिप्त इति व्याख्याय—"न च निर्भागस्यैकस्य स्वसंवेदनप्रत्यक्षस्य विपरीतज्ञानगोचरत्व-संभवः। सामान्यतो ग्रहे रूपविशेषाग्रहे च तदन्यरूपारोपेण विभ्रमो दृष्टः शुक्तिकादौ। न तु जातु शुक्तिरूपं विद्वान् रजतमिति विपर्यस्यति। न च निरंशे स्वसंवेदनप्रत्यक्षे ब्रह्मणि तत्स्वरूपाग्रहः सामान्यग्रहो वा भवति। तस्मादीश्वरो जगद्भेदेन विवर्तत इत्ययुक्तम्" इति सन्दर्भेण तन्निरासं कुर्वन्ति व्याख्यातारः।

इदमत्रालोचनीयम्- सामान्यतो ज्ञातत्वे सत्यज्ञातविशेषवत्त्वमधिष्ठानत्वं प्रयोजकम्। निर्धर्मके च ब्रह्मण्यज्ञातविशेषवत्त्वासंभवात् स्वप्रकाशत्वेन स्वरूपतिरोधानाभावाच्च न निर्धर्मक-ब्रह्माधिष्ठानको भ्रमः संभवतीति निरुक्तदूषणसारः। तद्धर्मिण्यज्ञातविशेषवत्त्वापेक्षया लाघवाद् विशेषरूपेण ज्ञातत्वस्यैवाधिष्ठानताप्रयोजकत्वमुचितम्। तथा च स्वरूपेण ज्ञातत्वे सति विशेषरूपेणाज्ञातत्वमधिष्ठानत्वप्रयोजकमिति फलितम्। सद्रूपेण ज्ञातत्वे सति पूर्णानन्दत्व-रूपेणाज्ञातत्वं ब्रह्मणि वर्तते। यद्यपि सद्रूपं पूर्णानन्दरूपं चैकमेव, तथापि पूर्णानन्दो नास्ति न भाति, सद्रूपमस्ति भातीति व्यवहारात्तयोराविद्यकोऽनादिर्भेदः स्वीक्रियते। यद्यपि सद्रूपानन्दरूपयोर्न्यूनाधिकदेशवृत्तित्वरूपः सामान्यविशेषभावो नास्ति, तथापि भ्रमे भासमानत्वाभासमानत्वरूपः सोऽस्ति। अवश्यं च भ्रमे भासमानत्वमेव सामान्यत्वमिति वक्तव्यम्, एकमात्रवृत्तिधर्मविशिष्टे धर्मिणि भ्रमसंभवेन तत्रानेकव्यक्तिवृत्तित्वाक्रान्त-सामान्याभावात्। स्वप्रकाशस्यापि पूर्णानन्दरूपेणाप्रतिभासादधिष्ठानतिरोधानमपि वर्तते। तस्मान्निर्धर्मकब्रह्माधिष्ठानकः प्रपञ्चभ्रमो युक्त एवेति।

(३) एक एवात्मेत्यद्वैतिनामैकात्म्यवादः—"व्यवस्थातो नानात्मानः" [३।२।२०] इति वैशेषिकसूत्रे व्यवस्थया निराकृतः। किरणावल्यां चोदयनाचार्यैरित्थमुपपादिता व्यवस्था— लोके कश्चित् सुखी, कश्चिद् दुःखीति व्यवस्था दृश्यते। एकस्मिन्नेवात्मनि विरुद्धे सुखदुःखे न संभवतः। अतो नानैवात्मानः।

(क) न चैकस्मिन्नेवात्मनि पादे मे सुखं शिरसि मे वेदनेत्यनुभवेन पादाद्यवयवभेदेन सुखदुःखयोरिव देवदत्तयज्ञदत्तादिशरीरभेदात् सुखदुःखे व्यवस्थिते स्यातामिति वाच्यम्; तथाप्यात्मैकत्वे योऽहं देवदत्तः सुखी सोऽहं यज्ञदत्तो दुःखीति प्रतिसन्धानप्रसङ्गात्। न च जन्मान्तरीयसुखादेरिदानीमनुसन्धानाभावः शरीरभेदप्रयुक्तः, तथैव देवदत्तयज्ञदत्तशरीर-भेदादनुसन्धानाभाव इति वाच्यम्; संस्कारविच्छेदेन जन्मान्तरीयसुखादेरनुसन्धानाभावः, न तु देहभेदात्। न चेहापि तथा वक्तुं शक्यम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(ख) एवमात्मैकत्वे कश्चिदीश्वरः, कश्चिदनीश्वर इति व्यवस्था न स्यात्। किञ्च, ऐकात्म्ये शुको मुक्त वयं बद्धा इति व्यवस्था नोपपद्यते, बन्धमोक्षयोरेकस्मिन्नात्मन्यसंभवात्। शुकस्य मुक्तत्वे तदतिरिक्तस्यात्मनोऽभावात् कोऽन्यः संसरेत्।

(ग) इयता कालेन न कोऽप्यप्रवृक्त इति चेत्; इतः परमपि न कोऽप्यपवर्गं प्राप्नुयात्। नह्यनादौ संसारे यन्न वृत्तं तद् वर्त्स्यतीति संभवति। अनेकात्मत्व ऐकात्म्यश्रुतिविरोध इति नास्ति, मुमुक्षुणा सर्वं विहाय स्वात्मप्रतिष्ठेन भवितव्यम्, न चैक एवात्मेति श्रुतितात्पर्यादिति।

इदमत्रालोचनीयम्—सुखदुःखसाक्षात्काररूपो भोगो न केवलस्यात्मनः, किन्तु देहेन्द्रियमनआदिविशिष्टस्यैवात्मनः। "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" [कठो० ३।४] इति श्रुतेः।

(क) देवदत्तयज्ञदत्तादिशरीरमनआदिविशेषणभेदेन विशिष्टस्यात्मनो नानात्वादनुसन्धानव्यवस्थोपपद्यते। न चैतावताऽद्वैतहानिः, परमार्थसत्यस्य शुद्धात्मन एकत्वात्, विशिष्टानां च तेन रूपेणाध्यस्तत्वात्।

अथवाऽऽत्मन एकत्वेऽप्युपाधिभेदादननुसन्धानमुपपद्यते। न च हस्तपाद्युपाधिभेदेऽप्यनुसन्धानदर्शनादुपाधिभेदो नाननुसन्धानप्रयोजकः। शरीररूपोपाधिभेदोऽननुसन्धानप्रयोजक इत्यपि न वक्तुं शक्यम्; अवयवोपचयापचयाभ्यां बालयुवशरीरयोर्भेदात्, बाल्येऽनुभूतस्य यौवनेऽनुसन्धानाभावप्रसङ्गात्, जातिस्मरस्य शरीरभेदाद् जन्मान्तरानुभूतानुसन्धानाभावापत्तेश्चेति वाच्यम्; जीवविभाजकान्तःकरणरूपोपाधिभेदस्याननुसन्धानप्रयोजकत्वान्न कोऽपि दोषः। बाल्ये यौवने चान्तःकरणमेकमेव। जातिस्मरस्यापि जन्मभेदेऽप्यन्तःकरणमेकमेवेत्यनुसन्धानं संगच्छते। तथा चोपक्रमोपसंहाराभ्यासादिभिः षड्भिस्तात्पर्यलिङ्गैरवधृताद्वैततात्पर्यैर्वेदान्तैरात्मैक्यस्य सिद्धतया सर्वानुसन्धानापत्तेर्वारणाय जीवविभाजकान्तःकरणभेदस्याननुसन्धानप्रयोजकत्वं कल्प्यत इति बोध्यम्।

एतेन मुमुक्षुणा सर्वं विहाय स्वात्मप्रतिष्ठेन भाव्यमित्यत्र श्रुतितात्पर्यमिति किरणावली परास्ता वेदितव्या। षड्विधतात्पर्यलिङ्गोपेताया अद्वैतश्रुतेरीदृशार्थवर्णनस्यासमञ्जसत्वात्।

यत्तु न्यायमञ्जरीकारैः "यस्त्वागमः पठितः – 'एकमेवाद्वितीयम्', 'नेह नानास्ति किञ्चन' इत्यादिस्तस्यार्थवादत्वान्न यथाश्रुत एवार्थो ग्रहीतव्यः।···प्रत्यक्षादिविरुद्धार्थाभिधायिनामर्थवादानां मुख्यां वृत्तिमपहाय गौण्यापि वृत्त्या व्याख्यानमाश्रितम्। एवमिदमपि वचनमितरप्रमाणाविरुद्धमर्थमभिदधदपरथा व्याख्यायते···यथाकथञ्चिदयमर्थवादो योजनीयः। अभेदोपदेशी तु तत्परः शब्दो विधिरूप इह नास्त्येव' [प्रमे० पृ० ६७] इत्यभिहितम्। तदपि न सामञ्जस्यमश्नुते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

'यजमान प्रस्तरः' इत्यादिवाक्यानामुत्तरं 'बर्हिषः प्रस्तरं सादयति' इति संनिहितवाक्यशेषत्वमिव, 'एकमेवाद्वितीयम्' इत्यादिवाक्यनिकुरम्बस्य न संनिहितविधिवाक्यशेषत्वं दृश्यते। तानि वाक्यान्यात्मैकत्वबोधन एव पर्यवसितानि लक्ष्यन्ते। कर्मविध्यपेक्षितकर्तृस्तावकत्वादिना बलात् कर्मकाण्डस्थयागादिविधिवाक्यशेषत्वं कल्पनीयम्। तच्च न कल्पयितुं शक्यते। ऐदम्पर्येण वेदान्तवाक्यबोधितस्याकर्तुरेकस्यात्मनस्तादृशविध्यननुकूलत्वात्। षड्विधतात्पर्यलिङ्गोपेतावधारिततात्पर्याणामद्वैतवाक्यानां बहुश उपलम्भेऽपि—"अभेदोपदेशी तु तत्परो विधिरूप इह नास्त्येव" इति वचनं साहसनिबन्धनमेव। फलवदज्ञातार्थावबोधकं वाक्यं विधिरिति व्यपदिशन्ति। एवं च तात्पर्येणानन्यशेषमर्थं बोधयदद्वैतवाक्यं मुख्यार्थकमेव। 'यजमानः प्रस्तरः' इत्यादिकं तु विधिशेषभूतं प्रत्यक्षविरोधे गौण्या वृत्त्या प्रस्तरसदृशार्थं बोधयदमुख्यार्थं भवति। तदुक्तमाचार्यवाचस्पतिमिश्रैः—'प्रस्तरादिवाक्यमन्यशेषत्वादमुख्यार्थम्, अद्वैतवाक्यं त्वनन्यशेषत्वान्मुख्यार्थम्" इति।

एतेन न्यायलीलावत्यां मुक्तिनिरूपणावसरे—"अद्वैतश्रुतेश्च द्वैतावभासिप्रत्यक्षविरोधेन ग्रावप्लवनश्रुतिवदुपचरितार्थत्वात्। अध्यक्षमविद्यात्वेन न तस्या बाधकमिति चेत्; तुल्यं प्लवनेऽपि" इति वल्लभाचार्याणां वचनभङ्ग्यपि पराकृता बोध्या।

द्वैतप्रत्यक्षं नाद्वैतश्रुतिबाधकं भवितुमर्हति। निश्चितप्रामाण्यकमेव प्रत्यक्षमितरबाधकं भवेत्। न च द्वैतप्रत्यक्षे प्रामाण्यं निश्चितम्। इदं रजतमिति प्रत्यक्षं नेदं रजतमित्याप्तवचनेन, नभोनैल्यप्रत्यक्षं नीरूपत्वग्राहकानुमानेन, चन्द्रः प्रादेशिक इति प्रत्यक्षं चन्द्रस्यानेकयोजनविस्तीर्णत्वबोधकागमेन च बाध्यमानं दृश्यते। द्वैतप्रत्यक्षे चाद्वैतागमविरोधो द्वैतासत्त्वग्राहकानुमानविरोधश्च दृश्यते। अतो द्वैतप्रत्यक्षे प्रामाण्यं न निश्चितम्। अन्यथा प्रत्यक्षसामान्यनिश्चितप्रामाण्यकत्वाभावाद् द्वैतप्रत्यक्षं नाद्वैतश्रुतिबाधकं भवति। अन्यथा प्रत्यक्षसामान्यस्यागमबाधकत्वे, अहं मनुष्यः गौर इत्यादिदेहात्म्यैक्यप्रत्यक्षविरोधादागमेन देहातिरिक्तत्वमप्यात्मनो न सिद्ध्येत्। 'ग्रावाणः प्लवन्ते' इति श्रुतिस्तु प्लवनाभावप्रत्यक्षबाधितैव। अर्थक्रियादिपरीक्षापरीक्षितस्य प्रत्यक्षस्य प्रबलत्वाद् व्यवहारदशायामेव तद्विरुद्धार्थग्राहिकायाः श्रुतेर्बाधः। द्वैतप्रत्यक्षस्य तु परीक्षया व्यावहारिकं प्रामाण्यं सिद्धम्। तस्याद्वैतागमेन न बाधः। परमार्थसत्यबोधकत्वलक्षणं प्रामाण्यं बाध्यते। तच्च न परीक्षासिद्धमिति न विरोधः। ग्रावप्लवनश्रुतेर्मुख्यार्थस्वीकारे तु प्रत्यक्षस्य परीक्षासिद्धं व्यावहारिकं प्रामाण्यमेव व्याहन्येतेति द्वयोर्विशेष इति वेदान्तिनां सिद्धान्तः। प्रत्यक्षमविद्यात्वेन न बाधकमिति वचनेऽप्यविद्यात्व-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पदेनानिश्चितंप्रामाण्यकत्वमेव विवक्षामर्हति। लीलावत्यां किञ्चास्याविद्यात्वमित्यादिना अद्वैतानुभवविरुद्धत्वायत्नसिद्धत्वादीनां स्वकल्पितविकल्पानां दूषणाभिधानं नाद्वैतवादिसमालोचनमर्हतीति बोध्यम्।

तस्मादात्मैक्यस्य श्रुतिसिद्धत्वादननुसन्धानप्रयोजकोऽन्तःकरणभेद इत्युच्यते। योगिनानाशरीरेष्वन्तःकरणानां नानात्वे तु योगिनो नानाशरीरेषु सुखाद्यनुसन्धानं न स्यात्। अतस्तस्मिन्पक्षे जीवोपाधिभूताविद्याभेद एवाननुसन्धानप्रयोजक इति बोध्यम्।

यत्तु न्यायमञ्जर्यामेकस्याकाशस्य घटपटाद्यवच्छेदभेदेन भेदो वक्तुं शक्यः, उपाधेः सत्त्वात्। अविद्यायास्त्वसत्त्वान्नोपाधित्वमिति दूषितम्, तन्न युक्तम्; अविद्यायाः परमार्थभिन्नत्वेऽपि निःस्वरूपत्वानङ्गीकाराद् व्यावहारिकत्वाङ्गीकारात् तदवच्छेदकृतो व्यावहारिकभेदः संभवत्येव, व्यवस्थादीनां व्यावहारिकत्वेन तदुपयोगिनो जीवविभागस्यापि व्यावहारिकस्य व्यावहारिकोपाध्यधीनत्वसंगतेः; अकल्पितस्यैवोपाधित्वमित्यस्यासंप्रतिपत्तेः।

एतेन सतामेव वृक्षादीनामुच्छेददर्शनादसतां शशविषाणादीनामुच्छेदादर्शनाद् असत्यास्तत्त्वाग्रहणरूपाविद्याया उच्छेदो न संभवति। तत्त्वग्रहणाभावस्याप्यस्तित्वसमर्थनान्नासत्त्वमिति न्यायमञ्जरीकाराणां दूषणं नात्मानं लभत इति चिन्तनीयम्।

अविद्यायाः परमार्थसद्भिन्नत्वेऽप्यलीकत्वानङ्गीकारेण, अलीकत्वाच्छशविषाणवदुच्छेदाभावापादनासंभवात्। अपि च, उभयसंमतसतश्चिदात्मन उच्छेदो न दृश्यते। उच्छिद्यमानवृक्षादीनां यादृशं सत्त्वं सत्तादात्म्यरूपं तदविद्यायामपि वर्तते। नाप्यविद्या तत्त्वग्रहणाभावरूपा स्वीक्रियते, अपि तु भावरूपा दण्डायमाना। पराक्रान्तं चात्र सूरिभिः। अज्ञानाग्रहणादिपदानां ज्ञानविरोधिनि भावरूपाज्ञाने शक्तिरिति सिद्धान्तः। अतोऽनिर्वचनीयाया अविद्याया अलीकत्वकल्पनाप्रयुक्तानि दूषणान्यनवकाशानीति विभावनीयम्।

(ख) एवं जीवेश्वरभेदोऽप्याविद्यकः। मायाज्ञानादिशब्दितायामविद्यायां स्थूलसूक्ष्मान्तःकरणावच्छिन्नायां चैतन्यं प्रतिबिम्बते। प्रतिबिम्बितं चैतन्यं जीवः, बिम्बभूतमविद्योपहितं चैतन्यमीश्वरः। अन्तःकरणभेदाज्जीवभेदः। दर्पणाद्युपाधिः स्वगतं मालिन्यं प्रतिबिम्ब एवासञ्जयति, न बिम्बे। नहि दर्पणमालिन्येन ग्रीवास्थं मुखं मलिनं भवति। अतश्चोपाधिभूताविद्याकृतो दोषः संसारः प्रतिबिम्बजीवस्य, न बिम्बस्येश्वरस्येतीश्वरो संसारी जीवः संसारीति व्यवस्थोपपद्यते। अविद्योपहितबिम्बचैतन्यमीश्वरः, अन्तःकरणभेदभिन्ना

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जीवाः, जीवेश्वरयोर्भेद इत्येतेऽनादयोऽनिर्वचनीया व्यावहारिकाः। शुद्धचैतन्यमेकमेव परमार्थसत्यमिति नाद्वैतहानिः।

अथवाऽविद्याश्रयचैतन्यं जीवः, अविद्याविषयत्वोपहितं चैतन्यमीश्वरः। ब्रह्म नास्तीति व्यवहारो जीवाश्रितः। तादृशव्यवहारे चाविद्याकारणं कार्यकारणयोश्च सामानाधिकरण्यमावश्यकमित्यविद्याया आश्रयो जीवः। प्रतिजीवमविद्या भिन्नभिन्ना। जीवविभाजकोपाधिभूताविद्याभेदेन जीवभेदः। ईश्वरचैतन्येऽविद्याभावान्न तदधीनः संसार इति जीवेश्वरयोः संसारित्वासंसारित्वे उपपद्येते।

यत्तु—"अविद्याकृतो जीवपरमात्मनोर्भेद इति चेत्; कस्येयमविद्या? किं ब्रह्मणः, उत जीवानाम्? न तावद् ब्रह्मणोऽस्त्यविद्यायोगः, शुद्धबुद्धस्वभावत्वात्। जीवाश्रयाविद्येति चान्योन्याश्रयपराहतम्। अविद्याकृतो जीवभेदः, जीवाश्रयाविद्येति" इति कन्दल्यामभिहितम्, तत्रेदं वक्तव्यम्—

अविद्याया जीवाश्रितत्वे निरूपितोऽन्योन्याश्रयः किमुत्पत्तौ, उत ज्ञप्तौ, आहोस्वित् स्थितौ? नाद्यः, अविद्या तदवच्छिन्नं चैतन्यं तत्कल्पितभेदं वा चैतन्यं जीव इति द्वयोरप्युत्पत्तिर्नास्ति। अत उत्पत्तावन्योन्याश्रयदोषो न संभवति। न द्वितीयः, अविद्यायाश्चिद्भास्यत्वेऽपि चितोऽविद्याभास्यत्वाभावात्। न तृतीयः, तयोः परस्पराश्रितत्वाभावात्। अविद्याया जीवाश्रितत्वेऽपि जीवस्य शुद्धचिद्वृत्तित्वेनाविद्याश्रितत्वाभावात्। न चाविद्योपहितस्याविद्याश्रयत्वेऽविद्याया अप्याश्रयत्वमापततीति शङ्क्यम्, दण्डत्वोपहितस्य घटकारणत्वे दण्डत्वस्य कारणत्वाभाववदविद्योपहितस्याश्रयत्वेऽविद्याया आश्रयत्वासंभवात्। समानकालिकयोर्घटतदवच्छिन्नाकाशयोरिवोपाध्युपहितभावमात्रेणाविद्याजीवयोरन्योन्याधीनतोपपद्यते।

एतेन—"बीजाङ्कुरवदनादिरविद्याजीवप्रभेद इति चेत्, बीजाङ्कुरव्यक्तिभेदवदविद्याजीवयोः पारमार्थिकत्वाभावादनुपपन्नम्। व्यक्तिभेदेन च बीजाङ्कुरयोरन्योन्यकारणता, जीवस्तु सर्वासु भवकोटिष्वेक एव। तत्राविद्याकृतो जीवभेदः, जीवभेदाच्चाविद्येत्यसंगतिः" इति कन्दली परास्ता।

अविद्याजीवयोरनादित्वादुत्पत्तावन्योन्याश्रयो न संभवतीत्यद्वैतवादिभिर्निरूप्यते, न तु बीजाङ्कुरवदनादित्वमुच्यते। न हि तैर्बीजादङ्कुरस्य, अङ्कुराच्च बीजस्येवाविद्याया जीवस्य, जीवादविद्यायाश्चोत्पत्तिः स्वीक्रियते, उभयोरनादित्वस्वीकारात्। अपि च पारमार्थि-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कत्वाभावादनुपपन्नमित्यसंगतम्, पारमार्थिकत्वस्य तत्रातन्त्रत्वात् । 'तस्मात् स्वकल्पिताक्षेपदूषण-मिदं नाद्वैतवादिदूषणमिति मन्तव्यम् ।

यच्चेतरेतराश्रयत्वं परिहर्तुमनादित्वमावेदितमित्यादिकं न्यायमञ्जरीकारोक्तम्, तदप्यनयैव सरण्या पर्यालोचनीयम् ।

(ग) जीवविभाजकाविद्यानां नानात्वाद यस्य जीवस्यात्मसाक्षात्कारो जातः, तेन तदीयाविद्यानिवृत्तौ तत्प्रयुक्तबन्धनिवृत्तिस्तस्य भवति । यस्य तु साक्षात्कारो नोत्पन्नस्तस्या-विद्या न नष्टेति संसारित्वमित्युपपद्यते बन्धमुक्तिव्यवस्था । अविद्याया एकत्वपक्षेऽपि तस्यां जीवभेदेन विभिन्नावरणशक्तयः सन्ति । तथा च यस्य साक्षात्कारो जातस्तस्य जीवस्य ब्रह्मस्वरूपावरणशक्तिविशिष्टविद्यानाशः, न त्वन्यजीवं प्रत्यावरणशक्तिविशिष्टनाशः । एवं चान्यजीवस्यावरणविशिष्टविद्यासत्त्वेन तत्प्रयुक्तः संसारो वर्तते । यस्य साक्षात्कारस्तस्या-वरणशक्तिविशिष्टाविद्यानाशात् तत्प्रयुक्तसंसारो नास्तीति बन्धमुक्तिव्यवस्थोपपद्यते ।

येषां मते विभव आत्मानो नाना, तेषामेव नैयायिकानां वैशेषिकाणां च सुखदुःखादि-व्यवस्था निरूपयितुमशक्या । सर्वात्मनां संनिधावुत्पद्यमानेऽदृष्टे प्रतिनियतात्मसमवायस्य वक्तुमशक्यत्वाद् यच्छरीरं यदीयादृष्टजन्यं तत् तस्योपभोगं जनयति नान्यस्येति व्यवस्थाया दुरुपपादत्वात् । पराक्रान्तं चात्र पूर्वाचार्यैरंशाधिकरणे ।

तस्मात् पूर्वोक्ता त्रिविधापि व्यवस्थाऽऽत्मनः पारमार्थिकं नानात्वं विनाप्युपपद्यमाना न पारमार्थिकात्मैक्यवादमपाकर्तुं प्रभवतीति बोध्यम् ।

(घ) अद्वैतब्रह्मसाक्षात्कारेण निरतिशयानन्दरूपब्रह्मप्राप्तिरूपो मोक्षः सिद्ध्यति । यत्त्वत्र न्यायलीलावत्यां मुक्तिस्वरूपनिरूपणावसरे—"ननु चाद्वैततत्त्वसाक्षात्कारादविद्योपनीत-प्रपञ्चप्रत्ययबाधे···अद्वैतानन्दसाक्षात्कारो मुक्तिरिति मन्यन्ते । मैवम्, मानाभावात् । श्रुतिस्तत्र मानमिति चेन्न, बाधितत्वात्; ब्रह्मसंवेदनेऽपि प्रपञ्चप्रत्ययस्य सत्त्वात् । ब्रह्मसंवेदनमिदानीं नास्तीति चेत्, न; नहि ब्रह्म संवेदनान्तरवेद्यम् । न च ब्रह्मस्वरूपमिदानीं नास्तीति श्रुतिवाक्यजविशिष्टब्रह्मानुभवो नास्तीति चेत्, न; तस्याप्यनुभवस्य ब्रह्मस्वरूपानतिरेकात् । ब्रह्मणोऽभिन्नत्वेन कल्पितोऽनुभवो नास्तीति चेत्, न; कल्पितस्यासत्त्वेन कल्पनात्वेन वाऽबाधकत्वात्" इति ग्रन्थसन्दर्भेणाद्वैतमतमनूद्य दूषितम् ।

तत्रेदं समालोचनीयम् । ब्रह्मणः स्वप्रकाशत्वेन ब्रह्मसंवेदनमपि ब्रह्मस्वरूपमेव । श्रुतिवाक्यजन्यानुभवोऽपि ब्रह्मरूपः । ब्रह्म चेदानीमप्यस्ति, प्रपञ्चप्रत्ययोऽप्यस्तीति न तस्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संवेदनस्य तद्बाधकत्वमिति वल्लभाचार्या मन्यन्ते। नह्यद्वैतिनो ब्रह्मस्वरूपात्मकः साक्षात्कारः प्रपञ्चबाधको मुक्तिसाधनमिति ब्रुवते, परन्त्वन्तःकरणवृत्तिरूपः साक्षात्कारः। स्वप्रकाशस्य ब्रह्मणः प्रकाशायान्यानपेक्षत्वेऽपि पूर्णानन्दस्वरूपस्याज्ञानेनावृतत्वादावरणभङ्गायान्तःकरण-वृत्तिरूपः साक्षात्कार इष्यते। तद्विषयत्वेऽपि न तस्य स्वप्रकाशत्वं हीयते। तदुक्तम्--
"ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्यत्वमिष्यते। फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतम्॥" इति। मुक्तिसाधनीभूतस्तादृशसाक्षात्कारो नास्तीति तद्दूषणस्यावकाशो नास्त्येवेति बोध्यम्। अत एव मुक्तिवादे श्रीगदाधरभट्टाचार्या अद्वैतिसंमतमुक्तिनिरूपणावसरे ब्रह्म-स्वरूपस्य साक्षात्कारस्येदानीमपि सत्त्वान्मुक्त्यापत्तिरिति वेदान्तमतदूषणमयुक्तम्, अन्तःकरण-वृत्तिरूपसाक्षात्कारस्यैव तत्साधनत्वेन तैः स्वीकारादिति निरूपयन्ति।

परन्तु तस्यापि कल्पितत्वेनासत्त्वाद् बाधकत्वं न संभवतीति दूषणमवशिष्यते। तदप्यसंबद्धम्। अन्तःकरणवृत्तेरनिर्वचनीयाया निःस्वरूपत्वानङ्गीकारात्। परमार्थसत्यभिन्न-स्यापि स्वाप्नगजाभावज्ञानस्य स्वाप्नगजप्रत्ययबाधकताया दृष्टत्वेन परमार्थसत्यस्य बाधक-तायामतन्त्रत्वात् स्वाप्नगजाभावज्ञानस्य स्वरूपतः सत्त्वेऽपि बाधकतावच्छेदककल्पितविषय-विशेषावच्छिन्नत्वेन रूपेणासत्त्वात्। स्वरूपतो बाधाभावे विषयतोऽबाधापत्त्या तस्य स्वरूप-तोऽपि सदन्यत्वस्य पूर्वमावेदितत्वाच्चेति विभावनीयम्।

न्यायकन्दल्यां मुक्तिस्वरूपनिरूपण आनन्दात्मतयाऽवस्थानं मोक्ष इत्यभ्युपगमे चिते-रानन्दात्मतायाःस्वाभाविकत्वे संसारावस्थायामपि तदनुभवमापाद्य---"अविद्याप्रतिबन्धादननुभव इति चेत्, न; नित्यायाश्चितेरानन्दानुग्रहस्वरूपायाः स्वरूपस्याप्रच्युतेः कः प्रतिबन्धार्थः? प्रच्युतौ वा स्वरूपस्य का नित्यता? तस्यान्नित्य आनन्दो नित्यया चित्या चेत्यमानो द्वयोरप्यवस्थयो-रविशेषेण चेत्येत। न चैवमस्ति। अतो नात्मनो नित्यं सुखम्" इति दूषितम्।

तत्रेदं वक्तव्यम्। यथा सूर्यो मेघेनावृतो न प्रकाशते। मेघस्यावरणस्यापाये तु स्वयमेव प्रकाशते। न तु मेघेन सूर्यस्य स्वरूपप्रच्युतिः क्रियते। तथात्मा पूर्णानन्दोऽविद्य-यावृतो न भाति। 'अस्ति, भाति' इति व्यवहारप्रतिबन्धकत्वं 'नास्ति, न भाति' इति व्यवहार-प्रयोजकत्वं चावरकत्वम्। अखण्डाकारवृत्त्याऽविद्यावरणनाशे तु स्फुरति, संसारदशाया-मावृतत्वान्नानन्दानुभव इति वेदान्तरहस्यमनाकलय्य कन्दलीकारैरविद्याया आनन्दस्वरूप-प्रच्यावकत्वरूपमनुभवप्रतिबन्धकत्वं मत्वा स्वरूपप्रच्युतौ नित्यत्वम्, अप्रच्युतौ अविद्यायाः प्रतिबन्धकत्वं चानुपपन्नमिति दूषितमिति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यदपि जयन्तभट्टैर्न्यायमञ्जर्यामस्मिन्नेव प्रस्तावेऽविद्यावरणात् संसारावस्थायां नित्यसुखानुपलम्भमुत्थाप्य—"प्रकाशस्य तुच्छेनावरीतुमशक्यत्वात्" इत्यविद्यावरणं दूषितम्।

तदप्यविद्याया निःस्वरूपत्वानङ्गीकारपराहतं द्रष्टव्यम्। यदि तुच्छपदेन परमार्थभिन्नमेव विवक्षितमित्युच्यते, तदापि न दोषः। परमार्थभिन्नस्य कल्पितस्यापि तमस आवरकत्वदर्शनात्। मध्यन्दिने महाप्रकाशयुक्तस्थलात् सालोकमपवरकं प्रविष्टोऽन्धकारमिव पश्यति। तत्रत्यान् पदार्थान् न विजानाति। तत्र पुरुषेण कल्पितं तमस्तत्रत्यपदार्थाच्छादकं दृश्यते। अतश्चावरकत्वे परमार्थत्वमप्रयोजकमिति सद्भिन्नयाप्यविद्ययाऽऽत्मसुखमावरीतुं शक्यत एवेति विभावनीयम्।

यदपि मणौ—"एतेन ब्रह्माद्वैततत्त्वसाक्षात्कारादविद्यानिवृत्तौ विज्ञानसुखात्मकः केवल आत्माऽपवर्गे वर्तत इति वेदान्तमतमपास्तम्। स्वप्रकाशसुखात्मकब्रह्मणो नित्यत्वेन मुक्तसंसारिणोरविशेषप्रसङ्गात्। पुरुषप्रयत्नं विना तस्य सत्त्वादपुरुषार्थत्वाच्च। अविद्यानिवृत्तिः प्रयत्नसाध्येति चेत्, अविद्या यदि मिथ्याज्ञानमर्थान्तरं वा, उभयथापि सुखदुःखाभावतत्साधनेतरत्वेन तन्निवृत्तेरपुरुषार्थत्वात्" [ईश्वरा० पृ० १८१] इति श्रीगङ्गेशोपाध्यायानां दूषणम्।

तत्रापीदमालोचनीयम्। अविद्यावरणनिरूपणेनैव मुक्तसंसारिणोरविशेषप्रसङ्गदोषो दूरोत्सारितः। आत्मसुखस्य नित्यसिद्धत्वात् तत्प्राप्त्यर्थं यत्नो न स्यादिति तदभिसंहितस्य दूषणस्यायं परिहारः। अप्राप्तस्य प्राप्तिरिव प्राप्तस्यापि कण्ठगतचामीकरादेरप्राप्तत्वभ्रमेण दुःखमनुभवता पुरुषेणोपदेशादिनाऽप्राप्तत्वभ्रमनिवृत्तौ प्राप्तमेव चामीकरं प्राप्तमिव भवति। ईदृशप्राप्तौ भ्रमनिवृत्तेरुपायोऽन्वेषणीयः। अतश्चात्रापि प्राप्तनित्यसुखप्राप्त्यर्थं भ्रमनिवर्तकसाक्षात्कारसंपादने यत्नः कर्तव्य एवेति।

अविद्यानिवृत्तेः प्रयत्नसाध्यत्वेऽपि सुखदुःखाभावेतरत्वेनापुरुषार्थत्वं नापतति। आत्यन्तिकस्य दुःखसाधनदुरितध्वंसस्य मुक्तित्ववादिनां नव्यनैयायिकानां मते यथा दुःखसाधनाभावरूपत्वेन गौणं पुरुषार्थत्वम्, तथाऽविद्यानिवृत्तेरपि दुःखसाधनाभावत्वेन पुरुषार्थत्वसंभवात्। इत्थमेव श्रीगदाधरभट्टाचार्यैर्मुक्तिवादेऽद्वैत्यभिमतमुक्तेः पुरुषार्थत्वमुपपादितं दृश्यते।

वस्तुतस्त्वविद्यानिवृत्तिर्मुक्तिः। सा च चरमाखण्डाकारवृत्त्युपलक्षितपूर्णानन्दात्मस्वरूपा। तदुक्तम्—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अविद्यास्तमयो मोक्षः सा च बन्ध उदाहृतः ।
निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः ॥ इति ।

यथा विद्यमानेऽपि चैत्रे तदीयपाकसंबन्धगतामुत्पत्तिमारोप्य 'अद्य पाचको जातः' इति व्यवहारः, तथाऽऽत्मनो नित्यसिद्धत्वेऽपि तदुपलक्षणवृत्तेः साध्यत्वं तत्रारोप्य मुक्तौ साध्यत्व-व्यवहारः । न चैतावता मुक्तेः पुरुषार्थत्वमप्यौपचारिकमिति शङ्क्यम्, आत्मन आनन्द-रूपत्वेन निरुपाधीच्छाविषयत्वेन पुरुषार्थत्वसंभवात्; पुरुषार्थत्वस्य साध्यत्वाघटितत्वात् । "अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः" इत्युक्तेस्तादृशात्मनः दुःखाभावरूपत्वाद् नैयायिकमत इव पुरुषार्थत्वमप्यक्षुण्णमिति वेदान्तसंप्रदायः ।

तस्मात् परिपूर्णानन्दरूपं प्रकाशात्मकमेकमेव परमार्थसत्यं ब्रह्म । तत्साक्षात्काराद् निखिलानर्थनिवृत्तिपूर्वकपरमानन्दावाप्तिरित्युपनिषदामैदम्पर्यं प्रकटीकुर्वत् शाङ्कराद्वैतदर्शनं दर्शनेषु दर्शनीयतमं दर्शनमिति सुधीभिर्विभावनीयमिति शिवम् ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न्यायवैशेषिकयोर्भेदकतत्त्वानि

श्रीकेदारनाथत्रिपाठी, राजकीयसंस्कृतमहाविद्यालयः, भागलपुरम् ।

नाविदितमिदं विपश्चिदपश्चिमानां यद् भारतवर्षीयद्वादशदर्शनारण्यान्यां षड्भिर्नास्तिकदर्शनैः सह न्यायवैशेषिकसांख्ययोगपूर्वमीमांसोत्तरमीमांसानामकानि षडास्तिकदर्शनानि परिगण्यन्त इति । आस्तिकदर्शनानां षट्त्वसंख्यापूर्त्तिरियं सत्यपि न्यायवैशेषिकयोः समानतन्त्रत्वे, सत्यामपि च —"सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः" [भग० ५।४], "एकं सांख्यं च योगं च यः पश्यति स पश्यति" [भग० ५।५] इत्यादिस्मृतिपरम्परायां वर्तते कश्चिन्मौलिको विशेषो यमालम्ब्य षडप्येतान्यास्तिकदर्शनानि परस्परभिन्नतया व्यपदिश्यन्ते ।

अत्र प्रकृतयोर्न्यायवैशेषिकदर्शनयोः संबन्धे आधुनिका ऐतिहासिका वदन्ति यन्न्यायवैशेषिकयो रचनातः प्राग्भारतवर्षे द्विविधे विचारधारे प्रसृते आस्ताम्— वेदाविरोधिनी ह्येका, द्वितीया च विरोधिनी वेदानाम् । तत्र द्वितीयधारावाहिष्वेव केचन पश्चाद् धर्मेश्वरादिविषयेषु वेदानां प्रामाण्यमङ्गीकृतवन्तो वेदाविरोधिप्रथमधारया मिलिताः । परन्तु भौतिकस्वरूपेषु ते स्वीयपूर्वतनसिद्धान्तानुगामिन एवाभूवन् । तैरालक्षितं यद् वेदोपनिषत्सु प्रतिपादिताः सिद्धान्ता व्यापकाः सन्ति, यत्र द्वैताद्वैत-वस्तु-विज्ञानादिवादानां परस्परविरोधिनामपि साधीयान् समन्वयो दृश्यते । एवं च नास्तिकमतवादिषु ये वेदप्रामाण्याङ्गीकारेणास्तिका अभूवन्, तेषामेवैको वैशेषिकवादोऽप्यस्ति । न्यायमतं तु पूर्वत एव वेदादबहिर्भूतमासीत् । न्यायशब्दो हि प्रमाणैरर्थपरीक्षणार्थकोऽत एव वैदिकमतस्य व्याख्यार्थमेव न्यायस्य प्रादुर्भाव इति नात्र कापि विप्रतिपत्तिः । मनुरपि संवदत्येनमर्थम्—"आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥" [१२।१०६] इति वचनेन । इतरेषामास्तिकमतानां सत्यपि वैदिकत्वे समाने स्वविलक्षणविश्लेषणपद्धतेस्तर्कप्रामाणिकताभ्युपगमाच्च न्यायमतं मतान्तरात् पार्थक्यं भजते ।

परमत्र वैशेषिकवादोपरि प्रारम्भेऽवैदिकत्वारोपमधुनातनैतिहासिकानां न वयं रोचयामहे । कणादसूत्रेषु नैतादृशं किमपि लक्षणं पश्यामो येन तद्दर्शनस्यांशतोऽपि कदाचिदवैदिकत्वमाशङ्क्येतापि । प्रत्युतादावेव—"अथातो धर्मं व्याख्यास्यामः, यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" [१।१।१-२] इति सूत्रयता महर्षिणा पारलौकिकस्य धर्मस्य प्रतिपादनात्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तस्यास्तिकत्वम्, वेद एव रहस्यत्वेन निर्दिष्टस्य धर्मतत्त्वस्य व्याख्यानमात्रप्रतिज्ञानाच्चास्य दर्शनस्य वैदिकत्वं च समुद्घोषितम्। "तद्वचनादाम्नायस्य प्रामाण्यम्" [वै० १।१।३] इति सूत्रस्यादावन्ते चावर्तनेन प्रणयनादीश्वराभ्युपगन्तृत्वं वेदप्रामाण्याभ्युपगन्तृत्वं च कण्ठतोऽपि विज्ञापितम्। यद्यप्युक्तसूत्र ईश्वरपदाभिधानं नास्ति, तत्सर्वनामस्य च पूर्वसूत्रस्थधर्मपरामर्शित्वमेव भवितुमर्हति, तथापि वैशेषिकदर्शन ईश्वरोऽभ्युपगत इत्यत्र सन्त्यनेकानि प्रमाणानि। तथा हि प्रशस्तपादभाष्ये—"तत्रेश्वरबुद्धिमपेक्ष्योत्पन्ना परमाणुद्व्यणुकेषु बहुत्वसंख्या, तैरारब्धे कार्यद्रव्ये त्र्यणुकादिलक्षणे रूपाद्युत्पत्तिसमकालं महत्त्वं दीर्घत्वं च करोति" [परिमाण० पृ० ५६-५७] इत्युक्तम्। अत्र सर्गादौ 'अयमेकोऽयमेकः' इत्यनियतैकत्वविषयकेश्वरीयापेक्षाबुद्ध्यैव परमाणुद्व्यणुकादौ बहुत्वसंख्योत्पत्तिस्ततश्च त्र्यणुकादौ महत्त्वदीर्घत्वाद्युत्पत्तिरिति कथनादायाति वैशेषिकदर्शन ईश्वराभ्युपगमः। प्रशस्तपादभाष्यस्य टीकायां कणादरहस्ये शङ्करमिश्र आह—"सोऽयं द्विविधः—क्षेत्रज्ञः, सर्वज्ञश्चेति। द्वितीयं न मृष्यामह इति चेन्न; 'क्षितिः सकर्तृका, कार्यत्वाद्, यद् यत् कार्यं तत्तत् सकर्तृकं यथा घटः, सकर्तृकत्वव्याप्यकार्यत्ववती चेयम्, तस्मात् सकर्तृका' इत्यस्मदादिविलक्षणकर्तृ(भूतेश्वर)सिद्धेः" [पृ० ३६]। पुनश्च—"संज्ञाकर्म त्वस्मद्विशिष्टानां लिङ्गम्" [२।१।१८] इति वैशेषिकसूत्रव्याख्यायामुपस्कार आचार्यशङ्करमिश्र आह—"संज्ञा नाम, कर्म कार्यं क्षित्यादि, तदुभयमस्मद्विशिष्टानामीश्वरमहर्षीणां सत्त्वेऽपि लिङ्गम्" इति। किं बहुना वैशेषिकदर्शनस्य साम्प्रतमुपलभ्यमानासु किरणावली-न्यायकन्दली-लीलावती-व्योमवती-सूक्ति-सेतु-नाम्नीष्वपरास्वपि च व्याख्यासु तत्प्रकरणे भूयस्या युक्त्या ईश्वरः साधितः। प्रशस्तदेवाचार्यस्तु ग्रन्थादावेव मङ्गल ईश्वरं प्रणमति—"प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः। पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः॥" इति श्लोकेन। अतश्च वैशेषिकदर्शनव्याख्यातॄणां सर्वेषामेवेश्वराभ्युपगन्तृत्वे तदुपजीव्यभूतो महर्षिकणादोऽनीश्वरवादीति वचनमश्रद्धेयमेव। वैशेषिकदर्शनस्यानीश्वरवादित्वे तु तस्य न्यायदर्शनेन समानतन्त्रतायां महान् व्याघातः स्यात्। अत एवाधुनिकैतिहासिकमान्यताप्रत्याख्यानव्याजेनाऽस्येश्वराभ्युपगमे वैशेषिकविदुषां कतिपयसंवादाः प्रदर्शिताः। समानतन्त्रत्वप्रसिद्धिरेवैतयोर्न्यायवैशेषिकयोर्भेदकतत्त्वजिज्ञासां जनयतीति समानतन्त्रत्वसंबन्धेऽपि विचारणीयं तावत्।

प्राग् न्यायवैशेषिकदर्शने परस्परतः स्वतन्त्रसत्ताके सती मिथः समानतन्त्रतया प्रसिद्धे आस्ताम्। तथा चाह स्म भगवान् वात्स्यायनः "समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः" [१।१।२९] इति न्यायसूत्रभाष्ये—"पुरुषकर्मादिनिमित्तो भूतसर्गः, कर्महेतवो

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दोषाः प्रवृत्तिश्च, स्वगुणविशिष्टाश्चेतनाः, असदुत्पद्यते, उत्पन्नं निरुध्यत इति योगानाम्" (वैशेषिकाणामित्यर्थः) इति। अर्थादेते न्यायसिद्धान्ताः स्वसमानतन्त्रे वैशेषिकेऽपि सिद्धाः सन्ति, अतः प्रतितन्त्रसिद्धान्ता उच्यन्ते।

जयन्तभट्टोऽपि स्पष्टमाह न्यायमञ्जर्य्याम्—"यथाऽस्माकमीश्वरेच्छाप्रेरितपरमाणु-निर्मितानि पृथिव्यादीनि, समानतन्त्रे कणव्रतमते तथैव सिद्धानि" [१।१।२६] इति। न केवलं शब्दत एवोभे दर्शने समानतन्त्रे, किन्तर्हि ? वस्तुतोऽपि। तथा हि वैशेषिकस्येश्वराभ्युपगन्तृत्वं प्रदर्शितं पूर्वम्। न्यायदर्शनं तु—"ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्", "न पुरुषकर्माभावे फलानिष्पत्तेः", "तत्कारितत्वादहेतुः" [४।१।१६, २०, २१] इति सूत्रैः स्पष्टमेवेश्वरं साधयति। सूत्रस्यायमाशयः—न केवलं पुरुषकर्म कारणम्, बहुधा समीहमानोऽपि पुरुषो नावश्यं फलं प्राप्नोतीति दर्शनात्। न वा केवल ईश्वरः कारणम्, तथा सति विनाऽपि कर्म सुखदुःखोपभोगौ स्याताम्। तथा च प्राणिनो न कर्मसु प्रवर्तेरन्, अनिर्मोक्षश्च प्रसज्येत। तस्मादीश्वरेण निमित्त-कारणेनानुगृहीतानि कर्माणि प्राणिनां सुखदुःखोपभोगौ जनयन्तीति न्यायसिद्धान्तः। उद्योतकराचार्योऽपि वार्त्तिके सूत्राण्येतानि विवृण्वानः सांख्योक्तप्रधानकारणवादं केवल-परमाणुकारणवादं च खण्डयित्वा, ईश्वरस्य कारणत्वे प्रतिवादिभिः कृतान् बहूनाक्षेपांश्च प्रतिक्षिप्येश्वराधिष्ठितं परमाणूनां कर्मणां न जगत्कारणत्वं महता संरम्भेण समाहितवान्। न्यायाचार्य उदयनस्त्वीश्वरसाधकं प्रसिद्धं न्यायकुसुमाञ्जलिनामानं स्वतन्त्रं ग्रन्थमेव प्रणीतवान्।

मोक्षस्वरूपं न्यायदर्शने उक्तम्—"तदत्यन्तविमोक्षोऽपवर्गः" [१।१।२२] इति। अत्र तच्छब्देन—"दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" [१।१।२] इति पूर्वसूत्रोक्तं दुःखं परामृश्यते। तेन तत्त्वज्ञानेन सवासनमिथ्याज्ञाननाशे दोषनाशस्ततः प्रवृत्तिनाशस्ततो जन्मनाशस्ततो दुःखस्यापुनरुत्पत्तिलक्षणो मोक्षो जायते। वैशेषिकेऽपि—"तदभावे संयोगाभावोऽप्रादुर्भावश्च मोक्षः" [५।२।१८] इति सूत्रेण तदेव मोक्षस्वरूपं वर्णितम्। अयं सूत्रार्थः—तत्त्वज्ञानेन मिथ्याज्ञानादिनाशे सति पूर्वशरीरेण सहात्मनः संबन्धनाशे पुनर्देहान्तराप्राप्त्याऽऽत्यन्तिकः पुनर्दुःखानुत्पादलक्षणो मोक्ष इति। न्यायदर्शने यान्यात्मनो लिङ्गानीच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्युक्तानि तान्येव वैशेषिकेऽपीति नात्मसंबन्धेऽप्यनयोर्भेदः कश्चित्। हेत्वाभासा न्याये सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीतसंज्ञयोक्ता एव वैशेषिकेऽपि—"अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चानपदेशः" [३।१।१५] इति सूत्रेण चकारस्य बाधसत्प्रतिपक्षसमुच्चयार्थतामाश्रित्य पञ्च संगृहीताः। "प्रतिज्ञाहेतूदाहरणोपनयनिग-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मनान्यवयवाः" [१।१।३२] इति गौतमसूत्रोक्तानामेव पञ्च न्यायावयवानां प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नाया इत्यन्वर्था वैशेषिकाणां संज्ञाः। शब्दानित्यत्ववादोऽपि न्यायवैशेषिकयोः समानः। वैशेषिकोक्तपरमाणुकारणवादमपि न्यायदर्शनम्—"व्यक्ताद् व्यक्तानामुत्पत्तिः प्रत्यक्षप्रामाण्यात्" [४ १।११] इति सूत्रेण समर्थयति। यद्यपि नैयायिकानामयथार्थज्ञानभेदास्त्रयः संशयविपर्ययतर्कनामानः, वैशेषिकाणां च चत्वारः संशयविपर्ययानध्यवसायस्वप्नलक्षणाः; तथापि न्यायोक्ततर्कस्य वैशेषिकैर्विपर्ययभेदत्वेनाङ्गीकारात् पृथङ्नोपदेशः कृतः। सर्वतन्त्रविषयत्वाच्च छलादिवद् विशेषतो न व्युत्पादितः, वैशेषिकोक्तस्यानध्यवसायस्य निर्णयाभावरूपस्य संशयेऽन्तर्भावात्। अनध्यवसायस्य संशयत्वमध्यवस्यैव महर्षिर्गं तमोऽसाधारणधर्मदर्शनमपि संशयकारणत्वेनोक्तवान्। कणादस्तु भिन्नमभिप्रेत्य संशयकारणेऽसाधारणधर्मं न संगृहीतवानिति। स्वप्नस्य च विपर्ययेऽन्तर्भावाद् न्यायदर्शने पृथङ्नोपदेश इति नाविद्याभेदेऽप्यनयोर्वस्तुतो विरोधः।

ननु प्रमेयमुद्दिश्यैव न्यायवैशेषिकयोर्महान् भेदः। तथा हि—"आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" [१।१।९] इति न्यायसूत्रे द्वादशविधमेवप्रमेयमुपपादितम्। यावता वैशेषिके पृथिव्यादीनि नव द्रव्याणि, रूपादयश्चतुर्विंशतिर्गुणाः, उत्क्षेपणादीनि पञ्च कर्माणि, परापरभेदेन द्विविधं सामान्यम्, नित्यद्रव्यवृत्तयोऽनन्ता विशेषाः, एकः समवायः, चतुर्विधोऽभावश्चेति सप्तपदार्थानुक्रम्य तदवान्तरविशेषैरानन्त्यं प्रमेयस्योपवर्णितमिति चेदुच्यते—नहि प्रमाणविषयमात्रं प्रमेयं न्यायेऽभिमतम्, एवंविधस्य तु प्रमेयस्य प्रसिद्धत्वेन लक्षणानर्हत्वात्। यतो हि प्रमाण एव ज्ञाते सति तद्विषयीभूतोऽर्थः प्रमेयमिति ज्ञायत एव, किं तेन लक्षितेन। तस्माद् विशिष्टमेव प्रमेयमिह लक्ष्यते। यथाह जयन्तभट्टः—

"ज्ञातं सम्यगसम्यग् वा यन्मोक्षाय भवाय वा। तत्प्रमेयमिहाभीष्टं न प्रमाणार्थमात्रकम्॥"

[न्याय० प्रमे० पृ० २]। तथा च ज्ञातत्वे सति मोक्षोपयोगितावतामेव प्रमेयाणामुद्देशो न्यायशास्त्रे कृतः, प्रमाणविषयमात्राणां तु वैशेषिके कृत इति प्रमेयमादाय नानयोर्विरोधलेशोऽस्ति। पदार्थानां षोडशत्वसप्तत्वप्रयुक्तोऽपि नानयोर्विरोधः, नव्यैः सप्तस्वेव षोडशानामन्तर्भावस्य बहुत्र सम्पादनात्।

नाप्ययं नियमः सर्व एवाभिमताः पदार्थाः स्वशास्त्रेऽवश्यं तेनैव वा स्वरूपेण निर्दिश्येरन्निति। तथा सति शास्त्रान्तरत्वमेव तस्य हीयेत। शास्त्रकाराणामेषा रीतिर्यत् शास्त्रान्तरीयविषयान् स्वीकुर्वन्तोऽपि स्वस्योद्देश्यान्तरेण प्रवृत्ततया तान्न स्पृशन्ति वैशद्येन

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्युत्पादयन्ति वा। अस्मात् साम्यातिशयादेव च बहुपूर्वं वैशेषिकेण मेलनादिदं न्यायवैशेषिक इति मिलितसंज्ञया गीयते। वसुबन्धुना तूभयशास्त्राभिप्रायेणैव यत्र तत्र वैशेषिकशब्दः प्रयुक्तः। आर्यदेवस्य शतशास्त्रे उद्घृतानि न्यायसूत्राणि तट्टीकाकारो वैशेषिकसूत्रतयैवोदाजहार। एकादशशताब्द्यां शिवादित्येन रचितायां सप्तपदार्थ्यामनयोः साधु समन्वयो दृश्यते। नव्यन्यायस्योत्थानप्रचारानन्तरं तु न्यायवैशेषिके पूर्णतया परस्परं संमिलिते, यत्प्रभावाद् भाषापरिच्छेदादीनां भूयसां मिश्रग्रन्थानां रचना समजायत।

एवं च सत्यपि न्यायवैशेषिकयोः समानतन्त्रत्वे सामान्यस्य भेदघटिततयाऽनयोर्भेदेनाप्यवश्यं भवितव्यम्, यतश्च भिन्नमहर्षिभ्यां पृथक् पृथगनयोर्दर्शनयो रचना कृतेति। इदमेव शास्त्राणां शास्त्रत्वं यच्छास्त्रान्तराऽप्रतिपादितार्थप्रतिपादकत्वम्। एकस्य शास्त्रस्य शास्त्रान्तरेण गतार्थत्वे त्वनतिप्रयोजनकत्वं पश्चात्तनशास्त्रस्यापद्यते। अतोऽनयोः कियदंशेषु विद्यमानं वैशिष्ट्यमपि प्रदिदर्शयिषितमिह विविच्यते। वैशेषिकस्य वैशिष्ट्यावेदक आभाणक एष पठ्यते —

द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे।
यस्य न स्खलिता बुद्धिस्तं वै वैशेषिकं विदुः॥ इति।

अर्थाद् द्वित्वसंख्योत्पत्तिविषये, पाकजोत्पत्तिविषये, विभागजविभागविषये च यस्य बुद्धिर्न च्यवेत तं वैशेषिकं विदन्ति। उक्तस्थलत्रये हि वैशेषिकाणां विशेषोऽभिनिवेश इति यावत्।

तत्र द्वित्वविषये मीमांसका मन्यन्ते — यदा घटद्वयमेकत्र मिथः सन्निधानं प्राप्नोति तदानीमेव तत्र द्वित्वसंख्योत्पद्यते। पश्चादिन्द्रियसन्निकर्षानन्तरम् 'अयमेकोऽयमेकः' इत्यपेक्षाबुद्ध्या द्वित्वं ज्ञायते। तथा चापेक्षाबुद्धिर्द्वित्वस्य व्यञ्जिका न तूत्पादिका। यदा तु तद्घटद्वयं मिथो वियुक्तं भवति तदा द्वित्वस्य नाशः। एवमेव त्रित्वादिसंख्याविषयेऽपि बोध्यमिति।

वैशेषिकास्तु तेषामुक्तिमिमामसहमाना अज्ञाताया द्वित्वादिसंख्याया अभ्युपगमो निरर्थक इति मन्वाना अपेक्षाबुद्धिरेव द्वित्वादिसंख्यानामुत्पादिकेति वदन्ति। तेषामयमाशयः—प्रथमक्षण इन्द्रियस्य घटाभ्यां सह संबन्धः, द्वितीयक्षणे एकत्वत्वजातिज्ञानम्, तृतीयेऽयमेकोऽयमेक इत्यपेक्षाबुद्धिः, चतुर्थे द्वित्वसंख्योत्पत्तिः, पञ्चमे द्वित्वत्वजातिज्ञानं निर्विकल्पात्मकम्, षष्ठे द्वित्वत्वविशिष्टद्वित्वज्ञानम्, सप्तमे इमौ द्वौ घटाविति द्वित्वसंख्याविशिष्टद्रव्यज्ञानम्, अष्टमे च तादृशज्ञानादात्मनि संस्कार उत्पद्यते। अत्र पूर्वपूर्वोत्पन्नस्योत्तरोत्तरं प्रति कारणत्वादीदृश-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रमस्यावश्यकत्वम्। तत्रापेक्षाबुद्धिनाशेन द्वित्वस्यापि नाशो भवति। तत्रैषां नाशस्याप्ययमेव क्रमः — पूर्वपूर्वज्ञानस्योत्तरोत्तरज्ञाननाश्यत्वनियमादेकत्वत्वसामान्यज्ञानस्यापेक्षाबुद्धितो द्वित्वोत्पत्तिक्षणे नाशः, तृतीयक्षणे जाताया अपेक्षाबुद्धेः पञ्चमक्षणे जायमानाद् द्वित्वत्वजातिज्ञानाद् द्वित्वगुणज्ञानकाले षष्ठे क्षणे नाशः, अपेक्षाबुद्धिजन्यस्य द्वित्वगुणस्यापेक्षाबुद्धिनाशेन द्रव्यबुद्धिसमकालं नाशः, गुणबुद्धेर्द्रव्यबुद्धितः संस्कारोत्पत्तिसमकालं नाशः, द्रव्यबुद्धेरपि संस्कारानन्तरं नाश इति। इत्थं चापूर्वेयं वैशेषिकाणां द्वित्वोत्पत्तितन्नाशप्रक्रिया भृशं चमत्करोति विद्वच्चेतांसि। यद्यपि नैयायिका अपि नैतद् विरुन्धन्ति तथापि न तेषां विशेषतस्तत्राभिनिवेशः। वैशेषिकास्तु द्वित्वमपेक्षाबुद्धिव्यङ्ग्यं न तज्जन्यमिति केनाप्युक्ते सद्यस्तत्खण्डनार्थं स्वप्नादप्युत्तिष्ठेयुरिति।

पाकजप्रक्रियामाश्रित्य तु न्यायवैशेषिकयोर्महदन्तरं वरीवर्त्ति। पीलुपाकवादिनो वैशेषिकाः पिठरपाकवादिनो नैयायिकाश्च प्रसिद्धाः। तत्र परमाणव एव स्वतन्त्राः पच्यन्ते, तत्रैव पूर्वरूपनाशाग्रिमरूपाद्युत्पत्ती, ततश्च कारणगुणप्रक्रमेण पुनरवयविनि रूपाद्युत्पद्यत इति पीलुपाकवादिनः। सम्पूर्ण एव घटः पच्यत इति पिठरपाकवादिनः। पीलुपाकवादिनामयमाशयः— आपाके निक्षिप्तस्याऽऽमघटस्य भास्वरया तीव्रयाऽतिवेगवत्या च वह्निज्वालया नोदनादभिघाताद्वा घटारम्भकेषु परमाणुषु कर्म, ततोऽवयवानां मिथो विभागः, तत आरम्भकसंयोगनाशः, ततोऽवयविनो घटस्य नाशः, ततश्च स्वतन्त्रभूताः परमाणव एव पच्यन्ते। दृश्यते हि स्थाल्यामाहितानां तण्डुलादीनामध्यधःसन्तापनमात्रेण भर्जनात्तदानीमेव नाशः, क्षीरनीरादीनां चात्यन्तमुल्बणता। किञ्च यद्यवयविद्रव्यानाशस्तदा मध्यभागे पाकानुपपत्तिः, नहि दृढतरावयवावरुद्धे मध्यभागे तेजःसंयोगसंभावना, यतस्तत्र श्यामादिनिवृत्तिः स्यात्। तथा च श्यामा अवयवा अवयवी च रक्त इति महद्वैशसम्। तस्माद् विभक्ताः परमाणव एव पच्यन्ते, पुनश्च रक्तपरमाणुभिर्द्व्यणुकादिक्रमेण रक्तघटोत्पत्तिरिति। विस्तरभियैवात्र वैशेषिकोक्ता क्षणप्रक्रिया नोदाह्रियते।

पिठरपाकवादिनो नैयायिकास्तु मन्यन्ते—उत्पद्यमानान्यवयविद्रव्याणि सच्छिद्राण्येव जायन्ते, अतो घटादयोऽपि सच्छिद्रा एव भवन्ति। कथमन्यथा तत्रान्तर्निहितानां तैलघृतादीनां स्यन्दनं श्रयणं च, तस्मान्मध्यभागेऽपि तेजःसंयोगः स्यादेव। यदि च तत्रावयविघटस्य नाशः स्यात् तर्हि कथं स एवायं घट इति प्रत्यभिज्ञा, कथन्तरां सर्वास्ववस्थास्वापाकादौ घटादेस्तादृशस्यैव दर्शनम्, कथन्तमां च घटादेरुपरि निहितानां शरावोदञ्चनादीनां यथापूर्वमवस्थितिः; घटादिस्फुटने हि तेषां पातः स्यात्। अत एव यावन्त एवापाके निहिता घटास्तावन्त एवोपलभ्यन्ते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नाशपक्षे तु परमाणुभिद्व्यणुकादिक्रमेण न्यूनानामधिकानां वा तदानीमारम्भसम्भवात्। अत एवापाकोत्तीर्णस्य घटस्य तावदेव परिमाणमप्युपलभ्यते, अत एव च न घटस्थपूर्वरेखोपरेखादिचिह्नानां विलोपो भवति। किञ्च पक्वेऽपि कलशे निषिक्तानामपां बहिःशीतस्पर्शग्रहणं दरीदृश्यते, अतश्च यदि पाककाले ज्वलदनलशिखाकलानुप्रवेशकृतो घटविनाशः स्यात् कथं न शिशिरतरनीरकणनिकरानुप्रवेशकृतोऽपि विनाशो घटस्य प्रसज्येत। क्वचित्तु घटाद्याकृतिपरिवर्तनं काष्ठाद्यभिघातकृतमुपपद्यते। तस्मादविनष्टा एव घटादयः पच्यन्त इति।

विभागजविभागेऽपि न्यायवैशेषिकयोर्मतवैभिन्न्यम्। तत्र वैशेषिकनये विभागस्त्रिविधः—अन्यतरकर्मजः, उभयकर्मजः, विभागजश्चेति। विभागजोऽपि विभागो द्विविधोऽस्ति—कारणमात्रविभागजः कारणाकारणविभाग एकः, यथा कपालद्वयविभागात् कपालाकाशविभागः। कारणाकारणविभागजश्च कार्याकार्यविभागो द्वितीयः, यथाऽङ्गुलितरुविभागाद्धस्ततरुविभाग इति। नैयायिकास्तु विभागाज्जायमानं विभागान्तरं नैव मन्यन्ते। नहि कपालद्वयविभागो भिन्नो भिन्नश्च कपालाकाशविभागः। एकस्मिन्नेव देशे कपालाकाशयोरवस्थितत्वेनैकस्यैव विभागस्याश्रयभेदेन भेदात्। मूर्त्तानामेव समानदेशवृत्तित्वं विरुध्यते, आकाशस्य तु सर्वव्यापकस्यामूर्तस्य सर्वदेशवृत्तित्वं न व्याहन्यते। अत एवाकाशकपालयोरेकदेशवृत्तित्वाद् यत् कर्म 'कपालद्वयविभागजनकं तदेव कपालाकाशविभागमपि जनयेदिति विभागजविभागाङ्गीकारो निरर्थक इति।

वैशेषिका हि चतुर्धा विद्यां विभजन्ते—प्रत्यक्षलैङ्गिकस्मृतार्षभेदात्। नैयायिकाः प्रत्यक्षानुमित्युपमितिशब्दभेदेन चतुर्धा यथार्थज्ञानं विभजन्ते। अत्र वैशेषिकाः शब्दोपमानयोरनुमानेऽन्तर्भावं कुर्वन्ति। तथा च प्रशस्तपादभाष्यम्—"शब्दादीनाप्यनुमानेऽन्तर्भावः, समानविधित्वात्। यथा प्रसिद्धसमयस्यासन्दिग्धलिङ्गदर्शनप्रसिद्ध्यनुस्मरणाभ्यामतीन्द्रियेऽर्थे भवत्यनुमानम्, एवं शब्दादिभ्योऽपीति। व्याख्यातं चैतदाचार्योदयनेन किरणावल्याम्—"एते पदार्था मिथः संसर्गवन्तः, आकाङ्क्षादिमद्भिः पदैः स्मारितत्वात्, गामभ्याजेति पदार्थवत्। न च संसर्गस्य सामान्यतः सिद्धावपि विशेषसंसर्गसिद्धिः, संसर्गस्य संसृज्यमानविशेषापेक्षयैव विशिष्टरूपत्वात्" इति। अतोऽनुमानगतार्थत्वात् शब्दो न प्रमाणान्तरम्। एवमुपमानमपि न प्रमाणान्तरमपेक्षणीयम्, अनुमानेनैव संज्ञासंज्ञिसंबन्धप्रतिपत्तेः। तथा हि गोसदृशो गवयो भवतीत्यतिदेशवाक्यं श्रुत्वा वनं गतो नागरो गवयत्वविशिष्टं पिण्डमुपलभ्य स्मृतातिदेशवाक्यमनुमिनोति—अयमसौ

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गवयपदवाच्यः, असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात्, यन्न यत्पदवाच्यं तदसति वृत्त्यन्तरे वृद्धैर्न तत्र प्रयुज्यते, यथा गोपदं महिष इति व्यतिरेकिणा तत्सिद्धिः। योऽपि नैयायिकैरुपमानसहकारितया गोसादृश्यापेक्षया गवयत्वरूपाखण्डजातावेव तात्पर्य्ये लाघवरूपस्तर्कः स्वीकृतः, स वरमनुमान एव क्लृप्तप्रमाणभावेऽस्तु किं नूतनकल्पनीयप्रमाणभावेनोपमानेनेति।

नैयायिकास्तु प्रत्यवतिष्ठन्तेऽत्र—किं पुनरत्र प्रथमानुमाने साध्यम्? एते पदार्थाः संसृष्टा एवेति नियमो वा, संभावितसंसर्गा इति वा? तत्र न प्रथमः, अनाप्तोक्तपदकदम्बस्मारितैर्व्यभिचारात्। आप्तोक्त्या विशेषणीयमिति चेन्न, वाक्यार्थप्रतीतेः प्राक् तदसिद्धेः। न चैतत् शक्यमसर्वज्ञेन सर्वदा सर्वत्रायं सम्यग्ज्ञानवानाप्त इति निश्चेतुम्, भ्रान्तेः पुरुषधर्मत्वात्। यत्र क्वचनाप्तत्वमनाप्तस्याप्यस्तीति न तेनोपयोगः। ततोऽस्मिन्नर्थेऽयमभ्रान्त इति केनचिदुपायेन ग्राह्यम्। न चैतत् संसर्गविशेषमविज्ञाय शक्यम्। नापि द्वितीयः, योग्यतामात्रसिद्धावपि संसर्गनिश्चयात्, वाक्यस्य च संसर्गनिश्चयैकफलत्वात्। तस्माच्छब्दस्यैव संसर्गविशेषप्रत्यायकत्वसामर्थ्यं मन्तव्यम्।

एवं व्याप्तिज्ञानं विनाऽपि शाब्दबोधोऽनुभवसिद्धो लोके। नहि सर्वत्र शब्दश्रवणानन्तरं व्याप्तिज्ञाने प्रमाणमस्ति। एवमुपमितेरपि व्याप्तिज्ञानं विनैवानुभवादुपमानमपि प्रमाणान्तरत्वेनावश्यमङ्गीकरणीयम्। यदि च सर्वत्र शाब्दोऽयमिति स्थले व्याप्तिज्ञानं कल्प्येत तदा सर्वत्रानुमितिस्थले पदज्ञानं कल्पयित्वा शाब्दबोध एव किं न स्वीक्रियताम्।

एवं सूक्ष्मेक्षिकया वेगाख्यसंस्कारेऽपि मतभेदो दृश्यते न्यायवैशेषिकयोः। तथा हि युगपत् प्रक्षिप्तयोर्नाराचयोरयुगत्पातः कर्मणो वेगस्य तीव्रत्वमन्दत्वे विना न स्यात्। किञ्चित् कर्माल्पदेशावच्छेदेन संयोगं जनयति किञ्चिच्चाधिकदेशावच्छेदेनेति शरपातायौगपद्यमुपपद्यते। तादृशं च कर्मवैचित्र्यं वेगाधीनमिति तद्गते एव तीव्रत्वमन्दत्वे। स चायं वेग एक एव शरादौ यावत् पतनमनुवर्तत इति वैशेषिकसिद्धान्तः। नैयायिकानां तु सन्तानरूपेणाप्युत्पद्यते। कर्मणा वेगः, पुनर्वेगेन कर्मेति मतं वर्तते तेषाम्। "नोदनादाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरं च" [५।१।१७] इति पारमर्षं सूत्रं यद्यप्युभयपक्षे समानं तथापि स्पर्शवद्द्रव्यं संयोगविशेषविरोधीति विशेषपदोपादानेन प्रशस्तदेवाचार्यस्य तथाभिप्राय उन्नीयते। अन्यथोत्तरसंयोगविरोधीत्येव ब्रूयात्। वैशद्येन विशेषपदार्थविवेचनं तु कणाददर्शनस्य वैशेषिक इत्यन्वर्थां संज्ञामेव समर्पयतीति शिवम्॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्याप्तिप्रसारनिरूपणम्

श्रीढुण्ढिराजशास्त्री, नित्यानन्दवेदविद्यालयः, वाराणसी।

उपोद्घातः

श्रीमद्गौतममहर्षिप्रणीतन्यायशास्त्रस्य सकलविद्योत्तमत्वं श्रुतिस्मृतिपुराणादिषु प्रतिपादितम्। तथा हि—"न्यायो मीमांसा धर्मशास्त्राणि" इति श्रुतिः। "पुराणन्याय-मीमांसाधर्मशास्त्राणि" इत्यात्मोपनिषदि[1] खण्डे। मनुरपि—"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः" इति। याज्ञवल्क्येऽपि—"पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥" [१।३] इति। एवम्—"अङ्गानि चतुरो वेदा मीमांसा न्यायविस्तरः। पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश॥" इति विष्णुपुराणादिष्वपि। तर्कशास्त्रापरपर्यायस्यास्य धर्मज्ञानोपयोगित्वमुद्भावयता मनुना - "आर्षं धर्मोपदेशं च वेदशास्त्रा-विरोधिना। यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥ [मनु० १२।१०६] इति वचनेन निखिलविद्याशिरोमणित्वस्थापनात् तार्किकरक्षायां तर्कस्य सर्वप्रमाणानुग्राहकत्वं प्रसाधितम्। अत्र तर्कशब्देन श्रीमहर्षिगौतमविरचितान्वीक्षिक्या एव ग्रहणम्। अत एवोक्तममरसिंहेन—"आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः" [१।६।५] इति। अत एव च महर्षि-वात्स्यायनेनापि दृढीकृतमेतत्—"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्। आश्रयः सर्व-धर्माणां विद्योद्देशे प्रकीर्तिता॥" [न्यायभा० १।१।१] इति। अस्य चार्थो न्यायवार्त्तिक-तात्पर्य-टीका-तात्पर्यपरिशुध्यादौ श्रुतिस्मृतिपुराणप्रामाण्येन न्यायशास्त्रस्य सर्वविद्योत्तमत्वं व्यवस्थाप्य प्रपञ्चितस्तत्रैवानुसन्धेयः।

"इयमेवान्वीक्षिकी चतसृणां विद्यानां मध्ये न्यायविद्या गण्यते, 'आन्वीक्षिकी त्रयी विद्या दण्डनीतिश्च शाश्वती" [पृ० ४] इति न्यायमञ्जर्यां जयन्तभट्टेन, तथा—"अथ··· आन्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय" इति तत्त्वचिन्तामणौ गङ्गेशोपाध्यायेनापि स्फुटीकृतं न्यायशास्त्रस्य महत्त्वम्। अत एव च—"मथ्नामि मनसा तात दृष्ट्वा चान्वीक्षिकीं पराम्" इत्यादिना महाभारतीयमोक्षधर्मेऽपि महिमास्य वर्णितः। गौतमोक्तषोडशपदार्थ-निर्वचनस्योपनिषत्स्वप्युपलब्धेरस्य शास्त्रस्यावैदिकत्वमपि निरस्तं भवति—"सौक्ष्म्या-देतत्प्रमाणम्। ···न विना प्रमाणेन प्रमेयस्योपलब्धिः" [६।१४] इत्यादिना

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्याप्तिप्रसारनिरूपणम्

मैत्रायण्युपनिषदादौ गौतमोक्तपदार्थस्वरूपप्रणयनसंवाददर्शनात्। एवं सर्वोत्कृष्टेऽस्मिन् न्यायशास्त्रे मूलभूतानि गौतमाद्युक्तानि सूत्राणि। येषु—"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्ति-सामर्थ्यादर्थवत्प्रमाणम्" [१।१।१] इत्युपोद्घातद्वारा वात्स्यायनमुनिना प्रमाणानामेवात्र शास्त्रे परपक्षखण्डनद्वारा तत्त्वव्यवस्थापकत्वात् सर्वपदार्थेषु प्राधान्यं व्यवस्थापितम्, अन्येषां तदधीनत्वात्। अत एवोक्तमीश्वरकृष्णेनापि—"प्रमेयसिद्धिः प्रमाणाद्धि" [सा० का० ४] इति। तेनाखिलदर्शनेषु स्वस्वतत्त्वव्यवस्थापकता प्रमाणानामेवेति सिद्धम्। तानि च "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" [१।१।४] इति न्यायसूत्रे प्रमाणसमाख्यया प्रमा-करणत्वरूपलक्षणनिर्देशपूर्वकं विभक्तानि। एवं प्रमाणचतुष्टयवादिनो गौतममुनेर्मतमवलम्ब-मानेन लोकोत्तरनव्यन्यायप्रपञ्चप्रजापतिना महर्षिकल्पेन श्रीमद्गङ्गेशोपाध्यायेन षोडशपदार्थ-निरूपणपरस्य पञ्चाध्याय्यात्मकस्य न्यायशास्त्रस्य प्रमाणप्रकरणात्मकमेकमंशमवलम्ब्य प्रमाण-चतुष्टयस्थापनपरो युक्तिदीप्तिजालजटिलो महानिबन्धस्तत्त्वचिन्तामणिनाम्ना प्रथितः प्रमेय-तत्त्वज्ञानसौलभ्याय प्रमाणतत्त्वावधारणार्थमेव निरमायि। तस्य च—"अथ जगदेव दुःखपङ्क-निमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय। तत्र प्रेक्षावत्प्रवृत्त्यर्थं प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगमः [१।१।१] इत्यादावसूत्रयत्। तेष्वपि प्रमाणाधीना सर्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते" इति प्रामाण्यवादरहस्यस्यादिमवाक्यम्। एवं न्यायदर्शनस्थम्—"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" [१।१।३] इति पञ्चदशाक्षरात्मकं सूत्रमेकमाश्रित्य श्लोकद्वयसाहस्र्यात्मकश्चिन्ता-मणिमहानिबन्धः श्रीमद्गङ्गेशोपाध्यायेन स्वबुद्धिकौशलतया यथा व्यरचि तथा जानन्त्येव न्यायाम्बुधिपरिशीलनपरास्तर्करसिका विद्वांसः।

व्याप्तिप्रसारमूलोत्थानम्

तत्र सकलदर्शनेषु प्रत्यक्षानुमानयोः प्रमाणत्वमविवादम्। तत्राप्यनुमानस्यापरोक्ष-प्रमाणमध्येऽन्तर्भाव इति जैननैयायिकमतम्, तेषां परोक्षापरोक्षभेदेन प्रमाणद्वैविध्यस्य संमत-त्वात्। अनुमानेऽविनाभावाद्यनेकसमाख्यावलम्बिनी व्याप्तिरेव प्रधानेति च सर्वतन्त्रसिद्धान्तः। तत्र च गौतमस्य तदनुयायिनां च मते—"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि [१।१।३] इति सूत्रमेव व्याप्तिस्वरूपोत्थापकं नान्यत्। यत एतत्सूत्रीयानुमानपदव्याख्यानं विदधता वात्स्या-यनमुनिना—"मितेन लिङ्गेनार्थस्य पश्चान्मानमनुमानम्" [१।१।३] इत्यमनुमानलक्षणं प्रणीतम्। गौतमेनापि तल्लक्षणं विभागश्च—"अथ तत्पूर्वकं त्रिविधमनुमानं

११

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पूर्ववच्छेषवत्सामान्यतोदृष्टं च" [१।१।५] इति सूत्रे प्रदर्शितः। अस्य च व्याख्यानं विदधता भाष्यकृताऽग्रे—"लिङ्गलिङ्गिनोः संबन्धदर्शनं लिङ्गदर्शनं चाभिसंबध्यते। लिङ्गलिङ्गिनोः संबन्धदर्शनेन लिङ्गस्मृतिरभिसंबध्यते। स्मृत्या लिङ्गदर्शनेनाप्रत्यक्षोऽर्थोऽनुमीयते" [१।१।५] इति ग्रन्थेऽविनाभूतलिङ्गदर्शनस्य हेतुत्वोक्त्याऽविनाभावाख्यव्याप्तिपदार्थ एव व्यक्तीकृतोऽनुमानाख्यप्रमाणतया। तत्र च—"तानि ते तत्पूर्वं यस्य" [न्या० वा० १।१।५] इत्यादिग्रन्थेनोद्योतकरो भारद्वाजः—"वयं तु पश्यामः" इत्यादिना स्मृतेरप्रधानत्वमुद्भाव्य तदनुगृहीतस्य लिङ्गपरामर्शस्यैव मुख्यत्वं प्रतिपादयाञ्चकार। वाचस्पतिमिश्रेणैतदेवानुमोदितम्। एवं च तत्पूर्वकमित्यनुमानलक्षणादेव लिङ्गलिङ्गिसंबन्धज्ञानस्य सर्वसंमततयाऽस्ति कश्चित्संबन्धः, स चाविनाभावाद्यनेकसंज्ञया व्यवहृतः सकलदर्शनकारैरिति तत्स्वरूपं तस्याः क्रमिकप्रसारक्रमश्चेदानीं प्रदर्श्यते—

संख्या	मतम्	व्याप्तिस्वरूपम्	समयः
१	गौतमस्य	अविनाभावः।	ईशातः पूर्वं २५००
२	वात्स्यायनस्य	"	" २३००
३	बौद्धानाम्	"	" ४८७
४	व्योमशिवाचार्यस्य	"	ईशवीये २६५ वर्षे
५	धर्मकीर्तेः	स्वभावप्रतिबन्धः।	" ६३५-५०
६	वाचस्पतेः	स्वाभाविकः संबन्धः।	" ६००
७	रघूत्तमस्य	"	" "
८	भारद्वाजस्य	"	" १०००
९	हेमचन्द्रस्य	सहक्रमभाविनोः सहक्रमभावनियमः।	" "
१०	जयन्तभट्टस्य	नित्यसाहचर्यम्।	" "
११	उदयनाचार्यस्य	अनौपाधिकः संबन्धः।	" "
१२	मीमांसकानाम्	अव्यभिचरितः संबन्धः।	" "
१३	प्रशस्तदेवस्य	विधिर्नियमोऽन्वयरूपः।	" "
१४	श्रीधरस्य	विधिर्निरुपाधिकसहभावः।	" ११००
१५	वल्लभाचार्यस्य	कार्त्स्न्येन संबन्धः।	" १२००
१६	शङ्करमिश्रस्य	अनौपाधिकः संबन्धः।	" १३००

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्याप्तिप्रसारनिरूपणम्

संख्या	मतम्	व्याप्तिस्वरूपम्	समयः
१७	शशधराचार्यस्य	साध्यात्यन्ताभावासामानाधिकरण्यम् ।	१३०० ई०
१८	गङ्गेशोपाध्यायस्य	प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यम् ।	१३०० ई०
१९	रघुनाथशिरोमणेः	निरुक्तप्रतियोग्यनधिहेतुन्निष्ठाभावप्रतियोगितासामान्ये यत्संबन्धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन संबन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वम् । व्यापकसामानाधिकरण्यं च व्याप्तिः ।	१४७७ ई०
२०	मथुरानाथतर्कवागीशस्य	स्वावच्छेदकसंबन्धेन स्वावच्छेदकावच्छिन्नसामान्यसंबन्धिनिरुक्तहेतुसंबन्धिकप्रतियोगितासामान्ये साध्यतावच्छेदकसंबन्धावच्छिन्नत्व-यद्धर्मनिष्ठपर्याप्तावच्छेदकत्वोभयाभावस्तद्धर्मावच्छिन्नसाध्यसामानाधिकरण्यं व्याप्तिः ।	१५७० ई०
२१	जगदीशतर्कालङ्कारस्य	यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकसंबन्धसामान्ये साध्यतावच्छेदकसंबन्धत्वहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकसंबन्धत्वोभयाभावस्तादृशप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यम्, स्वावच्छेदकताघटकसंबन्धेन यादृशप्रतियोगितावच्छेदकानधिकरणहेत्वधिकरणतादृशप्रतियोगितासामान्ये यद्धर्मावच्छिन्नावच्छेदकताकत्वयत्संबन्धावच्छिन्नावच्छेद-	१६३५ ई०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संख्या	मतम्	व्याप्तिस्वरूपम्	समयः
		कताकत्वोभयाभावस्तेन संबन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वम्, व्यापकसामानाधिकरण्यं वा व्याप्तिः।	
२२	गदाधरभट्टाचार्यस्य	साध्यतावच्छेदकसंबन्धानुयोगितासामान्ये निरुक्तप्रतियोगिकत्वविशिष्टसंबन्धनिरूपितहेत्वधिकरणीभूतयत्किञ्चिद्व्यक्तिनिष्ठत्वाभावस्तेन संबन्धेन तद्धर्मावच्छिन्नस्य व्यापकत्वम्, व्यापकसामानाधिकरण्यं व्याप्तिः।[१] अथवा प्रतियोगितावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकानधिकरणकाभावप्रतियोगितावच्छेदकतासामान्ये साध्यता-	१७०० ई०

१. शिरोमण्युक्तप्रदर्शितोभयाभावघटितकल्पे संयोगेन घटादिसाध्यके घटत्वादिहेतावतिव्याप्तिवारणाय संयोगमात्र एव निरुक्तप्रतियोगिकत्वहेत्वधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयाभावमादृत्य यस्य घटस्याधःस्थितपटे येन संयोगविशिष्टबुद्धिर्जनिता तेनैव संयोगेन घटेन समं परिवृत्त्यस्थापिते तद्घटे घटविशिष्टबुद्धिरपि जायते, तत्र संयोगे घटप्रतियोगिकत्वघटानुयोगिकत्वस्यावश्यकतया संयोगेन घटसाध्यके तद्घटतत्पटान्यतरत्वरूपेण हेतुतायामतिव्याप्तिं निरसितुमयं कल्पोऽङ्गीकृतः। एवं च स्वस्मिन् स्वविशिष्टबुद्ध्यनुदयेन स्वप्रतियोगिकत्वविशिष्टसंयोगनिरूपितत्वस्य स्वनिष्ठानुयोगिताया-मसत्त्वात् संयोगीयानुयोगितासामान्ये घटप्रतियोगिकत्वविशिष्टसंबन्धनिरूपितत्वतद्घटनिष्ठत्वोभयाभावोऽक्षत इति नातिव्याप्तिः।

एवमुक्तप्रतियोगिताघटितोभयाभावकल्पे विषयतादिवृत्त्यनियामकसंबन्धेन साध्यतायां तादृशसंबन्धस्य वृत्त्यनियामकतयाऽभावप्रतियोगितानवच्छेदकत्वेन तत्संबन्धावच्छिन्नत्वस्याप्रसिद्धतयाऽव्याप्तिवारणाय वृत्त्यनियामकसंबन्धेन व्यापकतास्वीकारपक्षे तत्संबन्धस्याभावप्रतियोगितानवच्छेदकत्वमङ्गीकृत्य गदाधरभट्टाचार्येण द्वितीयव्याप्तिस्वरूपपक्षः प्रदर्शितः। तथा चोक्तसंबन्धेन साध्यतायां सद्धेतौ तत्संबन्धावच्छिन्नावच्छेदकताकसाध्यवदभावो न प्रतियोगितावच्छेदकताघटकसंबन्धेन प्रतियोगितावच्छेदकानधिकरणहेत्वधिकरणकः, अतोऽन्यसंबन्धेन साध्यादिमदभावः तत्संबन्धेनान्यावच्छिन्नाभावो वा तादृश इति तत्प्रतियोगितावच्छेदकतायामुभयाभावसत्त्वान्नातिव्याप्तिरिति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संख्या	मतम्	व्याप्तिस्वरूपम्	समयः
		वच्छेदकसंबन्धावच्छिन्नत्व-तादृशरूपावच्छिन्नत्वोभयाभाव इति व्यापकत्वार्थः। अन्यत्पूर्ववदिति।	
२३	अन्नंभट्टस्य	साहचर्यनियमः।	१७०० ई०
२४	केशवमिश्रस्य	उपाधिविधुरः संबन्धः।	”
२५	गोवर्धनस्य	सामानाधिकरण्यनियमः।	”
२६	जयनारायणस्य	यद्विशिष्टसमानाधिकरणा यावन्तः साध्यसमानाधिकरणास्तद्वत्वम्।	”
२७	जानकीनाथस्य	साध्यसमानाधिकरणस्वसमानाधिकरणयावत्कत्वं व्याप्तिः।	”
२८	भीमाचार्यस्य	साध्यसंबन्धितावच्छेदत्वम्।	१८७४ ई०
२९	वाक्यवृत्तिकारमेरुशास्त्रिणः	स्वाश्रयसामानाधिकरण्यसंबन्धेन हेतुसंबद्धं साध्यनिष्ठहेतुव्यापकत्वम्।	१८८० ई० ”
३०	पट्टाभिरामशास्त्रिणः	नियतसाहचर्यम्।	”
३१	विश्वनाथपंचाननस्य	हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यम्।	”
३२	दिनकरस्य	” ”	”
३३	रामरुद्रीकारस्य (मु० टीका)	” ”	”
३४	प्रभाकृतो नरसिंहपण्डितस्य	हेतुसमानाधिकरणान्योन्याभावीयप्रतियोगितावच्छेदकतासामान्ये यत्संबन्धावच्छिन्नत्व यद्धर्मावच्छिन्नत्वोभयाभावस्तत्संबन्धावच्छिन्नतद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिः।	”
३५	विरलाकृतः	अवश्यंभाविसाध्यसामानाधिकरण्यम्।	१९४३ ई०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्राच्यनव्यविवेकः

प्रदर्शितव्याप्तिविधासु संक्षेपतो द्वैविध्यं प्राच्यनव्यार्थान्तरभावात्। तत्र प्राच्यार्वाचीनत्व-स्वरूपं किमित्यधुना चिन्त्यते। अवच्छेदकावच्छिन्नशब्दादिभिर्व्याख्यातत्वेन न्यायशास्त्रस्यास्य नव्यत्वमिति केचित्। तच्छास्त्रतात्पर्यानवगमादयुक्तमिदमिति ब्रूमः। अन्यथा पातञ्जलदर्शनीय-समाधिपादस्थे—"पूर्वेषामपि गुरुः कालेनानवच्छेदात्" [१।२६] इति सूत्रे तद्भाष्यादौ चावच्छेदकादिशब्दव्यपदेशात्तेषामपि नव्यत्वं स्यात्। इदमत्र विविच्यते—किं तावन्न्यायशास्त्रस्य प्राचीनत्वमर्वाचीनत्वं वा? यद्यपि सूत्रकारीयप्रमाणभागनिरूपकत्वाद् गङ्गेशोपाध्यायप्रचा-लितशैलीसम्पन्नानां ग्रन्थानामद्ययावत्प्राचीनेष्वेवान्तर्भावः समुचितः, तथा तत्त्वचिन्तामण्यादि-गादाधर्यन्तेषु सविवेचनेषु ग्रन्थेषु कुत्राप्यादावन्ते च नव्यन्यायशास्त्रं प्राच्यन्यायशास्त्रं चेति व्यवहारस्यादर्शनात् सकलमेव न्यायशास्त्रमेकविधमेव भवितुमर्हम्; तथापि भारद्वाजकृतस्य न्यायवार्त्तिकस्य—"अतिजरतीनाम्" [तात्पर्यटीका] इत्यादिवाक्येन प्राचीनत्वं स्थापयन्तो वाचस्पतिमिश्रादय एव प्राच्यार्वाचीनव्यवहारे प्रमाणम्। न चैवमपि तत्त्वचिन्तामण्यादि-निबन्धानां नव्यत्वं पूर्वोक्तरीत्याऽसंभवीति वाच्यम्; न्यायसारमारभ्योपलभ्यमानेषु न्यायशास्त्र-निबन्धेषु—"इति प्राच्याः, इति नव्याः" इत्यादिना विद्वत्सूभयव्यवहारस्य प्रचलिततया तन्निरासस्यावश्यकत्वात्।

अत्र केचित्—आत्मादिप्रमेयपदार्थानां तत्त्वज्ञानान्निःश्रेयसमुररीकुर्वद्भिर्गौतमादिभि-र्निरात्मवादिचार्वाकबौद्धादिपराजयार्थमात्मनोऽनुमानेन सिद्धिः प्रादर्शि, परार्थानुमानापर-पर्यायस्य च न्यायस्य पूर्वाङ्गोत्तराङ्गसाकल्येनैव वस्तुसाधनक्षमत्वम्। अतस्तदनुयायिनां सूत्रग्रन्थानां शास्त्रीयसकलपदार्थप्रतिपादकानां भाष्यवार्त्तिकतात्पर्यटीकादिव्याख्यानिबन्धानां समानतन्त्र-सिद्धानां चोक्तलक्षणग्रन्थानां प्राचीनत्वम्, तदेकदेशप्रमाणव्याख्यानानां तु सव्याख्यानां तत्त्वचिन्तामण्यादिनिबन्धानां प्राचीनानामपि नव्यत्वव्यवहार इति।

तन्मन्दम्, तथा सति प्रमाणमात्रविवेचनपराणां जैनबौद्धादिप्राचीनग्रन्थानामपि नव्यत्वव्यपदेशप्रसङ्गात्।

बाहुल्येन नास्तिकत्वेनाभिमतचार्वाकबौद्धादिमतानामेव तत्त्वचिन्तामणिपूर्वकालिकेषु सूत्रभाष्यादिषु खण्डनस्योपलम्भात्तेषां प्राचीनत्वम्, तत्त्वचिन्तामण्यादिषु चास्तिकत्वेन गृहीतानां मीमांसासांख्यादिदर्शनानामेवाधिक्षेप इति नव्यत्वमित्यप्यपरे वदन्ति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्याप्तिप्रसारनिरूपणम्

वस्तुतस्त्वलौकिकनूतनप्रतिभाशालिना विद्वत्प्रकाण्डेन गङ्गेशोपाध्यायेन भाष्यग्रन्थं मन्थानं विधाय तात्पर्यटीका-दिङ्नागादिनिबन्धप्रग्रहैर्न्यायसूत्राम्बुधिं मथित्वा तत्सारभूतोऽयं तत्त्वचिन्तामणिकौस्तुभो नूतन एवोदपादीति तत्समयमारभ्य विनिर्मितस्य निखिलन्यायशास्त्रस्य नव्यत्वव्यवहार इति युक्तमुत्पश्यामः।

केचित्तु विद्वांसोऽस्य न्यायशास्त्रस्य प्राच्यं नव्यं नव्यनव्यं चेति त्रिविधं विभागं कल्पयन्ति। तत्र सूत्रकारमारभ्योदयनार्यात्पूर्वं प्राच्यम्, उदयनाद् गङ्गेशाद्वा दीधितिकारपर्यन्तं नव्यम्, शिरोमणिमारभ्य सर्वं न्यायशास्त्रं नव्यनव्यमिति तेषामाशयः।

तत्र तृतीयविभागमूलं विमृष्यमाणमवच्छेदकादिशब्दप्रवेशनिबन्धनमेवेति प्रतिभाति, तच्च व्यभिचरितत्वादयुक्तमित्युक्तमेव। किञ्चैवं सति "अतिजरतीनाम्" इति वाचस्पतिवचनाच्चातुर्विध्यमप्यापद्येत। उक्तवचनबलेनोद्योतकारान्तानां गौतमादीनामतिप्राचीनत्वम्, भारद्वाजोत्तरसमयवर्तिनां प्राचीनत्वम्, स्वस्य स्वसमयवर्तिनामुदयनादीनां च नव्यत्वमाविष्कुर्वता तदुत्तरसमयजातानां गङ्गेशोपाध्यायादीनां नव्यनव्यत्वस्य संभवदुक्तिकतया अतिप्राचीन-प्राचीन-नव्य-नव्यनव्येति चतुर्धा विभागस्य वक्तुं शक्यत्वात्। तस्मादुक्तवस्तुतस्त्वित्यादिना प्रदर्शित एव प्राचीनार्वाचीनव्यपदेशः साध्विति कृतं वाग्विवादेनेत्यलं विस्तरेण॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रविभूम्योश्चलत्वाचलत्वसाधनार्थमुपस्थापितानां प्रमाणानां नैयायिकदृष्ट्या समीक्षणम्

श्रीविभूतिभूषणभट्टाचार्यः, सरस्वतीभवनम्, वाराणसी ।

साम्प्रतं केचन विद्वांसो मन्यन्ते यन्न्यायशास्त्राध्ययनाध्यापनशीलानां जनानां तत्तद्-ग्रन्थालोचितविषयदृष्टान्तादिकमवलम्ब्यैव न्यायशास्त्रालोचनप्रवृत्तेर्दर्शनात् तादृशालोचनस्य चेदानीं पिष्टपेषणमात्रत्वान्निष्फलप्रायमिदं न्यायशास्त्रालोचनम् । अतोऽत्र न्यायशास्त्रीय-ग्रन्थेष्वनालोचितपूर्वं कञ्चिद् विषयमवलम्ब्य न्यायशास्त्रीयदृष्ट्या उपस्थापितानां युक्ति-प्रमाणादीनां समालोचनं करिष्यते ।

तत्र रविभूम्योश्चलत्वमधिकृत्य प्राचीननवीनज्यौतिषशास्त्रविदां मतवैषम्यं वर्तत इति सुप्रसिद्धमेव । तयोश्चलत्वाचलत्वसाधनार्थं तैर्ज्योतिर्विद्भिर्ये प्रमाणदृष्टान्तादय उपस्थापितास्त एवात्र नैयायिकदृष्ट्या विवेचनीयाः । एतादृशे चावसर आलोच्यस्य विषयस्य गाम्भीर्य्यम्, इदम्प्रथमताम्, मदीयं बुद्धिदोषं च संस्मृत्य निबन्धेऽस्मिन् यास्त्रुटयः सन्ति ता विद्वद्भिः शोध-नीया इत्यादिमेयं प्रार्थना ।

प्राचीनास्तु भूरियं जगतः केन्द्रस्था, इमामेव परिवृत्य प्रातिस्विकीषु कक्षासु रव्यादयो ग्रहा अहर्निशमचिन्त्येन वेगेन परिभ्रमन्तीति मन्यन्ते ।

उद्योतकराचार्य्येणापि प्राचीनानामाशयमनुसृत्यैवादित्यगतिरनुमिता । तैरुक्तं न्यायवार्त्तिके — "नैवेदमादित्यगत्यनुमानं साक्षात् । किं तर्हि ? देशान्तरप्राप्तिमनुमाय तया गत्यनुमानमित्यदोषः" इति । तथा चादित्यस्य देशान्तरप्राप्तिमेवादावनुमाय पश्चात् तयाऽनुमितया देशान्तरप्राप्त्या तत्कारणभूता गतिरप्यनुमीयते । देशान्तरप्राप्तेरनुमानप्रणाली च तत्रैव— "देशान्तरप्राप्तिमानादित्यः, द्रव्यत्वे सति क्षयवृद्धिप्रत्ययाविषयत्वे च प्राङ् मुखोपलभ्यत्वे च तदभिमुखदेशसंबन्धादनुत्पन्नपादविहारस्य परिवृत्य तत्प्रत्ययविषयत्वात्" इति, तथा "देशान्तर-प्राप्तिमानादित्यः, अचलचक्षुषो व्यवधानानुपपत्तं दृष्टस्य पुनर्दर्शनविषयत्वात्, देवदत्तवत्" [न्या० वा० (काशी सं०) पृ० ४८] इति च ।

प्रातरेकत्र प्राङ् मुखावस्थितो द्रष्टा आदित्यं दृष्ट्वा तदभिमुखमगच्छन् तत्रैव स्थितः सायं परिवृत्य प्रत्यङ् मुखः सन् पुनरादित्यं पश्यति । तच्चादित्यस्य देशान्तरप्राप्तिं विना न संभवतीति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तादृशोपलब्धिरादित्यस्य देशान्तरप्राप्तिं गमयति। तथैवाऽचलचक्षुः कश्चिद् द्रष्टा आकाशे कुत्रचिदप्यादित्यं दृष्ट्वा पुनः कालान्तरे तत्रैव तं न पश्यति तदप्यादित्यस्य स्थानान्तरप्राप्तिनिमित्तमेवेति तादृशदर्शनमादित्यस्य स्थानान्तरप्राप्त्यनुमापकं भवितुमर्हतीत्येवोद्योतकराचार्याणामाशयः। तन्मते भूमेरचलत्वस्य प्रत्यक्षसिद्धत्वादादित्याभिमुखदेशसंबन्धादनुत्पन्नपादविहरणस्य द्रष्टुर्देशान्तराप्राप्तिरर्थतः सिद्धेति, उक्तेनानुमानेनादित्यस्य देशान्तरप्राप्तिः सिद्धैव।

तदेतदाचार्याऽऽर्यभटा नानुमन्यन्ते। तैस्तु—

अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वत्।
अचलानि भानि तद्वत् समपश्चिमगानि लङ्कायाम्॥

इत्युक्त्वा खेचराणां पश्चिमदिग्गतेराश्रयौपाधिकभ्रान्तित्वं व्यवस्थापितम्। तथा चादित्यादीनां प्रतिदैवसिकी स्थानान्तरप्राप्तिप्रतीतिरपि भूमेश्चलत्वात् तदाश्रितस्य द्रष्टुराश्रयौपाधिकी भ्रान्तिरेव। यथा च नदीतटावस्थितस्य वृक्षादेरभिमुखदेशसंबन्धादनुत्पन्नपादविहरणस्याप्यनुलोमगतेर्नौस्थस्य कालान्तरे परिवृत्य तिष्ठत एव द्रष्टुश्चाक्षुषप्रत्ययविषयत्वसत्त्वेऽपि तेषां वृक्षादीनां स्थानान्तरप्राप्तिरुद्योतकराचार्योक्तेन हेतुनानुमातुं न शक्यते, तथैव पादविहरणादिव्यापारशून्येनाप्याश्रयस्य गतिवशात् स्वयं स्थानान्तरप्राप्तेन द्रष्ट्राऽऽश्रयौपाधिकभ्रान्तिवशादादित्यादीनां स्थानान्तरप्राप्तिरनुभूयत इति ह्याचार्याऽऽर्यभटस्याभिप्रायः। दृश्यते च नैयायिकवैशेषिकाचार्यैस्तमसो दशमद्रव्यत्वखण्डनावसरे प्रतीतस्यापि तमसश्चलनस्याश्रयौपाधिकभ्रान्तित्वं व्यवस्थापितमिति।

अत्रेदं मन्तव्यम्—यदापामरप्रत्यक्षविरुद्धस्य भूमेश्चलत्वस्य सिद्धिं विना केवलेन नौस्थपुरुषप्रतीतिविषयवृक्षादिदृष्टान्तबलेन नक्षत्रादीनां पश्चिमदिग्गतिनिरासः कर्तुं न शक्यते। नहि वयं दृष्टान्तस्येदृशीं काञ्चिच्छक्तिमङ्गीकुर्मः, प्रमाणनिरपेक्षया यया वस्तुसिद्धिरपि कर्तुं शक्यते।

ये खलु यथास्थित उद्योतकरोक्ते हेतौ नौस्थपुरुषप्रतीतिदृष्टान्तेन व्यभिचारम्, अचलाश्रयावस्थितिरूपोपाधिवशाद् व्याप्यत्वासिद्धिं वोद्भाव्य आदित्यादीनां गतिशून्यत्वं साधितं मन्यन्ते, ते परपक्षखण्डनमात्रेणैव स्वपक्षसिद्धिं मन्यमाना वैतण्डिकास्तादृशे हेतौ 'अचलाश्रयावस्थितस्य' इति विशेषणमात्रप्रक्षेपाद् हताशाः कर्तव्याः। तथा च देशान्तरप्राप्तिमानादित्यः, द्रव्यत्वे सति क्षयवृद्धिप्रत्ययाविषयत्वे च प्राङ्मुखोपलभ्यत्वे च तदभिमुखदेशसंबन्धादनुत्पन्नपादविहरणस्य (अचलाश्रयावस्थितस्य च) परिवृत्य तत्प्रत्ययविषयत्वादिति हेतौ

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न व्यभिचारः, न वा व्याप्यत्वासिद्धिः संभवतीति ।

इदानीमादित्यादीनां प्रात्यहिकपश्चिमदिग्गतिप्रतीतेराश्रयौपाधिकभ्रान्तित्वव्यवस्थापनार्थं भूमेश्चलत्वं साधनीयम् । अन्यथा स्वेष्टसिद्धेरसंभाव्यता न्यायनये स्पष्टा ।

ये तावद् भूमेरचलत्वाभ्युपगम आदित्यादीनां ग्रहाणां प्रतिदैवसिकोदयास्तमननिर्वाहार्थमचिन्तनीया पश्चिमदिग्गतिः कल्पनीयेति तामपेक्ष्य भूमेरेव सूर्यंद्यपेक्षया स्वल्पया गत्या भ्रमणं कल्पनालाघवानुरोधादङ्गीकरणीयमिति मन्यन्ते, तेऽपि लघुतरां कल्पनामेव वस्तुस्थितिमन्यथयितुं समर्थां मन्यमाना दयनीया एव नैयायिकैः ।

केषाञ्चिन्मते तु पाश्चात्त्यैर्नवीनैर्ज्यौतिषशास्त्रविद्भिर्भूमेश्चलत्वं प्रतिपादितमिति तैरुपस्थापितानि प्रमाणान्यत्र परीक्ष्यन्ते ।

तत्र निकोलस् कोपर्निकस् (१४७३ १५४३ ई० तदनुसारं च १५३०-१६०० वैक्रमसं०) महोदयेन तु—"ग्रहाणां गतिभेदाः सूर्यस्य जगत्केन्द्रत्वे भूम्यादीनां सूर्यमभितः स्वस्वकक्षासु भ्रमणे च कल्पिते सूपपादिता भवन्ति । भूमिश्च वर्षकालेन सूर्यमभितः स्वकक्षायां परिभ्रमति, प्रतिदिनं च स्वाक्षोपर्यावर्तते"[1] इत्युक्तम् ।

नवीनेयं कल्पना तु केनापि प्रमाणेनाऽनुगृहीता नासीत् । अस्या उपपत्त्यर्थं कोपर्निकस् महोदयेन केवलं लाघवाख्यं तर्कमेवोपस्थापितम्[2] ।

ताईको ब्राहे (१५४६-१६०१ ई० = १६०३-१६५८ वि०सं०) महोदयेन प्रमाणाभावनिबन्धना कोपर्निकसीया सूर्यकेन्द्रिकजगत्कल्पना प्रत्याख्याता ।

जॉन केप्लर् (१५७१-१६३० ई० = १६२८-१६८७ वि०सं०) महोदयेन तु वेधानीतग्रहस्थितिं प्राचीनमतानुसारिच्छेद्यकेनोपपादयितुमसमर्थेन सता दीर्घवृत्ताकारग्रहकक्षाकल्पनया दृग्गणितयोः संवाददर्शनादधोलिखिताः सिद्धान्ताः ख्यापिताः—

१—प्रत्येकस्य ग्रहस्य कक्षा दीर्घवृत्ताकारा, यस्याश्चान्यतरे केन्द्रे सूर्यस्तिष्ठति ।[3]

२—प्रत्येको ग्रहः सूर्यमभितस्तथा भ्रमति यथा च सूर्यतस्तत्तद्ग्रहप्राप्तिसूत्रं तुल्येन कालांशेन तत्तद्ग्रहकक्षान्तःस्थं तुल्यपरिमितमेवाऽऽकाशीयक्षेत्रं परिसर्पति ।[4]

---

१. द्रष्टव्यम् – एस्ट्रोनोमी बाई आर वी· बेकर, १९४७ एडी० पृ० १६२ अनु· ७-१४

२. तत्रैव द्रष्टव्यम्—पृ० १६५

३. तत्रैव द्रष्टव्यम् पृ० १६५

४. तत्रैव द्रष्टव्यम्—पृ० १६५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रविभूम्योश्चलत्वाचलत्वसमीक्षणम्

३—कयोश्चिदपि द्वयोर्ग्रहयोर्भगणवर्गौ तयोर्ग्रहयोर्मध्यकर्णघनयोस्तुल्यानुपातिनौ भवत इति।[१]

स्पष्टमेवैतद् यदेते सिद्धान्ता ग्रहाणां सूर्यमभितो भ्रमणवादमनुसृत्यैव निर्दिष्टाः। केप्लर्महोदयेन तु दीर्घवृत्ताकारग्रहकक्षाकल्पनायां दृग्गणितयोरविसंवाद एव कारणत्वेनोपन्यस्त आसीत्। नहि तेन महोदयेन भूमेश्चलत्वसाधनार्थं किमपि प्रमाणमुपन्यस्तमिति द्रष्टव्यम्। वेकरमहोदयेनापि तदेव समर्थितम्[२]।

गैलेलियो (१५६४-१६४२ ई० = १६२१-१६९९ वि०सं०) महोदयस्तु कोपर्निकसीयसूर्यकेन्द्रिकजगद्वादानुग्राहकं प्रमाणं दूरेक्षणयन्त्रयोगेनाविष्कर्तुं प्रवृत्तो गुरुमभितो भ्रमतश्चतुरस्ताराग्रहान् दृष्टवान्। येन च भूमेः सूर्यमभितो भ्रमणवादे तस्या निरन्तरं स्वस्थानं त्यक्त्वाऽग्रतो गमनेन चन्द्रमसः पश्चाद्वर्त्तित्वापत्तिर्निराकृता।[३] तादृशापत्तेर्निराकरणेऽपि सूर्यमभितो भूमेर्भ्रमणं न केनापि प्रमाणेन साधितमनेन महोदयेनेति मन्तव्यम्।

इस्साक न्यूटन (१६४२-१७२७ ई० = १६९९-१७८४ वि० सं०) महोदयेन तु गैलेलियोप्रभृतीनां पिण्डगतिसंबन्धिनः सिद्धान्तान् संगृह्य तत्संबन्धिनस्त्रयो नियमा उपनिबद्धाः। एते च न्यूटनीयगतिनियमा इति पाश्चात्त्यज्यौतिषादिशास्त्रेषु प्रसिद्धाः। ते च—

१—प्रत्येकं पिण्डं तावदचलं तिष्ठति, निजया समगत्यैकां सरलां रेखां वाऽनुसरति, यावत् तत्र पिण्डे प्रयुक्तं किञ्चिद्बहिर्बलं तं पिण्डं निजां स्थितिदशां यथोक्तां वा गतिदशां परिवर्तयितुं विवशीकरोति[४]। तथा च सति—

२—प्रयुक्तस्य बहिर्बलस्यानुलोमानुगमनेन पिण्डगुरुत्वस्य विलोमानुपातेन च बहिर्बलस्य प्रयोगदिशं व्यञ्जयन्तीं सरलां रेखामनुसृत्यैव तादृशपिण्डस्य गतौ परिवर्तनं (दिशो मात्रायाश्च) जायते।[५]

---

१. तत्रैव द्रष्टव्यम्—१६५

२. तत्रैव द्रष्टव्यम्—पृ० १६५

३. तत्रैव द्रष्टव्यम् —पृ० १६६

४ द्रष्टव्यम् - ए टेक्स्ट बुक आफ फिजिक्स, बाई डब्ल्यू० वाट्सन, एफ आर० एस० १९१४ पृ०डी० पृ० ६४

५. तत्रैव द्रष्टव्यम् पृ० ६५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

३—प्रत्येकस्मिन् बहिर्बलप्रयोग एव तद्विपरीतदिशस्तुल्यः प्रतिबलोऽपि नियमेन प्रयुज्यते। अथवा पिण्डयोर्द्वयोरन्योन्यापेक्षिणी तु कर्मणी सदा तुल्ये विपरीतदिक्के च भवतः।[१]

अत्रापि भूमेः सूर्यमभितो भ्रमणं तेन महोदयेन प्रमाणसिद्धं न कृतमिति स्पष्टमेव।

बेकरमहोदयमतेऽपि कोपर्निकस्महोदयेन सूर्यकेन्द्रिकग्रहभ्रमणवादे प्रचारितेऽपि तत्साधकप्रमाणाभावाद् भूमेश्चलत्वं तावत् सन्दिग्धमेवासीद् यावत् तारकारश्मीनां गमनमार्ग-प्रच्यवनेन भूमेः सूर्यमभितो भ्रमणं सुदृढमुपन्यस्तम्।[२] इदं तु तारकारश्मीनां गमनमार्ग-प्रच्यवनं १७२७ ई० (=१७८४ वि०सं०) वर्षे ब्राड्लेमहोदयेनाविष्कृतमिति बेकर-महाशयस्योक्तिः।[३]

वाट्सन्महोदयमते त्वत्रत्यानां तारकाणां भिन्नकालिकवेधानीतस्थितावुपलभ्यमान-भेदवशादालोकस्य गतिवेगः १७२७ ई० (=१७८४ वि०सं०) वर्षे ब्राडलेमहोदयेन निर्णीत आसीत्।[४]

यथा तथा वा भवतु, १७२७ ई०वर्षपर्यन्तं भूमेः सूर्यमभितो भ्रमणं तु प्रमाणसिद्धं नासीदित्युभयवादिसिद्धम्।

चित्रसं० १

चित्रसं० २

तदिदानीं १७२७ ई० वर्षे ब्राडलेमहोदयेन तारकारश्मीनां गमन-मार्गप्रच्यवनेन भूमेश्चलत्वं कथं साधित-मित्येव परीक्ष्यते। उक्तं प्रच्यवनपदार्थं व्याख्यातुकामेन बेकरमहोदयनोक्तम्—स्तिमिते वायौ मेघमुक्ता जलबिन्दवो भुवि लम्बरूपेण पतन्तः पथचारिणां मुखमण्डलेषु संपृक्ता भवन्ति। मेघतो लम्बरूपेण पतिता अपि ते बिन्दवः कस्यांश्चिदपि दिशि विचरतां पथिका-नामभिमुखं प्रसरन्त इव प्रतीयन्ते। तेषां पतनमार्गमपि पथिकगतिवेगानुसारं तिर्यग्भावं भजत

१. तत्रैव द्रष्टव्यम्—पृ० ६७
२. द्रष्टव्यम्—एस्ट्रोनामी बाई आर एच बेकर, पृ० २७३
३. तत्रैव द्रष्टव्यम्—पृ० ४८
४. द्रष्टव्यम्—ए टेक्स्ट बुक आफ फिजिक्स, बाई वाट्सन. पृ० ५०७

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इति प्रतीयते। तदिदं लम्बरूपेण पतितानामपि जलबिन्दूनां पतनमार्गस्य पथिकगतिवेगानुसारि तिर्यग्भावभजनमेव तेषां जलबिन्दूनां गमनमार्गप्रच्यवनमित्युच्यते[1]। लाघवानुरोधाच्च पाश्चात्यपदार्थयत्ताशास्त्रेष्विदं प्रच्यवनमिति कथ्यते।

अस्यैव प्रच्यवनपदार्थस्य निरूपणार्थं तावद् वाटसन्महोदयेनोक्तम्—

कल्प्यते यदेकस्मात् कसंज्ञकाद् महानालिकास्त्रात् 'अ-ब' संज्ञकस्य जलयानस्योपरि एकं गोलं निक्षिप्तम्। तद्धि जलयानं निक्षिप्तगोलगमनमार्गेण सह ९० दिगंशैरन्तरितेन मार्गेण गच्छन् वर्तते। यदि तद्गोलं 'द' बिन्दुं भित्त्वा जलयानान्तः प्रविष्टं तदा 'ई' बिन्दुं भित्त्वा निर्गच्छेत्। यतस्तद्गोलस्य जलयानान्तःसञ्चरणकाल एव जलयान-मप्यग्रतश्चलिष्यति। यतश्च 'फ' बिन्दुर्गोलगमनमार्गं प्राप्स्यति, अतो गोलं 'फ' बिन्दुं भित्त्वा निर्गतं भविष्यति। इदानीं जलयानान्तःस्थितेन गोलगमन-मार्गानुमापकेन 'द-फ' बिन्दुद्वयगामिसूत्रेण महानालि-कास्त्रस्थितिनिरूपणे कर्तव्ये 'क' बिन्दुरेव तत्स्थानमिति प्रतीयते। अथवा जलयानमार्गमनुसृत्य महानालिकास्त्र-मपि स्वस्थानात् प्रच्युतमिति प्रतीयते।



चित्रसं० ३

इदानीं दृष्टान्तस्थजलयानस्थाने सूर्यमभितः स्वकक्षायां भ्रममाणा भूः, तथा गोलस्थाने च कस्याश्चित् तारकाया निर्गतो भुवं प्राप्तस्तेजोरश्मिः स्थाप्यते; भूमित-स्तत्तारकागामिसूत्रं च भुवो गमनदिशा ९० दिगंशैरन्तरितं वर्तत इति कल्प्यते।

यदि भूश्चला स्यात् 'द' संज्ञकं दूरेक्षणयन्त्रमपि तत्तारकाभिमुखं स्थापितं स्यात् तदा दूरेक्षणयन्त्रस्यानुदैर्घ्या मध्यरेखा वर्द्धिता सती तत्तारका-प्रापिणी स्यादेव। भुवश्चलत्वाच्च तदुपरि स्थापितं दूरेक्षणमपि तदुपदृश्य-भागपतितस्य तारकातो निर्गतस्यालोकरश्मेर्दूरेक्षणोपचक्षुर्भागगमनकालपर्यन्तं भूकक्षामनुसृत्याग्रतश्चलितम्। इदानीमपि दूरेक्षणस्यानुदैर्घ्या मध्यरेखा यदि तत्तारगामिनी क्रियते तदाऽऽलोकरश्मयः पश्चाद्वर्त्तिनः सन्तो दूरेक्षणो-पचक्षुर्भागस्थस्य स्वस्तिकस्य पार्श्वत एव 'फ' बिन्दौ तत्तारकायाः प्रतिबिम्ब-मुत्पादयिष्यति। यथा किल पूर्वस्मिन् दृष्टान्ते जलयानस्याचलत्वे निक्षिप्तस्य

चित्रसं० ४

१. द्रष्टव्यम्—पस्त्रानोंमो बाइ बेकर, पृ० ४८

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गोलस्य 'द ई' बिन्दुद्वयगामिसूत्रेणैव जलयानं भित्त्वा बहिर्गमनं संभवति, परन्तु तस्य चलत्वात् 'द-फ' सूत्रेणैव तस्य बहिर्गमनं भवेत्। तथैव दूरेक्षणोपचक्षुर्भागपतितस्य प्रतिबिम्बस्य तत्रत्यस्वस्तिकोपरि स्थापनार्थं दूरेक्षणानुदैर्घ्या मध्यरेखा 'फ-क' दिशि स्थापनीया। तथा कृते चालोकरश्मेः 'द' बिन्दुतः 'फ' बिन्दुपर्यन्तगमनकाल एव भूरपि 'फ' बिन्दुतः 'ई' बिन्दुपर्यन्तं चलिष्यतीति ध्येयम्[१]।

इदमत्रावधेयम्—वाट्सन्महोदयस्य कथनानुसारं ब्राड्लेमहोदयेन त्वालोकरश्मेर्गतिर्वेगेयत्ता भुवं सूर्यमभितो भ्रममाणामङ्गीकृत्यैवोक्तेन प्रयोगेण दूरेक्षणोपदृश्यभागपतितस्य तदुपचक्षुर्भागपर्यन्तं गच्छत आलोकरश्मेः प्रच्यवनमात्रया निर्दिष्टा। वाट्सन्महोदयेन भुवोऽचलत्वे यादृशी स्थितिर्भवेत्तत्कथनावसरे तु भुवोऽचलत्ववादिनां मते तारकाणां गतिरपि स्वीक्रियत इति विस्मृत्यैव—"यदि भूरचला स्यात्" इत्यादिना "दूरेक्षणयन्त्रस्यानुदैर्घ्या मध्यरेखा वर्द्धिता सती तत्तारकाप्रापिणी स्यादेव" इति यदुक्तम्, तद् वस्तुस्थितिविरुद्धमिति मन्तव्यम्।

ब्राड्लेमहोदयेन सूर्यमभितो भुवो भ्रमणं साधयितुमालोकरश्मीनां प्रच्यवननिर्णायकः प्रयोगः कृत इति वेकरमहाशयोक्तिस्तु तत्र प्रयोगे सिद्धत्वेनाभ्युपगतस्य भुवो भ्रमणस्य साध्यत्वेनोपस्थापनाद् वस्तुस्थितिविरुद्धैवेति मन्तव्यम्। अभ्युपेत्यापि ब्रूमः—तारकातो निर्गता दूरेक्षणोपदृश्यभागपतिता आलोकरश्मयस्तस्मादुपदृश्यभागादुपचक्षुर्भागपर्यन्तगमनेनोपचक्षुर्भागस्थस्य स्वस्तिकस्य पार्श्वतस्तारकायाः प्रतिबिम्बं यदुत्पादयति तद् भुवश्चलत्वमङ्गीकृत्य रश्मीनां प्रच्यवनवादेन यथोपपादयितुं शक्यते, तथैव भुवः स्थिरत्वमङ्गीकृत्य तारकाणां गतिकल्पनयाप्युपपादयितुं सुकरमेवेति न तेन प्रच्यवनवादेन भुवो गतिमत्त्वं साधयितुं योग्यम्। ब्राड्लेमहोदयेन तारकाणां गतिवशाद् दूरेक्षणोपचक्षुर्भागगतस्वस्तिकस्य पार्श्वतः प्रतिबिम्बोत्पत्तिर्नैव संभाव्यत इति कुत्राप्यप्रतिपादनात् तारकाभूम्योरन्यतराया गतिमत्त्व एव स्वस्तिकस्य पार्श्वतः प्रतिबिम्बोत्पत्तिसंभावनयोक्तेन प्रयोगेण भूमेरेव चलत्वमुपपन्नमिति नैव वक्तुं शक्यते।

---

१. द्रष्टव्यम्—ए टेक्स्ट बुक आफ फिजिक्स, वाई वाट्सन, पृ० ५८७।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

रविभूम्योश्चलत्वाचलत्वसमीक्षणम्

वेकरमहोदयेन प्रच्यवनभङ्गिव्याख्यानावसरेऽपि वाट्सन्महोदयवद् भुवश्चलत्वे ताराणां निश्चलत्वमभ्युपेत्यैवापत्तिः प्रदर्शिता[1]। तत्रैव यदि भुवोऽचलत्वे ताराया गतिमत्त्वं कल्पितं स्यात् तदा फलव्यक्तिस्तुल्यैव भविष्यतीति स्पष्टमेव गतिवित्तिशास्त्रविदाम्।



चित्रसं० ५

फुकोमहोदयेन १८५१ ई० =(१६०८ वि०सं० वर्षे दोलकप्रयोगेण भुव आह्निकी गतिः (स्वाक्षोपर्यावर्त्तनरूपा) साधितेति श्रुतमस्माभिः, परं तदीयप्रयोगविषये प्रामाणिकाणां ग्रन्थानामलाभात् तत्र मौनमेव सम्यगिति विभावनीयम्।

तथा च कोपर्निकस्महोदयकल्पितं भुवः सूर्यमभितो भ्रमणं साधयितुं यानि खलूल्लिखितानि साधनानि १६०८ विक्रमाब्दात् प्राक् पाश्चात्त्यैर्विद्वद्भिरभ्युपगतानि तानि नैयायिकदृष्ट्या साध्यसिद्ध्यसमर्थानीत्यद्यात्रैव विरमामः॥

---

१. द्रष्टव्यम्—एस्ट्रोनोमी बाई बेकर, पृ० ५०

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चित्रपरिचयः

चित्रम् १ । अत्र जलबिन्दूनां पतनमार्गं स्थितस्य पथिकस्य हस्तधृतच्छत्रोपरि लिखितेन शरेण प्रदर्शितम् ।

चित्रम् २ । अत्र लम्बरूपेण पततामपि जलबिन्दूनां पथिकगतिवशादनुभूततिर्यग्भावमात्रा छत्रोपरि लिखितेन शरेण प्रदर्शिता । तत्रैव पार्श्वस्थेन लम्बितेन शरेण तु तेषां जलबिन्दूनां वास्तवं पतनमार्गमपि प्रदर्शितम् ।

चित्रम् ३ । अत्र 'अ-ब' रेखामनुसृत्यैव जलयानस्य 'क-ई' रेखामनुसृत्य च गोलगतिर्ज्ञातव्या ।

चित्रम् ४ । अत्र द = दूरवीक्षणोपदृश्यभागः । ई = दूरवीक्षणोपचक्षुर्भागस्थं स्वस्तिकचिह्नम् । क = तारका । फ = वास्तवं प्रतिबिम्बस्थानम् । ई = भुवोऽचलत्वदशायां प्रतिबिम्बस्थानम् । क = प्रतीयमानं तारकास्थानम् । शरः भुवो गतिबोधकः ।

चित्रम् ५ । अत्रापि चतुर्थचित्रवत् क = भूस्थो द्रष्टा । घ = तारका । 'क-घ' रेखानुसारं तदभिमुखं स्थापिते दूरवीक्षणे भुवो गतिवशात् 'ख' स्थानं प्राप्तो द्रष्टा 'ख-ग' रेखाग्र एव 'घ' संज्ञकां तारकां पश्यतीति वेकरमहोदयमतम् । तत्र यथा 'क' बिन्दुतो द्रष्टुश्चलनेन 'ख-ग' रेखाग्रे 'घ' तारकाया दर्शनं भवति, तथैव 'ख' बिन्दुस्थद्रष्टुर्निश्चलत्वे 'घ' तारकाया गतिवशात् 'ग' स्थानप्राप्तावपि भवेदिति मन्तव्यम् ।

———

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अवयविस्वरूपविमर्शः

स्व० प० केशवद्विवेदी, भूतपूर्वन्यायप्राध्यापकः, राजकीयसंस्कृतमहाविद्यालयः, वाराणसी।

अथ विदितमेव तत्रभवतां विपश्चिद्पश्चिमानां यदयमवदीर्णसुवर्णभार इव तृषाविदीर्णमानसानां कुपितफणिफणानातप इव तपनतापसंतप्तानां महेन्द्रजालोपमनयनलोभकारिदर्शनः, अनेकविधबाधनालब्धदुःखकल्लोलमालः, रागद्वेषमोहादियादोभिरतिभीषणश्च वस्तुतः स्वप्ननिर्विशेषः संसारवारांनिधिः, अपरं च निसर्गप्रतिकूलस्वभावं सर्वजनसंवेदनसिद्धं दुःखजालं समूलघातं जिघांसवोऽशेषासुधारिण इति।

परन्तु मिथ्याज्ञानजनितावयव्यभिमानसमुद्भूतरागद्वेषमोहात्मकदोषत्रयकारणकधर्माधर्मपरम्परापायमन्तरा दुःखमन्तयितुं कोऽपि न प्रभवति प्राणभृदिति तदपायोपायावयविन्यभिमानमेवादावपेक्षितं भवति दुःखं समूलकालंकषितुमभिलषताम्। यदभिहितं भगवताऽपि नायिकादिदेहात्मकेऽवयविनि भोग्यत्वज्ञानात्मकाभिमानो रागादीनां निदानभूतो भवति। स च रागादिप्रयोज्यदुःखं जिहासुभिः परित्याज्यमित्याशयेन गौतममुनिना—"दोषनिमित्तं त्ववयव्यभिमानः" [४।२।३] इति। अवयव्यभिमानहाननं च तन्निदानमिथ्याज्ञानोच्छेदनहेतुभूतावयवितत्त्वज्ञाननिबन्धनमेवेत्यवयवितत्त्वज्ञानमेव प्रेक्षावतां प्रथममपेक्षितमिह भवति।

किन्तु द्रव्यत्वं स्पर्शवत्त्वं वाऽणुत्वव्याप्यं न वेत्यादिविप्रतिपत्तिकरालव्यालकुलकवलितसामान्यतत्त्वकोऽवयवी जात्वपि [1]परमाणुस्वरूपविमर्शानन्तरमवयविस्वरूपं निरूप्यते। तत्र च विचाराङ्गसंशयजनकं द्रव्यत्वं स्पर्शवत्त्वं वाऽणुत्वव्याप्यं न वेत्यादिविप्रतिपत्तिस्वरूपं सामान्यविचारगारुडकररुहादृते न विशेषतः परित्रातुं शक्यमिति सामान्यतो विचार एवात्राश्रीयते।

अत्र च बौद्धाः शरीरघटादयः परमाणुपुञ्जरूपा एव, न तु तदतिरिक्तमवयविरूपं द्रव्यान्तरमिति मन्यन्ते। तेषामयमाशयः—खरस्नेहौष्ण्येरणस्वभावाश्चतुर्विधाः परमाणवः। तत्राद्यो रूपरसगन्धस्पर्शस्वभावः, द्वितीयो रूपरसस्पर्शस्वभावः, तृतीयो रूपस्पर्शस्वभावः, चतुर्थः स्पर्शस्वभावः। एत एव च चतुर्विधाः परमाणवो मिथः संहताः पृथिव्यप्तेजोवायुशब्दैः क्रमाद् व्यपदिश्यन्ते। तानि चैतानि चतुर्विधभूतानीत्युच्यन्ते। त एव च पृथिव्यादयः संघातविशेषापन्नाः शरीरेन्द्रियविषयरूपा भवन्ति।

[1] द्रष्टव्यम्—सारस्वती सुषमा, व० ७ अ० १, पृ० २५।

१३

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं च परमाणुसञ्चयादतिरिक्तो यद्यवयवी स्यात्तर्हि केनचित् प्रमाणेन तदतिरिक्ततयोपलभ्येत। न चोपलभ्यते, अतः परमाणुसञ्चयादतिरिक्तोऽवयवी नास्त्येव। न चायं घट इत्यादिप्रत्यक्षमेवातिरिक्तावयविनि प्रमाणम्, अन्यथेयं प्रतीतिः किमवगाह्योपपद्येत। तत्कथं प्रमाणानुपलम्भ इति वाच्यम्; परमाणुपुञ्जावगाहित्वेनैवोक्तप्रतीत्युपपत्तेः।

न चायं घट इति प्रतीतेः परमाणुपुञ्जविषयकत्वे मृत्तिकासमुदायेऽपि तथा प्रतीत्यापत्तिरिति वाच्यम्; विलक्षणसंयोगविशिष्टपरमाणूनामेव तद्विषयकत्वस्वीकारेण तदापत्तिवारणात्। न चावयविनः परमाणुपुञ्जरूपत्वे परमाणूनां नित्यत्वाद् घटादावुत्पत्तिविनाशप्रतीत्यनुपपत्तिरिति वाच्यम्; पदार्थमात्रस्यैव क्षणिकतया परमाणूनामुत्पत्तिविनाशयोः स्वीकारात्। न च तथापि परमाणुपुञ्जस्य घटरूपताङ्गीकारे कपालाद् घट इति प्रतीत्यनुपपत्तिरिति वाच्यम्; कपालस्यापि परमाणुपुञ्जरूपतया घटरूपपरमाणुपुञ्जे कपालरूपपरमाणुपुञ्जजन्यत्वस्वीकारात्, पुञ्जात्पुञ्जोत्पत्तिरिति सिद्धान्तात्।

नैयायिकाः पुनरेतदसहिष्णवः परमाणुद्वयाद् द्व्यणुकं द्व्यणुकात् त्र्यणुकं त्र्यणुकाच्चतुरणुकमित्येवं क्रमेण तत्तदवयवेषु समुत्पद्यमानमवयविरूपं द्रव्यान्तरं शरीरघटादिकमङ्गीकार्यं न तु परमाणुपुञ्जरूपमिति प्राहुः।

तेषां चायमाशयः—घटादेः परमाणुपुञ्जरूपताङ्गीकारे परमाणुष्वेकत्वस्य स्थौल्यस्य च बाधेनैको घटः स्थूल इति प्रतीतेः प्रामाण्यानुपपत्तिः स्यात्, तस्मादेको घटः स्थूल इति निराबाधप्रत्यक्षात्मकप्रतीतेः प्रामाण्योपपत्तये स्थूलात्मकमेकं द्रव्यान्तरमवयविरूपमवश्यमङ्गीकार्यम्।

न चैको घटः स्थूल इत्याकारकं ज्ञानं नानुभवरूपं (निर्विकल्पकम्), किन्तु सविकल्पकमेव; अतो न प्रमाणम्, अनुभवस्यैवास्माकं मते प्रामाण्यात्। तथा च न तेनैकस्थूलद्रव्यसिद्धिर्येनावयविसिद्धिः स्यात्, भ्रमज्ञानस्य वस्तुसाधकत्वविरहात्। अन्यथा रजतभ्रमेण रजतोपलब्धिप्रसङ्गादिति वाच्यम्; साक्षात्त्वेनास्याप्यनुभवरूपतया प्रामाण्यसंभवेन वस्तुसाधकत्वात्।

नन्वौपाधिकमेवास्य साक्षात्त्वमनुभूयते न तु वास्तवम्, अतस्तस्याप्रामाण्येन न तदधीनवस्तुव्यवस्थितिरिति वाच्यम्; विकल्पासहत्वात्। तथा हि—समानाकार उपाधिर्विभिन्नाकारो वा? नाद्यः, उक्तसविकल्पकसमानाकारकस्यैकः स्थूलो घट इत्यनुभवस्योपाधितयाऽङ्गीकारे तत एव स्थूलैकावयविसिद्धिः। न द्वितीयः, विभिन्नाकारानुभवस्योपाधित्वं स्वीकृत्यैकः स्थूल इति विकल्पस्य यथा साक्षात्त्वोपपत्तिस्तथा नीलादिसविकल्पानामपि साक्षात्त्वोपपत्तौ सकलप्रत्यक्षो-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

च्छेदापत्तेः। अत एकः स्थूल इति प्रत्यक्षस्य प्रामाण्यादेकत्वस्थौल्यविशिष्टद्रव्यसिद्धावकामेनावयवी स्वीकर्तव्यः।

न च परमाणव एव स्थूलाः, तथा च तानादायैव स्थूल इति प्रत्यय उपपद्यत इति वक्तुं शक्यम्; तत्र स्थौल्यस्वीकारे परमाणुत्वव्याघातापत्तेः। न चैकपरमाणौ स्थौल्यविरहेऽपि परमाणुसमुदायस्तथा स्यादिति वाच्यम्; त्वन्मते समुदायस्य समुदायिभ्योऽनतिरिक्तत्वेन परमाणुसमुदायस्य परमाणुरूपतया शतमप्यन्धानां न पश्यति सहस्रमपि पङ्गूनां न चलतीति न्यायेन प्रत्येकपरमाणूनामस्थौल्यस्वभावेन तत्समुदायस्यापि महत्त्वरूपस्थौल्यासंभवात्, स्वभावस्यातिक्रमासंभवात्।

न च परमाणुसमुदायस्य परमाणुभ्योऽनतिरिक्तत्वं न स्वीक्रियतेऽस्माभिः, किन्त्वतिरिक्तत्वमेव। एवं च परमाणूनामस्थौल्यस्वभावेऽपि विलक्षणसंयोगविशिष्टपरमाणुसमुदायस्य तदतिरिक्ततया तत्र स्थौल्याङ्गीकारेऽपि न स्वभावातिक्रमः। अन्धपङ्गुसमुदाये तु वैलक्षण्यनियामकस्यासत्त्वेनान्धपङ्गुसमुदायस्यान्धादिवैलक्षण्याभावेऽप्यत्र नियामकस्य विलक्षणसंयोगस्य सत्त्वेन तत्संभवादिति वाच्यम्; अवयव्यपह्नववादिना त्वया परमाणुसमुदायस्य परमाणुभ्योऽतिरिक्ततयाऽभ्युपगमासंभवात्, अन्यथा विलक्षणसंयोगादीनां विनिगमकाभावेनातिरिक्तसमुदायनियामकवदतिरिक्तावयविनियामकत्वापत्तेः; यद्यतिरिक्तः समुदायः स्वक्रियते तह्यवयविना किमपराद्धमिति पर्यनुयोगे विनिगमकालाभेन भवतां मौनातिरिक्तसमाधानासंभवाच्चेति।

ननु स्थौल्यं न परिमाणविशेषः, किन्त्वन्योन्यसंबद्धत्वे सति परमाणूनां नानादिग्देशव्यापित्वमेव, तच्चात्र संभवतीति वाच्यम्; प्रत्येकपरमाणुषु नानादिग्देशव्यापित्वाभावेन तत्र स्थौल्यायोगात् पुनस्तदवगाहित्वानुपपत्तेः।

न च नानात्वैकार्थसमवायि नानादिग्देशव्यापितैव स्थौल्यमिति वाच्यम्; नानात्वपर्याप्त्यधिकरणवृत्तिनानादिग्देशव्यापित्वस्य स्थौल्यरूपताङ्गीकारे तद्घटकनानात्वपर्याप्त्यधिकरणताया एकत्वविरोधिन्याः परमाणुषु भानेनैकत्वभानासंभवात्, एकत्वसामानाधिकरण्येन पुनरेकः स्थूल इति प्रतीत्यनुपपत्तेः। न च केवलं स्थूल इत्येव प्रत्ययो जायते, अपि त्वेकः स्थूल इति प्रत्ययनियमः। न चैको घटः स्थूल इति प्रतीतौ नानात्वपर्याप्त्यधिकरणत्वस्य स्थौल्यघटकतया भानेऽपि निर्धर्मितावच्छेदकस्यैव तस्य भानेनैकत्वधर्मितावच्छेदकावच्छिन्ने तदभावविरहाद् विरोधित्वाभावेनैकत्वभानं स्यादिति वाच्यम्; बहुष्वेकमिति बुद्धेः क्वाप्यदर्शनेन परमाणुसमुदायविषयकत्वे पुनरुक्तप्रतीतेरेकत्वावगाहित्वानुपपत्तेः। न चान्यत्र बाधकादिबलाद्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बहुष्वेकमित्याकारकप्रतीत्यनुत्पादेऽप्यत्र परमाणुसमुदाये फलबलकल्प्यबाधकविरहप्रयोज्यतदवगाहित्वं स्यादिति वाच्यम् ; अन्यत्रेवात्रापि नानार्थविषयिणी बुद्धिर्नैकत्वावगाहिनी समुच्चितविषयत्वादित्यनुमानस्य सामान्यतो बाधकस्य सत्त्वात् । न च सेनाया वनस्य च वस्तुतो नानापदार्थरूपत्वेऽपि दूरादगृह्यमाणपृथक्त्वेन बहुष्वेकमिति प्रत्यक्षबुद्धिर्यथोत्पद्यते, एवं परमाणुपुञ्जस्य नानापदार्थरूपत्वेऽपि बहुष्वेकमिति प्रत्यक्षबुद्धिः स्यात् । तथा चैका सेनैकं वनमित्यादिनानार्थावगाहिबुद्धावेकत्वावगाहित्वदर्शनेन नानार्थबुद्धिर्नैकत्वावगाहिनीत्यनुमानमनैकान्तिकमिति वाच्यम्; उपलभ्यमानरूपेष्वेव कुतश्चिन्निमित्तादनुपलभ्यमानपृथक्त्वेष्वेकमिति प्रत्ययदर्शनेनात्र च परमाणुनामतीन्द्रियतया तद्विरहेण सेनावनादिवदस्या बुद्धेरेकत्वावगाहितोपपादनासंभवात् । तथा हि—यत्र सामीप्ये सत्येकशो गृह्यमाणपृथक्त्वानां सेनावनाङ्गानां दूरत्वरूपकारणनिबन्धनं पृथक्त्वस्याग्रहणं यत्र च सान्निध्ये सति पलाश इति वा खदिर इति वा गृह्यमाणजातीनां दूरत्वादिनिबन्धनं जातेरग्रहणं भवति, तत्रैव गृह्यमाणे ह्यर्थजाते सेनावनादौ पृथक्त्वस्याग्रहणादेकमिति प्रत्ययो भवति । ये च पुनः परमाणवः सर्वथाऽनुपलभ्यमानाः, कथं तेषामेकशः पृथक्त्वग्रहणं कथं वा कुतश्चिन्निमित्तादनुपलभ्यमानपृथक्त्वानिबन्धन एकत्वप्रत्ययसंभवः, परमाणूनामतीन्द्रियत्वेन तद्गतपृथक्त्वस्याप्यतीन्द्रियतया तस्य कदाचिद् ग्रहणासंभवेन कथमपि पृथक्त्वानुपलब्धिनिमित्तक एक इति प्रतीत्यसंभवात् ।

किञ्च, त्वन्मते सेनावनादीनां तत्तद्वृक्षादिगजादिजातीयेभ्योऽनतिरिक्तत्वेऽप्यस्मन्मते तेभ्यः समुत्पद्यमानं सेनावनादिकं तदतिरिक्तमेकं द्रव्यान्तरमेव न तु तदेव । इत्थं च विवादास्पदतया न तदुदाहरणं भवितुमर्हतीति, न च तदुदाहरणेन मदुक्तानुमानस्यानैकान्तिकत्वसंभव इति । तदेतत्सर्वं वार्त्तिककृद्भिरुक्तम्—"केन सेनावनयोरनर्थान्तरभावोऽभ्युपगम्यते ?" [२।१।३६], एवमभेदप्रत्ययस्य चानेकनिमित्तत्वान्न युक्तमिदम्, अस्त्ययमभेदप्रत्ययोऽभिन्न एव । भिन्ने चोपलभ्यमाने भेदस्यादर्शनादपि क्वचिद् भवति । किन्त्वनेकस्मिन्नुपलभ्यमानेऽपि भेदस्यादर्शनाद् यत्राभेदप्रत्ययस्तत्र भेदस्यादर्शनमारान्निमित्ताज्जायते, यथा सेनावनादिषु । यानि तानि सेनावनाङ्गानि हस्त्यादीनि तान्येकश उपलभ्यमानपृथक्त्वान्यारान्निमित्ताद् भेदं नोपलम्भयन्ति । भेदानुपलब्धेश्च भिन्ने वस्तुन्यभेदप्रत्ययो जायते । न च परमाणवः केनचिदुपलभ्यन्ते । कस्मात् ? अणूनामतीन्द्रियत्वाद् । यश्चैन्द्रियकः पदार्थः स उपलभ्यमानपृथक्त्व आरात् पृथक्त्वस्याग्रहणे सत्यभेदप्रत्ययनिमित्तं भवति, यथोपलभ्यमानजातीयानामारान्न जातिग्रहणम् । उपलभ्यमानप्रस्पन्दानां च नारात् स्पन्दग्रहणमिति । यच्चेदं गृह्यमाणपदार्थस्याग्रहणं तदन्य-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निमित्तकं दृष्टं यथा तेषामेव सेनावनाङ्गानाम् । न तु परमाणवो गृह्यन्ते, तेषामतीन्द्रियत्वात् । तस्मान्न तेषामन्यनिमित्तकमग्रहणं संभवतीति बहुविधनिमित्तेषु मध्ये कस्याप्यत्रासंभावितत्वेन नाभेदप्रत्ययासंभवादिति ।

ननु मास्तु भेदादर्शनादिसामग्रीशंवलनाभावेन सेनावनादिवदेतत्प्रत्ययोपपत्तिः, परन्त्वेकत्वारोपेणैवेयं प्रतीतिरुपपद्यते, अन्यत्र प्रसिद्धैकत्वस्यात्रारोपसंभवादिति चेन्न; रजतसदृशशुक्त्यादावेव रजतारोपो न तु सुवर्णादौ, एवं स्वर्णसदृशपित्तलादावेव स्वर्णारोपो नान्यत्रेति नियमोपपत्तये विशेषनिर्णयदशायामारोपवारणाय चारोपं प्रति सामान्यधर्मज्ञानविशेषानुपलब्धिघटितसामग्र्याः प्रयोजकत्वनियमेन परमाणूनामतीन्द्रियतयाऽत्र सामान्यधर्मदर्शनाद्यसंभवादेकत्वारोपासंभवात् ।

न च प्रत्येकपरमाणोरतीन्द्रियत्वेऽपि नानापरमाणुभ्योऽतीन्द्रियेभ्यः परमाणुपुञ्जस्यैन्द्रियकस्योत्पत्तिरिति सिद्धान्तादरे तत्र सामान्यधर्मग्रहणसंभवादारोपसंभवः । अत एवाणुसञ्चयं दर्शनविषयं प्रतिजानानः किमनुयोक्तव्य इत्युक्तं वार्त्तिककृतेति वाच्यम्; अलीकाद्यप्रसिद्धारोपवारणायारोपं प्रति प्रधानप्रत्ययस्यान्वयव्यतिरेकतो हेतुत्वनिश्चयेनात्र त्वन्मते सर्वस्यैव परमाणुपुञ्जात्मकत्वेन समुदायरूपतया क्वाप्येक इति प्रधानप्रत्ययासंभवेनारोपासंभवात् । अत एवैकत्र प्रसिद्धस्यान्यत्रारोपो नाप्रसिद्धस्येति नियमः सिद्ध्यति । तथा चैकत्वाप्रसिद्ध्या कुतस्तदारोप इति ।

तथा चाह वार्त्तिककारः—एको घटः स्थूल इति यश्चायमनेकस्मिन्नेकप्रत्ययः, स च मिथ्याप्रत्यय एव भवति । मिथ्याप्रत्ययनिमित्तं च सामान्यदर्शनं विशेषानुपलब्धिश्च । न चातीन्द्रियभूतानां परमाणूनां सामान्यदर्शनमस्ति, तदभावे च कुतो विशेषादर्शनम् । सामान्यदर्शने विशेषादर्शने वाऽसति कुतस्तद्विपरीतधर्माध्यारोपात्मको मिथ्याप्रत्ययः, निमित्तमन्तरेण नैमित्तकस्य प्रादुर्भावासंभवात् । एवमतस्मिंस्तदिति मिथ्याप्रत्ययस्य प्रधानापेक्षितत्वात्प्रधानं किञ्चिदङ्गीकार्य्यम्, यथा स्थाणौ पुरुष इति प्रत्ययस्य योऽसौ पुरुषे पुरुष इति प्रत्ययस्तदेव प्रधानम् । तस्मिंश्च सति पुरुषसामान्यग्रहणात् स्थाणौ पुरुषोऽयमिति मिथ्याप्रत्ययो जायते । एवं नानाभूतेष्वप्येकोऽयमिति मिथ्याप्रत्ययोऽपि प्रधाने सति सामान्यधर्मग्रहणाद् भवितुमर्हति । न चात्र किञ्चित्प्रधानं संभवति, येन तद्विषयसामान्यग्रहणाद् मिथ्याप्रत्ययो जायेत । त्वन्मते सर्वस्यैव परमाणुतत्पुञ्जात्मकत्वेन प्रत्येकपरमाणूनामतीन्द्रियतया तत्पुञ्जस्य समुदायरूपतया च क्वाप्येक इति प्रधानप्रत्ययासंभवात् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न च श्रोत्रादिविषयेषु शब्दादिष्वेकत्वादिप्रधानप्रत्ययसंभवेन तदीयसामान्यधर्मग्रहणाद् घटादौ मिथ्याप्रत्ययः संभवतीति वाच्यम्; अवयविनोऽसत्त्ववादे शब्दादीनामपि परमाणुपुञ्जात्मन्येव समावेशात्तेषां पृथक् सत्तास्वीकारस्यानावश्यकत्वात्। तदुक्तं वार्त्तिकादौ—"यांश्च शब्दादीन् प्रधानप्रत्ययनिमित्तत्वेन भवान् प्रतिपद्यते, वैभाषिकाः खलु भूतभौतिकसमूहात् पटादपि तानिच्छन्ति। अतस्तेषां मते शब्दादयोऽपि संचिता एव। संचितत्वात्तेष्वप्ययमेकत्वप्रत्ययो न प्रधानं भवितुमर्हति। अस्माकं मतेऽपि शब्दादीनां न मुख्यमेकत्वम्, संख्याया गुणस्य गुणेषु शब्दादिष्वसंभवात्। न पुनः शब्दादिषु प्रधानसिद्धिः" [२।१।३६] इति।

न च यान्येकत्ववन्ति द्रव्याणि तेषां समुच्चयनिवृत्तिर्धर्मः। अस्ति च शब्दादिषु समुच्चयनिवृत्तिस्तेनैकत्ववद् द्रव्यसामान्याच्छब्दादिष्वेकप्रत्ययो घटादिष्वपि च भाक्तो भवितुमर्हत्येवेति वाच्यम्; सर्वत्र समुच्चयनिवृत्तिनिमित्तकस्यैक इति प्रत्ययस्य स्वीकारे न द्वे इति निश्चयदशायां किमेकमनेकं वेति द्वित्वप्रतिषेधसामान्यात् संशयानुपपत्तेः। संशयनिवृत्त्यर्थं चैकमेवेति नियमप्रयोगानुपपत्तेश्च। समुच्चयनिवृत्त्या तत्रैकत्वनिश्चयेन संशयायोगात्। न च तथाप्येकत्र परमाणौ प्रसिद्धस्यैकत्वस्य नानापरमाणुष्वारोपसंभवेनैकत्वाविरुद्धनानात्वपर्याप्त्यधिकरणवृत्तिनानादिग्देशव्यापित्वरूपपूर्वोक्तस्य स्थौल्यस्य च तावत्परमाणुषु सत्त्वसंभवेनैकत्वसामानाधिकरण्यावगाह्येकः स्थूलो घट इति प्रत्यय उपपद्यत इति वाच्यम्; कपालावयवानां भिन्नतयाऽनुभूयमानत्वेनैकत्वारोपासंभवात्, प्रागुक्तविशेषानुपलब्धिरूपकारणविरहात्। नहि करचरणचिबुकनासिकादिपरमाणूनामैक्यं कश्चित् क्वचिदारोपयति। न चावयवानां नानात्वेनानुभूयमानतादशायामेकत्वावगाहिप्रत्ययो नोत्पद्यते, किन्त्वन्यस्मिन् काल एवानुभवसिद्धमप्येतद् यदेकत्वावगाहि स्थूलमेकमिदं शरीरमेकः स्थूलो घट इत्याद्यनुभवदशायामवयवानां पार्थक्येनानुभवविरह इति, तथा च नानुपपत्तिरिति वाच्यम्; कपालाद्यवयवानां करचरणादीनां च पार्थक्येनानुभूयमानतादशायामप्येकः स्थूलो घट एकं स्थूलमिदं शरीरमिति प्रत्ययदर्शनात्।

न चावयवानां नानात्वेन ज्ञानेऽप्येकत्वमारोप्यताम्, तत्र का हानिरिति वाच्यम्; एकधर्मिणि नानात्वनिश्चयस्यैकत्वबुद्धिविरोधित्वात्, तत्त्वे स्फुरति तद्विपरीतातत्त्वसमारोपासंभवात्। अन्यथा नेदं रजतमिति निश्चयदशायामपि शुक्तौ रजतारोपापत्तेः, तस्मादेकत्वसामानाधिकरण्येन स्थौल्यप्रतीत्युपपत्त्यर्थमवश्यमवयवी स्वीकार्य इति।

न च दोषवशान्नानात्वं न भासते। तथा चैकत्र परमाणौ प्रसिद्धैकत्वस्य नानापरमाणुष्वारोपसंभव इति वाच्यम्; कथञ्चिदेकात्मना परमाणुकोटेरारोपितत्वसंभवेऽपि परमाणुमात्रत्वेनैव

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

तेषां स्फुरणसंभवेन स्थूलतया स्फुरणासंभवात्, पुनः स्थौल्यावगाहित्वानुपपत्तेस्तादवस्थ्यात्, स्थूलतया स्फुरणे परमाणुत्वव्याघातापत्तेः। न च दिग्देशव्यापित्वस्यैष महिमा यत्परमाणुत्वेन न तेषां स्फुरणम्, किन्तु स्थूलत्वेन स्फुरणमिति स्थौल्यावगाहित्वसिद्धिरिति वाच्यम्; विरोधात्त्वं-दुक्तेरग्राह्यत्वात्। तथा हि—पूर्वोक्तनानात्वपर्याप्त्यधिकरणवृत्तिनानादिग्देशव्यापित्वमेव स्थौल्यं परिमाणभेदो वा? न तावदाद्यः, त्वत्पक्षे भागभागिनोर्देशदेशिनोरभावादवयव-भूनानां परमाणूनामेव देशत्वं देशित्वं च सर्वं कार्यम्, एवं च दिग्देशा हि भवतां परमाणव एव, ते यदि नानात्वेन देशत्वेन च गृह्यन्ते, न तर्हि तेष्वेकत्वस्य देशित्वस्य वाऽऽरोपो भवितुमर्हति। न च परमाण्वतिरिक्तस्य ग्रहणमस्ति, येन नानादिग्देशव्यापिता प्रतीयेत।

अथ ते एकत्वेन देशित्वेन चारोप्यन्ते, न तर्हि तेषां नानात्वेन देशत्वेन च ग्रहणं संभवति। न चान्येषां देशानां ग्रहणमस्ति, येन नानादिग्देशव्यापिता प्रतीयेत। तदुक्तमाचार्य-पादैः—"नानादिक्काः परमाणवो देशतयावभासेरन् नैकतया देशितया चारोप्येरन्, तथा च कस्य नानादिग्देशव्यापिता, देशिनोऽपरिस्फूर्त्तेः। अथ तथात्वेनारोप्येरन् न तर्हि नाना-त्वेन देशत्वेनावभासेरन्। तथा च कस्य नानादिग्देशव्यापिता, देशिनोऽपरिस्पूर्तेः। तस्मादेक-त्वारोपे परमाणुमात्रावभास एव स्यात्" इति।

न च घटादिपरमाणवो देशिनो देशाश्च भूतलादिपरमाणव इति वाच्यम्; भूतलादा-वप्येकत्वस्थूलत्वप्रत्ययात्। न च देशदेशिभावापन्नानन्तपरमाणुसमूहसन्तान एवोक्तप्रत्यय-गोचर इति वाच्यम्; देशान्तराग्रहणेऽपि चान्धकारे करपरामर्शेनैकः स्थूलो घट इति प्रत्ययो-त्पादेन परमाणूनामेव तथात्वे तत्रापि देशभानापत्तेः। परिमाणविशेष एव स्थौल्यमिति द्वितीयपक्षे त्वेकैकपरमाणौ तदसंभवेन सिद्धस्तदाश्रयतयाऽवयवीति।

न च तावत्परमाणुषु व्यासज्यवृत्तेस्तादृशपरिमाणविशेषस्वीकारेऽनुपपत्त्यभावेन किमर्थं तदाश्रयोऽवयवी परमाण्वतिरिक्तः स्वीक्रियेतेति वाच्यम्; विनिगमनाविरहेणावयविनोऽपि तदाश्रयत्वसंभवेनावयविनो निराकरणासंभवात्, परमाणुसमुदायस्य तदाश्रयत्वे परमाणूना-मतीन्द्रियत्वेन पुनरेकः स्थूल इति प्रत्यक्षानुपपत्तेरग्रे वक्ष्यमाणत्वाच्च। किञ्च, परमाणूनामणुत्वव्याघातापत्तिभिया तेषु व्यासज्यवृत्तेस्तादृशपरिमाणविशेषात्मकस्थौल्य-स्वीकारासंभवाच्चेति। नन्वेतावता प्रबन्धेन घटस्य परमाणुपुञ्जरूपत्वे तत्रैकत्वस्य स्थौल्यस्य च बाधादेको घटः स्थूल इति प्रतीतेरेकत्वस्थौल्यावगाहित्वासंभवेन तत्प्रतीतेरनुपपद्यमानत्वं भवता प्रदर्शितम्, किन्तु तन्न सङ्गच्छते; एको महान् धान्यराशिरितिवत्तदुपपत्तिसंभवात्।

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS
CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तथा हि—धान्यराशिर्हि तव मते न वस्तुतो धान्येभ्योऽतिरिच्यते, धान्यानामन्त्यावयवित्वेन द्रव्यान्तरानारम्भकत्वात्। अतस्तत्रैकत्वप्रतीतिर्न संख्यामवगाढुमर्हति, धान्यानामनेकत्वात्। किन्तु परस्परसंयुक्तपदार्थमात्रघटितसमुदायत्वरूपमेकत्वमेव तद्विषयः। एवं सामान्यतो महान् धान्यराशिरिति प्रतीतौ धान्यगतमहत्त्वस्यैव कथञ्चिद् भाननिर्वाहेऽपि धान्यशतघटितराश्यपेक्षया धान्यसहस्रघटितराशौ महत्तरत्वप्रतीतेर्न धान्यसमवेतमहत्त्वालम्बनत्वम्, उभयविधराशिघटकधान्यसमवेतानां महत्त्वानामुत्कर्षापकर्षयोरभावात्। अतस्तद्राशिघटकपरस्परसंयुक्तधान्यपर्याप्तसंख्याधिकसंख्यापर्याप्त्यधिकरणपरस्परसंयुक्तधान्यघटितत्वमेव तदपेक्षया महत्तरत्वमिति वक्तव्यम्। तद्वदेकः स्थूलो घट इत्यत्रापि परस्परसंयुक्तपदार्थघटितसमुदायत्वरूपमेकत्वं परस्परसंयोगविशेषापन्नबहुपदार्थघटितत्वरूपस्थूलत्वमपि घटपदोल्लिखितपरमाणुपुञ्जे भासते। एवमस्मादयं स्थूलतर इत्यादेरप्युपपत्तिरिति चेन्न; परमाणुपुञ्जस्य घटादिरूपताङ्गीकारे परमाणूनामतीन्द्रियतया तत्पुञ्जस्याप्यतीन्द्रियत्वेन घटादिप्रत्यक्षस्यैवानुपपत्तेः। एवं च घटादेरेवाप्रत्यक्षत्वे तत्रैकत्वस्थौल्यावगाहित्वस्यापि दूरनिरस्ततयैको घटः स्थूल इति प्रत्यक्षस्यानुपपत्तेः पुनस्तादवस्थ्यापातात्। एवं घटादेः परमाणुपुञ्जरूपताङ्गीकारे न केवलं घटस्थौल्यैकत्वानामेवाग्रहणम्, अपि तु सर्वेषां द्रव्यगुणकर्मसामान्यविशेषाणामग्रहणं प्रसज्येत। तदुक्तं वार्त्तिकादौ—

"यद्यवयवी न स्यात्तर्हि सर्वस्य ग्रहणं नोपपद्येत। किं तत्सर्वम्? द्रव्यगुणकर्मसामान्यविशेषाः। कथं कृत्वा? परमाणुसमवस्थानं तावद् दर्शनविषयो न भवत्यतीन्द्रियत्वादणूनाम्, द्रव्यान्तरं चावयविभूतं भवद्भिर्न प्रतिपद्यते। तदनभ्युपगमे च योऽयं द्रव्यप्रत्ययः कुम्भ इति, गुणप्रत्ययश्च श्याम इति, क्रियाप्रत्ययश्चलतीति, सामान्यप्रत्ययोऽस्तीति, विशेषप्रत्ययः कलश इति, समवायप्रत्यय इह घटे रूपादय इति, तथाऽन्येऽपि प्रत्यया एको महान् संयुक्तो विभक्तः पृथक् परोऽपर इति च न स्युः। अस्ति च सर्वस्य ग्रहणं सकलानुभवसिद्धं द्रव्यगुणकर्मादिप्रपञ्चस्य, तेन सर्वस्य ग्रहणात् पश्यामोऽवयवातिरिक्तोऽस्त्यवयवी" [२।१।३४] इति।

नन्ववयव्यभावे गुणकर्मप्रभृतिसर्वाग्रहणमित्युक्तमसङ्गतम्, अवयविनो ग्रहाभावेऽपि स्वातन्त्र्येण तेषां ग्रहणसंभवादिति चेदुच्यते; क्विञ्चिद्दृश्ये वस्तुनि वर्तमानाः सन्तस्तेन सहैवेमे गुणादयो गृह्यन्ते, न तु केवलं स्वतन्त्रा निरधिष्ठाना ग्राह्याः। किन्तु त्वन्मते परमाणुपुञ्जस्यैव द्रव्यगुणकर्मणामाश्रयतया तस्य चातीन्द्रियतया ग्रहणासंभवेन गुणादीनामपि सुतरामग्रहणप्रसङ्गात्। नन्ववयविनोऽसत्त्ववादे गुणकर्मादयो न पृथक् स्वीक्रियन्ते, किन्तु परमाणुपुञ्जात्मन्येव समाविष्टाः। तथा च तेषां स्वरूपतोऽसत्त्वेन तानुपादाय सर्वाग्रहणरूपदोषोद्भावनं पुनरसङ्गत-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मेवेति चेन्न; सर्वाग्रहणप्रसङ्गदानेन विरोधप्रसङ्गदानेऽस्माकं तात्पर्यात्। तथा हि—योऽपि हि
नास्तिको गुणकर्मादिकं नाभ्युपैति सोऽपि सकलानुभवसिद्धं तत्प्रत्यक्षं नापह्नोतुं शक्नोति,
अनुभवविरोधात्; अस्ति च लौकिकपरीक्षकाणां समेषां तावदवयविद्रव्यगुणकर्मादिप्रत्यक्षम्,
तदिदमशक्यापह्नवमिति। किन्तु परमाणुपुञ्जरूपत्वे तस्यातीन्द्रियत्वेनाग्रहणाद् गुणादीनामपि
निरधिष्ठानाग्रहणकतया सर्वानुभवसिद्धस्य गुणादिप्रत्यक्षस्यापलापरूपविरोधस्य स्पष्टत्वात्।

नन्ववयविनोऽनङ्गीकारे परमाणुपुञ्जस्यातीन्द्रियतया प्रत्यक्षाभावेन तन्मूलकगुणकर्मादि-
जातस्य प्रत्यक्षं मास्तु, किन्त्वनुमानादिना तज्ज्ञानं स्यात्तथा च सर्वाग्रहणोक्तिः पुनरसङ्ग-
तेति चेदुच्यते; अनुमानादीनां हि प्रत्यक्षमूलकतया प्रत्यक्षाविषयेऽनुमानाद्यप्रवृत्तेः।

तदुक्तं वार्त्तिककृता—"सर्वाग्रहणमिति सर्वैः प्रमाणैरग्रहणम्। कथम्? प्रत्यक्षस्य
वर्तमानमहद्विषयत्वात्, यद् वर्तमानं यच्च महत् तद् बाह्यकरणप्रत्यक्षम्। घटाद्यवयविप्रत्याख्याने
च न बाह्यकरणप्रत्यक्षविषयोऽस्ति। तस्याभावादनुमानादेरप्यभाव इति। सेयं सर्वप्रमाणा-
निवृत्तिः। उपलभ्यन्ते चार्थाः प्रत्यक्षादिप्रमाणैस्तैः सर्वैर्ग्रहणात् पश्यामोऽस्त्यवयवीति"
[२।१।३४] इति।

न चैकस्य केशस्य दूरादप्रत्यक्षत्वेऽपि तत्समूहस्य यथा प्रत्यक्षं जायते, एवमेकस्य परमाणो-
रप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षं स्यादिति वाच्यम्; परमाणोरतीन्द्रियत्वेन तत्समूहस्याप्य-
तीन्द्रियत्वस्यानिवार्यतया प्रत्यक्षासंभवात्, अतीन्द्रियमात्रघटितसमुदायस्यैन्द्रियकत्वायोगात्;
अन्यथाऽऽकाशकालदिक्समुदायस्याप्यैन्द्रियकत्वापत्तेः। प्रत्यक्षं न परमाणुविषयकं प्रत्यक्षत्वा-
दित्यादिना तदतीन्द्रियत्वनिष्पादनात्।

शतमप्यन्धानां न पश्यति सहस्रमपि पङ्गूनां न चलतीति न्यायेन स्वभावतोऽतीन्द्रियाः
परमाणवः संहता अपि न प्रत्यक्षविषयीभवितुमर्हन्ति। दूरस्थकेशस्तु न स्वभावतोऽतीन्द्रियः,
तदानीमेव सन्निहितेन पुरुषान्तरेण गृह्यमाणत्वात्। किन्तु दूरत्वरूपप्रतिबन्धकसमवधानान्न
तदा तत्प्रत्यक्षम्। प्रतिबध्यतावच्छेदकं चात्र न केशप्रत्यक्षत्वम्, तत्समानपरिमाणाश्रयतन्तुविशे-
षादिद्रव्यान्तरप्रत्यक्षासंग्रहात्। किन्तु तत्तदपकर्षाश्रयपरिमाणद्रव्यप्रत्यक्षत्वं [1]व्यामादिव्यवधान-
रूपतत्तद्दूरत्वप्रतिबध्यतावच्छेदकम्। अथैवं दूरस्था बहवः केशाः समूढाश्चक्षुषा न गृह्येरन्
प्रतिबन्धकसत्त्वात्। न च तादृशपरिमाणविशिष्टैकैकव्यक्तिमात्रविषयकप्रत्यक्षत्वं प्रतिबध्यता-

---

१. बाह्वोः प्रसार्यमाणयोर्यदन्तरं स व्यामः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वच्छेदकमिति वाच्यम्; तथा सत्यसंयुक्तकेशरूपविषयकप्रत्यक्षस्य प्रतिबध्यतावच्छेदकानाक्रान्तत्वापातादिति चेन्न, यादृशपरिमाणवद्द्रव्यविषयकप्रत्यक्षत्वस्यैव प्रतिबध्यतावच्छेदकत्वस्वीकारात् ।

अथैवं समानजातीयपरिमाणाश्रयशुक्लतन्तुसमुदायघटितस्य नीलतन्तोर्दूरे प्रत्यक्षत्वापत्तिरिति चेन्न; नीलत्वस्यापि तत्र द्रव्यान्तरे द्रव्ये च विशेषणत्वस्वीकारादित्यलमतिविस्तरेण ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बुद्धमार्क्सयोर्वादसाम्यम्

महापण्डितराहुलसांकृत्यायनः, मसूरी ।

बुद्धो मार्क्सात् चतुर्विंशतिशताब्दिपूर्वं जातः । तयोः कालयोर्महदन्तरम्, विचारयोरपि भवेदिति नैतच्चित्रम् । बुद्धो धर्मस्य प्रतिष्ठापकः । तस्य धर्मः क्रैस्तवे षष्ठशतके सम्पूर्णेऽप्यबर्वरे जगति व्याप्तः, तत्रत्यानां जनानां श्रद्धाभाजनं चाभूत् । अद्यापि धर्मेषु तत्पथपथिका भूयांसो जगति । इदानींतनेषु विद्यानिष्णातेषु जनेषु धर्मविषयिकैकान्तनिष्ठा न संभाव्या, अथापि महति बुद्धे सत्कृतिर्भूयसां मनुसन्ततीनामित्यत्र न कस्यापि विसंवादः । बुद्धो योगमार्गपरायणः परलोके आस्थावान् । मार्क्सस्य पन्था ततो विप्रतीपः ।

सत्स्वपि भेदेष्वनेकत्र तयोरद्भुतं साम्यमनेकेषु विषयेषु । मार्क्सो मनुसंततौ सामाजिकमार्थिकं भेदमनिष्टकरममन्यत, तद्विध्वंसन एव स आजीवनं बद्धपरिकर आसीत् । तदर्थं तेन महत् कष्टमनुभूतम् । जन्मभूमितो निर्वासितः स्थानात् स्थाने यायावर इवाभ्रमत् । न स परिहृतगृहः परिव्राजकः, पत्न्याः सन्ततीनां च भारमुद्वहता तेनाकिञ्चन्यं तद्भाविनी वेदना च शिरसि सादरं धृता । बुद्धोऽपि सामाजिकं भेदभावं निरपवादमार्थिकं वैषम्यं च सापवादं निरसितुं प्रवृत्तः । वर्षाया मासत्रयं विहाय सर्वोऽपि तस्य कालः व्रज्यायामयात् । पश्चिमस्यां स्थाण्वीश्वरनिगमं प्रस्थाय पूर्वस्यां विहारप्राक्सीमान्तं यावत्, उत्तरस्यां हिमवतो दक्षिणस्यां यावद् विन्ध्यगिरिं तस्य विचरणक्षेत्रम् । तत्र पर्यटता तेन स्वीयः सन्देशः प्रसारितः । तस्य देशना सरला, हृदयंगमा, मनोहरा; आचरणं व्यक्तित्वं च तदनुरूपम् । जीवत तुल्यकालीनाः पण्डिताः सामान्याश्च जनाः सकृत् संपर्केण तं मार्गदेष्टारं स्वीचक्रुः । जीवत एव तस्य समीपे तक्षशिलाशूर्पारकादिभ्यः प्रत्यन्तस्थानेभ्यो मेधाविनः समागत्य तस्यान्तेवासित्वमूरीचक्रुः । अशीतिवर्षायुषस्तस्य परिनिर्वृतिकाले सर्वस्मिन्नप्यभिज्ञातभारते तथागतशासनं व्यतन्यत ।

मार्क्सः क्रैस्तवे १८१८ संवत्सरे जर्मनदेशस्य ट्रीटनगरे जातः, पञ्चविंशतिवर्षवयस्कः (क्रैस्तवे १८४३ संवत्सरे) स्वदेशतो निर्वासितः पेरिस-ब्रुशेल्सादिनगरेषु स्तोकं स्तोकं विश्रान्तः क्रैस्तवे १८४६ संवत्सरे लन्दनं गतः । ततो यावन्मरणं तत्रैव तस्य भूयान् निवासः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रैस्तवे १८८३ संवत्सरे तत्रैव तस्य जीवनलीलासंवरणं पञ्चषष्टिवर्षायुषि। अतिताऽरुण एव मानवसमताप्रसारणे तेन प्रयतितुमारब्धम्, तत्कार्यं च मृत्युपरवशतयैव परिहृतम्। जीवनकाल एव तस्य विचारा अखिलेऽपि भूमण्डले पर्यवर्धन्त। जीवनान्ताच्चतुस्त्रिंश-द्वर्षानन्तरं तस्य कल्पना वसुन्धरायां समवतीर्णा। महति रूसदेशे साम्यवादशासनं प्रवृत्तम्।

मानवसाम्यं बुद्धमार्क्सयोरासीत् समभिप्रेतम्। प्रतिजनं प्रतिभावैषम्यं भवितुमर्हति। एकस्मिन् गृहे पित्रोरेकत्वेऽपि बुद्धिविषमता दृश्यत एव। अथाप्येतस्मात् कारणान्न जातु तेषु हीनोत्तमभावः समाचर्यते। तेषां सहोदरत्वम्, बन्धुत्वम्, स्नेहभोगभागित्वं च समानमेवा-द्रियते। मार्क्सेन निरपवादमिदमाचरणीयमिति गदितम्। बुद्धस्यापीदमेवासीद् मनीषितम्। अथापि नैतद् व्यवहारसहमिति विज्ञाय तेन मानवसंघस्यैकस्मिन्नंशे स्वीये भिक्षुभिक्षुणीसंघ एव भोगसाम्यमाचरणीयमिति विहितम्। साम्याधारितमानव-जीवनस्य माधुर्यं निरीक्ष्य जनाः स्वत एव तत्परायणा भवेयुरित्यासीत् तस्य आशा ननु। बुद्धस्य समये यदसंभवि मार्क्सस्य समये तन्नितरां संभवीति ज्ञात्वैव मार्क्सेन सर्वस्या-मपि नृजातावार्थिकसाम्यस्य देशना प्रारब्धा। मार्क्सकाले यन्त्राणां प्राबल्यं बाहुल्यं च जगति। देशे देशे धातुपटादीनां महान्तो यन्त्रालयाः स्थापिताः, अहर्निशं तेषु सहस्रशो लक्षशोऽपि कर्मकरा एकत्र कार्ये प्रवृत्ताः। स्वग्रामं स्वगेहं च विहायेमे मानवा यन्त्रालयैक-शरणा अभूवन्। चलति यन्त्रालये तेषामुदरपीडा शाम्यति, निवृत्तकार्ये च तेऽशन-वञ्चिता यमैकशरणा अजायन्त। "बुभुक्षितः किं न करोति पापम्"। पुरा मानवोपयोगीनि खाद्यपेयपरिधेयादीनि वस्तूनि दुर्लभकल्पान्यासन्। यन्त्रयुगे तु कालान्तजलप्लावनमिव तैर्जगत्प्लावितम्। काले काले क्रेतॄणां दौर्लभ्याद् वस्तूनि स्ववेश्मस्वेव रुद्धानि, एवं कर्मकराणां कार्यविरहताकारणानि भवन्ति। विगतकृत्या विगताशनाः कर्मकरास्तूष्णीं कथं आस्थातुमर्हाः? पुरा शिल्पिनो गृहे गृहे ग्रामे ग्रामे विकीर्णाः, एकीभूय किमपि कर्तुं नालम्। इदानीं त्वेकस्मिन् नगरेऽपि लक्षशस्ते संचिताः। संघबलं परमं बलम्, तच्च तेषां हस्तगतम्। मार्क्सेन संदृष्टमिदं बलम्। एतेन बलेन मानवसाम्यं स्थापयितुं शक्यम्, एतेनैव कर्मकराणां बुभुक्षासंकटमप्यपास्तं भवेत्। यन्त्रालयानां तत्रस्थानां लक्षलक्षकर्मकराणां च भाग्यमेकस्य पुरुषस्याधीनम्। स चाधिकाधिकं लाभं कामयन् चालयति यन्त्रम्। सति लाभे वस्तुसमाप्लावः, अलाभे कार्यनिरोधः कर्मकराणां च निष्क्रियताऽवश्यंभाविनी।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बुद्धमार्क्सयोर्वादसाम्यम्

बुद्धकाले नासीदेतादृशी सामाजिकी आर्थिकी च स्थितिः। तेनैव तेनैकाङ्गीनः साम्यवादः—केवलं भोगे न कार्ये—समादिष्टः। मार्क्सेन तु भोगे कार्ये चोभयत्र साम्यमपेक्षितम्। एवं न केवलं साम्यवादसिद्धान्त एव तेन समर्थितः, तस्य निष्पत्त्युपायोऽपि। श्रेष्ठिवर्गस्य हस्तेऽमोघाऽनियन्त्रिता सृष्टिसंहारकारिणी शक्तिर्मानवतायाः संहारायैव भवेत्। सा तु राष्ट्रायत्ता करणीया। तच्च सर्वथा समुचितं संभाव्यं च। बुद्धेन मानवानां स्वाभाविकं हृदयकौमल्यं विज्ञाय तत्साहाय्येन नृषु साम्यं स्थापयितुं चिकीर्षितम्। केषाञ्चिद् हृदयं परिवर्तितं भवेदपि, परं तेन सर्वस्य श्रेष्ठिवर्गस्य हृदयपरिवृत्तिर्न जातु संभवति। एवं बुद्धेनाऽऽदत्तमस्त्रमतिनिर्बलं सिद्धमभूत्। मार्क्सेन तु कर्मकरनिचयभूतमस्त्रं स्वीकृतम्, तच्चामोघमिति सर्वप्रत्यक्षम्। यावदुदरं रिक्तम्, यावद् बुभुक्षामरणं शिरसि निषण्णम्, तावत् कर्मकरसंघः कथं संघर्षतो विरमेत? कर्मकराः सर्वान्त एव स्वचेष्टाफलं लभेरन्निति नासीद् दृष्टचरम्। प्रतिसंघर्षं कृतस्य दक्षिणा हस्तगताऽभूत्। श्रेष्ठिनः स्वकर्मकराणां संघबद्धं संघर्षं सोढुमसमर्थाः, आंशिकं तेषामभीष्टं स्वीकर्तुं परवशा अभूवन्। दक्षिणया कर्मकराणां हृदि स्वकृत्यं प्रति श्रद्धा सन्निविष्टा। संघर्षो भूयोऽप्यवर्धत। दक्षिणाश्रद्धयोर्मात्रापि तदनुक्रममैधत। अन्ते चेतश्चत्वारिंशद्वर्षतः पूर्वं पृथिव्याः षष्ठो भागो मार्क्सप्रवर्तिते साम्यवादे दीक्षितः।

सत्यपि क्षेत्रसामर्थ्ययोर्भेदे द्वयोः पुरुषोत्तमयोरासीदेकवाक्यता मानववैषम्यदूरीकरणे। जगत् केनचित् सर्वज्ञेन सर्वशक्तिमता निर्मितम्, खर्वो मानवो यन्त्रवत् तस्य हस्ते समर्पितः स्वपरिधावर्टितुं प्रभवति। सर्वशक्तिमत ईश्वरस्य कार्ये स किमपि कर्तुमप्रभुः—इतीश्वरवादो बुद्धेन प्रत्याख्यातः, बहुजनहिताधारो धर्मस्तु नापास्तः। मार्क्स ईश्वरं धूर्तमूर्खाविलमतिजनमनःसंसृष्टममन्यत। धर्मस्तु तन्मतेऽहिफेनसदृशः प्रबुद्धमानवमूर्च्छाकरः। धर्मेण केवलं मूर्च्छापादनमेव कृतमिति तत्संपृक्तं सर्वमपि हेयमिति नासीद् मार्क्सस्य मनीषितम्। काव्ये, कलासु, अन्येऽपि मानवनिर्माणेऽस्ति यद्यपि धर्मसंपृक्तं किमिति तत् सर्वं परिहर्तव्यम्। पुरुषस्य न केवलमुदरम्, तस्य मनोऽपि वर्तते। उभयोर्बुभुक्षायाः शान्तिरपेक्षिता। आचारशून्या शान्तिर्नासीत् तस्य बहुमता।

बुद्धः शान्तिवादी अहिंसापरायणः। बुद्धशासनं देशान्तरे प्रसारयितुं प्रवृत्ता धर्मदूताः स्वाचरणेन स्वीयामक्षुण्णां शान्तिवादितामदर्शयन्। बुद्धेन युद्धाय सन्नद्धाः शाक्याः कौलियाश्च निवारिताः। रोहिणी नदी उभयो राज्ययोर्मध्यवाहिनी। तज्जलकृते शाक्याः कोलियाश्च शस्त्रसज्जा अभूवन्। बुद्धेन पृष्टम्—"कस्य मूल्यमधिकतरं नद्या जलस्य, युष्माकं बन्धुबान्धवानां रक्तबिन्दोर्वा। बन्धुबान्धवानां

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रक्तबिन्दोरेव मूल्यमधिकमिति सर्वैरभ्युपगतम्। ते संमर्दतो व्यरमन्त। भारताद् बहिर्बुद्धस्य शान्तिसंदेशमादाय तस्य धर्मदूता अगच्छन्। जगत्यन्येऽपि विश्वजनीना धर्माः। तैः स्वप्रसाराय खड्गसाहाय्यमसकृद् गृहीतम्। बुद्धस्यैव केवलो धर्मो नैवमपराद्धः। मार्क्सोऽन्ततस्तु शान्तिवादी एव। शान्तिभङ्गस्य कारणं मानववैषम्यं सर्वस्य स्वस्याल्पपुरुषायत्तता। विश्वस्यैकं कुलमारचितं चेन्न संभवति युद्धम्। स्वत्वापहरणमेव बीजं सर्वेषां संपरायाणाम्। दस्यो राज्ञा स्वीकृतिर्न शमाय भवति। उभयोर्द्विपदोत्तमयोर्मार्गयोरस्ति भेदः। बुद्धो मध्यमप्रतिपत्प्रतिष्ठाता। अहिंसाशान्तिविषयेऽपि तस्य मध्यमा प्रतिपत्।

सर्वतोऽधिकं साम्यं तु बुद्धमार्क्सयोर्दर्शनेऽस्ति। 'सर्वमनित्यम्', 'यत् सत् तत् क्षणिकम्', 'यन्न क्षणिकं तत् कदापि न सत्' इत्येवमस्याधारभूता दृष्टिर्बुद्धस्य। मार्क्सोऽपि जगत् क्षणिकं मन्यते, विश्वं तस्यैकैककणोऽपि प्रतिक्षणं परिवर्त्यमानम्। परिवर्तनं चैतन्नापातलः। पूर्वक्षणस्थितस्य वस्तुनः परक्षणेऽत्यन्ताभाव उभयोरभिप्रेतः। अणुतममपि वस्तु उद्भूयमानमात्यन्तिकेन स्वीयेन ध्वंसेन समं सत्तामापद्यते। अपरस्मिन् क्षणे तत्स्थानेऽवस्थीयमानं सर्वथाऽन्यदेव वस्तु। एवं कार्यकारणयोः संबन्धो न तादात्म्येन। कारणं यदनन्तरपूर्वक्षणे स्थितम्, कार्यं कारणस्यानन्तरपरक्षणे निर्वर्त्यमानम्। एतदर्थमेव कार्यकारणयोर्लक्षणमस्मिन् (कारणे) सति, इदं (कार्यं) भवति। अयमेव प्रतीत्यसमुत्पादो नाम। कार्यकारणयोः संबन्धः केवलं कालानन्तर्येण, शारीरिकः संबन्धस्तु न कदापि तयोः। ननु कथमेकताभानं तयोः? सादृश्यादिति प्रत्युच्यते बौद्धैः। सर्वं कार्यं कारणसदृशं भवति, यथा पित्रोः सदृशः पुत्रः। अयमस्ति सार्वत्रिकः सार्वकालिको नियमः सर्वैरमुद्रितचक्षुभिः प्रत्यक्षदृष्टः। 'सेयं दीपकलिका' इत्यत्रापि सादृश्यादेकताभ्रान्तिः। सैषा सदृशताऽऽनुवंशिकतारूपेण सर्वेषु प्राणिष्वप्राणिषु च दरीदृश्यते। यदा बुद्धेन सर्वानित्यतावाद उद्घोषितः, तदा भारते नित्यकूटस्थाक्षणिकस्यात्मतत्त्वस्य स्थापना मनीषिवर्गेऽभूत्। बाह्यस्य वस्तुनः क्षणिकता तैः स्वीक्रियते, आन्तरस्यात्मनस्तु तथाभावो न प्रतिज्ञायते। आत्मवादविरोधिनो बुद्धस्य वादोऽनात्मवादनाम्नाऽभिहितः। अनयोर्नमून्न भवति न च भविष्यति समन्वयः कदापि। स्वीयेनाऽनात्मवादेन बुद्धो जीवात्मनः परमात्मनश्च सत्तां प्रतिक्षिप्तवान्। इदानीमपीममनात्मवादमाकर्ण्यास्माकं पण्डिता भीता इव दृश्यन्ते। आधारभूतं किमपि कूटस्थं कारणं नः चेत् कथं स्याज्जगतः प्रादुर्भावः? अचेतनस्य जगतो न चेत् कोऽपि कर्ता कथं तत् संभवेत्? एवमाकलयन्तस्ते न बहु मन्यन्ते बुद्धस्यानात्मवादम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बुद्धमार्क्सयोर्वादसाम्यम्

अनात्मवादेऽनीश्वरवादे च बुद्धमार्क्सयोरस्त्यैकमत्यम्। मार्क्सस्य वादो द्वन्द्वात्मकवादनाम्ना प्रसिद्धः। अस्ति कार्यकारणयोः सनातनं द्वन्द्वम्, कार्यं कारणस्यात्यन्ताभावायैव भवति।

कार्यमकारणं न भवतीति जगतोऽपि कारणमपेक्षितम्। एतच्च बौद्धैर्न सर्वथा निरस्यते। उच्यते तु जगति न किमपि कार्यं यदेककारणसंभूतं स्यात्। एकस्य कार्यस्य कृतेऽनेकानि कारणान्यपेक्ष्यन्ते। संभूयैव कारणान्येकं कार्यं कारीणि। एकस्य कार्यस्य निर्माणाय कारणानां सामग्री, कारणानां साकल्यमपेक्ष्यते। घटं कुम्भकार एव न रचयति मृत्पिण्डः, दण्डः, चक्रम्, मृत्पिण्डवाहको गर्दभः, तस्यास्तरणमित्यादीन्यनेकानि वस्तूनि कारणभूतानि। सत्यपि सर्वस्मिन् भौतिककारणजाते घटनिर्माणं न संपद्येत, यदि पञ्चाशदधिकानां कुलालपूर्वजानां विद्या परम्परया नाधिगता भवेत्। एवं न कार्यत एकस्य कारणस्यानुमानम्। कारणसामग्रीसिद्धावीश्वरस्य कारणता प्रतिषिद्धा। बौद्धानां कारण-सामग्री मार्क्सवादे कारणमात्रायां परिणता। विशेषमात्रासु समग्रीभूतानि कारणवस्तूनि सर्वथाऽपूर्वं कार्यं प्रादुर्भावयन्ति। मात्रायां स्तोकमप्यूनता चेत् न कार्यं सम्पद्येतेति रसायनशास्त्रवेदिभिः सुपरिज्ञातम्। कारणानां समग्रतैव कार्यनिर्माणायालम्।

आपाततः स्थितमप्यन्तर्बहिर्जगत्तु प्रतिक्षणं चरमाणम्, चलमानम्; अत्यन्ताभाव-
आपद्यमानम्, परिणंस्यमानम्। सद्वस्तु क्षणिकमेव भवितुमर्हति। धर्मकीर्तिना प्रतिपादितम्—
“अर्थक्रियासमर्थं यत् तदत्र परमार्थसत्” इति। स्वप्ने आहतो मोदको न सत्, स हि न भवत्य-
र्थक्रियासमर्थः, बुभुक्षानिवारणभूतार्थक्रियायां समर्थः। जाग्रदवस्थायां तु स भवत्यर्थक्रिया-
समर्थ इति सद्भूतः। अर्थक्रियासमर्थत्वमेव केवलं प्रमाणं कस्यापि सद्भूतत्वे। अत्र
मार्क्सस्याप्यस्त्यविप्रतिपत्तिः। परमं प्रामाण्यं वस्तूनामेव। वस्तुतन्त्रं तत्त्वज्ञानम्, अवस्तुतन्त्रं
तु केवलं कल्पनाजल्पनम्। वस्तुविरोधे न कस्यापि प्रामाण्यम्। धर्मकीर्तिश्च कथयति—
“यदिदं स्वयमर्थानां रोचते तत्र के वयम्” इति। चरमो वस्तुवाद एष य उभाभ्यां स्वीक्रियते।

पश्चात्तनेषु बौद्धेषु नानावादा अजायन्त, अथापि मौलेऽनित्यतावादे तेषां नासीद्
विमतिः। धर्मकीर्तिर्वस्तुवादी, अथापि विज्ञानवादसमर्थकः। विज्ञानवादिना बाह्यस्य वस्तुनः
सत्ता प्रत्याख्याता। धर्मकीर्तिनापि विज्ञानवादः समर्थितः। तत्र तु तस्योक्तयो न प्रौढाः। केवल-
मेतावदेव युक्तिसहम्—दृश्यस्य बाह्यस्य जगतः कारणान्यणुतमान्यतिसूक्ष्माणि। अद्यतन-
मपि भौतिकं शास्त्रं परमाणुर्निराकार एवेति विज्ञापयति। परमाणुगर्भे तद्घटकसूक्ष्म-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तमोंशऽस्तु परमाणुतोऽपि विलक्षणः, कदाचित् कणरूपोऽन्यदा तरङ्गरूपश्च विज्ञायते। तस्य रूपभिन्नताप्रख्यापनाय यद्यरूपं विज्ञानमभिधीयेत तर्हि धर्मकीर्तेर्विज्ञानवादः स्याद् नात्यन्तं वस्तुविरुद्धः।

बुद्धमार्क्सयोर्वादे साम्यमस्तीति नादृष्टचरम्। बौद्धदर्शनमभिज्ञाय लघीयसा पथा मार्क्सदर्शनावगाहनमिति न संदेहलेशः।

अन्यस्मिन्नपि क्षेत्रेऽस्ति तयोरतीव साम्यम्। उभावपि जनतन्त्रतां बहु मन्येते। बुद्धस्य तु शुभं तदेव यत् "बहुजनहिताय बहुजनसुखाय"। तस्मिन् काले भारते मगधकोसलादीनि समृद्धानि राज्यान्यासन्। बुद्धस्य तु समादरभाजनं लिच्छवीनां गणतन्त्रम्। स्वीयस्य संघस्य स्थापनमपि बुद्धेन गणानुरूपं कृतम्। गणसदृशी एव छन्ददानव्यवस्था तत्र प्रवर्तिता। मार्क्सोऽप्यत्र बुद्धमेव समर्थयति। आर्थिकवैषम्ये जनतन्त्रता न संभवतीत्यार्थिकवैषम्यं बहिष्कार्यम्। आदौ बौद्धसंघे नासीदार्थिकं वैषम्यमिति स्वच्छन्दं छन्ददानं संभवति स्म। मतभेदे यद् बहुमतं तद् ग्राह्यमिति तद्व्यवहाराय काष्ठमयी छन्दशलाका प्रायुज्यत। बुद्धस्य जनतन्त्रवादो नात्रैव परिसमाप्तः। तेन समष्टिः समाजः संघो वा व्यक्तेरुपरि स्वीकृतः, मातृष्वसा प्रजापती गौतमी स्वकर्तितं स्वनिर्मितं पटमादाय बुद्धाय समर्पितुमैच्छत्। व्यक्तितोऽधिकं संघस्य दानं फलदमिति संभाष्य बुद्धेन संघाय समर्पयितुं प्रेषिता गौतमी। निर्वाणानन्तरमपि न काऽपि व्यक्तिः संघराजो वा तस्य स्थानापन्नः, संघ एव तदधिकारभाक् संमतः।

एवमार्थिकसामाजिकसाम्यवादे, अहिंसाशान्तिविषये, दार्शनिकेऽनित्यतावादे, अनात्मवादे, अनीश्वरवादे, कारणसामग्रीवादे, वस्तुवादे, जनतान्त्रिकतायां चोभयोर्महामनीषिणोरद्भुतं साम्यम्॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

किलेसविद्धंसननयो

भदन्त तिलोकञाणो, वेरिखथनगरे, ब्रह्मरट्ठे ।

एत्थ किलेसो'ति सब्बदुक्खानं उप्पन्नहेतुभूतो पापधम्मसभावो। सो हि सत्तानं संकिलिट्ठत्ताय च नाना वयुप्पादनत्थाय च सोक-परिदेव-जाति-जरा-व्याधि-मरणादीनं सब्बदुक्खसमूहानं पुनप्पुनं समुप्पन्नत्थाय च असंखेय्यं संसारवट्टं आवट्टनत्थाय च ठामागत-सम्पन्नो कण्हपक्खपरियापन्नो पहानदुक्करो हीनधम्मसमूहो एव ।

तं तं निमुज्जनसभावं अजानित्वा एते किलेसे सत्तनिम्माणकारी देवो'ति वा मारो'ति वा ब्रह्मा'ति वा ईश्वरो'ति वा अल्ला'ति वा गॉड'ति वा अनेकेहि नामेहि यथावुत्तं सच्चञाणं अलद्धत्ता दुप्पञ्ञावन्ता सत्ता वोहरन्ति वा संलक्खन्ति वा। एकन्तेन पन लोभ-मान-मिच्छा-दिट्ठिमोहपमुखो दसविधो किलेसधम्मो एव।

एते च मंसचक्खूहि वा दिब्बचक्खूहि वा ब्रह्मचक्खूहि वा सम्पस्सितुं अविसयत्ता च असमत्थत्ता च तेसं विद्धंसननयं'पि दट्ठुं वा सोतुं वा दुल्लभा च दुक्करा च।

तथाहि सवासन-सम्मोह-निद्दाय जागरितो असेसकिलेसविद्धंसनसमत्थो गोतमबुद्धो'पि पुब्बे तेसं यथावुत्तं न जानाति, यथा अञ्ञे पुग्गला। तथा'पि सो गोतमो असंखेय्य-कप्पानि पुब्बे परिचितपारमीसंभारठामवसेन बोधिमण्डले सम्मासम्बोधिञाणं लद्धकाले एव संसारवट्टपवत्तनकं सब्बपापकिलेसजातिसमूहं अग्गमग्गञाणेन असेसं समुच्छिन्दित्वा दसबल-ञाणसहितं सब्बञ्ञुतञाणवरं सुलभित्वा अतीते अनमतग्गसंसारे दुक्खकारकानं तेसं किलेसभावानं नानाकारेन निरन्तरं मायाकारठामगतं असाधारणेहि तेहि ञाणविसेसेहि विजित्वा दानि तेसं मायाकाराधिवत्थभूमितो विमुत्तता खीणासवभावेन वा दस्सनसमंगी-भावेन वा उदानेतुं—

१. अनेकजातिसंसारं संधाविस्सं अनिब्बिसं ।
गहकारं गवेसन्तो दुक्खा जाति पुनप्पुनं ॥
२. गहकारक दिट्ठो'सि पुन गेहं न काहसि ।
सब्बा ते फासुका भग्गा गहकूटं विसंखतं ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विसंखारगतं चित्तं तण्हानं खयमज्झगा'ति ॥ वा उदानेसि ।

[विनयपिटके महावग्गे]

अपरं च, पटिच्चसमुप्पादस्स अनुलोम-पटिलोमसंखातानं संसारचक्कस्स आवत्तन-निवत्तनकारानं हेतुं वा तेहि विमुत्तभावं वा उदानेतुकामताय च—

१. यदा ह वे पातुभवन्ति धम्मा आतापिनो झायतो ब्राह्मणस्स ।
अथस्स कंखा वपयन्ति सब्बा यतो पजानाति सहेतुधम्मं ॥

२. यदा ह वे पातुभवन्ति धम्मा आतापिनो झायतो ब्राह्मणस्स ।
अथस्स कंखा वपयन्ति सब्बा यतो खयं पच्चयानं अवेदी'ति ॥

३. यदा ह वे पातुभवन्ति धम्मा आतापिनो झायतो ब्राह्मणस्स ।
विधूपयं तिट्ठति मारसेनं सुरियो'व ओभासयमन्तलिक्खन्ति ॥ वा उदानेसि ।

[विनयपिटके महावग्गे]

अपरं च, तेसं किलेसानं विद्धंसनत्थाय असमत्थसमयसमत्थसमयो'ति द्वीसु समयेसु असमत्थसमये उप्पन्नाकारं सन्दस्सितुं सम्बुद्धेन—"याव किवञ्च मे भिक्खूहि इमेसु चतुसु अरियसच्चेसु एवं तिपरिवट्टं द्वादसाकारं यथाभूतं ञाणदस्सनं न सुविसुद्धं अहोसि । नेव तावाहं भिक्खवे सदेवके लोके समारके सब्रह्मके ससमणब्राह्मणिया पजाय सदेवमनुस्साय अनुत्तरं सम्मासम्बोधिं अभिसम्बुद्धो'ति पच्चञ्ञासिन्ति" [धम्मचक्कपवत्तनसुत्तं] । सामं असमत्थसमये उप्पन्नाकारं निगूहनं उद्धरित्वा सुनिद्दिट्ठो ।

तेसं च किलेसानं विद्धंसनत्थाय समत्थसमये'पि सामं उप्पन्नाकारं सन्दस्सितुं—"यतो च खो मे भिक्खवे इमेसु चतुसु अरियसच्चेसु एवं तिपरिवट्टं द्वादसाकारं यथाभूतं ञाणदस्सनं सुविसुद्धं अहोसि । अथाहं भिक्खवे सदेवके लोके समारके सब्रह्मके ससमणब्राह्मणिया पजाय सदेवमनुस्साय अनुत्तरं सम्मासम्बोधिं अभिसम्बुद्धो'ति पच्चञ्ञासिं । ञाणं च पन मे दस्सनं उदपादि । अकुप्पा मे विमुत्ति । अयमन्तिमा जाति । नत्थिदानि पुनब्भवो'ति" अभूतपुब्बो अनुपन्नुपन्नो दुब्बिञ्ञेय्यो च अनवसेसकिलेसविद्धंसननयसंखेपो सुनिद्दिट्ठो ।

एतं संखेपनयं उपनिधाय संसारवट्टमूलबद्धस्स अनुसयकिलेससमूहस्स असेसविद्धंसनत्थाय वित्थारनयं सन्दस्सितुं अतिदुक्करो वत । तथापि सब्बकिलेससमुच्छिन्दितानं अग्गदक्खिणेय्यभूतानं खीणासवानं महाकरुणाञाणेन निच्छारितदेसितनयं निस्सयं कत्वा पटिच्चसमुप्पादचक्कं-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पि असेसतो छिन्दितुं समत्थं निपुणं दुब्बिञ्ञेय्यं इमं क्लिसविद्धंसननयं थेरवादनयगाहेन संदस्सयिस्साम ।

तिविधा हि किलेसा—वितक्कमकिलेसो, परियुट्ठानकिलेसो, अनुसयकिलेसो चाति । एते पन किलेसा धम्मतो याव गोत्रभू, भूमितो याव भवक्कं आकुलव्याकुलत्थाय समत्थत्ता उपरूपरि निपुणपहानत्थाय च न सुकरा । तस्मा तेसं निवारितुं वा विक्खम्भितुं वा निस्सेसतो विद्धंसितुं वा यथाक्कमं दुक्करा । तेसं च विद्धंसननयो'पि काममहग्गतलोकुत्तरञाणबलानुभाववसेन तिविधो ।

तथा च वितक्कमकिलेसो'ति छन्नं इन्द्रियानं आसवयोगगन्थादीहि गुत्तं असंयमत्ता निगुत्तगामनिगमेसु विलुत्ता दामरिक विय मनोद्वारमत्ते उट्ठहनकिच्चं अठत्वा याव कायद्वारवचीद्वारं महोघो विय अधिवत्थित्वा पीडितो हीनो गामो पुथुज्जनिको अनरियो अनत्थसंहितो वितक्कमकिलेसो वा, तं निवारितुं पातिमोक्खसंवरइन्द्रियसंवरादिसु चतुसु चारितवारितसीलेसु अमिलनं असबलं अछिद्दं सुरक्खितेसु गुत्तसीलसंपन्नस्स थोकं कालं पटिवाहितुं वा विसुद्धापेतुं वा समत्थो । तेन वुत्तं—

१. मिच्छासंकप्पबहुलो इन्द्रियानि न रक्खति ।
एवरूपस्स वे सीलं जायते हानभागियं ॥
२. सम्पन्नसीलो घटति समाधत्थाय यो पन ।
विसेसभागियं सीलं होति एतस्स भिक्खुनो ॥
[संयुत्तनिकाये]

३. न गंगा यमुना चापि सरयू वा सरस्सती ।
निन्नगा वा'चिरवती मही वापि महानदी ॥
४. सक्कुणन्ति विसोधेतुं तं मलं इध पाणिनं ।
विसोधयति सत्तानं यं वे सीलजलं मलं ॥
५. न तं स जलदा वाता न चापि हरिचन्दनं ।
नेव हारा न समनाय न चन्दकिरनंकुरा ॥
६. समयन्ती'ध सत्तानं परिलाहं सुरक्खितं ।
यं समेतीध अरियं सीलं अच्चन्तसीतलं ॥ इति वा ।
[विसुद्धिमग्गे सीलनिद्देसे]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

७. सीलवन्तं न बाधन्ति आसवा दिट्ठधम्मिका।
सम्परायिका दुक्खानं मूलं खनति सीलवा'ति ॥ [सुत्तनिपाते]

अयं वितक्कमकिलेसविद्धंसननयो'ति।

परियुट्ठानकिलेसो'ति तिविधानं कण्हपक्खवितक्कानं असंयमत्ता च—छन्नं नीवरनानं पतिवाहिकं अधिचित्तपमुखं समथज्झानपटिपदं वसीभावेन बाहुलिकं अभावितत्ता च गूळ्ह-पुरिसो विय वा थेय्यठाने आचिण्णबहुलो छेकमहाचोरो विय वा मनोद्वारे सुकरेण उट्ठितो पुथुज्जनजनेहि निवारितुं नातिसुकरो लहुकावत्तिको तिक्खविससदिसो च सुखुमकिलेसो वा।

तं निवारितुं अधिसीलपरिवारितेन झानअभिञ्ञाणसंयुत्तेन च अप्पनासमाधिना वा तनुकं कातुं वा विक्खम्भितुं वा समत्थो। न सीलमत्तदानमत्तेन। तस्मा तं किलेसजातं विद्धंसेतुकामो कुलपुत्तो तेसु समथकम्मठानेसु अत्तनो चरितानुरूपं एकेकं समथभावनासमाधिं याव झानअभिञ्ञाणं पुनप्पुनं भावेय्य वा समापज्जेय्य वा।

तेन आह—

१. यथा अगारं दुच्छन्नं वुट्ठि समतिविज्झति।
एवं अभावितं चित्तं रागो समतिविज्झति॥
२. यथा अगारं सुच्छन्नं वुट्ठि न समतिविज्झति।
एवं सुभावितं चित्तं रागो न समतिविज्झति॥

[धम्मपदे यमकवग्गे]

३. उट्ठानेनप्पमादेन संयमेन दमेन च।
दीपं कयिराथ मेधावी यं ओघो नाभिकीरति॥

[धम्मपदे अप्पमादवग्गे]

४. तस्मा नेकानिसंसम्हि किलेसमलसोधने।
समाधिभावनायोगे न पमज्जेय्य पण्डितो'ति॥ [विसुद्धिमग्गे समाधिनिद्देसे]

अयं परियुट्ठानकिलेसविद्धंसननयो'ति।

अनुसयकिलेसो'ति चतुन्नं आसवानं वा ओघानं वा याव अनतिक्कमनं सब्बसत्तनाम-खन्धेसु सकलदिवारत्तिं निरन्तरं पटिसंलीनो अत्तनो छाया विय अनुगतो च दुद्दसो च सत्तानं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

किलेसविद्धंसननयो

मूलबीजसदिसत्ता लोकियसीलसमाधिज्झानअभिञ्ञाणेहि अपातितुं असमत्थो च संसार-निम्मानकारो वा उदाहु सब्बलोकनिम्मानकारो वा ठामागतकिलेसो एव।

तं असेसतो विद्धंसितुं इच्छन्तेन कुलपुत्तेन सप्पुरिसुपनिस्सयं कत्वा अरियमग्गपवेसनद्वारभूतो यथाभूतविपस्सनाकम्मठाननयो सुट्ठु उग्गहितब्बो। दुतिये तीहि परिञ्ञाणेहि च सत्तहि विसुद्धीहि च परिपुण्णं च नामरूपपरिच्छेदञाणतो पट्ठाय याव अनुलोमञाणं संखारानं लक्खणरसपच्चुपट्ठानपदट्ठानानि आपथं च पापुणित्वा द्वादसविपस्सनाञाणद्वारानि यथाक्कमं विवरितुं आरभितब्बो।

ततिये एकतो उट्ठानभूतं गोत्रभूञाणं उट्ठहित्वा सत्तमं ञाणदस्सनविसुद्धिभूतं लोकियवंसअतिक्कमनं अरियानं सेट्ठवंसागतं पठममग्गफलञाणद्वारं चतुसच्चेहि एकतो विवरिस्सति तदा एतेन पठममग्गञाणेन यथामग्गानुरूपं दुद्दसे द्वे अनुसयकिलेसे असेसतो विद्धंसेति।

अथ पच्छा उपरूपरिभूतानि दुतिय-ततिय-चतुत्थ-मग्गञाणानि इच्छन्तो वा सेस-अनुसयकिलेसे असेसं विद्धंसितुं इच्छन्तो वा कुलपुत्तो पठमअरियमग्गञाणद्वारं पवेसन्तो विय तीहि परिञ्ञाणेहि वा सत्तहि विसुद्धीहि वा अट्ठारसमहाविपस्सनाञाणेहि वा परिपुण्णं कत्वा याव चतुत्थं पुन भावेय्य वा समापज्जेय्य वा।

तदा यथा उद्दिट्ठं सत्तानं मूलबीजसदिसं दुद्दसं दुब्बिञ्ञेय्यं सेसअनुसयकिलेससमूहं असेसं विद्धंसितुं समत्थो भविस्सति। न अञ्ञेन नयेन। तेनेवाह—

१. सीले पतिट्ठाय नरो सपञ्ञो चित्तं पञ्ञञ्च भावयं।
आतापी निपको भिक्खु सो इमं विजटये जटं'ति॥
[संयुत्तनिकाये]

२. सब्बदा सीलसम्पन्नो पञ्ञवा सुसमाहितो।
आरद्धवीरियो पहितत्तो ओघं तरति दुक्करं॥
[विसुद्धिमग्गे]

३. पटिसोतगामिं निपुणं गम्भीरं दुद्दसं अणुं।
रागरत्तं न दक्खन्ति तमोक्खन्धेन आवुटा॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

४. सुखविरागता लोके कामानं समतिक्कमो।
अस्मिमानस्स यो विनयो एतं वे परमं सुखं॥

[विनयपिटके महावग्गे]

५. येसं सम्बोधियंगेसु सम्मा चित्तं सुभावितं।
आदानप्पटिनिस्सग्गे अनुपादाय ये रता॥
खीणासवा जुतिमन्तो ते लोके परिनिब्बुता॥

[धम्मपदे पण्डितवग्गे]

६. यस्सासवा परिक्खीना आहारे च अनिस्सितो।
सुञ्ञतो अनिमित्तो वा विमोक्खो यस्स गोचरो॥
आकासे व सकुन्तानं पदं तस्स दुरन्वयं॥

७. असद्धो अकतञ्ञू च सन्धिच्छेदो च यो नरो।
हतावकासो वान्तासो स वे उत्तमपोरिसो'ति॥

[धम्मपदे अरहन्तवग्गे]

इच्चेवं तिविधकिलेसविद्धंसननयो अनुमानवसेन वेदितब्बो। यदि संदिट्ठिकेन एकन्तं जानितुं वा पस्सितुं वा इच्छेय्य। यथावुत्तं गम्भीरपटिपदानयं सुट्ठु उग्गहित्वा सामं पटिपज्जितब्बो। एत्थ च किलेसविद्धंसनकम्मं अरियमग्गञाणकिच्चमेव। न अञ्ञ-ञाणकिच्चं। तस्मा तं सुतमयञाणस्स वा चिन्तामयञाणस्स वा अविसयो। एकन्तेन पन भावनामयञाणस्सेव विसयो'ति सुट्ठु दट्ठब्बो'ति॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सिद्धाचार्यों के दार्शनिक तथा योग संबन्धी मत

श्री हर्बर्ट बी० गुएन्थरः, लखनऊविश्वविद्यालयः, लक्ष्मणपुरम् ।

सिद्धाचार्यों का युग, जिसका विस्तार कई शताब्दियों तक रहा, भारतीय विचार-
धारा के इतिहास में एक अनोखी घटना है। परम्परा के अनुसार सिद्धाचार्यों की संख्या
चौरासी तक ही सीमित बताई जाती है, किन्तु वस्तुतः कोई इस प्रकार की सीमा नहीं रही
और समीप के देशों में बुद्ध-धर्म के प्रसार के साथ साथ वे व्यक्ति भी सिद्ध तथा विशेष
अवस्थाओं में सिद्धाचार्य कहलाये जो सिद्धाचार्यों के समान ही अनुभवी थे और जिन्होंने
इन अनुभवों के आधार पर ही अपने उपदेश दिये।

बुद्ध-धर्म की महायान शाखा उसके विभिन्न प्रारम्भिक रूपों का तर्कयुक्त परिणाम
है। यह सभी प्रारम्भिक रूप जीवन के एक मार्ग अथवा पथ की ओर इंगित करते हैं।
किन्तु एक ओर जहाँ इन प्रारम्भिक रूपों में इस पथ का आलोकन एक ऐसे अन्त अथवा
अभीष्ट लक्ष्य को दृष्टिगत रखते हुए किया गया है जिसमें स्वयं ही सारे मूल्य निहित हैं और
जिसके कारण ये संसार तथा निर्वाण, मूल्य तथा मूल्य रहित, सत्ता तथा सत्ता रहित आदि
भिन्नताओं के परिहार का विवाद निश्चित करने में असमर्थ रहते हैं, वहीं दूसरी ओर
महायान शाखा द्वारा इस पथ को ही सबसे अधिक महत्ता दी गई हैं; क्योंकि यह इन भिन्न-
ताओं का परिहार कर सकने में समर्थ है और साथ ही उनमें प्राथम्य भी निश्चित करता है।
महायान में इस पथ को उस मार्ग के समान नहीं माना गया जो केवल एक स्थान से दूसरे
स्थान तक जाता हो। वह तो मानव की बौद्धिकता का प्रतीक है। इसी प्रकार मोक्ष की
स्थिति को बंधन की स्थिति के समान स्थायी न मानकर महात्तम एवं परम मूल्यवान्
आदर्शों के क्रमिक विकास का प्रतीक कहा गया है। बौद्धिकता लक्ष्य प्राप्ति का उपक्रम
किसी वर्ग विशेष का विशेषाधिकार नहीं है। प्रत्येक प्राणी उस बृहत्तर जीवन का एक अंग
है जो उसे अपनी मूल आवश्यकताओं की ओर आकर्षित कर सदैव कर्म की ओर प्रवृत्त
करता रहता है। अत एव इन सिद्धाचार्यों में विभिन्न वर्गों के व्यक्ति पाना कोई आश्चर्य
की बात नहीं। उनमें ब्राह्मण भी हैं और जुलाहे भी, राजा भी है और शिकारी तथा धोबी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भी। पुरुष और स्त्री में कोई भेदभाव नहीं। पुरुष स्त्रियों के शिष्य हो सकते हैं और स्त्रियाँ पुरुषों की शिष्या। सभी किसी न किसी प्रकार से उस अनुभव के साक्षी हैं, जिसे उन्होंने अपने जीवन का मार्गदर्शक सिद्धान्त मान लिया है। इस प्रकार इन भिक्षु और भिक्षुणियों के सम्प्रदाय ने बुद्ध-धर्म को एक ऐसे सार्वभौमिक पंथ का रूप दे दिया, जो मनुष्य के प्रयत्नों को महत्त्व देने के कारण पूर्णरूप से उदार और सहनशील था।

यह सत्य है कि महायान एक सामान्य शब्द है, जिसमें कई प्रकार की धारणाओं का समावेश है। कुछ गहन भेद होते हुए भी इन धारणाओं को 'माध्यमिक' और 'विज्ञानवाद' के अन्तर्गत वर्गीकृत किया जा सकता है। इन दोनों धारणाओं में ही प्रधानरूप से चित्त को महत्त्व दिया गया है, किन्तु चित्त के तार्किक स्वरूप के संबन्ध में इनमें मतभेद है। फिर भी चित्त को प्रधानतः महत्त्व देने के कारण इनमें इस प्रवृत्ति के दर्शन होते हैं जो बुद्ध-धर्म में प्रारम्भ से ही विद्यमान रही है :—

चित्तेन नीयते लोको चित्तेन परिकृष्यते।
चित्तस्यैकधर्मस्य सर्वे धर्मा वशानुगाः॥

प्राचीन भारत में दर्शन को कभी जीवन से विलग नहीं माना गया। जो दर्शन जीवन में प्रयुक्त न हो सके उसे व्यर्थ और मिथ्या-विश्वास मानकर यह कहा जाता था कि उसमें लगना केवल समय नष्ट करना है। इसका अर्थ यह नहीं है कि विवाद करते समय लोग जीवन और दर्शन के संबन्ध को कभी भूलते ही न हों। बुद्धि-युक्त तर्क-वितर्कों में भी कभी ऐसा प्रतीत होता है कि दर्शन को जीवन से विलग माना जा रहा है, किन्तु यह एक अस्पष्टता की बात है जो विषय की सूक्ष्म परीक्षा करने पर नहीं टिकती।

सिद्धाचार्यों का दर्शन तो जीवन के क्रम से ही संबन्धित है। दर्शन तो हमारे दैनिक जीवन का मूल है, क्योंकि वह सदैव दृढ-चित्त होकर सत्य की ही खोज में रत रहता है। इस कारण इस प्राप्त सत्य के अनुसार अपना जीवन व्यवस्थित करने से पहले मस्तिष्क के स्वरूप अथवा अर्थ को समझ लेना आवश्यक होता है। कर्म में प्रवृत्त होने से पहले सर्व प्रथम मस्तिष्क के स्वरूप अथवा अर्थ का निर्णय कर लेने की बात को दूसरे प्रकार से यों भी कहा जा सकता है कि हमारे सभी प्रकार के कार्यों के प्रारंभ में दर्शन-मार्ग की स्थिति होती है और इसके उपरान्त भावना-मार्ग का स्थान है, जो वास्तविक जीवन में विचार मात्र की ओर नहीं वरन् कर्म की ओर इंगित करता है। इस प्रकार दर्शन-मार्ग एवं भावना-मार्ग तथा 'कार्य' रूप में उनका

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

हमारे जीवन पर प्रभाव प्रारम्भ के उस त्रिगुण—शील-समाधि-प्रज्ञा—का तर्कयुक्त परिणाम है, जिसके धागे में बुद्ध-धर्म के सारे सूत्र जैसे पिरोये हुए हैं। इसी तथ्य के आधार पर कि दर्शन जीवन से अभिन्न है, यह कहा जा सकता है कि सिद्धाचार्यों का दर्शन उस स्थान से प्रारम्भ होता है जहाँ यह सूत्र समाप्त हो जाते हैं। किन्तु यह कहना अधिक युक्तिसंगत होगा कि सिद्धाचार्य बुद्ध-धर्म का व्यावहारिक रूप प्रस्तुत करते हैं, जहाँ सूत्र केवल उसके सिद्धान्तों का निरूपण कर पाते हैं।

खेद का विषय है कि सिद्धाचार्यों के अधिकांश लेखों की मूल प्रतियाँ, यदि वे कभी क्रम से लिखी गई हों, खो चुकी हैं। इस प्रकार विभिन्न सिद्धों के दार्शनिक विचारों का पता लगाना एक बड़ा कठिन कार्य हो जाता है। इसके अतिरिक्त साथ ही साथ दो परम्पराएँ दृष्टिगत होती हैं—एक दीक्षितों की और दूसरी उनसे न्यून वर्गवालों की। प्राप्त सामग्री की, जिसका कुछ अंश प्रामाणिक है और कुछ संग्रहीत, तुलना सिद्धों के गीतों के तिब्बती अनुवाद और टीका से करने पर यह तथ्य सिद्ध हो जाता है। सिद्धाचार्यों के दर्शन का विवेचन बौद्ध-धर्म के विकास पर उसके प्रभाव को दृष्टि में रखते हुए केवल परोक्ष रूप से किया जाता है, इस तथ्य से कम से कम इतना तो निश्चित ही माना जा सकता है कि वे केवल कुछ अपवादों के साथ विज्ञानवाद के स्थान पर माध्यमिक मार्ग के अधिक समीप थे।

सिद्धाचार्यों का दर्शन चूँकि अनुभव पर आधारित है और यह अनुभव आवश्यक-रूप से मानसिक है, इस कारण चित्त सदैव आगे रहता है। चित्त से ही संसार और निर्वाण दोनों का उद्‌गम हुआ है। किसी इच्छानुसार फल देने वाली मणि की भाँति इससे हम जो कुछ भी माँगें उसे प्राप्त कर सकते हैं। सरह ने एक स्थान पर कहा है :—

चित्तैक्क सअलवीअं भवणिव्वाणो वि जस्स विफुरन्ति।
तं चिन्तामणिरूअं पणमह इच्छाफलं देन्ति॥

(चित्त ही प्रत्येक वस्तु का मूल है। संसार और निर्वाण का उद्‌गम भी उसी से हुआ है। इसके प्रति शीश झुकाओ, क्योंकि इच्छानुसार फल देनेवाली मणि की भाँति यह समस्त कामनाओं की पूर्ति करता है।)

किन्तु चित्त एक इकाई है। इससे पृथक् रहकर भी हम इसको देख सकते हैं, फिर भी हमारा पृथक्करण चित्त की पूरी परिभाषा में नहीं आता। इस इकाई के कारण संसार और निर्वाण का विभाजन अस्थिर सा है। दोनों एक दूसरे से मिले हुए हैं :—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जो भव सो णिव्वाण खलु स उ ण मएणहु अएण।
(जो संसार है वह निर्वाण भी है, इनमें कोई भेद मत समझो)।

किन्तु नागार्जुन का यह कथन है :—

न संसारस्य निर्वाणात् किञ्चिदस्ति विशेषणम्।
न निर्वाणस्य संसारात् किञ्चिदस्ति विशेषणम् ॥

चित्त की इस इकाई के कारण, जिसमें स्वयं किसी प्रकार के भेद की संभावना नहीं है, हमारे जीवन में जो कुछ भी हमारे समक्ष आता है उसमें हम यही गुण पाते हैं, और चूँकि चित्त चपल होता है और कभी स्थिर नहीं रहता, उसका प्रतीक 'नाथ' से दिया जा सकता है।

जत्त वि चित्तहि विफ्फुरइ तत्थ वि णाह सरूअ।
अएण तरंग कि अएण जलु भवसम खसम सरूअ ॥

(जहाँ चित्त की चपलता दृष्टिगत होती है, वहीं ईश्वर का स्वरूप प्रकट होता है। क्या लहरें समुद्र से विलग हैं ? वह एकता जो सम्पूर्ण प्रकृति में व्याप्त है, उसी प्रकार है जैसे आकाश की समता)।

एकता की यह धारणा सभी स्थानों पर और सभी वस्तुओं में व्याप्त है। इससे इस निष्कर्ष पर पहुँचा जाता है कि दासत्व से विलग कहीं मोक्ष की खोज करना असंभव है अथवा आत्मिक सत्ता भी हमारी शारीरिक सत्ता में ही निहित है :—

असरिर [कोइ] सरीरहि लुक्को। जो तहि जाणइ सो तहि मुक्को ॥
(आत्मिक भी शारीरिक में निहित है। जो यह जानता है वह मुक्त हुआ)।

इस धारणा के परिहार के लिए कि सत्ता और सत्तारहित एवं अच्छाई और बुराई की भिन्नताएँ, जिनके बीच हम सदैव चक्कर काटा करते हैं, विलग अस्तित्व रखती हैं, सिद्धाचार्यों ने एक नए शब्द का प्रयोग किया, ताँकि जीवन की एकता की ओर इंगित किया जा सके। यह शब्द था 'सहज'। किन्तु इन भिन्नताओं का एक ही अस्तित्व भी नहीं मानना चाहिये। वे न तो 'सत्ता' में हैं और न ही 'सत्तारहित' में : —

सहज सहाव ण भावाभाव।
(सहज की प्रकृति न तो सत्ता में है और न हो सत्तारहित में)।

यह तो एक शब्द मात्र है। यदि हम शब्द का प्रयोग न करें तो अपने भाव दूसरों के

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रति प्रकट नहीं कर सकते। सहज के संबन्ध में उक्त धारणा ही व्यावहारिक योग की वास्तविक कुंजी है।

'सहज' के संबन्ध में विवेचन करते समय सदैव यह बात ध्यान में रखते हुए भी कि स्वयं में ही इसकी कोई सत्ता नहीं है, अपने चित्त की रचना के कारण हम उसमें इतने खो जाते हैं कि फिर यह नहीं समझ पाते कि उनका कोई विलग अस्तित्व नहीं है, वरन् वह एक वृहत्तर और अधिक स्थायी 'सम्पूर्ण' का भेद मात्र है। यह अधिक स्थायी सम्पूर्ण ही वास्तव में ज्ञान है, क्योंकि ज्ञान चित्त की ही प्रकृति है। यहाँ ज्ञान का तात्पर्य साधारण अर्थ में नहीं वरन् 'निर्विकल्पक ज्ञान' के अर्थ में किया गया है। इसके अतिरिक्त चूँकि चित्त स्वयं इकाई न होकर किसी दूसरी वस्तु से प्रकट होनेवाला एक गुण है और यह 'निर्विकल्पक ज्ञान' है जो एक ऐसी परिभाषातीत एवं अवर्णनीय वस्तु से प्रकट होता है, जिसे बहुधा 'शून्यता' की संज्ञा दी जाती है। इसके प्रकट होने के 'ज्ञान' से उसका बहुत निकट का संबन्ध है, जिसका तार्किक अध्ययन किया करते हैं। उनकी शब्दावली में इसे 'कल्पनापोढ' की संज्ञा दी जा सकती है। हम लोगों में ऐसे क्षणों को अधिक देर तक रोक सकने की क्षमता नहीं है, जहाँ चित्त में किसी भी प्रकार की वस्तु का विचार न आवे, चाहे वे वस्तुएँ प्रकृति-जन्य हों अथवा इन्द्रिय-गोचर। इसलिए हम एक भ्रान्ति के सागर में डूब जाते हैं, जहाँ विकल्प अथवा चित्त की इकाई और हमारे बौद्धिक जीवन के बीच कृत्रिम भेद का प्राधान्य है। किन्तु चित्त की इकाई और अनुभवों के बौद्धिक होने के कारण भ्रान्ति भी अवर्णनीय वस्तुओं का स्वरूप ग्रहण कर लेती है। वह प्रत्येक वस्तु, जो 'निर्विकल्पक ज्ञान' नहीं है, इससे परे है, भ्रान्ति है, विकल्प है और इस अवस्था में जो कुछ भी हम करते हैं, वह विकल्प के वशीभूत होकर करते हैं। इस धारणा को इसके बाह्य अर्थ के अनुसार समझने से हम कर्म को पूर्णरूपेण रोक देने के परिणाम तक पहुँच सकते हैं, किन्तु सिद्धाचार्य दूसरों के भले के लिए कर्मनिष्ठ होने की बात करते हैं। किन्तु यह कर्म विकल्प के वशीभूत होकर नहीं करना चाहिए, इसके लिए 'अमनसिकार' बर्तना चाहिए, जो क्रियात्मक रूप से मूलतः 'निर्विकल्पक ज्ञान' के ही समान है। यदि सिद्धाचार्यों के ध्यान के संबन्ध में कथन पढ़े जायें तो असत्य के आभास की यह परिस्थिति और भी अधिक कटु प्रतीत होती है। ऐसा लगता है कि वे ध्यान का तिरस्कार कर रहे हैं। सरह का कथन है :—

झाण वाहिअ कि कीअइ झाणें। जो अवाअ तहि काहि वखाणें॥
भव मुद्दे सअलहि जग वाहिउ। णिअ-सहाव णउ केणवि साहिउ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(ध्यान लेकर क्या करेंगे, जब वास्तविकता ध्यान से परे है। जो अकथनीय है, उसके संबन्ध में कैसे कुछ कहा जाय? सारा संसार अस्तित्व के आधार पर आश्रित हो धोखा खाता है। कोई अपने स्वरूप को सिद्ध नहीं कर सकता)।

यहाँ पर यह बात विचारणीय है कि 'साहिउ' शब्द माध्यमिक-दर्शन का द्योतक है, जिसे सिद्धाचार्यों के उपदेशों का सार कहा जा सकता है। उन्होंने भी वस्तुतः अनुभव को तर्क से अधिक महत्त्व दिया है, यद्यपि वास्तविकता के संबन्ध में हम कोई सिद्धान्त अथवा विश्वास न बना बैठें, इसके लिए उन्होंने स्वयं बहुत उपप्लवकारी तर्क का प्रयोग किया है। ध्यान की असारता के संबन्ध में और भी कथन है :—

झाणें मोक्ख कि चाहुरे आलें।

(दोषपूर्ण ध्यान के द्वारा तुम मोक्ष क्यों खोजते हो?)।

झाणें मोहिअ सअल वि लोअ। णिअ सहाव णउ लक्खई कोअ॥

(सारा संसार ध्यान द्वारा छला जाता है। अपना स्वभाव कोई नहीं जानता)।

किन्तु इन कथनों के अनुसार हमें यह न समझ लेना चाहिये कि 'ध्यान' को व्यवहार में नहीं लाना चाहिये। सिद्धाचार्यों का पूरा दर्शन और उसका जीवन में प्रयोग, ध्यान पर ही आश्रित है। परन्तु ध्यान को स्वयं ही उद्देश्य नहीं मानना चाहिये। अधिक से अधिक इसे उस उपाय की संज्ञा दी जा सकती है, जिसके द्वारा हम अपने उन सजीव अनुभवों को वश में रख सकते हैं, जो अन्यथा समाप्त हो जाते हैं।

योग के अभ्यास 'सहज योग' कहलाते हैं और तिब्बती ग्रन्थों में इनका पूर्ण विकास हुआ है। सिद्धाचार्यों ने इसे क्रमानुसार प्रस्तुत नहीं किया। गीतों द्वारा अपनी सिद्धि को प्रकट करने के लिए उन्होंने जिन शब्दों का प्रयोग किया है, उन्हें केवल योग के अभ्यासों से ही समझा जा सकता है। सहज योग के चार चरण हैं, जिनमें से प्रथम दो 'शमथ' और 'विपश्यना' की स्थिति के अनुरूप हैं। इनमें से प्रथम को 'एकाग्रता' भी कहा जाता है, जो ध्यान के सारे अभ्यासों का आधार है। जब एक ऐसी स्थिति में पहुँच जाया जाता है, जहाँ किसी अन्य वस्तु अथवा उससे संबन्धित विश्वासों से कोई विघ्न उपस्थित हो सके तभी वास्तविकता के गहन अनुभवों और अस्तित्व की इकाई की ओर बढ़ा जा सकता है। इस स्थिति तक पहुँचने के दो मार्ग हैं। पहला उन साधारण अभ्यासों के समान है, जिनमें किन्हीं विशेष वस्तुओं के प्रति एकाग्र-चित्त होने और प्राणायाम के साधन का प्रयोग किया

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

सिद्धाचार्यों के योग सम्बन्धी मत

जाता है। दूसरा मार्ग एक मनोवैज्ञानिक प्रकार है, जिसमें अन्तः अवलोकन को महत्त्व देते हैं। 'एकाग्रता' की स्थिति में पहुँचने के उपरान्त योगी 'विपश्यना' की स्थिति में आता है, जिसे 'निष्प्रपंच' कहते हैं। बौद्धिकता के विकास के उपरान्त विश्राम की जो अवर्णनीय और परमानन्दमयी स्थिति उत्पन्न होती है, तथा विकल्प की विश्रामहीन स्थिति में वास्तविकता से दूर रहने के कारण जो दुःख की नींव पड़ती है, इन दोनों विलग अवस्थाओं के बीच काफी दूरी होती है; जिसको पाटने में निष्प्रपंच की स्थिति एक पुल का कार्य करती है। यह भ्रान्ति अथवा दासत्व और ज्ञान अथवा मोक्ष की दूरी को भी मिला देती है।

मनुष्य केवल एक बौद्धिक प्राणी ही नहीं है, वह भावुक भी होता है। जीवन की एकता पर दृढ रहते हुए सिद्धाचार्य भावुकता का महत्त्व भी स्वीकार करते हैं। चेतना और भावुकता में भी आत्मिकता का सार होता है। अतः भावुकता और बौद्धिकता में किसी को अधिक महत्त्व दे देना उचित नहीं। जब ज्ञान चित्त की लहरों से मुक्त होता है, भावुकता बौद्धिक जीवन के लिए विष न रहकर उसे ताप प्रदान करती है, संसार के दुःख हमें नहीं व्यापते और हम निर्वाण के द्वारा परमानन्द की स्थिति में आ जाते हैं। इस अनुभव को 'एकरस' अथवा 'समरस' की संज्ञा दी जाती है और ऐसा कहा जाता है कि चित्त का साकार प्रत्यक्षीकरण हो गया और चित्त से आकार की उत्पत्ति हुई। इसका बड़ा सुन्दर उदाहरण है सागर और उसकी लहरें। चित्त और आकार के सह-अस्तित्व तथा अन्तःप्रवेश को युगनद्ध कहते हैं और इसका उदाहरण बरफ तथा जल से दिया जा सकता है।

चित्त और चित्त के अवर्णनीय समस्त अंगों में अधिक से अधिक एकता का अनुभव करने पर अन्तिम स्थिति आती है और वह है 'धर्मकाय' की प्राप्ति, जो 'समाहित ज्ञान' तथा 'पृष्ठलब्ध ज्ञान' के बीच की दूरी को पाटती है। इसे 'अभावनीय' की संज्ञा भी दी जाती है और इस स्थिति में संसार तथा निर्वाण, दोनों के ही बंधनों से पूर्णरूपेण मुक्ति पाई जा सकती है।

वास्तविकता अविभाजनीय है, इस तथ्य के परिणाम महत्त्वपूर्ण हैं। मैत्रेयनाथ ने अपने 'उत्तरतन्त्र' में कहा है :—

नापनेयमतः किञ्चिदुपनेयं न किञ्चन।

परिणामस्वरूप स्त्री-पुरुष का भी कोई भेद नहीं है। सिद्धाचार्यों ने इस परिस्थिति को उतनी ही अच्छी तरह से समझा है, जितना दूसरे लोग उसके प्रति उनकी धारणा को

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

समझने में असमर्थ रहते हैं। दूसरे शब्दों में यह कहा जा सकता है कि पुरुष-स्त्री का संबन्ध भी वास्तविकता की प्राप्ति का एक मार्ग है। जो बात दी हुई है उससे ही सोचकर प्रारम्भ किया जावे तो हम पावेंगे कि स्त्री और पुरुष के भेद से दूर भागने पर चित्त को शान्ति नहीं मिल सकती। उसके लिए तो :—

द्रष्टव्यं भूततो भूतं भूतदर्शी विमुच्यते।

अत एव स्त्री और पुरुष के संबन्ध को एक योगाभ्यास मान लिया गया है, जिसमें चार मुद्रायें हैं। प्रत्येक मुद्रा भावुकता के एक चरण को व्यक्त करती है। धर्ममुद्रा में पुरुष और स्त्री का शारीरिक एवं मनोवैज्ञानिक संबन्ध व्यक्त होता है। यह संबन्ध मनुष्य के स्वभाव को उसके विभिन्न प्रकार के आन्तरिक एवं बाह्य खिचावों से मुक्ति तथा एक प्रकार की अनुरूपता प्रदान करता है। कर्ममुद्रा में इस संबन्ध के अनुभवों की समीपता व्यक्त होती है। यह स्त्री-पुरुष के स्वभाव से संबन्धित विश्वासों से मुक्त है। महामुद्रा में अन्तिम अनुभव व्यक्त होते हैं और समयमुद्रा में मूर्तिपूजक और रहस्यवादी के लिए पर्याप्त अवसर हैं, क्योंकि वह नियमनिष्ठता से परे जाना नहीं पसन्द करता। यह लिखना अनुचित न होगा कि सिद्धाचार्य सदैव इस बात पर जोर देते थे कि यदि इन मुद्राओं को बिना ध्यान के समझा जाय, तो काफी हानि संभव है। ध्यान का अभ्यास बहुत लम्बी अवधि तक कर लेने के उपरान्त ही वे स्त्री-पुरुष के संबन्ध को अभीष्ट प्राप्ति का मार्ग बनाने का अवसर दिया करते थे।

सिद्धाचार्यों के उपदेशों में सदैव सिद्धान्तों का परिहार कर व्यावहारिकता और अनुभवों को समझाने के प्रयत्न दृष्टिगत होते हैं। भिन्नताओं के द्वन्द्व को समाप्त कर सिद्धाचार्यों ने एक मध्यममार्ग की ओर इंगित किया है, जिसमें जीवन की अवर्णनीय एकता का समावेश है और जिसे समझने के लिए इसका अनुभव करना आवश्यक है। इसके अतिरिक्त अपने दर्शन के अनुसार वे जीवन यापन भी कर सके हैं। इस प्रकार सिद्धाचार्यों ने बौद्ध-धर्म को जो प्रेरणा प्रदान की वह इतिहास में अनोखी ही है। अपने दर्शन के अनुसार ही जीवन यापन करके वे अपने कथनों की बाह्य असत्यता का भी खंडन कर सके हैं। सचमुच ही जीवन कभी सुदृढ सिद्धान्तों की परवाह नहीं करता, वरन् सदैव आकार बदलता रहता है॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नाथयोगदर्शनम्

(शिवशक्तितत्त्वम्)

श्रीअक्षयकुमारवन्द्योपाध्यायः, गोरक्षपुरम् ।

योगदर्शनशब्देन महर्षिणा पतञ्जलिना प्रणीतं दर्शनम्, तत्रोपदिष्टः साधनमार्गश्च 'योगमार्ग' इति नाम्नाऽभिधीयते । नाथयोगिसंप्रदाये योगदर्शनं योगमार्गश्चेत्युभावपि विशिष्ट-रूपं परिजग्रहतुः । विभिन्नसम्प्रदायेषु नाथयोगिसम्प्रदायस्य हठयोगिसम्प्रदायत्वेन प्रख्यातत्वेऽपि, सम्प्रदायेऽस्मिन् हठयोगस्तु साधनस्याङ्गविशेषत्वेनैव स्वीकृतोऽस्ति । अस्य साधकास्तस्याङ्ग-विशेषस्य विशेषज्ञा भवन्ति । सुनियतेनानुशीलनेन मानवो निजदेहस्थेषु प्रत्यङ्गेषु कीदृक् प्रभुत्वं स्थापयितुं शक्नोति, देहान्तर्वर्तिनः प्रतियन्त्रस्य क्रियाः कीदृक् सर्वथा स्वेच्छाधीनाः कर्तुं शक्नोति, निजां प्राणशक्तिं मनःशक्तिं च स्वायत्तां कृत्वा कियत्पर्यन्तमलौकिकशक्तिसम्पन्नो भवितुं शक्नोतीत्येवंविधेषु विषयेषु गुरुशिष्यपरम्परया हठयोगिनो बह्वीर्गवेषणाः कृतवन्तः, असामान्यं कृतित्वं च प्रदर्शितवन्तः । हठयोगेन मनुष्यो देहेन्द्रियमनसां प्रभुर्भवति । देहस्य प्राणस्य मनसश्चोपरि प्रभुत्वप्रतिष्ठायामेव तेषां साधनाया अवसानं न भवति । अनया या दिव्यशक्तिर्यच्च दिव्यं ज्ञानं प्राप्यते तत्साहाय्येन जगतो मूलभूतस्य चरमतत्त्वस्य निरावरणः साक्षात्कार एव तेषां साधनाया आदर्शः । तत्तु चरमतत्त्वं निजाभ्यन्तरे स्वस्यात्मनोऽप्यात्म-रूपेणोपलभ्य, तयैव चरमतत्त्वसंबन्धिन्या दृष्ट्या विश्वस्य सृष्टिस्थितिप्रलयानां रहस्यमवगत्य, सर्वप्रकारकेभ्यो बन्धनक्षुद्रतामोहदुःखादिभ्यश्चात्यन्तिक्या विमुक्तेर्लाभम्, तथैवाखिल-विश्वस्योपरि सम्यङ् नाथत्वस्य प्रभुत्वस्य वा प्रतिष्ठामेव ते मानवजीवनस्य लक्ष्यमामनन्ति । ज्ञाने, प्रेमणि, शक्तौ, शान्त्यां च पूर्णत्वमवाप्य मानव ईश्वरत्वे प्रतिष्ठितो भविष्यति, नित्यसिद्धेन नित्यपरिपूर्णेन परमेश्वरेण सह स्वरूपतोऽभिन्नतां चोपलप्स्यते, इत्यमुमेव मानवताया महान्त-मधिकारमङ्गीकृत्य नाथयोगिनः साधनसमरे प्रवर्तन्ते ।

ते निजसम्प्रदायं 'सिद्धसम्प्रदाय' इतिनाम्ना घोषयन्ति । स्वसाधनाभिरभीप्सिते लक्ष्ये य उपनीता त एव सिद्धाः । सुतरां ज्ञाने, प्रेमणि, शक्तौ, शान्त्यां चादिनाथेन योगीश्वरेण शिवेन सह य एकीभावमवाप्तुं शक्नुवन्ति, त एव यथार्थतः सिद्धेति नाथेति वा नाम्नः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

योग्याः। अस्मिन् सम्प्रदाये विभिन्नकालेष्वेवंभूता अनेके सिद्धा महापुरुषा आविरभूवन्; तैः साक्षात्कृतं तत्त्वं समवलम्बिता साधनपद्धतिश्चैवास्मिन् सम्प्रदाये साध्यसाधकविषयिणो मतवादस्य भित्तिः। सिद्धानामेषां जीवनस्य निजजीवनाभ्यन्तरे सम्यग्रूपेण प्रकटीकरणमेव साधकजीवनस्यादर्शं इत्येवंभूतं विश्वासं सदा सुदृढीकर्तुमेव सम्पूर्णोऽपि सम्प्रदायः 'सिद्धयोगि-सम्प्रदायः' इति नाम्नाभिधीयते।

योगिगुरुर्गोरक्षनाथो न चास्य सम्प्रदायस्यादिप्रवर्तकः, अपि तु प्रधानतम आचार्यः। वेदान्तिसम्प्रदाये यदाचार्यशङ्करस्य स्थानं तदेव गोरक्षनाथस्यापि योगिसम्प्रदाये। भगवतो बुद्धस्यानन्तरं शङ्कराचार्यादृते योगिगुरोर्गोरक्षनाथस्येव नापरस्य कस्यापि महापुरुषस्य व्यक्तित्वमुपदेशश्च भारतीयाध्यात्मिकजीवनस्योपरि तावद्विशालं प्रभावं विस्तारयितुं समर्थोऽभूदित्यनुमन्ये। भारतवर्षस्य प्रतिप्रदेशेषु तद्बहिर्भूतेष्वनेकेषु देशेष्वपि नाथसम्प्रदायस्य बहवो मठा मन्दिराण्याश्रमाः शाखासम्प्रदायाश्च संगठिताः, सर्वत्र च तत्र गोरक्षनाथस्यालौकिक-योगैश्वर्यसंबन्धिन्यः किंवदन्त्यः प्रचलिताः सन्ति। सम्प्रदाये त्वस्मिन् गोरक्षनाथः साक्षाच्छिव-स्यावताररूपेण स्वीकृत्य पूजितो भवति। अमरश्चैषः, अद्यापि दिव्यदेहस्थितः लोकसमा-जस्य कल्याणं विधत्ते—इत्ययं साम्प्रदायिकसाधकानामकपटविश्वासः।

गोरक्षनाथः खलु कस्मिन् समये कस्मिन् वा प्रदेश आविरभूदित्यस्मिन् विषय ऐतिहासिकेष्वद्भुतमतवैषम्यं दृश्यते। वंगमहाराष्ट्रपंजाबप्रभृतयो देशास्तमात्मजं घोषयन्ति। तस्याविर्भावकालोऽपि तथैव विविधकिंवदन्तीमवलम्ब्य खीष्टपूर्वस्याः प्रथमशताब्द्या आरभ्य खीष्टीयपञ्चदशशताब्दीपर्यन्तं नानाकालेषु कल्पितो भवति। तत्संप्रदायान्तर्वर्तिनस्तु तं सत्यत्रेताद्वापरकलिष्विति चतुर्ष्वपि युगेषु लोककल्याणार्थं स्वेच्छयाविर्भूतं मन्यन्ते। भवतु, ऐतिहासिकतत्त्वालोचना तु प्रबन्धस्यास्य नोद्देशः, अपि तु तेन प्रवर्तितस्य दार्शनिकमतवादस्य संक्षिप्तं विवरणमेवोद्दिश्य प्रवर्तामहे।

नाथसंप्रदाये संस्कृतभाषायां प्रादेशिकभाषायां च साध्यसाधनसंबन्धिनोऽनेके ग्रन्था विरचिता आसन्। गोरक्षनाथः स्वयमप्यनेकान् ग्रन्थान् रचयामास। ग्रन्थानामधिकांशेषु प्रधानतया योगसाधनायाः पद्धतिर्नानारूपेणोपदिष्टा, केवलं यत्र तत्र च दार्शनिकतत्त्वं सन्निविष्टमस्ति। तेषु 'सिद्धसिद्धान्तपद्धति' इतिनाम्ना ख्यातः संस्कृतभाषायामुपनिबद्ध एक उत्कृष्टो दार्शनिकग्रन्थः। इममेव ग्रन्थमवलम्ब्यास्मिन्निबन्धे गोरक्षनाथस्य दार्शनिकमतमालोचितं भविष्यति। ग्रन्थश्चायं गद्यपद्यात्मकः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सिद्धसिद्धान्तपद्धतेरयं प्रथमः श्लोकः—

आदिनाथं नमस्कृत्य शक्तियुक्तं जगद्गुरुम् ।
वक्ष्ये गोरक्षनाथोऽहं सिद्धसिद्धान्तपद्धतिम् ॥१।१॥

गोरक्षनाथोऽत्र ग्रन्थकर्ता । नाथसम्प्रदायस्यादिप्रवर्तक आदिनाथो गोरक्षनाथस्य गुरोरपि गुरुः, अर्थात् परमगुरुरूपेण प्रसिद्धः । तमेष शक्तियुक्तं जगद्गुरुं चोक्त्वा प्रख्यापयति, तस्मै प्रणतिं च विज्ञाप्य ग्रन्थमारभते । अस्मिन् मङ्गलाचरणश्लोके ग्रन्थस्य प्रतिपाद्यं विषयमपि निर्दिष्टं भवति । आदिनाथस्तु ग्रन्थकर्तुर्मते तत्त्वतः सर्वेषां नाथानामादिः, निखिलयोगिनां चिरन्तन आदर्शः, योगीश्वरो महादेवः । स एव परमं तत्त्वम् । एतदेव परममद्वयं तत्त्वं शिवः, स च 'शक्तियुक्तः', 'जगद्गुरुश्च' । इदमेव शिवतत्त्वं ग्रन्थस्य प्रतिपाद्यम् ।

शिवो नित्यशक्तियुक्तः । स चैकोऽद्वितीयः सर्वविधपरिच्छेदरहितः । तस्य शक्तिरपि स्वरूपतस्तदभिन्ना । सुतरां शक्तेः सत्ताया हेतोः कोऽपि द्वैतभावस्तस्मिन्न संभवति । तद्यथा—

शिवस्याभ्यन्तरे शक्तिः शक्तेरभ्यन्तरे शिवः ।
अन्तरं नैव जानीयात् चन्द्रचन्द्रिकयोरिव ॥४।२६॥

शिवः सच्चिदानन्दस्वरूपः, तस्य शक्तिरपि सच्चिदानन्दमयी । परन्तु शक्त्याः संकोच-विकासौ भवतः, व्यक्ताव्यक्तौ च भावौ स्तः, क्रियायामभिव्यक्तिरेवं क्रियाभावे स्वस्वरूपेऽवस्थान-मस्ति । एवं परिणामस्यास्तित्वादेषा शक्तिरिति नाम्नाभिधीयते ।

"सर्वशक्तिप्रसरसंकोचाभ्यां जगत्सृष्टिः संहृतिश्च
भवत्येव न सन्देहः ॥"४।२०॥

किन्तु परिणामस्यात्मा त्वपरिणामी । अपरिणामिनः सत्स्वरूपस्यात्मनोऽधिष्ठातृत्वं व्यतीत्य न कोऽप्यर्थो भवति परिणामिन्याः सत्तायाः । परिणामश्चापरिणामश्चैकस्यैव तत्त्वस्य द्वावङ्गौ ।

न शिवेन विना शक्तिः न शक्तिरहितः शिवः ।

व्यावहारिके तु ज्ञाने परिणामस्य परिवर्तनस्य वा प्रत्ययोऽपरिणामस्यार्थात् स्थिति-शीलतायाः प्रत्ययसापेक्षः, तथैवापरिणामस्यार्थादपरिवर्तनस्य प्रत्ययोऽपि परिणामस्य परिवर्तनस्य वा प्रत्ययसापेक्षः । केवलं परिणामस्याथवा केवलमपरिणामस्य केवलं गत्या वा केवलं स्थित्या एव न कापि धारणा संभवति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्थूलदृष्ट्या स्थितेः गतेश्च परस्परं सापेक्ष्यं प्रतीयते, परस्परमालिङ्गय्यैव तयोरन्योन्यस्य सत्तेतीदमनुभवगोचरं वर्तते। सूक्ष्मदृष्ट्या तु विचारे कृते सतीदमपि प्रत्यक्षं भवति यद्यत्किञ्चिदप्यापाततः स्थिरं गतिहीनं परिणामरहितं प्रतीयते, तदपि नैव सर्वथा स्थिरम्। गतिस्तु तस्यान्तरेऽपि भवत्येव। तदपि परिणामप्रवाहस्यैव समन्वितोऽवस्थाविशेषः। यत्र च तथैव केवलं गतिः परिणाम एव वा प्रत्यक्षीक्रियते, तस्याप्यन्तरे कथञ्चिदपि स्थितिशीलताऽवश्यमेव विद्यते। अतिद्रुतः परिणामशीलः पदार्थः प्रायः स्थिरोऽचञ्चलोऽपरिणामीव प्रतिभाति। तथा च नित्यस्याच्युतस्वभावस्य परिणामरहितस्यापि वस्तुनो मध्येऽपि सूक्ष्मदृष्ट्या सूक्ष्मपरिणाम आविष्कृतो भवति। स्थितिगत्योर्भेदः, नित्यत्वपरिणामित्वयोः पार्थक्यं वस्तुत आपेक्षिकरूपेणैवावगम्यते।

सूक्ष्मयाऽऽलोचनयेदमेव निरूपितं भवति यत्परमायाः परकाष्ठाया अवस्थायां गतिः स्थितिश्च, परिणाम एकत्वं च परस्परेण सहाभिन्नस्वरूपे प्रतिष्ठिताः। तदा शक्तिर्वस्तु चैकमेव भवति, कालमहाकालयोर्मध्ये न कोऽपि भेदोऽवशिष्यते। नास्त्यत्रैतद्विषयस्यालोचनाया अवकाशः।

नाथयोगिनस्तु गत्या मूलमुपादानमेव शक्तिरिति नाम्ना कथयन्ति, स्थितेरुपादानाय तथैव शिवसंज्ञां ददति, एवं शिवशक्ती तत्त्वतोऽभिन्ने वदन्ति। शक्तिस्तु नियतपरिणामशीला -अविरामक्रियामयी बहुरूपरूपान्तरप्रसविनी विश्वजननी; शिवश्चाप्रच्युतस्वरूपः, निखिलपरिणामेषु क्रियासु चोदासीनः, द्रष्टा संभोक्ता चासंख्यरूपरूपान्तराणाम्, नित्योऽभेदभूमिः, नित्योऽद्वितीयः, स्वयंज्योतिः, परमात्मा। द्वावपि तत्त्वत एकावभिन्नौ च। ते तु शक्तिं तस्याः प्रवाहं च न मिथ्यां घोषयन्ति, विश्वप्रपञ्चं रज्जौ सर्पवदज्ञानप्रसूतं न वदन्ति। शक्त्या तस्याः परिणामेन वा शिवस्याद्वैतत्वहानिर्भवतीत्येषापि नैषां धारणा। शक्तेः क्रियास्वपि ते शिवस्यैव प्रकाशं प्रत्यक्षीकुर्वन्ति।

शिवमय्याः शक्तेरात्मपरिणामादेव विश्वप्रपञ्चस्य सृष्टिर्भवति। सा च व्यष्टिसमष्टिभेदेन द्विविधा। बहुषु व्यष्टिष्वैक्यसूत्रस्य विकास एव समष्टिसृष्टिः। नाथयोगिनस्तु व्यष्टिं पिण्डनाम्ना समष्टिं च ब्रह्माण्डनाम्ना व्यपदिशन्ति। पिण्डरूपेण शक्तिपरिणामेन यथा बहुत्वस्य विस्तारो भवति, तथैव तन्मध्ये ऐक्यसूत्रस्य विकासेन समष्टिसृष्टिर्भवति, ब्रह्माण्डः परिणमतीत्यर्थः। प्रतिपिण्डं ब्रह्माण्डः प्रतिफलति, एवमेव ब्रह्माण्डे पिण्डस्यैव विराड्रूपेणाभिव्यक्तिर्भवति। अद्वितीया सच्चिदानन्दमयी महाशक्तिः सृष्टिकाले त्वनन्तपिण्डब्रह्माण्डजननी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अनन्तपिण्डब्रह्माण्डरूपिणी । शिवस्तु तस्या अनन्तलीलापरिणतीनाम्—"उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः" ।

प्रलयकाले सर्वेऽप्येतेऽनन्तपिण्डब्रह्माण्डास्तस्यामेव शक्तौ परिणामाभिव्यक्तिविहीनेऽव्यक्ते शक्तिरूप एव विलीनास्तिष्ठन्ति । तदा शक्तेः स्वस्वरूपे प्रतिष्ठा शिवेन च सार्धं सम्यगभिन्नभावेनावस्थितिः । तदा शक्तेः परिणामस्य परस्यां काष्ठायां वर्तमानत्वात् तदवस्थायां स्थितिगत्योर्नहि कश्चिद् भेदः, नापि स्वरूपक्रिययोरेव । शिवस्यापि तदा न कोऽप्युपाधिः । तेन सह शक्तेरभिन्नत्वात् तदा तस्य शक्तिमत्त्वेन व्यपदेशोऽपि निरर्थकः, सम्पूर्णस्य ज्ञानस्य, सर्वेषां गुणानाम्, सकलस्यैश्वर्यस्य तदभिन्नायां शक्तावभेदभावेन विलीनत्वात्तदा तस्मिन् ज्ञानं गुण ऐश्वर्यं वा नैवारोप्तुं शक्यते ।

विश्वातीतस्य चरमतत्त्वस्य विषये गोरक्षनाथस्योक्तिः—

यदा नास्ति स्वयं कर्ता कारणं च कुलाकुलम् ।
अव्यक्तं च परं ब्रह्म अनामा विद्यते तदा ॥ १।४॥

कार्यस्य संपर्क एव कारणत्वं कर्तृत्वं च संभवति । उत्पत्तिस्थितिध्वंसशीलस्य कार्यजगतो यदाऽभावो भवति, तदा यद्विद्यते तत्कारणं कर्ता वेति वक्तुं न शक्यते । तदा किञ्चिदपि नास्तीत्यपि च न वक्तव्यम्, यतोऽभावाद् विश्वप्रपञ्चस्योत्पत्तिः कथं संभाव्येत । यद्विद्यते तस्य न कोऽपि गुणो विशेषणं नाम वा निर्देष्टुं शक्यते, यतो सर्वे गुणा वस्तु विशिंषन्ति, अन्यस्माद्वस्तुनस्तस्य वैशिष्ट्यं निर्दिशन्ति, तथा च तद्द्वारेण वस्त्वन्तरस्य सत्तां सूचयन्ति । एवमेव सर्वाणि सार्थकनामान्यपि गुणवाचकविशेषणकल्पान्येव । अत एव विश्वप्रपञ्चादूर्ध्वं मूलतत्त्वं तु नामरूपादिविहीनं कर्तृत्वकारणत्वादिरहितं सर्वविधपरिच्छेदहीनमेकं सद्वस्तुमात्रम् । तदव्यक्तं किन्तु स्वप्रकाशम् । तदेव सद्वस्तु वेदान्ते श्रुतौ च ब्रह्मशब्देनाभिधीयते । नाथयोगिनां ग्रन्थेषु तदेव शिवशब्दवाच्यम् ।

कर्तृत्वकारणत्वादिधर्माणां तत्राव्यक्तेऽपि तस्मिन् तेषां नूनं संभावना वर्तते, तत्रैतत्कार्यजगदेव प्रमाणम् । यदा कार्यं नास्ति तदा कारणं कर्ता वापि नास्ति; किन्तु कार्यं यदा तस्मादुत्पतति तदा कारणत्वकर्तृत्वयोर्बीजं तस्मिन्नवश्यमेव स्वीकार्यम् । बीजं चैतत्तस्य स्वरूपादभिन्नम् । बीजस्यैव शक्तिरित्यपरं नाम । योगिगुरुः कथयति—

"स्वयमनादिसिद्धमेवानादिनिधनं नित्यसिद्धान्तप्रसिद्धम् । तस्येच्छामात्रधर्मा धर्मिणी निजा शक्तिः प्रसिद्धा ॥" इति । १।५ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

परमार्थतो धर्मधर्मिणयोरनयोः न कोऽपि भेदः, एवमेवैषा निजा शक्तिर्नित्यं निर्विकारं नामरूपक्रियादिरहितमद्वितीयं तत्त्वं चेत्यनयोरपि न कोऽपि भेदो वर्तते। तथापि सृष्टि-प्रक्रियायां सैव शक्तिः परिणाममयी तस्याश्चात्मस्वरूप एको नित्यः कूटस्थः, शक्तिर्विश्वजननी, एकश्च विश्वात्मा विश्वप्रकाशको विश्वाधिष्ठानः। एष एव एको वेदान्तिनां ब्रह्म, नाथ-योगिनामुपासकानां शिवः।

अस्यानादिसिद्धस्यानादिनिधनस्य नामरूपपरिणामादिरहितस्याद्वितीयस्य शिवस्य स्वरूपभूताया अनादिसिद्धाया नित्यपरिणाममय्या इच्छामात्रधर्माया: "निजायाः शक्तेः" क्रम-विवर्तने कया पद्धत्या विश्वप्रपञ्चस्य क्रमाभिव्यक्तिर्भवति, किञ्च तद्द्वारेण कया पद्धत्या शिवस्य विचित्रोपाधिविशिष्टस्य स्वस्वरूपस्य प्रकाशो भवतीत्येतदेव 'सिद्धसिद्धान्तपद्धतौ' सिद्धगुरुणा गोरक्षनाथेन प्रदर्शितम्। किन्त्वेतत्पद्धतिनिर्देशस्यावतरणिकायां तस्योक्तिः—

नास्ति सत्यविचारेऽस्मिन्नुत्पत्तिश्चाण्डपिण्डयोः।
तथापि लोकवृत्त्यर्थं वक्ष्ये सत्संप्रदायतः॥ १।२॥

परब्रह्मणः शिवस्य स्वरूपभूता 'निजा शक्तिः' चतुर्षु स्तरेषु क्रमशोऽभिव्यक्ता भूत्वा विश्वसृष्टेः कारणं भवति। चतुर्णामेषां स्तराणां नामानि यथाक्रमम्—'पराशक्तिः', 'अपरा-शक्तिः', 'सूक्ष्माशक्तिः', 'कुण्डलिनीशक्तिः' इति च। शक्त्या ईदृशे क्रमविकास एव शिवस्य ज्ञानगुणवीर्यैश्वर्यादिविशेषणानां विकासो भवति।

या 'निजाशक्तिः' तस्यां शक्तिशक्तिमतोर्भेदो नास्ति, गुणगुणिनोर्भेदो नास्ति, आश्रिता-श्रययोर्भेदो नास्ति, ज्ञानेच्छाक्रियासु भेदो नास्ति, प्रकाशप्रवृत्तिस्थितिषु च भेदो नास्ति। आत्यन्तिकाभेदभूमेरस्या निजायाः शक्तेः स्वभावे योगिगुरुः पञ्चलक्षणानां निर्देशं कृतवान्—

"नित्यता निरञ्जनता निस्पन्दता निराभासता निरुत्थानता—इति पञ्चगुणा निजाशक्तिः।" १।१०॥

(१) नित्यता—निजाशक्तिर्नित्या। न तस्याः प्रागभावः, न चापि ध्वंसाभावः। (२) निरञ्जनता—अस्यां न किमपि मालिन्यम्, न च कोऽपि रागद्वेषादिदोषः। (३)निस्पन्दता—अस्यां किञ्चिदपि स्पदनं नास्ति, स्तोकमपि चाञ्चल्यं नास्ति। अस्यास्तु स्वभावे स्थितिगत्यो-र्भेदो नैवोत्पन्नः, अवस्थान्तरप्राप्तेरुन्मुखताया अपि नोन्मेषः। (४) निराभासता—स्वाश्रया-च्छिवाद्भिन्नत्वेन न तस्याः कापि प्रतीतिः। भेदाभावात् शिवस्याभासः प्रतिबिम्बो वा न विलसत्यस्याम्। शक्तिशक्तिमदाश्रिताश्रयप्रकाश्यप्रकाशकगुणगुणिप्रभृतीनां भेदानां न कोऽपि

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विकासोऽस्यां संभवति । (५) निरुत्थानता—उत्थानस्य संसाररूपपरिणामस्य वा न किञ्चिदपि लक्षणं तदवस्थायां प्रकटितमस्ति ।

अत्र केवलं निषेधवाचकैः पञ्चभिर्लक्षणैः शिवाभिन्ना निजाशक्तिर्लक्षिता । अस्यां यदा सृष्ट्यभिमुखी काचिदुन्मुखताभिव्यक्ताऽभूत्, शिवेन सह तस्याः कथञ्चित् शक्तिशक्तिमद्भावमभ्युत्थितम्, शिवश्च कथञ्चिदुपाधिविशिष्टो भूत्वा शक्तिं प्रतीक्षणं चकार, तदेयं शक्तिः पराशक्तिरूपेणात्मप्रकाशं चकार—

"तस्योन्मुखत्वमात्रेण पराशक्तिरुत्थिता ।" २।६॥

एषा परा शक्तिरपि पञ्चधा लक्षिता—

"अस्तिता अप्रमेयता अभिन्नता अनन्तता अव्यक्तता—
इति पञ्चगुणा परा शक्तिः" ।१।११॥

(१) अस्तिता—पराशक्तेः स्तरे शिवाश्रितशक्तिरूपे शक्त्याः कथञ्चिद्भिन्नाभिन्नस्यास्तित्वस्याविर्भावोऽभूत् । निजायाः शक्तेः स्तरे शिव एव शक्तिः, शक्तिरेव वा शिवः । पराशक्तेस्तु स्तरे शिवस्य शक्तिः । शक्तिः शिवेन सह नित्ययुक्ता भूत्वाऽपि, तत्सत्तया सत्तावती तच्चैतन्येन प्रकाशमयी च भूत्वाऽपि, स्वरूपतः शिवेन सहाभिन्ना भूत्वाऽपि, सृष्ट्युन्मुखतालक्षणेन कथञ्चिद्भिन्नरूपेण विराजमानास्ति । (२) अप्रमेयता—पराशक्तिस्त्वप्रमेया सर्वविधपरिच्छेदशून्या इयत्तारहिता, सुतरामिन्द्रियप्रत्यक्षस्यानुमानादेर्लौकिकप्रमाणस्य चागम्या । (३) अभिन्नता—जीवजगदादिसृष्टेरभावात् तस्यान्तः बहिर्वा न कोऽपि भेदो वर्तते, तस्याः सत्तायाः पृथक् सत्ताविशिष्टो न कोऽपि पदार्थो विद्यते । (४) अनन्तता—तद्व्यतिरिक्तस्य वस्तुनोऽभावात्, देशकालयोश्चाभावात् पराशक्तिरनन्ता, आदिमध्यान्तरहिता च । (५) अव्यक्तता—पराशक्तिरप्यव्यक्ता तदा तु किमपि द्वैतं वैचित्र्यं वा नाभिव्यक्तमस्ति ।

सृष्टेरुन्मुखताया हेतोः शक्त्या अभ्यन्तरे यदा किञ्चित् स्पन्दनमाविरभूत्, शक्तिर्यदा सामान्यरूपेण कथञ्चित् क्रियाशीलाऽभूत्, तदा या पराशक्तेरवस्था सैव "अपराशक्ति" इति नाम्नी—

"तस्य स्पन्दनमात्रेण अपराशक्तिरुत्थिता" ।१।७॥

अत्रेदं स्मरणीयं यद् निजा शक्तिर्यदा पराशक्तिरूपे परिणमति, तदा तस्या निजात्वमवतिष्ठतेऽथ च परात्वस्य प्राप्तिः । तथैव यदा पराशक्तिरपराशक्तिरूपे परिणमति तदापि तस्या निजात्वं परात्वं चाप्यविलुप्यदेवाऽपरात्वमापद्यते । कारणरूपं सर्वदैव कार्य-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रूपस्यान्तरेऽनुस्यूतमस्ति । एवमस्माद्धेतोः कार्यरूपे विविधवैचित्र्यान्विते सत्यपि तत्रैकत्वं न नश्यति । बहुत्वेऽप्येकत्वमक्षुण्णमस्ति, तथा नित्यनूतनायाः सृष्टेर्योग्यताप्यक्षय्या वर्तते ।

अस्याः स्पन्दनात्मिकाया अपराशक्तेरपि पञ्च लक्षणान्युक्तानि—

"स्फुरता स्फुटता स्फारता स्फोटता स्फूर्तिता—इति पञ्चगुणा अपराशक्तिः ।" १।१२

स्फुरता स्फारता चार्थात् संचलनं संचालनं च । स्फूर्तितार्थाद् उत्साह आनन्दभावो वेति । अपराशक्तिस्तु पूर्वापेक्षया कथञ्चिद्व्यक्तभावान्विता, व्यक्तीभावाय पर्याप्तरूपेण प्रस्तुतेत्यर्थः । तस्यां सृष्टेरावेगः पूर्वापेक्षया स्फुटतरः, वैचित्र्यं तु तत्र सूक्ष्मभावेनापि न प्रकाशितम्, केवलं किञ्चिच्चाञ्चल्यं विलसति । अपराशक्तेरुपाधियोगेन शिवो निर्विकल्पसमाधेः सद्य उत्थितप्राय इव प्रतिभाति, न तु व्युत्थितः । तस्याहंबोधोऽपि तदा न जाग्रतोऽस्ति, न चापि तस्मिन् ज्ञातृज्ञेयभेदः कर्तृकार्यभेदो वा विकसितः । आत्मनः शक्तिमद्रूपेण शक्तेश्च निजाश्रित-रूपेणानुभूतिरपि न समुत्थिता । केवलं व्युत्थानस्योद्योग एवारब्धः ।

अपराशक्तौ क्रमेणाहंभावो दृष्टः, तथा च तत्र सृष्टेराभिमुख्ये शक्तिर्व्यंसरत्तराम् । अपराशक्तिस्तु तदा सूक्ष्माशक्तिरूपे परिणताऽभूत् ।

"ततोऽहन्तार्थमात्रेण सूक्ष्माशक्तिरुत्पन्ना ।" १।८ ॥

सूक्ष्मायाः शक्तेरपि पञ्च लक्षणानि वर्णितानि—

"निरंशता निरन्तरता निश्चलता निश्चयता निर्विकल्पता—इति पञ्चगुणा सूक्ष्माशक्तिः ।" १।१३ ॥

(१) निरंशता—अखण्डिताहमाकारवृत्तिरूपे तदा शक्तेः प्रकाशः । अहमाकारायां वृत्त्याविदमाकाराया वृत्तेरसमुत्पन्नेऽहमहमेवंविधस्यानुभवप्रवाहस्य मध्ये मध्येऽहंभिन्ना 'इदमिदम्' इत्याकारानुभूतिर्यावन्न जागर्ति, तावत् 'अहम्' इति वृत्तिः खण्डिता न भवति, अहं-बोधस्यावयवविभागो न भवति, अंशांशीभेदो न समुदेति । (२) निरन्तरता—देशकृतं काल-कृतं वा किमप्यन्तरं व्यवधानं वा तत्र न प्रकटितमस्ति । कदाचिदहंबोधः, अन्यदा तदभावः, पुनरपि तस्योत्पत्तिरित्येवंप्रकारेण व्यवहितरूपेणाहंताबोधः प्रवाहितो नाभूत् । कस्मिंश्चित् स्थानविशेषे (यथा देहात्मबोधे) अहंबोधः, किञ्च स्थानान्तरेऽस्य बोधस्याभावः (यथा देहाति-रिक्ते स्थाने); इत्येवंप्रकारकः कश्चिद् व्यवधानोऽपि सूक्ष्मशक्त्यन्तरगतेऽहंताबोधे नास्ति । (३) निश्चलता—अस्या अहमाकाराया वृत्तेः किञ्चिदपि चलनं चाञ्चल्यं वा स्वरूपविच्युतिर्वा न घटते । कदाचिद् गाढता, अन्यदा शिथिलता; एकत्र जागर्तिरन्यत्र तन्द्राच्छन्नतेत्यवस्थाभेद-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्तस्यां वृत्तौ नास्ति। (४) निश्चयता—अहन्ता चैषा निश्चयात्मिका संशयविपर्ययशून्या वेत्यर्थः। (५) निर्विकल्पता—अस्मिन्नहंज्ञाने न कोऽपि विकल्पः, उपाधिः, विशेषणो वास्ति; न चात्राहंबोधः केनापि विशेषणेन विशिष्टः, न चाप्युपाधियुक्तः। सुतरां परिच्छिन्नो नास्ति, नापि विभिन्नकाले विविधावस्थायामवस्थितिर्भवति। 'अहं ज्ञानम्' अस्मिंस्तरे सर्वदैकरूपमित्येषोऽहं-बोध एव सूक्ष्मशक्तेः स्वरूपम्।

अथाहंतया सार्धं वेदनशीलतोद्गता। ज्ञातृज्ञेयज्ञानभेदः, कर्तृकार्यकर्मभेदः, संकल्पात्मिका वृत्तिः, संकल्पनीयानां पदार्थराजीनां भावमयं रूपं चेत्यस्यामहंतान्वितायां महाशक्त्यां समुद्भूवन्, तदा कुण्डलिनीशक्तिरित्यस्या नाम बभूव।

"ततो वेदनशीला कुण्डलिनीशक्तिरुद्गता" ।१।१३॥

कुण्डलिन्याः शक्तेः पञ्च लक्षणानि—

"पूर्णता प्रतिबिम्बता प्रबलता प्रोच्चलता प्रत्यङ्मुखता—
इति पञ्चगुणा कुण्डलिनीशक्तिः।" १।१४॥

(१) पूर्णता—व्यापकता, सर्वत्र विद्यमानता; सर्वस्य जगत उपादानकारणत्वेन कुण्डलिनीशक्तिः पूर्णा सर्वव्यापिनी च भवति। (२) प्रतिबिम्बता—अस्यास्तु मध्ये स्वरूपतोऽप्रकाशितोऽपि शिवो विचित्ररूपेण प्रतिबिम्बितो भवति। कुण्डलिनीमवलम्ब्यैव शिवस्य वैचित्र्यसृष्टिः, विचित्रोपाधिपरिग्रहश्च। (३) प्रबलता—अशेषवैचित्र्यरचनासामर्थ्यम्। (४) प्रोच्चलता—क्रमवर्धमानता, स्थूलादिरूपे परिणामशीलत्वं च। निजाभ्यन्तरतो नित्यनूतनां सृष्टिं विकासयन्ती कुण्डलिनीशक्तिः क्रमशः पुष्टिं लभते। (५) प्रत्यङ्मुखता—विचित्ररूपेणात्मानं संसारसृष्टिषु परिणतां कृत्वाऽपि कुण्डलिनीशक्तिर्नित्यं शिवमुखी शिवप्राणा शिवात्मबोधसंपन्ना चेत्यस्मात् प्रत्यङ्मुखताहेतोर्वैचित्र्येष्वेकत्वं विराजते, वैषम्ये साम्यं विद्यते, भेदेष्वभेदः सुप्रतिष्ठितो वर्तते।

शिवभिन्नायाः शिवमय्या महाशक्तेरेवं पञ्चविधे विकासे, प्रतिस्तरं पञ्चविधगुणप्रकाशे च शिवस्यायं विश्वदेह उत्पद्यते। विशुद्धसत्त्वस्वरूपस्याद्वैतस्य सच्चित्स्वरूपस्य शिवस्य विश्वात्मविश्वप्राणविश्वनियन्तृविश्वभावमयेषु रूपेष्वभिव्यक्तिः। अयमेव विश्वदेहः परपिण्डः ब्रह्माण्डो वेति—

"एवं शक्तितत्त्वे पञ्चपञ्चगुणयोगात् परपिण्डोत्पत्तिः।" १।१५॥

॥ इति शम् ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भागवतीयं दर्शनम्

श्रीअनन्तशास्त्री फडके, संस्कृतविश्वविद्यालयः, वाराणसी।

पुराणेषु चरित्रग्रथनप्रसङ्गेन मध्ये मध्ये वेदान्तवेद्यानि परमसूक्ष्माणि तत्त्वानि विविधदृष्टान्तैः सरलानि विधाय नानोपाख्यानैश्च संभूष्य स्थूलमतीनामपि सुज्ञेयानि कृतानि। यथा परब्रह्मणोऽतर्क्यशक्तिमत्त्वमनन्तत्वं व्यापकत्वमनेकरूपत्वं परमानन्दरूपत्वं चोपनिषत्प्रतिपादितं यथैवास्ते तत्तथैव श्रीकृष्णचन्द्रस्य श्रीरामचन्द्रस्य वा परब्रह्मरूपत्वं स्वीकृत्य पुराणेषु प्रदर्शितम्[1]।

तेषु किञ्चिद् दिग्मात्रं प्रदर्श्यते—ब्रह्मणोऽतर्क्यशक्तिमत्त्वं श्रीकृष्णस्य चरित्रे यशोदायाः [2]प्रस्नुतं स्तनं पाययन्त्या जृम्भतः श्रीकृष्णस्य मुखे चन्द्रसूर्यादिकं विचित्रं विश्वं पश्यन्त्या वर्णन-प्रसङ्गे श्रीव्यासदेवेन बोधितम्। अनन्तशक्तिमत्त्वं च परब्रह्मणः कृतहैयङ्गवीनचौर्यस्य

---

१. निशीथे तम उद्भूते जायमाने जनार्दने।
देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः॥
आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः॥
[भाग० १०।३।८]

विदितोऽसि भवान् साक्षात्पुरुषः प्रकृतेः परः।
केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक्॥
स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकम्।
तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे॥
[भा० १०।३।१३-१४]

इति श्रीकृष्णचन्द्रप्रादुर्भावसमये श्रीवसुदेववचनैः सुस्पष्टम्।
एवं गोकुले वत्सपादीन् हृतवता ब्रह्मणा कृतायां स्तुतौ च सुप्रसिद्धम्। यथा—
अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम्।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम्॥ इति।
[भाग० १०।१४।३२]

२. एकदार्भकमादाय स्वाङ्कमारोप्य भामिनी।
प्रस्नुतं पाययामास स्तनं स्नेहपरिप्लुता॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भागवतीयं दर्शनम्

यशोदाकृतानेकदामबन्धनेऽप्यबद्धस्य द्व्यङ्गुलोनस्य श्रीकृष्णस्य वर्णनप्रसङ्गे प्रकाशितम्।[१] उपाधिना तथानेकरूपत्वं ब्रह्मणो भौमासुरकारागृहबद्धषोडशसहस्रकन्याभिः साकमेकस्मिन् मुहूर्तेऽनेकगृहेषु तावन्ति रूपाणि विधाय श्रीकृष्णेन विवाहः कृत इति वर्णनेन, तथा गोकुले वत्सादीन् हृतवतो ब्रह्मणो वर्णनप्रसङ्गेन प्रकटीकृतम्।[२] परब्रह्मणो दयालुत्वादिकमनेकशक्तिशालित्वं च श्रीकृष्णस्य गोवर्धनधारणादिकार्यसंपादनवर्णनेन निरूपितम्।[३] एवं परमानन्दरूपत्वं श्रीकृष्णकृतानेकक्रीडनेन गोकुले जातानन्दस्वरूपवर्णनेन बोधितम्।[४]

मुखं लालयती राजन् जृम्भतो ददृशे इदम्।
खं रोदसी ज्योतिरनीकमाशाः सूर्येन्दुवह्निश्वसनाम्बुधींश्च।
द्वीपान्नगांस्तद्दुहितॄर्वनानि भूतानि यानि स्थिरजङ्गमानि॥
[भाग० १०।७।३४-३६]

१. इयेष किल तं बद्धुं दाम्नाऽतद्वीर्यकोविदा॥
न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम्।
पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः॥
तं मत्वात्मजमव्यक्तं मर्त्यलिङ्गमधोक्षजम्।
गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथा॥
तद्दाम बध्यमानस्य स्वार्भकस्य कृतागसः।
द्व्यङ्गुलोनमभूत्तेन सन्दधेऽन्यच्च गोपिका॥
यदासीत्तदपि न्यूनं तेनान्यदपि संदधे।
[भाग० १०।६।१२-१६]

२. अथो मुहूर्त एकस्मिन् नानागारेषु ताः स्त्रियः।
यथोपयेमे भगवाँस्तावद्रूपधरोऽव्ययः॥
[भाग० १०।५६।४२]

एवम्—
ततः कृष्णो मुदं कर्तुं तन्मातॄणां च कस्य च।
उभयायितमात्मानं चक्रे विश्वकृदीश्वरः॥
[भाग० १०।१३।१८]

३. इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्धनाचलम्।
दधार लीलया कृष्णश्छत्राकमिव बालकः॥
[भाग० १०।२५।१६]

४. हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथार्याः।...
अस्पन्दनं गतिमतां पुलकस्तरूणाम्॥
[भाग० १०।२१।६,१६]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अन्यानेकदर्शनवत् पुराणेष्वपि विवर्तवादः, परिणामवादः, मूलभूततत्त्वस्यैकरूपत्वमनेकरूपत्वम्, शक्तिशक्तिमतोऽभिन्नरूपत्वम्, जगतो विष्ण्वादिरूपत्वम्, परब्रह्मणो विवर्तरूपत्वम्, जगदादिकारणस्य विष्णुशिवनृसिंहादिरूपेण वर्णनम्, विष्ण्वादितश्चेतराणां समुत्पत्त्यादिकं चोपलभ्यते ।[1]

परमदयालुभिर्व्यासादिभिर्यमनियमादिद्वारा समाधियुक्तेन विशुद्धचेतसा प्रत्यक्षाद्यगम्यस्य

---

१. ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥ [वि० १।२।६]
इत्यादिना विवर्तवादः ।
विष्णोः सकाशादुद्भूतं जगदत्रैव च स्थितम् ।
स्थितिसंयमकर्तासौ जगतोऽस्य जगच्च सः ॥ [वि० १।१।३५]
इत्यादिना परिणामवादः ।
एकस्वरूपं च सदा हेयाभावाच्च निर्मलम् । तदेव सर्वमेवैतद् व्यक्ताव्यक्तस्वरूपवत् ॥
तथैव पुरुषरूपेण कालरूपेण च स्थितम् । परस्य ब्रह्मणो रूपं पुरुषः प्रथमो द्विज ॥
व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथा परम् ॥ [वि० १।२।१३-१५]
अनादिनिधनौ विद्धि सदा प्रकृतिपूरुषौ ।···तं च तां च महाभाग व्यापकौ विद्धि सर्वगौ॥
तौ विचिन्त्यौ सदा देहे मिश्रीभूतौ सदाव्ययौ । एकरूपौ चिदात्मानौ निर्गुणौ निर्मलावुभौ॥
[दे० भा० ३।७।११,१४]
इत्यादिनैकानेकरूपत्वम् ।
या शक्तिः परमात्माऽसौ योऽसौ सा परमा मता ।
अन्तरं नैतयोः कोऽपि सूक्ष्मं वेद च नारद ॥
[दे० भा० ३।७।१५]
इत्यादिना शक्तिशक्तिमतोऽभेदरूपत्वम् ।
सर्वत्राऽसौ समस्तं च वसत्यत्रेति वै यतः ।
ततः स वासुदेवेति विद्वद्भिः परिपठ्यते ॥ [वि० १।२।१२]
अविद्यमानोऽप्यवभासते यो वैकारिको राजससर्ग एषः ।
ब्रह्म स्वयंज्योतिरतो विभाति ब्रह्मेन्द्रियार्थात्मविकारचित्रम् ॥
[भाग० ११।२८।२२]
विष्णोः सकाशादुद्भूतं जगदत्रैव च स्थितम् ।
[वि० १।१।३५]
आदिसर्गे महादेवो ब्रह्माणमसृजत् प्रभुः ।
[सू० २।२५]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भागवतीयं दर्शनम्

सर्वथाऽलौकिकस्य तत्त्वस्य दर्शनं विधायान्येषामल्पज्ञानां बोधनार्थं तर्कस्याप्याश्रयणं कृतम्।[१] पुराणेषु स्वकीयप्रकारविशेषपद्धत्या सर्वदर्शनप्रतिपादिततत्त्वसमन्वयः कृतो दृश्यते। यथा प्रकृतेः सकाशान्महदादीनि तन्मात्रान्तानि सप्त तत्त्वानि प्रादुर्भूय संपूर्णं जगदुत्पादयन्तीति सांख्यशास्त्रे प्रतिपादितम्, तथा स एव क्रमः पुराणेषु स्वतत्त्वप्रतिपादनद्वारा प्रतिपादितः। तथा हि --ब्रह्मशब्दवाच्यप्रकृतेः सकाशादुत्पन्नाः कश्यपादयो मानसपुत्राः सप्त सर्वं भूतजातमुत्पादयन्ति। क्वचिन्महत्तत्त्वस्यैव ब्रह्मनामेति प्रत्यपादि, तथैव सत्त्वादिगुणानां विष्णवादिसंज्ञाः सन्तीति निरूपितम्।[२]

ब्रह्मा भूत्वा जगत्सृष्टौ नरसिंहः प्रवर्तते।
[नरसिं० २।१]

एवमन्यत्रान्यदेव।

१. द्वीपभेदसहस्राणि सप्त चान्तर्गतानि च। न शक्यते क्रमेणेह वक्तुं वै सकलं जगत्॥
सप्तैव तु प्रवक्ष्यामि चन्द्रादित्यग्रहैः सह। तेषां मनुष्यस्तर्केण प्रमाणानि प्रचक्षते॥
[मत्स्य० ११३।४-५]

अण्डोद्भिजस्वेदजरायुजानां धर्मात्मनां स्वर्गनिवासिनां वा।
ये यातनास्थानगताश्च जीवास्तर्केण तेषामपि च प्रमाणम्॥
प्रकृत्यवस्थेषु च कारणेषु या च स्थितिर्या च पुनः प्रवृत्तिः।
तच्छास्त्रयुक्त्या स्वमतिप्रयत्नात् समस्तमाविष्कृतधीधृतिभ्यः॥
[वायु० १।३।२२-२४]

२. बृहत्वाद् बृंहणत्वाच्च भावानां सलिलाश्रयात्।
यस्माद् बृंहयते भावान् ब्रह्मा तेन निरुच्यते॥
पर्यायवाचकैः शब्दैस्तत्त्वमाद्यमनुत्तमम्।
व्याख्यातं तत्त्वभावज्ञैरेवं सद्भावचिन्तकैः॥
[वायु० १।४।२६,४२]

रजो ब्रह्मा तमो ह्यग्निः सत्त्वं विष्णुरजायत।
परस्पराश्रिता ह्येते परस्परमनुव्रताः॥
परस्परेण वर्तन्ते धारयन्ति परस्परम्।
अन्योऽन्यमिथुना ह्येते ह्यन्योन्यमुपजीविनः॥
क्षणं वियोगो न ह्येषां न त्यजन्ति परस्परम्।
[वायु० १।५।११,१७]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रायो मनुष्याणां चेतसि कुतोऽहं समायातः ? सर्वदा विपरिणामशीलस्यास्य जगतो मूलभूतं किञ्चिदविपरिणामि नित्यं सर्वदैकरूपेण स्थितं तत्त्वमुपलभ्यते, न वा ? सर्वथा दुर्निवारस्य मृत्योः कथं निवृत्तिर्भवेत् ? मनुष्यैः सुखाय कृतं कर्मापि दुःखायैव संपद्यते, अस्य कारणं किम् ? इत्यादयो बहवो विचाराः प्रादुर्भवन्ति ।[१] एतेषां समाधानाय यमनियमाद्याचरणशीलै रागलोभादिशून्यैः सदाचाररतैः प्राचीनर्षिभिः कृता विचारा एव दार्शनिकतत्त्वरूपेण प्रादुर्भवन्ति ।[२] बाह्यजगतः सत्ताविषये वारं वारं विचारे क्रियमाणे न

१. कर्मण्यारभमाणानां दुःखहत्यै सुखाय च ।
पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणाम् ॥
नित्यार्दितेन वित्तेन दुर्लभेनात्ममृत्युना ।
गृहापत्याप्तपशुभिः का प्रीतिः साधितैश्चलैः ॥
[भाग० ११।३।१८-१९]

एवम्—
देहं नावरुरुत्सेऽहं दुःखशोकभयावहम् ।
सर्वत्रास्य यतो मृत्युर्मत्स्यानामुदके यथा ॥
[भाग० ६।१३।१०]

तथा—
मिथो निघ्नन्ति भूतानि भावयन्ति च यन्मिथः ।
जलौकसां जले यद्वन्महान्तोऽदन्त्यणीयसः ॥
[भाग० १।१५।२४]

२. तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः ।
श्रद्दधानस्य बालस्य दान्तस्यानुचरस्य च ॥
ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितम् ।
अन्ववोचन् गमिष्यन्तः कृपया दीनवत्सलाः ॥
[भाग० १।५।२९-३०]

एवम्—
तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम् ।
अजातशत्रवः शान्ताः साधवः साधुभूषणाः ॥
मय्यनन्येन भावेन भक्तिं कुर्वन्ति ये दृढाम् ।
मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवाः ॥
मदाश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च ।
तपन्ति विविधास्तापा नैतान्मद्गतचेतसः ॥
[भाग० ३।२५।२१-२३]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कुत्रापि विचारः स्थैर्यं प्राप्नोति,[१] अन्ततो गत्वा जगतो भासो मायात एव भवति, न तु वास्त-
विकं तत्र सत्तत्त्वं किमप्युपलभ्यत इति ।[२] इत्थं विचारे प्रचलिते मनस्ययं विचारः प्रथमतः
प्रादुर्भवति—स्वकीयो देह एव संरक्षणीयः । स एवातिप्रियतमो न तु स्वीयदारापत्यादय इति[३] ।

ततो विचारे सूक्ष्मतमे प्रवृत्ते प्रत्यक्षप्रमाणगम्येऽर्थे प्रत्यक्षप्रमाणे चास्थाभावान्मनुष्यो-
पलब्धस्य संपूर्णस्यागमापायिनो जगत आधारभूतं किञ्चित्सनातनं नित्यमेकरूपमखण्डं तत्त्वं
विद्यते न वेति विचिकित्सते । ततः सवत्रामङ्गलं मृत्युग्रस्तं दृष्ट्वाऽदृष्टमपि तथैवेति निश्चि-
नोति ।[४] ततः सर्वत्रानित्यत्वदर्शनेनाऽस्मात् संसारात् कश्चन विशिष्टः पुरुषो विरक्तः सन् जगतः
परमकारणञ्च कञ्चन विरक्तं रागद्वेषलोभमोहादिरहितं सत्पुरुषमुपस्थाय नित्यानित्यतत्त्वविचारं
कुर्वन् तेनोपदिष्टपथेन गच्छन् तत्त्वानि विज्ञायानुभवति[५]—इति पुराणतो मुमुक्षोर्विचिकित्स-
कस्य विचारक्रम उपलभ्यते ।

---

१. लोकः स्वयं श्रेयसि नष्टदृष्टिर्योऽर्थान् समीहेत निकामकामः ।
अन्योन्यवैरः सुखलेशहेतोरनन्तदुःखं च न वेद मूढः ॥
[भाग० ५।५।१६]

२. तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम् ।
त्वय्येव नित्यसुखबोधतनावनन्ते मायात उद्यदपि यत् सदिवावभाति ॥
[भाग० १०।१४।२२]

३. तद्राजेन्द्र यथा स्नेहः स्वस्वकात्मनि देहिनाम् ।
न तथा ममतालम्बिपुत्रवित्तगृहादिषु ॥
देहात्मवादिनां पुंसामपि राजन्यसत्तम ।
यथा देहः प्रियतमस्तथा न ह्यनु ये च तम् ॥
[भाग० १०।१४।५१-५२]

४. श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम् ।
प्रमाणेष्वनवस्थानाद् विकल्पा सविरज्यते ॥
कर्मणां परिणामित्वादावैरिञ्च्यादमङ्गलम् ।
विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ॥
[भाग० ११।१०]

५. तस्माद् गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् ।
शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथाधुना भागवते सुखदुःखकारण जीव-आत्मा ईश्वर ब्रह्म-माया-जगत्-परमपुरुषार्थ-पुरुषार्थसाधनविषये उपलब्धान् विचारान् संकलय्य वर्णयामः।

जीवः

पूर्वजन्मकृतकर्मानुरूपं वर्तमानजन्मनि संपादितसात्त्विकादिगुणः कदाचित् पुमान्, स्त्री, पशुः, पक्षी, अन्यद् वा भवति, अर्थात् जीवो नामाज्ञानयुतः पूर्वकर्मजवासनानुरूपसुखदुःखानुभवसाधनपाञ्चभौतिकदेहयुतश्चेतनः, परमेश्वरांशो वा।[1]

आत्मा

एको ज्योतिःस्वरूपो नित्यो देहादिभ्यो भिन्नो निर्गुणश्चापि स्वोत्पन्नगुणद्वारा निर्मितदेवमनुष्यादिरूपोपाधिनाऽनेकरूपः प्रतीयते।[2] देहरूपात्मभ्यः परः सुषुप्तेः साक्षी च।[3]

तत्र भागवतान् धर्मान् शिक्षेद् गुर्वात्मदैवतः।
अमाययानुवृत्त्या यैस्तुष्येदात्माऽऽत्मदो हरिः॥
[भाग० ११।३।२१-२२]

अन्यत्रापि—महत्सेवां द्वारमाहुर्विमुक्तेः॥
[भाग० ५।५।२]

१. क्वचित्पुमान् क्वचिच्च स्त्री क्वचिन्नोभयमन्धधीः।
देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः॥
तथा कामाशयो जीव उच्चावचपथा भ्रमन्।
उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियम्॥
[भाग० ४।२९।२९,३१]

एकस्यैव ममांशस्य जीवस्यैव महामते।
बन्धोऽस्याविद्ययानादिर्विद्यया च तथेतरः॥
[भाग० ११।११।४]

२. आत्मा ह्येकः स्वयंज्योतिर्नित्योऽन्यो निर्गुणो गुणैः।
आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते॥
[भाग० १०।८५।२४]

३. एकः शुद्धः स्वयंज्योतिर्निर्गुणोऽसौ गुणाश्रयः।
सर्वगोऽनावृतः साक्षी निरात्मात्मात्मनः परः॥
[भाग० ४।२०।७]

यथा प्रसुप्तः पुरुषो विश्वं पश्यति चात्मनि।
आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः॥
[भाग० ६।१६।५३]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भागवतीयं दर्शनम्

ब्रह्म

सर्वस्य जगतः स्थित्युत्पत्तिविनाशानां कारणं स्वतोऽकारणं जाग्रदाद्यवस्थानां समाधिसहितानामनुस्यूतं देहेन्द्रियादिभिर्यद् गम्यं विद्यते तद्वास्तविकं नास्तीति निषेधाधारभूतं यत्तदेव ब्रह्म।[१]

ईश्वरः

वेदादिकानामादिद्रष्टा तदनुरूपं सर्वेषां प्राण्यादीनां स्वप्रचालितनियमद्वारा संचालकः[२]।

माया

अर्थं विनाप्यसतो वस्तुनो भासिका परमेश्वरस्य शक्तिविशेषो माया। यथा स्वप्ने पुरुषः स्वशिरच्छेदनादिकं पश्यति, तथैवात्मनो बन्धमोक्षाद्यसन्नपि यथाऽनुभवति पुरुषः सेश्वरशक्तिर्माया।[३]

---

१. स्थित्युद्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजागरसुषुप्तिषु सद् बहिश्च।
देहेन्द्रियासुहृदयानि चरन्ति येन सञ्जीवितानि तदवेहि परं नरेन्द्र॥
[भाग० ११।३।३५]

२. यद्वाचि तन्त्यां गुणकर्मदामभिः सुदुस्तरैर्वत्स वयं सुयोजिताः।
सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः॥
ईशाभिसृष्टं ह्यवरुन्ध्महेऽङ्ग दुःखं सुखं वा गुणकर्मसङ्गात्।
आस्थाय तत्तद्यदयुङ्क्त नाथश्चक्षुष्मताऽन्धा इव नीयमानाः॥
[भाग० ५।१।१४-१५]

३. ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि।
तद्विद्यादात्मनो मायां यथाऽऽभासो यथा तमः॥
[भाग० २।९।३३]

यदर्थेन विनाऽमुष्य पुंस आत्मविपर्ययः।
प्रतीयते उपद्रष्टुः स्वशिरश्छेदनादिकः॥
यथा जले चन्द्रमसः कम्पादिस्तत्कृतो गुणः।
दृश्यतेऽसन्नपि द्रष्टुरा मनो नात्मनो गुणः॥
[भाग० ३।७।१० ११]

सैषा विष्णोर्महामायाऽबाध्यलक्षणया यया।
मुह्यन्त्यस्यैवात्मभूता भूतेषु गुणवृत्तिभिः॥
[भाग० १२।६।२६]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चित्तम्

पृथिव्याः संबन्धात्पूर्वं जलं मधुरं स्वच्छं शान्तं चास्ति, तथैव चेतसः स्वच्छत्वादि-मूलवृत्तिभिर्लक्षणमुच्यते ।[१]

सुखदुःखयोः कारणम्

मनुष्याः परमकल्याणमजानन्तो विषयभोगेच्छया परस्परं वैरमुत्पाद्याल्पसुखस्य हेतोः पर्वतप्रायदुःखमनुभूय दुःखस्य कारणं जिज्ञासन्ते, परन्तु सम्यक्तया न जानन्ति ।[२] परन्त्वनेक-कल्पनाः कुर्वन्तः सुखदुःखकारणविषये विवदन्ते । केचन स्वमेव स्वकीयदुःखस्य कारणतया वर्णयन्ति, परे दैवम्, अन्ये कर्म, केचित् स्वभावम्, एके परमेश्वरं च निरूपयन्ति ।[३] वस्तुतो विचारदृष्ट्याऽहङ्कार एव दुःखकारणमस्ति, स्वस्वरूपज्ञानं सुखस्य कारणं चास्ति ।[४]

परमपुरुषार्थः

इन्द्रियविजयपूर्वकं ज्ञानेन ततः परमभक्त्या चेश्वरानुग्रहात् संसारभ्रमत्यागपूर्वकं सर्वत्र व्यापकपरमेश्वरस्वरूपदर्शनम् ।[५]

---

१. स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः ।
वृत्तिभिर्लक्षणं प्रोक्तं यथापां प्रकृतिः परा ॥
[भाग० ३।२६।२२]

२. लोकः स्वयं श्रेयसि नष्टदृष्टिर्योऽर्थान् समीहेत निकामकामः ।
अन्योन्यवैरः सुखलेशहेतोरनन्तदुःखं न च वेद मूढः ॥
[भाग० ५।५।१६]

३. केचिद्विकल्पवसना आहुरात्मानमात्मनः ।
दैवमन्ये परे कर्म स्वभावमपरे प्रभुम् ॥
[भाग० १।१७।१९]

४. एवं पराभिध्यानेन कर्तृत्वं प्रकृतेः पुमान् ।
कर्मसु क्रियमाणेषु गुणैरात्मनि मन्यते ॥
तदस्य संसृतिर्बन्धः पारतन्त्र्यं च तत्कृतम् ।
भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ॥
[भाग० ३।२६।६-७]

५. न यावदेतां तनुभृन्नरेन्द्र विधूय मायां वयुनोदयेन ।
विमुक्तसङ्गो जितषट्सपत्नो वेदात्मतत्त्वं भ्रमतीह तावत् ॥
[भाग० ५।११।१५]
न यत्र सृज्यं सृजतोभयोः परं श्रेयश्च जीवस्त्रिभिरन्वितस्त्वहम् ।
तदेतदुत्सादितबाध्यबाधकं निषिध्य चोर्मीन् विरमेत् स्वयं मुनिः ॥
[भाग० १२।६।३१]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भागवतीयं दर्शनम्

परमपुरुषार्थसाधनम्

ज्ञानं कर्म तथा भक्तिरिति प्रतिपादितम्। तत्र साधनत्रये योग्यस्याधिकारिणस्तत्त-त्साधनेऽधिकारः। अथापि कलावस्मिन् सर्वत्र सुलभं सहजलभ्यं मनुष्यमात्रेण कर्तुं शक्यं भक्तिरूपं साधनमिति भागवतादिपुराणैः प्रतिपाद्यते।[१]

भक्तिः

भगवच्चरित्रादिश्रवणादिना द्रुतस्य चेतसः परमेश्वरविषयकाकारयुक्तता।[२] भक्ता भक्तिं पञ्चमपुरुषार्थरूपेणाङ्गीकुर्वन्ति। भगवता साक्षाद्दीयमानमपि मोक्षं नेच्छन्ति।[३]

अस्या भक्तेः प्राप्तिसाधनान्यपि भागवतीयैकादशस्कन्धस्य तृतीयाध्याये[४] विस्तरेण प्रोक्तानीति शम्॥

———

१. आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे।
कुर्वन्त्यहेतुकीं भक्तिमित्थंभूतगुणो हरिः॥ [भाग० १।७।१०]
धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः।
नोत्पादयेद्यदि रतिं श्रम एव हि केवलम्॥ [भाग० १।२।८]
दानव्रततपोहोमजपस्वाध्यायसंयमैः।
श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते॥ [भाग० १०।४७।२४]

२. मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ।
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्॥ [भाग० ३।२९।११-१२]

३. सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः॥ [भाग० ३।२९।१३]

४. तस्माद् गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम्। इत्यादिना,
एवम्—
भक्तियोगः पुरैवोक्तः प्रीयमाणाय तेऽनघ॥ इत्यादिना च।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुराणेतिहासयोः सांख्यदर्शनम्

श्रीश्रीकृष्णमणित्रिपाठी, सरस्वतीभवनम्, वाराणसी ।

तत्तत्पुराणेष्वाख्यानोपाख्यानगाथादिभिर्वेदार्थनिरूपणपूर्वकं वेदाङ्गानां विचारो दार्शनिकविषयाणां च दिग्दर्शनं विद्यते। तत्रापि विशेषतो वेदान्तदर्शनस्य सांख्ययोग-योश्च प्रचुरं निरूपणं दरीदृश्यते ।

यथा तत्त्वज्ञानम्, मोक्षप्राप्तिः, सत्कार्यवादः, पुरुषबहुत्वं सांख्यदर्शनस्यास्ति मुख्यो विषयः, तथैव पुराणेतिहासयोरपि यत्र तत्र तत्त्वज्ञाननिरूपणम्, सत्कार्यवादस्योल्लेखः, मोक्षप्राप्त्युपायश्च प्रदर्शितो विद्यते। पुराणेतिहासयोः प्रधानतया मोक्षप्राप्तिर्भक्तिं पुरस्कृत्य जायते, सांख्ये तु प्रकृतिपुरुषविवेकद्वारा भवति ।

भगवतो महापुरुषस्यावतारो जगदनुजिघृक्षया प्रजापतेः कर्दमस्य पुत्रः स्वायम्भुवस्य मनोर्दुहितरि देवहूत्यामवतीर्णो धर्मज्ञानवैराग्यैश्वर्यसम्पन्नो भगवान् कपिलो महामुनि-रज्ञानान्धकारे मज्जज्जगदवलोक्य संजातकारुण्यो जिज्ञासमानायाऽऽसुरिसगोत्राय ब्राह्मणाय स्वप्रधानशिष्याय गुणपुरुषान्यतोपलब्धिरूपेण ज्ञानेन संसारपारावारपारदिदर्शयिषयां पञ्च-विंशतितत्त्वान्युपदिदेश, येषां ज्ञानात् त्रिविधतापनिवृत्तिपूर्वकं मोक्षो भवति । तथा चोक्तम्—

पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे वसन् ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ।।

तत्र तत्त्वविकासक्रमः

त्रिगुणात्मिकायाः प्रकृतेर्महानुपद्यते, महतोऽहङ्कारो जायते, तस्मात् शब्द-स्पर्श-रूप-रस-गन्धतन्मात्राणि, एकादशेन्द्रियाणि चाविर्भवन्ति । पञ्चतन्मात्रेभ्यश्च आकाश-वायु-तेजोऽनिल-पृथिवीनामकानि पञ्च महाभूतान्युत्पद्यन्ते ।

तत्र शब्दतन्मात्रादाकाशं शब्दगुणकमुत्पद्यते। शब्दतन्मात्रसहितात् स्पर्शतन्मात्रात् शब्दस्पर्शोभयगुणको वायुरुत्पद्यते। शब्दस्पर्शतन्मात्रसहिताद् रूपतन्मात्रात् शब्दस्पर्शरूप-गुणकं तेज उत्पद्यते। शब्दस्पर्शरूपतन्मात्रसहितरसतन्मात्रात् तद्गुणिकाः शब्दस्पर्शरूपरसवत्य आप उत्पद्यन्ते। शब्दस्पर्शरूपरसतन्मात्रसहितगन्धतन्मात्रात् शब्दस्पर्शरूपरसगन्धवती पृथिव्युत्पद्यते। एवं क्रमेण पूर्वपूर्वानुप्रवेशेनैकद्वित्रिचतुष्पञ्चगुणकान्याकाशादीनि पृथ्वी-पर्यन्तानि पञ्चमहाभूतानि जायन्ते । तथा चोक्तं सांख्यकारिकायाम्—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुराणेतिहासयोः सांख्यदर्शनम्

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्मात् गणश्च षोडशकः ।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥

नारदीयपुराणे च—

वियदेकगुणं प्रोक्तं द्वौ गुणौ मातरिश्वनः ।
त्रयस्तेजसि चत्वारि सलिले पञ्च भूमिगाः ॥

देवीभागवतस्य तृतीयस्कन्धे सप्तमेऽध्यायेऽपि—

आकाशस्य गुणश्चैकः शब्द एव न चाऽपरः ।
शब्दस्पर्शौ च वायोश्च द्वौ गुणौ परिकीर्तितौ ॥
अग्नेः शब्दश्च स्पर्शश्च रूपमेते त्रयो गुणाः ।
शब्द-स्पर्श-रूप-रसाश्चत्वारो वै जलस्य च ॥
स्पर्श-शब्द-रसा रूपं गन्धश्च पृथिवीगुणाः ।
एवं मिलितयोगैश्च ब्रह्माण्डोत्पत्तिरुच्यते ॥ इति ।

सांख्यसृष्टिक्रमः

(१) पुरुषः (उदासीनः)
(२) प्रकृतिः
|
(३) महान्
|
(४) अहङ्कारः

- सात्त्विकोऽहङ्कारः
  - (५) मनः, पञ्चज्ञानेन्द्रियाणि च
    - (६) चक्षुः
    - (७) श्रोत्रम्
    - (८) घ्राणम्
    - (९) जिह्वा
    - (१०) त्वक्
- राजसोऽहङ्कारः
  - पञ्चकर्मेन्द्रियाणि
    - (११) वाक्
    - (१२) पाणिः
    - (१३) पादः
    - (१४) पायुः
    - (१५) उपस्थः
- तामसोऽहङ्कारः
  - पञ्चतन्मात्राणि
    - (१६) शब्दतन्मात्रम्
    - (१७) स्पर्शतन्मात्रम्
    - (१८) रूपतन्मात्रम्
    - (१९) रसतन्मात्रम्
    - (२०) गन्धतन्मात्रम्
      - (२१) आकाशः
      - (२२) वायुः
      - (२३) तेजः
      - (२४) जलम्
      - (२५) पृथिवी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लयक्रमः

सृष्टिक्रमतो लयक्रमो विपरीत उपलभ्यते। सृष्टिसमये यत्तत्त्वं यस्मात्तत्त्वादुत्पद्यते लयसमये तत्तत्त्वं तस्मिन्नेव स्वकारणे विलीयते। यथा पञ्चमहाभूतानि स्वकारणेषु पञ्चतन्मात्रेषु लीयन्ते। पञ्चतन्मात्राणि एकादशेन्द्रियाणि च स्वकारणेऽहङ्कारे लीयन्ते। स च स्वकारणे महत्तत्त्वे, महांश्च स्वकारणे प्रकृतौ लीयते। प्रकृतिर्न कुत्रापि लीयते। तथा चोक्तं शिवपुराणे वायवीयसंहितायाम्—

अव्यक्तप्रभवं सर्वमानुलोम्येन जायते।
प्राप्ते प्रलयकाले तु प्रातिलोम्येऽनुलीयते॥
गुणाः कालवशादेव भवन्ति विषमाः समाः।
गुणसाम्ये लयो ज्ञेयो वैषम्ये सृष्टिरुच्यते॥

वायुपुराणे च—

अव्यक्तान् ग्रसते व्यक्तं प्रत्याहारे च कृत्स्नशः।
आपो ग्रसन्ति वै पूर्वं भूमेर्गन्धात्मकं गुणम्॥
आत्तगन्धा ततो भूमिः प्रलयत्वाय कल्पते।
महदादेर्विकारस्य विशेषान्तस्य संक्षये॥
स्वयमाचरिते तस्मिन् प्रवृत्ते प्रतिसंचरे। इति।

सृष्टिप्रलयविचारणायामादावन्ते चैका प्रकृतिरेवावशिष्यते। सांख्यदर्शनानुसारं पुरुषस्य न किमपि कार्यं विद्यते, किन्तु तन्मते प्रकृतिरेव कर्त्री पुरुषस्तु पुष्करपलाशवन्निर्लेपः। तच्छायापत्त्या जडायां प्रकृतौ चेतनताऽऽगच्छति, यया सा चेतनवज्जगन्निर्माणकार्ये प्रवृत्ता भवति।

पुराणेषु सांख्यदर्शनम्

स्वस्वामिनि कर्दमे तपस्तप्तुमरण्यमुपगते देवहूतिर्ब्रह्मणो वचनं स्मरन्ती बिन्दुसरे वसन्तं स्वतनयं महामुनिं कपिलं ज्ञानोपदेशार्थं प्रार्थयत्। ततः स मातुरभिप्रायं विदित्वा संजातकारुण्यो भक्तिं पुरस्कृत्य सांख्यतत्त्वं सविस्तरमुपदिदेश। तदुक्तं श्रीमद्भागवते तृतीयस्कन्धे पञ्चविंशतितमेऽध्याये—

पितरि प्रस्थितेऽरण्यं मातुः प्रियचिकीर्षया।
तस्मिन् बिन्दुसरेऽवात्सीद्भगवान् कपिलः किल॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तमासीनमकर्माणं तत्त्वमार्गाग्रदर्शनम्।
स्वसुतं देवहूत्याह धातुः संस्मरती वचः॥
तं त्वां गताहं शरणं शरण्यं स्वभृत्यसंसारतरोः कुठारम्।
जिज्ञासयाहं प्रकृतेः पूरुषस्य नमामि सद्धर्मविदां वरिष्ठम्॥
विदित्वार्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाभिजातः।
तत्त्वाम्नायं यत्प्रवदन्ति सांख्यं प्रोवाच वै भक्तिवितानयोगम्॥

ननु—"तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति श्रुत्याऽऽत्मज्ञानादेव मुक्तिः प्रतिपाद्यते, न तु तत्त्वज्ञानादिति सांख्योक्तं तत्त्वज्ञानं कथं मुक्तिसाधकं भवितुमर्हतीति चेदत्रोच्यते—

आत्मदर्शनरूपज्ञानमेव हृदयग्रन्थिभेदकमहङ्कारनिवर्तकं च निःश्रेयसाय कल्पते। तत्त्वज्ञानादेव विविक्तात्मज्ञानं जायते। तत्त्वानि च साङ्ख्यशास्त्र एव समीचीनतया प्रतिपादितानि। तथा च सांख्योक्ततत्त्वज्ञानं परमावश्यकम्।

श्रीमद्भागवते तृतीयस्कन्धे षड्विंशतितमेऽध्याये सप्तमश्लोकादारभ्य पञ्चदशश्लोकपर्यन्तं सांख्यदर्शनपद्धतिमनुसृत्यैव प्रकृतिपुरुषादीनां सम्यग्विवेचनं कृतं विद्यते। तथा हि—

प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम।
ब्रूहि कारणयोरस्य सदसच्च यदात्मकम्॥

इति देवहूतिप्रश्ने भगवान् कपिलो ब्रवीति—

यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम्।
प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत्॥
पञ्चभिः पञ्चभिर्ब्रह्म चतुर्भिर्दशभिस्तथा।
एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः॥
महाभूतानि पञ्चैव भूरापोऽग्निमरुन्नभः।
तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे॥ इति।

सांख्ये यथा सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, महान्, अहङ्कारः, एकादशेन्द्रियाणि, पञ्चतन्मात्राणि, पञ्चमहाभूतानि च स्वीकृतानि, तद्वत् श्रीमद्भागवतेऽपि चतुर्विंशतितत्त्वानि प्रतिपादितानि—

प्रकृतिर्बुद्ध्यहङ्कारौ तन्मात्रैकादशेन्द्रियम्।
भूतानि चेति सामान्यं चतुर्विंशतिरेव च॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सांख्यसूत्रे यथा—"अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" [१।१] इत्यनेन मोक्षस्वरूपं प्रदर्शितम्, तथैव श्रीमद्भागवते तृतीयस्कन्धे सप्तविंशतितमेऽध्याये प्रथमश्लोकादारभ्य त्रिंशच्छ्लोकपर्यन्तं मोक्षस्य विवेचनं कृतम्। श्रीमद्भागवतस्य चतुर्थस्कन्धे एकत्रिंशदध्याये च नारदोक्तमोक्षकथनं सांख्यानुसारमेवास्ति। दशमस्कन्धे सप्तचत्वारिंशत्तमेऽध्यायेऽपि सांख्यदर्शनानुसारमेव तत्त्वोपदेशः कृतो विद्यते। एकादशस्कन्धस्यैकादशेऽध्याये बद्धमुक्तयोर्विषये सांख्यमतमेवावलम्बितमस्ति। ब्रह्मस्तुतौ च सांख्यमतमेवावलम्ब्य देवैर्भगवतः स्तुतिः कृता। तथा हि—

योगिनो यं हृदाकाशप्रणिधानेन निश्चलाः।
ज्योतीरूपं प्रपश्यन्ति तस्मै श्रीब्रह्मणे नमः॥
कालात्पराय कालाय स्वेच्छया पुरुषाय च।
गुणत्रयस्वरूपाय नमः प्रकृतिरूपिणे॥
विष्णवे सत्त्वरूपाय रजोरूपाय वेधसे।
तमसे रुद्ररूपाय स्थितिसर्गान्तकारिणे॥
नमो बुद्धिस्वरूपाय त्रिधाऽहङ्कृतये नमः।
पञ्चतन्मात्ररूपाय पञ्चकर्मेन्द्रियात्मने॥
नमो नमःस्वरूपाय पञ्चबुद्धीन्द्रियात्मने।
क्षित्यादिपञ्चरूपाय नमस्ते विषयात्मने॥ इति।

सांख्ये यथा पुंप्रकृत्योर्विवेकेन मोक्षप्राप्तिः, तथैव श्रीमद्भागवतस्यैकादशस्कन्धे चतुर्विंशतितमेऽध्यायेऽपि भगवता श्रीकृष्णेनोद्धवं प्रति सृष्टिप्रक्रिया, प्रलयप्रकारवर्णनपूर्वकं मोक्षस्वरूपं च प्रदर्शितम्। तथा हि—

अथ ते संप्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितम्।
यद्विज्ञाय पुमान् सद्यो जह्याद्वैकल्पिकं भ्रमम्॥
तमो रजः सत्त्वमिति प्रकृतेरभवन् गुणाः।
मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन च॥

सांख्यसूत्रे यथा—"न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते" [१।१९] इति, सांख्यसारे च—

नित्यशुद्धो नित्यमुक्तो नित्यबुद्धो निरञ्जनः।
स्वप्रकाशो निराधारः प्रदीपः सर्ववस्तुषु॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इति पद्येनात्मनो नित्यशुद्धबुद्धमुक्तस्वभावं प्रतिपादितम्, तद्वत् श्रीमद्भागवतेऽपि—

गुणस्य मायाभूतत्वान्न मे मोक्षो न बन्धनम्।
शोकमोहौ सुखं दुःखं देहोत्पत्तिश्च मायया॥
स्वप्नोऽयमात्मनः ख्यातिः संसृतिर्न तु वास्तवी। इति।

श्रीमद्भागवतस्य द्वादशस्कन्धे सप्तमाध्याये दशमश्लोकादारभ्य विंशतिश्लोकपर्यन्तं सांख्यरीत्यैव तत्त्वानां वर्णनं कृतमस्ति—

अव्याकृतगुणक्षोभाद् महतस्त्रिवृतोऽहमः।
भूतसूक्ष्मेन्द्रियार्थानां संभवः सर्ग उच्यते॥

सांख्ये यथा पुंप्रकृत्योर्विवेकेन मुक्तिस्तथा श्रीमद्भागवतेऽपि प्रकृतिपुरुषविवेके मोक्षप्राप्तिः प्रतिपादिता—

भुक्तभोगा परित्यक्ता दृष्टदोषा च नित्यशः।
नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च॥ इति।

सांख्ये यथा प्रकृतेः कारणत्वं तथा श्रीमद्भागवतेऽपि—

कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः।
भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम्॥ इति।

विष्णुपुराणे प्रथमेंऽशे द्वितीयेऽध्याये एकोनविंशतिश्लोकादारभ्य पञ्चाशच्छ्लोकपर्यन्तं सांख्यानुसारमेव सृष्टिक्रमः प्रतिपादितः—

अव्यक्तं कारणं यत्तत्प्रधानमृषिसत्तमैः।
प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकम्॥
त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययम्।
तेनाग्रे सर्वमेवासीद् व्याप्तं वै प्रलयादनु॥ इति।

सांख्ये यथा पञ्चविंशतितत्त्वानि स्वीकृतानि तथैवात्रापि। ध्रुवश्च सांख्यतत्त्ववर्णनपुरःसरमेव भगवतः स्तुतिं चकार—

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
भूतादिरादिप्रकृतिर्यस्य रूपं नतोऽस्मि तम्॥
शुद्धः सूक्ष्मोऽखिलव्यापी प्रधानात्परतः पुमान्।
यस्य रूपं नमस्तस्मै पुरुषाय गुणाशिने॥ इति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मार्कण्डेयपुराणे चतुर्थेऽध्याये पञ्चचत्वारिंच्छ्लोकादारभ्य त्रिपञ्चाशच्छ्लोकपर्यन्तं सृष्टिः सांख्यानुसारमेव प्रतिपादिता—

एका मूर्तिरनिर्देश्या शुक्लां पश्यन्ति तां बुधाः।
ज्वालामालोपरुद्धाङ्गी निष्ठा सा योगिनां परा॥
सत्त्वोद्रिक्ता तु सा ज्ञेया धर्मसंस्थानकारिणी॥ इत्यादिना।

वायुपुराणे तृतीयेऽध्याये सांख्यानुसारमेव सृष्टिः प्रतिपादिता—

यत्तत्स्मृतं कारणमप्रमेयं ब्रह्म प्रधानं प्रकृतिः प्रसूतिः।
आत्मा गुहो योनिरथापि चक्षुः क्षेत्रं तथैवामृतमक्षरं च॥

नारदीयपुराणे द्विचत्वारिंशत्तमेऽध्याये त्रयोदशश्लोकादारभ्य षट्त्रिंशच्छ्लोकपर्यन्तं सांख्यरीतिमनुसृत्यैव सृष्टिक्रमः प्रतिपादितः—

अनादिनिधनो देवस्तथा तेभ्योऽजरामरः।
अव्यक्त इति व्याख्यातः शाश्वतोऽथाक्षयोऽव्ययः॥
यतः सृष्टानि भूतानि जायन्ते च म्रियन्ति च।
सोऽसृजत्प्रथमं देवं महान्तं नाम नामतः॥

मत्स्यपुराणे चतुर्थाध्याये तृतीयश्लोकतो द्वात्रिंशच्छ्लोकपर्यन्तं सृष्टिक्रमः सांख्यरीत्यैव वर्णितः—

दिव्येयमादिसृष्टिस्तु रजोगुणसमुद्भवा।
अतीन्द्रियेन्द्रिया तद्वदतीन्द्रियशरीरका॥

देवीभागवते सप्तमस्कन्धे द्वात्रिंशदध्याये प्रकृतितत्त्वनिरूपणं सांख्यानुसारमेव कृतम्—

केचित्तां तप इत्याहुस्तमः केचिज्जडं परे।
ज्ञानं मायां प्रधानं च प्रकृतिं शक्तिमप्यजाम्।
विमर्श इति तां प्राहुः शैवशास्त्रविशारदाः॥ इति।

सप्तमस्कन्धे च त्रिचत्वारिंशत्तमेऽध्याये प्रथमश्लोकादारभ्य पञ्चाशच्छ्लोकपर्यन्तं ज्ञानस्य मोक्षार्थत्वं सांख्यरीत्यैव प्रतिपादितम्।

स्कन्दपुराणस्य माहेश्वरखण्डे सप्तविंशतितमेऽध्याये सांख्यदर्शनानुसारमेव प्रथमेन सृष्टिः, द्वितीयेन च प्रलयप्रकारो दर्शितः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुराणेतिहासयोः सांख्यदर्शनम्

वाराहपुराणे द्वितीयेऽध्याये षष्ठश्लोकात् पञ्चविंशतिश्लोकपर्यन्तं सांख्यानुसारमेव सृष्टिक्रमः प्रतिपादितः—

आदावहं व्योम महत्ततोऽणुरेकैव मत्तः प्रबभूव बुद्धिः।
त्रिधा नु सा सत्त्वरजस्तमोऽभिः पृथक् पृथक् सत्त्वरूपैरुपेता॥
तस्मिंस्त्रिकेऽहं तमसो महान् स सदोच्यते सर्वविदां प्रधानम्।
तस्मादपि क्षेत्रविवर्जितो यो बभूव बुद्धिस्तु ततो बभूव॥

द्विपञ्चाशत्तमेऽध्याये च प्रथमश्लोकादारभ्य पञ्चविंशतिश्लोकपर्यन्तं मोक्षस्य निरूपणं सांख्यरीतिमनुसृत्यैव प्रतिपादितम्।

ब्रह्मवैवर्तपुराणे ब्रह्मखण्डे द्वितीयेऽध्याये द्वितीयश्लोकतः पञ्चमश्लोकपर्यन्तं सृष्टिक्रमः—

आविर्बभूव सर्गादौ पुंसो दक्षिणपार्श्वतः।
भवकारणरूपाश्च मूर्तिमन्तस्त्रयो गुणाः॥
ततो महानहङ्कारः पञ्चतन्मात्र एव च।
रूपरसगन्धस्पर्शशब्दाश्चैतेति संज्ञकाः॥

प्रकृतिखण्डे च प्रथमाध्याये तृतीयश्लोकतोऽष्टमश्लोकपर्यन्तं प्रकृतिशब्दार्थः एवमभिहितः —

प्रकृतेर्लक्षणं वत्स ! को वा वक्तुं क्षमो भवेत्।
किञ्चित्तथापि वक्ष्यामि यच्छ्रुतं धर्मवक्त्रतः॥
प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः।
सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्तिता॥
गुणे प्रकृष्टसत्त्वे च प्रकाशो वर्तते श्रुतौ।
मध्यमे कृश्च रजसि तिशब्दस्तमसि स्थितः॥
त्रिगुणात्मस्वरूपा या सर्वशक्तिसमन्विता।
प्रधानसृष्टिकरणे प्रकृतिस्तेन कथ्यते॥

कूर्मपुराणे चतुर्थाध्याये पञ्चदशश्लोकतश्चतुःपञ्चाशच्छ्लोकपर्यन्तं सृष्टिक्रम एवं प्रतिपादितोऽस्ति—

प्रधानाच्चोद्यमानाच्च तथा पुंसः पुरातनात्।
प्रादुरासीन्महद्बीजं प्रधानपुरुषात्मकम्॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वैकारिकस्तैजसश्च भूतादिश्चैव मानसः ।
त्रिविधोऽयमहङ्कारो महतः संबभूव ह ॥
पञ्चभूतान्यहङ्कारात्तन्मात्राणि च जज्ञिरे ।
प्रधानं पुरुषो ह्यात्मा महद्भूतादिरेव च ॥
तन्मात्राणि मनो भूतानीन्द्रियाणि च जज्ञिरे ।

सप्तमेऽध्याये च सर्गक्रममुक्त्वा द्वितीयाध्याये चतुर्थश्लोकतः षट्पञ्चाशच्छ्लोकपर्यन्तं प्रकृतिपुरुषविवेचनं सांख्यरीतिमनुसृत्यैव कृतम् ।

भविष्यपुराणे ब्राह्मपर्वणि द्वितीयाध्याये त्रिंशच्छ्लोकतो द्वात्रिंशच्छ्लोकपर्यन्तं सर्गक्रमः प्रतिपादितः—

प्रकृतिः सूयते तद्वदानन्त्यान्नापचीयते ।
अव्यक्तात् कर्मजा बुद्धिरहङ्कारः प्रसूयते ॥
आकाशश्चाप्यहङ्काराद् वायुराकाशसंभवः ।
वायुस्तेजस्ततश्चापः अद्भ्योऽथ वसुधोद्गता ॥
मूलप्रकृतयो ह्यष्टौ जगदेतास्ववस्थितम् ।

लिङ्गपुराणे तृतीयाध्याये द्वितीयश्लोकतस्त्रयस्त्रिंशच्छ्लोकपर्यन्तं सांख्यरीत्यैव सृष्टिक्रमो दर्शितः—

प्रधानं प्रकृतिश्चेति यदाहुर्लिङ्गमुत्तमम् ।
गन्धवर्णरसैर्हीनं शब्दस्पर्शादिवर्जितम् ॥

शिवपुराणे वायवीयसंहितायां नवमेऽध्याये षष्ठश्लोकतश्चतुर्विंशतिश्लोकपर्यन्तं सांख्यानुसारमेव सर्गक्रमः प्रतिपादितः —

अव्यक्तं कारणं यत्तदात्मना समनुष्ठितम् ।
महदादिविशेषान्तं सृजतीत्यपि संमतम् ॥
किन्तु तत्रापि कर्तृत्वं नाव्यक्तस्य न चात्मनः ।
अचेतनत्वात् प्रकृतेरज्ञत्वात्पुरुषस्य च ॥
परिणामः प्रधानस्य प्रवृत्तिः पुरुषस्य च ।
सर्वं सत्यव्रतस्यैव शासनेन प्रवर्तते ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्रैवैकादशाध्याये च —

प्रधानात्प्रथमं जज्ञे बुद्धिः ख्यातिर्मतिर्महान् ।
महत्तत्त्वस्य संक्षोभादहङ्कारस्त्रिधाभवत् ॥
अहङ्कारश्च भूतानि तन्मात्राणीन्द्रियाणि च ।
वैकारिकादहङ्कारात् सत्त्वोद्रिक्तात्तु सात्त्विकः ॥
वैकारिकः स सर्गस्तु युगपत् संप्रवर्तते ।

ब्रह्माण्डपुराणे प्रकृतिखण्डे चतुर्थाध्याये प्रथमश्लोकतो विंशतिश्लोकपर्यन्तं सांख्यानुसारमेव सर्गक्रमो दर्शितः—

आत्मन्यवस्थिते व्यक्ते विकारे प्रतिसंहृते ।
साधर्म्येणातितिष्ठेते प्रधानपुरुषौ तदा ॥
तमस्तत्त्वगुणावेतौ समत्वेन व्यवस्थितौ ।
अनुद्रितावनुचरौ तेन प्रोक्तौ परस्परम् ॥
गुणसाम्ये लयो ज्ञेय आधिक्ये सृष्टिरुच्यते ।
सत्त्ववृद्धौ स्थितिरभूद् ध्रुवं पञ्चशिखास्थितम् ॥

पद्मपुराणे सृष्टिखण्डेऽष्टाविंशतितमेऽध्याये सर्गक्रमः सांख्यरीत्यैव प्रतिपादितः—

गुणव्यञ्जनसंभूतः स्पर्शकाले नराधिप ।
सात्त्विको राजसश्चैव तामसश्च त्रिधा महान् ॥
प्रधानतत्त्वेन समं तथा वीर्यादिभिर्वृतः ।

वामनपुराणे त्रिचत्वारिंशत्तमेऽध्यायेऽष्टादशश्लोकत्स्त्रिंशच्छ्लोकपर्यन्तं सांख्यरीतिमनुसृत्यैव सर्गक्रमो वर्णितः—

सत्त्वोद्रिक्तस्तथा ब्रह्मा शून्यं लोकमपश्यत ।
सृष्टिं चिन्तयतस्तस्य रजसा मोहितस्य च ॥
रजः सृष्टिगुणः प्रोक्तः सत्त्वं स्थितिगुणं विदुः ।
उपसंहारकाले च प्रवर्तते तमोगुणः ॥

गरुडपुराणे त्रिंशदुत्तरद्विशततमेऽध्याये चतुर्थाध्याये च सर्गक्रमः सांख्यानुसारमेव प्रतिपादितः—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अनादिनिधनो धाता त्वनन्तः पुरुषोत्तमः ।
तस्माद्भवति चाव्यक्तं तस्मादात्मापि जायते ॥
तस्माद् बुद्धिर्मनस्तस्मात्ततः खं पवनस्ततः ।
तस्मात्तेजस्ततस्त्वापस्ततो भूमिस्ततोऽभवत् ॥

ब्रह्मपुराणे एकविंशतितमेऽध्याये द्वाविंशतिश्लोकतश्चतुश्चत्वारिंशच्छ्लोकपर्यन्तं महदादीनामुत्पत्तिक्रमः कथितः, त्रयस्त्रिंशदधिकशततमेऽध्याये च चतुर्विंशतितत्त्वानां निरूपणं कृतम्—

प्रधानं तस्य संयोगादुत्पन्नं सुमहत्परम् ।
अहङ्कारो महातेजाः प्रजापतिनमस्कृतम् ।
अव्यक्ताद्व्यक्तिमापन्नं विद्यासर्गं वदन्ति तम् ॥

अग्निपुराणे सप्तदशाध्याये द्वितीयश्लोकादारभ्य द्वादशश्लोकपर्यन्तं सांख्यतत्त्वमवलम्ब्य सर्गक्रमो दर्शितः—

व्यक्ताव्यक्तं सदग्नेऽभून्न खं रात्रिर्दिनादिकम् ।
प्रकृतिं पुरुषं विष्णुं प्रविश्य क्षोभयत्ततः ॥
सर्गकाले महत्तत्वमहङ्कारस्ततोऽभवत् ।
वैकारिकस्तैजसश्च भूतादिश्चैव तामसः ॥
अहङ्काराच्छब्दमात्रमाकाशमभवत्ततः ।
स्पर्शमात्रोऽनिलस्तस्माद् रूपमात्रोऽनलस्ततः ॥
रसमात्रा आप इतो गन्धमात्रा मही स्मृता ।
अहङ्कारात्तामसात्तु तैजसानीन्द्रियाणि च ॥
वैकारिका दश देवा मन एकादशेन्द्रियम् ।

पुनरग्रेऽग्निपुराणे विंशतितमेऽध्याये सर्गविषयकवर्णनप्रसङ्गे प्राकृतं सर्गं सांख्यानुसारमेव वर्णितम् । तथा हि—

प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः ।
तन्मात्राणां द्वितीयस्तु भूतसर्गो हि स स्मृतः ॥
वैकारिकस्तृतीयस्तु सर्ग ऐन्द्रियकः स्मृतः ।
इत्येष प्राकृतः सर्गः संभूतो बुद्धिपूर्वकः ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चैते वैकृताः सर्गाः प्राकृताश्च त्रयः स्मृताः।
ब्रह्मणो नव सर्गास्तु जगतो मूलहेतवः॥ इति।

इतिहासे सांख्यदर्शनम्

महाभारतस्य उद्योगपर्वणि चत्वारिंशदध्यायादारभ्य षट्चत्वारिंशदध्यायपर्यन्तं सनत्सुजातेन धृतराष्ट्रं प्रति सांख्यमतमवलम्ब्य तत्त्वानामुपदेशः कृतः। सांख्ये यथा — "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाम्। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥" [४।५] इति श्वेताश्वतरश्रुत्यनुसारं प्रकृतेर्लोहितकृष्ण-श्वेतरूपाणि प्रतिपादितानि, तथैव महाभारतस्योद्योगपर्वणि सनत्सुजातीये त्रयश्चत्वारिंशदध्याये प्रकृतेस्त्रिरूपत्वं प्रतिपादितम्। तथा हि—

आभाति शुक्लमिव लोहितमिवाथो कृष्णमथार्जुनं काद्रवं वा।
यद् ब्राह्मणः पश्यति यत्र विद्वान् कथं रूपं तदमृतमक्षरं परम्॥

महाभारतस्य शान्तिपर्वणि मोक्षधर्मप्रकरणे षडधिकत्रिशततमेऽध्याये—

सांख्ये योगे च मे तात विशेषं वक्तुमर्हसि।
तव धर्मज्ञ सर्वं हि विदितं कुरुसत्तम॥

इत्यादियुधिष्ठिरप्रश्ने—

सांख्याः सांख्यं प्रशंसन्ति योगा योगं द्विजातयः।
वदन्ति कारणं श्रेष्ठं स्वपक्षोद्भावनाय वै॥
अनीश्वरः कथं मुच्येदित्येवं शत्रुसूदन।
वदन्ति कारणं श्रेष्ठं योगाः सम्यग् मनीषिणः॥

इत्यादिना सविस्तरं योगविषयं प्रतिपाद्य भीष्मपितामहेन सप्ताधिकत्रिशततमेऽध्याये सांख्यदर्शनस्य सर्वोत्कृष्टत्वं प्रतिपादितम्। तथा हि—

शृणु मे त्वमिदं कृत्स्नं सांख्यानां विदितात्मनाम्।
विदितं यतिभिः सर्वैः कपिलादिभिरीश्वरैः॥
सांख्या राजन् महाप्राज्ञा गच्छन्ति परमां गतिम्।
ज्ञानेनानेन कौन्तेय तुल्यं ज्ञानं न विद्यते॥
ज्ञानं महद् यद्धि महत्सु राजन् वेदेषु शास्त्रेषु तथैव योगे।
यच्चापि दृष्टं विविधं पुराणे सांख्यागतं तन्निखिलं नरेन्द्र॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यच्चेतिहासेषु महत्सु दृष्टं यच्चार्थशास्त्रे नृप शिष्टजुष्टे ।
ज्ञानं च लोके यदिहास्ति किञ्चित् सांख्यागतं तच्च महन्महात्मन् ॥
हित्वा च देहं प्रविशन्ति मोक्षं दिवौकसो द्यामिव पार्थ सांख्याः ।
अतोऽधिकं तेऽभिरता महार्थे सांख्ये द्विजाः पार्थिव शिष्टजुष्टे ॥

सांख्ये यथा पञ्चविंशतितत्त्वानि स्वीकृतानि, तथैव महाभारतस्य शान्तिपर्वणि मोक्षधर्मे एकाधिकत्रिशततमेऽध्याये तानि स्वीकृतानि । तथा हि—

तत्त्वानि च चतुर्विंशत् परिसंख्याय तत्त्वतः ।
सांख्याः सह प्रकृत्या तु निस्तत्त्वं पञ्चविंशकम् ॥
एषा तत्त्वचतुर्विंशत्सर्वाकृतिषु वर्तते ।
यां ज्ञात्वा नाभिशोचन्ति ब्राह्मणास्तत्त्वदर्शिनः ॥
पञ्चविंशतितमो विष्णुर्निस्तत्त्वस्तत्त्वसंज्ञितः ।
तत्त्वसंश्रयणादेनं तत्त्वमाहुर्मनीषिणः ॥

सांख्ये यथा—सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महान्, महतोऽहङ्कारः, अहङ्कारात् पञ्चतन्मात्राण्येकादशेन्द्रियाणि च, तन्मात्रेभ्यः स्थूलभूतानि, पुरुष इति पञ्चविंशतिर्गणः स्वीकृतः, तथैव महाभारतेऽपि तत्त्वोत्पत्तिक्रमो वर्णितः । परं तत्र नवविधः सर्गः स्वीकृतोऽस्ति । तथा हि—

अव्यक्ताच्च महानात्मा समुत्पद्यति पार्थिव ।
प्रथमं सर्गमित्येतदाहुः प्राधानिकं बुधाः ॥
महतश्चाप्यहङ्कार उत्पद्यति नराधिप ।
द्वितीयं सर्गमित्याहुरेतद् बुद्ध्यात्मकं स्मृतम् ॥ इति ।

सांख्ये यथाऽचेतनापि प्रकृतिर्जगज्जनयति संहरति च, तथैव महाभारतस्य शान्तिपर्वणि मोक्षधर्मे एकोनविंशत्यधिकत्रिशततमेऽध्यायेऽपि—

अचेतना चैव मता प्रकृतिश्चापि पार्थिव ।
एतेनाधिष्ठिता चैव सृजते संहरत्यपि ॥

सांख्ये यथा जन्मादिव्यवस्थातः पुरुषबहुत्वं स्वीक्रियते; तथैव महाभारतस्य शान्तिपर्वणि मोक्षधर्मप्रकरणे पुरुषबहुत्वप्रतिपादनमुपलभ्यते । तथा हि —

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बहवः पुरुषा राजन् सांख्ययोगविचारिणाम् ।
नैवमिच्छन्ति पुरुषमेकं कुरुकुलोद्वह ॥

किञ्च— अव्यक्तैकत्वमित्याहुर्नानात्वं पुरुषास्तथा ।
सर्वभूतदयावन्तः केवलं ज्ञानमास्थिताः ॥

सांख्ये यथा प्रकृतिपुरुषसंयोगात् सर्ग उत्पद्यत इति स्वीक्रियते, तथैव महाभारतेऽपि स्वीकृतम्—

अन्योन्यस्याभिसंबन्धादन्योऽन्यगुणसंश्रयात् ।
रूपं निवर्तयत्येतदेवं सर्वासु योनिषु ॥
स्त्रीपुंसोरभिसंबन्धादन्योन्यगुणसंश्रयात् ।
ऋतौ निवर्त्यते रूपं तद्वक्ष्यामि निदर्शनम् ॥

शान्तिपर्वणि मोक्षधर्मे षट्त्रिंशदधिकद्विशततमेऽध्याये एकोनत्रिंशच्छ्लोकादारभ्यैकचत्वारिंशच्छ्लोकपर्यन्तं सांख्ययोगयोर्वैलक्षण्यस्य विवेचनं कृतमस्ति, भीष्मपर्वणि च पञ्चविंशत्यध्यायादारभ्य द्विचत्वारिंशदध्यायपर्यन्तं श्रीमद्भगवद्गीतायां सांख्यसिद्धान्तवर्णनं विस्तरतः कृतम् ।

सांख्ये यथा त्रिविधं दुःखं हेयम्, तदत्यन्तनिवृत्तिर्हानम्, प्रकृतिपुरुषसंयोगद्वारा चाविवेको हेयहेतुः, विवेकख्यातिस्तु हानोपायः, त्रिविधदुःखात्यन्तनिवृत्तिः पुरुषार्थो वर्णितः; तद्वदत्रापि शोकाक्रान्तस्यार्जुनस्य मोहमपाकर्तुं प्रवृत्तो भगवान् श्रीकृष्णः—

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥

अपि च सांख्ये यथाऽऽत्मनो नित्यत्वं विभुत्वं निर्गुणत्वं च प्रदर्शितम्, तथैवात्रापि—

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥ इत्युक्तम् ।

सांख्ये यथा पुंसः कूटस्थत्वेन सत्त्वरजस्तमस्त्रिगुणात्मिकायाः प्रकृतेरेव जगदाकारेण परिणामित्वं जगतः सुखदुःखमोहात्मकत्वेन चानुमतानि प्रकृत्यादितत्त्वानि पुरुषादतिरिच्यन्ते, तथैव गीतायामपि पुरुषस्य प्रतिपादनम् ।

शान्तिपर्वणि मोक्षधर्मे च द्व्यशीत्यधिकशततमेऽध्याये त्रयोदशश्लोकत एकोनविंशतिश्लोकपर्यन्तं सांख्यरीत्यैव सृष्टिप्रकारो वर्णितः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवंप्रकारेण पुराणेतिहासयोः सांख्यदर्शनस्य यत्र तत्र दिग्दर्शनं विद्यते।

त्रिगुणात्मकेऽस्मिन् संसार आध्यात्मिकाधिभौतिकाधिदैविकदुःखदुःखिनानां मानवानां शाश्वतशान्तये भगवान् कपिलस्तत्त्वज्ञानाधिकारिणे स्वप्रियशिष्याय आसुरये परमपुरुषार्थसाधकानां प्रकृतिपुरुषविवेकप्रयोजकानां पञ्चविंशतितत्त्वानामुपदेशं कृतवान्। स च पञ्चशिखाचार्याय तानि तत्त्वान्यादिदेश। तेन च षष्टितन्त्रनामकं महाग्रन्थं निर्माय सांख्यदर्शनस्य महान् विस्तारः कृतः। परं कालविपर्ययवशादद्यत्वे स ग्रन्थो नोपलभ्यते। ईश्वरकृष्णेन तु पञ्चशिखाचार्यस्य षष्टितन्त्रस्य सारं गृहीत्वा तच्छिष्येभ्यश्च तद्रहस्यं विज्ञाय पञ्चविंशतितत्त्वजिज्ञासूनां मुमुक्षूणां कृते त्रिविधदुःखनिवर्तकं तत्त्वज्ञानं सांख्यशास्त्ररूपेणावतारितं सांख्यकारिकायाम्। तदुक्तं तेनैव सांख्यकारिकाया अन्ते—

एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ।
आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम् ॥७०॥
शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्याभिः।
संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥७१॥

यद्यपीश्वरकृष्णः सांख्यकारिकायामात्मानं कपिलशिष्यपरम्परायां गणितवान्, किन्तु महाभारते कपिलेश्वरकृष्णयोर्मध्ये गार्ग्योलूकप्रभृतीनामपि नाम निर्दिष्टं वर्तते।

वेद उपनिषत्सु च सांख्यदर्शनस्य यत्स्वरूपमुपलभ्यते, तत् सेश्वरमेव सांख्यं प्रतीयते, यतो हि तत्र प्रकृतिपुरुषाभ्यां परमपि ब्रह्मणः सत्ता स्वीकृताऽस्ति। इतिहासे पुराणेषु च सर्वत्र सेश्वरस्यैव सांख्यस्य निरूपणं विद्यते। महाभारते श्रीमद्भागवतादिपुराणेष्वपि प्रकृतिपुरुषयोरुपरि ईश्वरस्य सत्ता स्वीक्रियते। तथा हि—

प्रधानपुरुषौ चापि प्रविश्यात्मेच्छया हरिः।
क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्ययौ ॥

[विष्णु० १।२]

प्रभातायां तु शर्वर्यां प्रधानपुरुषावुभौ।
प्रविश्य क्षोभयामास मायायोगान्महेश्वरः ॥
ततः पुनरशेषाणां भूतानां प्रभवाप्ययात्।
अव्यक्तादभवत् सृष्टिराज्ञया परमेष्ठिनः ॥

[शिवपुराणे वायवीयसंहितायाम्]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इत्यादिना परमेष्ठिन आज्ञया प्रधानात् सृष्टिः प्रतिपादिता ।

किन्तु ब्रह्मसूत्रनिर्दिष्टं सांख्यकारिकायां च वर्णितं सांख्यं निरीश्वरमेवास्ति । एतन्मये सृष्टिकार्ये नेश्वरस्य काप्यावश्यकताऽस्ति । यथा मानवशरीरे स्वभावतो लोमान्युत्पद्यन्ते, तथैव प्रकृतेः समस्तं जगज्जायते । यतो हि प्रकृतिरेव समस्तं प्रपञ्चं निर्माति । तस्यै कस्यापि प्रेरणाया नास्त्यावश्यकता ।

महामुनेः कपिलादारभ्य वार्षगण्यपर्यन्तं सांख्यदर्शनस्य सर्वे आचार्या ईश्वरवादिन आसन् । किन्तु निरीश्वरस्य सांख्यस्य परम्परा ईश्वरकृष्णकृतसांख्यकारिकात एवोपलभ्यते ।

कियन्त आलोचकाः कथयन्ति यदीश्वरकृष्णो वसुबन्धुप्रभृतीनां बौद्धविदुषां निरीश्वरवादेन प्रभावितो भूत्वा प्राचीनं सेश्वरं सांख्यमभिनवरूपेण परिवर्त्य निरीश्वरवादाय प्रश्रयं दत्तवान् । अत एव तेन सांख्यकारिकायां प्रकृतिपुरुषावन्तिमे तत्त्वे मत्वा तत्त्वानां विवेचनं कृतम्, न च तयोरुपरि परमेश्वरसत्ता स्वीकृता ।

परमैतिहासिकं पौराणिकं च सेश्वरं सांख्यं प्रकृतिपुरुषयोः संयोगार्थमीश्वरस्यावश्यकतामनुभवति । तन्मते पुष्करपलाशवन्निर्लेपस्य निरीहस्य पुरुषस्याचेतनायाश्च प्रकृतेः स्वयं संयोगो न भवितुमर्हति । अतस्तयोरुपरि ईश्वरसत्तास्वीकार आवश्यकः, यत्प्रेरणया तयोः संयोगो जायते ।

यथाऽयस्कान्तस्य संमुखे जडेऽपि लौहे गतिरुत्पद्यते, तथैवेश्वरसन्निधानमात्रेणैवाचेतनायां प्रकृतौ चैतन्यमुपजायते । तेन सचेतनेव सा सृष्टौ प्रवर्तते ।

उपसंहारः

सांख्यदर्शनस्य मूलभूताः सिद्धान्ता वेदे उपनिषत्स्वितिहासे पुराणेषु चोपलभ्यन्ते । सर्वप्रथमं सांख्यदर्शनस्य दर्शनमृग्वेदस्य नासदीयसूक्ते भवति । श्वेताश्वतरोपनिषदि सांख्यतत्त्वानां ज्ञानं सर्वोत्कृष्टं साधनं स्वीकृतमस्ति । कठोपनिषदि सांख्यस्य तत्त्वानां तारतम्येनोल्लेखो वर्तते । छान्दोग्योपनिषदि च सांख्यदर्शनानुसारमेव सत्त्वरजस्तमसां सुन्दरं वर्णनं विद्यते । महाभारतस्य शान्तिपर्वणि जनकपञ्चशिखसंवादे सांख्यदर्शनस्य प्रमुखाणां सिद्धान्तानां सयुक्तिकं निरूपणं विद्यते । श्रीमद्भागवतस्य तृतीयस्कन्धे कपिलदेवहूतिप्रश्नोत्तरे सांख्यतत्त्वानां सविस्तरं विवेचनं कृतमस्ति । एवं तत्तत्पुराणेषु सांख्यसिद्धान्तानां यत्र तत्रोल्लेख उपलभ्यते, येन तस्य प्राचीनता महत्त्वोपयोगितोपादेयता च प्रतीयते ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सर्वज्ञविचारः

श्रीदेवदत्तशर्मोपाध्यायः, संस्कृतविश्वविद्यालयः, वाराणसी।

एतस्मिन् सर्वज्ञविचारविषयकप्रबन्धप्रस्तावनाप्रस्तवनकाले सर्वेभ्यः पूर्वमियं विचार-चर्चा चर्च्यते प्राचार्यैः स्वकीयस्वान्ते यत् 'सर्वज्ञविचारः' इति शब्दस्य कोऽभिप्रायः, यतो ह्यनल्पाः शङ्का अनेकैः प्रकारैश्चेतसीत्थं प्रादुर्भवन्ति। तथा हि—किं सर्वज्ञस्य स्वरूपविचारोऽनुष्ठीयते, अथवा तस्य नित्यानित्यत्वं विचार्यते, किं वा सर्वज्ञोऽस्ति न वेति शङ्क्यते। तत्रान्तर्निहितचेतसा मया सतीष्वपि बह्वीसु शृङ्खलायमानासु समुज्जृम्भितासु च शङ्का-परम्परासु प्रथमत इत्येव समुट्टङ्क्यते यत् संसारिविलक्षणः कश्चित् सर्वज्ञ ईश्वरोऽस्ति न वेति। यतो ह्येतन्निर्णयमन्तरेण शङ्कान्तराणां समुदय एव नोद्भवितुमर्हति। अतः—"छिन्ने मूले नैव पत्रं न शाखा" इति लोकोक्तिमनुजीवयन् पूर्वं सर्वविचारान्तराकलनमूलभूतः सर्वज्ञा-स्तित्वविचार एव शङ्कासमाधानपुरःसरः सुचारुदृष्ट्या संप्रदर्श्यते।

तथा हि—तत्र सांसारिकचाकचिक्याभिभूतशक्तिनिमीलितान्तर्लोचनाः, अनाद्यविद्या-पटबन्धनेत्राः, वैदिकवाङ्मयपराङ्मुखाः, "अन्धेन नीयमाना यथान्धाः" [कठो० २।५] इति वैदिकवचनं चरितार्थयन्तः, परबुद्धिविक्रीताः, प्रचण्डपाश्चात्यपवनोत्पातितरजःकणिका-कलुषीकृतचक्षुषः कथञ्चित् प्रत्यक्षादिप्रमाणं प्रमाणयन्तः समुद्गिरन्तीत्थम्—यत् सर्वज्ञस्य समतीन्द्रियत्वान्नास्ति प्रत्यक्षं प्रमाणं तत्र।

अपि च वदन्ति ते पूर्वपक्षिणो यत्—"विवादगोचरापन्नं भूभूधरसरित्सागरादि प्रेक्षा-वत्कर्तृकं भवितुमर्हति, विचित्ररचनात्मकत्वात्, यद् यद् विचित्ररचनात्मकं तत् तत् प्रेक्षा-वत्कर्तृकं दृष्टम्, यथा स्यन्दनमन्दिरगोपुरतोरणादि, तथा चेदं जगद् विचित्ररचनात्मकम्, तस्मात् प्रेक्षावत्कर्तृकम्" इति सिद्धान्त्यभिमतानुमानमपि न प्रमाणपदवीमुपारोढुमर्हति, सर्वस्य भोग्यवर्गस्य चेतनादृष्टकारणकत्वेन सिद्धसाधनत्वात्। कुलालादिदृष्टान्तानुमानमपि सिद्धान्त्युक्तमित्थमेव प्रक्षेप्तव्यमित्यपि च ते समाकलयन्ति।

किञ्चापरमप्याभणन्ति यत्—यदि तक्षादिदृष्टान्तेन सर्वज्ञश्चेतनोऽनुमीयेत, तर्हि तेनैव कारणेन तस्य शरीरेन्द्रियादिमत्त्वमसर्वज्ञता च न दण्डवारिता स्यात्, अर्थात् सापि बलात् स्वीकृतैव भवेत्। एवं च सति महाननर्थः संपद्येत भवतां मत इति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सर्वज्ञविचारः

इत्थं प्रतिपक्षिकर्णकटुवचः समाकर्ण्य कश्चित् सर्वज्ञवादी सिद्धान्ती समाचष्टे—ननु भो महानुभाव, तक्षादिनेश्वरस्य न सर्वात्मना साधर्म्यं विवक्षितम्, अपि तु केवलचेतनत्वमात्रेण। अन्यथा दृष्टान्तदार्ष्टान्तिकयोः सर्वात्मना साधर्म्ये सर्वानुमानमूलोन्मूलनप्रसङ्गः पुरतः समापन्नः स्यादिति।

तदा पूर्वपक्षी प्राह—नैतद् युक्तम्। यतो हि यावता धर्मकलापेन लिङ्गस्यानन्यथासिद्धाविनाभावलक्षणा व्याप्तिरस्ति, तद्विषयानुमानस्य दुर्वारत्वात्।

प्रसिद्धानुमाने, अर्थात् कुलालादिदृष्टान्ताद्यनुमाने पुनर्व्याप्तिभूमौ वर्तमानस्यापि कस्यचिद् धर्मस्यान्यथासिद्धिः, कस्यचिद् व्यभिचारः, कस्यचित् प्रमाणान्तर्विरोध इति युक्तं विवक्षितधर्ममात्रस्योपादानम्। ईश्वरानुमाने पुनरसर्वज्ञत्वादिधर्मकलापस्य प्रसज्यमानस्य न क्वचिद् व्यभिचारः, नान्यथासिद्धिः, नापि प्रमाणान्तरविरोध इति प्रसज्यत एवेश्वरेऽसर्वज्ञत्वादिधर्मकलाप इति।

ततः सिद्धान्ती स्वाभिप्रायमुद्घाटयति—नन्विहाप्यस्ति धर्मिग्राहकप्रमाणविरोधः, यतो हि न तावत् सर्वज्ञमप्रतिपद्यास्यासर्वज्ञत्वादिधर्मकलापमनुमातुमिह कश्चिदीष्टे। अथानुमानेन तं प्रतिपद्य तत्र धर्मकलापोऽनुमीयेत, प्राप्तस्तर्हि धर्मिग्राहकानुमानविरोध इति।

परं तदापि पूर्वपक्षी समुद्घोषयति यत् वयमेतदप्यसमीक्षितमेवोत्प्रेक्षितमुत्पश्यामः, यतो हि सर्वज्ञत्वविपरीतधर्मव्याप्तत्वेन हेतोः सर्वज्ञत्वसाधकत्वासिद्धेः।

पुनः सिद्धान्तीत्थं प्रत्यवतिष्ठते—ननु भोः, कार्यमात्रलिङ्गेन चेतनकारणमात्रावगमे सति कल्पनालाघवन्यायेन तदेकत्वे च समधिगते पक्षधर्मताबलेन तस्य सर्वज्ञत्वसर्वेश्वरत्वादिसिद्धिरिति वयं वक्तुं शक्नुम इति।

ततोऽपि पूर्वपक्षी प्राह—नैतदपि रुचिरम्, यतो हि कारणस्यैकत्वानेकत्वयोः साधारणव्याप्तिसत्त्वे सत्ययं कल्पनालाघवन्यायो न विशति, विचित्ररचनात्मकस्य तु स्यन्दनमन्दिरगोपुरहर्म्यादेर्महत्तरकार्यस्यानेकचेतनविरचनव्याप्तेर्जगद्विरचनकार्यस्यापि बहुकर्तृकत्वमेव युक्तमिति।

किञ्च, हेतोः प्रयोजकत्वमपि वक्ष्यमाणप्रकारेण संदिग्धमेवात्र दरीदृश्यते। यतो हि—किं विचित्ररचनात्मकत्वाद् घट-पट-कट-मठ-शकटादिकार्यस्य चेतनकर्तृकत्वम्, किं वाऽस्मदादियोग्यत्वादिति। तस्मात् पूर्वोक्तेनानुमानेनेश्वरप्रसाधनं तस्य च सर्वज्ञत्वप्रकाशनं सर्वथापि दुःशकमेव सिद्धान्त्यभिधानकस्य कस्यचिन्महानुभावस्य।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इत्थं निर्भर्त्स्यमानः सिद्धान्ती वक्ष्यमाणं द्वितीयानुमानं सविनयमित्थमुपस्थाप्य सर्वज्ञमीश्वरं साधयितुमुत्सहतेतराम् ।

"विवादगोचरापन्नौ धर्माधर्मौ कस्यचित् प्रत्यक्षौ, प्रमेयत्वात्, यदित्थं तत् तथा यथा करतलस्थितं बदरामलकादि, तथा चेमौ धर्माधर्मौ, तस्मात् कस्यचित् प्रत्यक्षौ, यस्य च प्रत्यक्षौ—अर्थाद् येन चेदं धर्माधर्मादि साक्षात्कृतम्, स एव सर्वज्ञ ईश्वरः" इति ।

एतस्मिन्ननुमाने श्रोत्रपथमुपगतवति सति ब्रूते साग्रहं पुनः पूर्वपक्षी—यद् भोः, नैतदपि युक्तमुक्तं भवता सिद्धान्तिना, हेतोरप्रयोजकत्वादिति । यतो हि योग्यविषयेन्द्रियसंबन्धः करतलस्थितबदरामलकादेरपरोक्षत्वे प्रयोजकः, न पुनः प्रमेयत्वं प्रयोजकम् । योग्यत्वे च वर्तमानत्वं प्रयोजकमिति ।

ततः सिद्धान्ती समुदाहरति—ननु भोः, वर्तमानत्वमपि योग्यत्वे न प्रयोजकम्, आत्मपरमाण्वादेर्वर्तमानस्याप्यदर्शनादिति ।

एवं सति पूर्वपक्षी ब्रवीति यत्—भो महात्मन्, न वर्तमानत्वादेव योग्यत्वं ब्रूमः, अपि तु योग्यं सच्चेद् वर्तमानमेवेति । एवंप्रकारेण द्वितीयानुमानमपि पराहतम्, ततो नास्ति कश्चित् सर्वज्ञ ईश्वर इति ।

अपि च पूर्वपक्षी स्मयमान इत्यपि वचः समाकलयति यत्—भो सर्वज्ञवादिन्, किञ्चिदेतदपि विज्ञाप्यतां यद् भवतां सर्वज्ञोऽयं धर्माधर्मावपरोक्षमीक्षमाणस्तावत्ताविन्द्रियपञ्चकेन साक्षात्करोति, किं वा मनसैव केवलेन, आहोस्विद् व्यपगतनिखिलकरणव्रातेन स्वरूपमात्रेणेति।

यदि तावदिन्द्रियपञ्चकेन, तदा तदिन्द्रियस्याप्यस्मदादीन्द्रियवद् योग्यार्थविषयत्वानुमानात् परोऽप्येको दोषस्त्वयि समापतति सर्वज्ञवादिनि यत्—तस्य चेन्द्रियसद्भावाभ्युपगमे तदाधारदेहस्याप्यवश्याभ्युपगमनीयत्वात् तस्य च धर्माधर्माभ्यां विनाऽसंभवाद् अस्मदादिवत् सुखदुःखादिसंसारसंत्रासप्रसङ्गः समुत्पन्नो भवति भवतां सर्वज्ञस्येश्वरस्य वराकस्येति । न च वाच्यं तस्येच्छानिमित्तो देहेन्द्रियादिपरिग्रह इति, परस्पराश्रयदोषप्रसङ्गात् । देहेन्द्रियादिसंबन्धे सतीच्छासमुदयः, इच्छासमुदये सति च देहेन्द्रियादिसंबन्ध इति । न चेच्छादेहेन्द्रियादिसंबन्धावपीश्वरस्य नित्यावेवेति नाऽन्योन्याश्रय उपर्युक्त इति वाच्यम्, तथाभावे प्रमाणानुपलम्भात् ।

नापि मनसैव तौ साक्षात्करोतीश्वर इति वाच्यम्; मनःसंबन्धकल्पनायामपीन्द्रियसंबन्धपक्षनिक्षिप्तदोषप्रसङ्गात्, आत्मनोऽन्यत्र मनसो बाह्यकरणापेक्षत्वाच्चेति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ स्वरूपेणैव तौ साक्षात्करोतीति मतं चेत्, तदपि न समीचीनं वचः समुद्भावितं भवता सर्वज्ञवादिना। यतः किं विज्ञानमीश्वरस्य स्वरूपम्, उत तद्व्यतिरिक्तमिति। यदि विज्ञानमीश्वरस्वरूपम्, तह्यस्मदादेरिव तज्ज्ञानस्यापि करणजन्यत्वात् संसारसंत्रासप्रसङ्ग इति भवदुक्तं वचः "घटकुट्यां प्रभातम्" इति वृत्तान्तमनुहरति, अर्थात् स एव पूर्वोक्तो दोषशङ्का-पङ्ककलङ्कस्तदवस्थ एव समुपस्थित इति। तस्मादसुन्दरमेव पूर्वोक्तं द्वितीयानुमानमपीति।

इत्थं प्रतीपं वचः समाकलयति सति पूर्वपक्षिणि सिद्धान्ती तृतीयानुमानेन चैवं समवतिष्ठते—"विमत्यापन्नमस्मदादिविज्ञानं क्वचित् सर्वविषयस्वावान्तरजातीयगुणाविनाभूतं दृष्टम्, यथा बकुलबदरामलकबिल्वादिपरिमाणं सातिशयं सदाकाशगतेन सर्वविषयपरिमाणे-नाविनाभूतम्, तथा चेदम्, तस्मात्तथा" इति।

परं तृतीयमप्येतदनुमानं पूर्वपक्षीत्थं खण्डयितुमुपक्रमते यत्—भो सर्वज्ञवादि-शिरोमणे, भवदीयमिदमप्यनुमानमनैकान्तिकदोषदुष्टम्, यतो हि रागद्वेषदुःखादेः सातिशय-स्यापि तथाविधेनाविनाभावानभ्युपगमात्। किञ्च—"विवादास्पदमस्मदादिविज्ञानं क्वचिदपि सर्वविषयस्वावान्तरजातीयगुणाविनाभूतं न भवति, चेतनविशेषगुणत्वात्, यदुक्तसाधनं तदुक्तसाध्यम्, यथा दुःखरागद्वेषादि, तथा चेदमुक्तसाधनम्, तस्मादुक्तसाध्यम्" इत्येवं-प्रकारेण व्यभिचारतां भजन् विरुद्धश्चायं हेतुः पूर्वोक्त इति। अतो न किमपि प्रमाण-मीश्वरस्य सत्त्वे, सर्वज्ञत्वस्य तु का कथा?

अत्र सिद्धान्ती प्राह—यत् प्रत्यक्षमनुमानं चाश्रित्य भवता दूषणमभ्यधायि तद् दूषणं सर्वथाप्यदूषणं निष्फलं च, यतो हि न वयं प्रत्यक्षानुमानाभ्यामीश्वरं तत्सर्वज्ञत्वं च प्रति-पद्यामहे; अपि तु वेदवाक्यावष्टम्भादेव जगदीश्वरं तत् सर्वज्ञत्वं च समर्थयामहे। अतो यन्मूलं भवद्भिराश्रितम्, तदेव नष्टम्। तदाधारस्य वागाडम्बरस्य च पुनः का कथा? ततो भवतां सर्वज्ञत्वनिरासात्मकसमीहितं दिवंगततामवाप्तमिव समजनि सम्प्रति। तथा च श्रुतयश्चेमाः समुज्जृम्भन्ते—"यः सर्वज्ञः स सर्ववित्", "तस्य भासा सर्वमिदं विभाति", "एको देवः सर्वभूतेषु गूढः", "स कारणं करणाधिपाधिपः", "यच्च किञ्चिज्जगत्यस्मिन्", "एष त आत्माऽन्तर्याम्यमृतः" इत्यादयः।

एभिः प्रमाणभूतैः श्रुतिवचोभिः सर्वज्ञेऽवगम्यमाने भूतभाविनि परमात्मनीश्वरे को नाम सहृदयः सचेतस्को विद्वान् नास्ति सर्वज्ञ ईश्वरः कश्चिदिति ब्रूयात्। न च वाच्यं वेदस्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कार्यार्थत्वान्न सिद्धे वस्तुनि प्रामाण्यं तात्पर्यं चेति, प्रमेयान्तरत्वात्तस्य। प्रमितिस्तावत् सर्वज्ञविषया समुदयमासादयन्ती दरीदृश्यते।

पुनः पूर्वपक्षी व्याहरति—भो सिद्धान्तिन् सर्वज्ञवादिन्, नागमादपि सर्वज्ञं प्रतिपत्तुं क्षमामहे वयम्, यतस्तस्य कार्यकारणवत्त्वे सत्यस्मदादिवत् संसारपाशबन्धप्रसङ्गः, तदभावे च ज्ञानोदयासंभव इति।

ततश्चास्मिन् प्रसङ्गे सिद्धान्ती समुदाहरति यत्—भो पूर्वपक्षिन्, ईश्वरस्य स्वरूपज्ञानेनैव समस्तवस्तुसाक्षात्करणक्षमत्वान्न कश्चिदपि दोषलेशप्रसङ्ग इति। न च वाच्यं तस्य ज्ञानस्वरूपमात्रत्वे सति ज्ञातृत्वाभावात् सर्वज्ञत्वासिद्धिरिति; "तस्माद् वा एतस्मादात्मन आकाशः संभूतः" इत्यादिश्रुत्या जगन्नियन्तुर्जगदीश्वरस्य जगदुपादानकारणत्वात्, "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिवक्ष्यमाणश्रुतिभिश्च तस्य संवित्स्वरूपत्वाच्च सर्वाभेदेन सर्वसाक्षात्करणं तावत् सिद्धमिति। ज्ञातृत्वव्यपदेशश्च समस्तज्ञेयानुगतमायाप्रतिबिम्बितसोपाधिकस्फुरणाश्रयत्वेन संपद्यते; सोपाधिकस्य निरुपाधिकस्वरूपतन्त्रत्वात्, तावता च तद्भावव्यपदेशोपपत्तेः।

न च निखिलजगदुपादानकारणत्वं संवित्स्वरूपत्वं चैकस्यासिद्धमिति वाच्यम्; विचित्रभुवनविरचनकार्यलिङ्गेन चेतनकारणमात्रे सिद्धे, तदेकत्वे च—"यतो वा इमानि भूतानि जायन्ते" इति श्रुतिगतैकवचनेन समधिगते सति, एकस्य निखिलजगदुपादानकारणत्वप्रत्याख्यानासंभवात्। किञ्च, तस्येश्वरस्य—"सत्यं ज्ञानमनन्तं ब्रह्म", "प्रज्ञा प्रतिष्ठा", "प्रज्ञानं ब्रह्म", "विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुतिकदम्बकसमर्पितसंवित्स्वरूपस्य सुतरामप्रत्याख्येयत्वात्।

पुनरपि पूर्वपक्षीत्थं पादं प्रसारयति यत्—ब्रह्मणः संविन्मात्रस्वरूपत्वे प्रदीपादिवदेव तस्य वर्तमानवस्तुमात्रावभासित्वादतीतानागतविज्ञानाभावः, ततश्च जगत्कारणत्वाभावः, नापि च सर्वज्ञत्वमिति।

इत्येवं संश्रुत्य सिद्धान्ती सप्रश्रयमुवाच यत्—भो पूर्वपक्षिन्, एषापि ते पादप्रसारिका न निस्ताराय, यतो ह्यतीतसमस्तवस्तुजातस्य स्वसत्ताकाले साक्षात्कृतस्य तथैव सर्वदाऽवभासमाने पुनरावरणकारणाभावात् तदाभासजनितसंस्कारवर्तमानतया चाविच्छिन्नतद्विषयस्मरणोपपत्तेरतीतसकलवस्तुविषयावभाससिद्धिः।

तथा च ब्रह्मणो मायाशक्तिमत्त्वात्, मायायाश्च सृष्टेः प्रागेव सृज्यमाननिखिलपदार्थस्वरूपस्फुरणरूपेण जीवादृष्टानुसारेण विवर्तमानत्वात्, तत्साक्षितया तदुपाधिकस्य ब्रह्मणोऽपि तत्साधकत्वसिद्धेरनागतसकलवस्तुविषयविज्ञानोपपत्तेः सर्वज्ञत्वसिद्धिरिति॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संस्कारतत्त्वम्

श्रीरामशङ्करभट्टाचार्यः, टीकमणिसंस्कृतविद्यालयः, वाराणसी।

अत्र चित्तसंस्कारमधिकृत्य किमपि समासेन विचार्यते सांख्ययोगमतानुसारेण। विषयेऽस्मिन् पूर्वसूरिभिर्यानि मतानि भाषितानि तान्यत्रोपपत्तिभिः परीक्षितानि भविष्यन्ति।

प्रतिक्षणं चित्ते ज्ञानस्य (क्रियाया वा) उत्पत्तिर्दृश्यते। परिच्छिन्नं ज्ञानं क्षणानन्तरं नाशमेति। ज्ञाने नष्टेऽपि तदनुरूपः कश्चिद् भावश्चित्ते आहितस्तिष्ठति, अन्यथा घटादर्शनकाले घटस्मरणं न स्यात्। चित्तेऽलक्ष्यरूपेणाहितोऽयं भावः संस्कारपदेन व्यवह्रियते। तदेतदुपरिष्टाद् विशदीकरिष्यते।

संस्कारो न शरीराश्रितधर्मः, प्रत्युत चित्तमेव तस्योत्पत्तिस्थानं लयस्थानं च। अतोऽत्र चित्तस्वरूपं सांख्ययोगनयानुसारेण व्याख्यास्यामः।

प्रख्याप्रवृत्तिस्थितिधर्मविशिष्टं यद् अन्तःकरणम्, तदेवात्र चित्तम् (चित्तपदमर्थान्तरेऽपि प्रयुज्यते दार्शनिकैः, अत्र त्वयमेवार्थो ग्राह्यः)। आह हि भगवान् व्यासः—"चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलवान् त्रिगुणम्" [योगभाष्ये १।२]। प्रख्या ज्ञानम्, प्रवृत्तिश्च सर्वाश्चेष्टाः, स्थितिः खलु ज्ञानकृत्यो रोधात्मिका। प्रख्याप्रवृत्ती चित्तस्य परिदृष्टधर्मौ, स्थितिः खल्वपरिदृष्टधर्मरूपः'।

चित्तं परिणामशीलम्। प्रतिक्षणं प्रलयोदयशीलानां वृत्तीनां प्रवाहस्तत्र दृश्यते। चित्तस्य यस्मिन्नंशे वृत्तीनामुदयलयौ भवतः, तस्य हृदयमिति पारिभाषिकी संज्ञा। यथोक्तं भगवता व्यासेन—"यतो निर्याति विषयो यस्मिंश्चैव विलीयते। हृदयं तद् विजानीयान्मनसः

---

१. संस्कारतत्त्वज्ञानार्थं चित्तस्वरूपं सुविज्ञेयम्। चित्तपदेन क्वचिज्ज्ञानवृत्तिः, क्वचिच्चेन्द्रियाधीशं मनोऽपि गृह्यते। इमौ द्वावर्थौ नात्र गृह्येते। इह हि चित्तं पूर्वोक्तधर्मत्रयविशिष्टमन्तःकरणमित्येव मन्तव्यम्। नेदं संकल्पकमिन्द्रियाधीशं मनः। यत् खलु ज्ञानेन्द्रियगृहीतविषयज्ञानम्, कर्मेन्द्रियग्राह्यगतिचाल्यतावोधं प्राणविषयभूतजाड्यधर्मबोधं सुखादीनामनुभवं च करोति, बोधचेष्टाधृतियुक्तं च भवति, तदेव चित्तमित्युच्यते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्थितिकारणम् ॥" [महाभारते]। स्थितिधर्मकं हृदयमित्यनेन सिद्धं भवति। ज्ञानचेष्टा-संस्कारेभ्यः (यद्वा प्रख्याप्रवृत्तिस्थितिभ्यः) अन्यः कोऽपि धर्मश्चित्तस्य नास्तीति निश्चप्रचम्।

प्रख्याप्रवृत्तिस्थितिरूपाणां त्रयाणां धर्माणां स्वरूपमत्र विशदीक्रियते। तथा हि—"आत्मबाह्येन हेतुना बौद्धचेतनताया उद्रेके यस्तूद्रेकस्य प्रकाशभावः, तदेव प्राकाश्यपर्यवसानं प्रख्यास्वरूपम्। यो वा प्रकाशशीलस्य बुद्धिसत्त्वस्य विषयभूत उद्रेकः, तदेव ज्ञानम् अभिमानेनाऽनात्मभावस्य स्वात्मीकरणं प्रवृत्तिस्वरूपम्। तथा च तस्य स्वात्मीकृतभावस्य संसृष्टस्यावस्थानं स्थितिस्वरूपम्" [सांख्यतत्त्वालोके, २० प्रकरणम्] इति। ज्ञानशब्दमधिकृत्य वाचस्पतिरपि बभाषे—"उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेस्तमोभिभवे सति यः सत्त्वसमुद्रेकः, सोऽध्यवसाय इति वृत्तिरिति ज्ञानमिति चाख्यायते" [तत्त्वकौमुद्यां ५ कारिकायाम्] इति।

क्रियाशीलेनाभिमानेन य उद्रेकः प्रजायते, सोऽस्मितया संबद्ध एव। स एव आत्मा-नात्मनोः संबन्धस्योपायभूतः। उद्रेके सत्येव तत्फलरूपः परिच्छिन्नः प्रकाशभावः ज्ञानाख्य उदेति।

निबन्धेऽस्मिन् स्थितिसंस्कारावाश्रित्य विचारः प्रस्तूयते। स्थित्यादयो यद्यपि परस्परम-संकीर्णप्रविभागाः, तथापि गुणानां नित्यसाहचर्यात्, अविनाभावित्वात्, अन्योन्यमिथुनत्वाद् ज्ञानचेष्टासंस्काराणामत्यन्तं पार्थक्यकरणमसंभवमेव। ज्ञानं खलु क्रियास्थिती अपेक्षते, प्रवृत्तिश्च ज्ञानसंस्कारावपेक्षते, तथैव ज्ञानं चेष्टां चान्तरेण संस्कारो न प्रजायते।

शास्त्रीयविभागानुसारेण ज्ञानं सात्त्विकम्, स्थितिस्तामसी, क्रिया च राजसी। ज्ञानस्य सात्त्विकत्वेऽप्युपसर्जनभावेन तत्र स्थित्यादयो विद्यन्ते। स्थित्यादिष्वप्ययमेव चर्चः। स च योगभाष्यादिषु स्पष्ट एव।

ननु "ज्ञाने यः प्रकाशगुणो विद्यते" इत्येवं वाग्व्यवहारो दृश्यते आचार्याणाम्। ज्ञानं खलु प्रकाशस्वरूपमित्यप्युच्यते। अनयोर्वाक्ययोः का संगतिरिति चेच्छृणु—ज्ञानेन सह क्रियाया अविनाभावी संबन्धोऽस्ति। घटज्ञानमेकं ज्ञानोदाहरणम्। तत्र यो बोधांशः स प्रकाशरूपः। यया क्रियया घटज्ञानं जायते, सैव ज्ञानगता क्रिया। या प्रकाशांशेन सहैव तिष्ठति, ज्ञानस्य या शक्तिरूपाऽवस्था, या क्रिययोद्रिक्ता, रजसोदयघटिता वा ज्ञानात्मकं भवति, सैव स्थितिशब्देनोच्यते। इदमुक्तं भवति—एते ज्ञानादयः परस्परं मिलित्वैवाऽऽत्मभावं लभन्ते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संस्कारतत्त्वम्

अथेदं विचार्यते—त्रिविभागवतोऽन्तःकरणस्य कस्मिन् विभागे संस्कारसत्ता विद्यत इति ? उच्यते—संस्कारः खलु व्यक्तो हेतुमान् भावः, भूयिष्ठश्च तस्य स्थितिभावः। अतश्चित्तस्य तामसेंऽशे संस्कार आहितो विद्यत इति स्पष्टमेव। चित्तस्य द्वावेव धर्मौ—परिदृष्टोऽपरिदृष्टश्च[१]। संस्कारः खल्वपरिदृष्टधर्मं इति प्रागेव विवृतम्। भगवान् योगभाष्यकारोऽपि—"निरोधधर्म-संस्काराः परिणामोऽथ जीवनम्। चेष्टा शक्तिश्च चित्तस्य धर्मा दर्शनवर्जिताः॥" [३।१५] इत्युक्त्वा मतमिदमनुगृह्णाति। अतिसूक्ष्ममानसक्रियाया यदलक्ष्यं स्वरूपं तदेव संस्कार-रूपमित्यपि कथयितुं शक्यते। अस्मिन्नलक्ष्यस्वरूपे ज्ञानादीनामत्यस्फुटरूपेण स्थितिर्विद्यते। प्रत्यये ज्ञानादीनां विशदं रूपं वर्तते, संस्कारे तु न तथेति सर्वलोकसिद्धम्। आवृतस्वभावत्वात् संस्कारस्य तामसत्वं सिद्धमेव। यद्यप्यतिसूक्ष्मत्वात् संस्कारसत्ताया विशदं ज्ञानं स्थूलप्रज्ञया न भवति, तथापि वृत्त्यादिसंस्कारकार्यदर्शनात् संस्कारसत्ताऽनुमीयते। तदेतदुपरिष्टादुपपादयिष्यते।

वृत्तयः खलु संस्कारकार्यभूताः, वृत्तिभिश्च पुनः संस्कारा जायन्ते इति प्रसिद्धम्। अपि च प्राहुः—"ग्राह्योपरक्तः प्रत्ययो ग्राह्यग्रहणोभयाकारनिर्भासस्तथाजातीयकं संस्कारमारभते" [योगभाष्ये, १।११]। यतो वृत्तय एव सूक्ष्मीभूताः सत्यः संस्कारत्वमापद्यन्ते, अतो वृत्ति-संस्कारयोः सजातीयता सिद्धा भवति। अत्राहुर्व्यासचरणाः—"तथाजातीयकाः संस्कारा वृत्तिभिरेव क्रियन्ते, संस्कारैश्च वृत्तय इति। एवं वृत्तिसंस्कारचक्रमनिशमावर्तते" [योगभाष्ये १।५]।

इदमत्रावधेयम्—यदा चित्ते ज्ञानचेष्टयोरनुभूतिर्जायते, तदा तदनुगतः कश्चिद् भावोऽप्युत्पन्नो भवति, येन भावेन तदनुरूपा क्रिया परवर्तिनि काले सुकरा भवति। भावोऽयं संस्कारपदेनोच्यते। यदीदं मतं न स्वीक्रियते, तर्हि 'अभ्यासबलेन क्रिया कथं सुकरा भवति' इति प्रश्नस्योत्तरं न समीचीनं भवति। संस्कारबलादेव क्रिया बलवती भवतीति निश्चप्रचम्।

चित्ते या स्थितिधर्मानुसारिणी धारिणी शक्तिरस्ति, तयैवालक्ष्यरूपेण संस्कारा विधृतास्तिष्ठन्ति। कस्यापि भावपदार्थस्य कदाप्यभावो न भवतीत्यस्ति निरपवादो नियमः। "कथं न ज्ञानचेष्टयोरभाव एवोत्पत्त्यनन्तरं स्यात्" इति प्रश्ने प्राप्ते वयं ब्रूमः—"नासतो विद्यते भावो नाभावो विद्यते सतः" इति नियमाज्ज्ञानादीनामभावो न भवितुमर्हति, व्यक्ताना-मेतेषामलक्ष्यरूपेण स्थितिः स्यादेव। सा स्थितिरेव संस्कारपदवाच्या। यथा कश्चित्

१. आधुनिकमनोविज्ञानपारिभाषिकशब्दानुसारेणेमौ द्वौ सुपरलिमिनलमेन्टेशन-सबलिमिनल-मेन्टेशनशब्दाभ्यामुच्येते।

२२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शब्दः क्रमिकसूक्ष्मतामापद्यमानोऽलक्ष्यवद् भवति, तथैव ज्ञानमप्यलक्ष्यवज्जायते। एवं सूक्ष्मरूपेणावस्थानं संस्कारस्वरूपम्। अतिसूक्ष्मत्वाद् मूढानां संस्कारसाक्षात्कारो न भवति, स्थिरचित्तानां तु संस्कारज्ञानं पृथग् भवत्येवेति प्रयोगबलेन परीक्ष्यताम्।

यदि संस्कारस्य बोधो न भवति, तर्हि तत्सत्ता कथमभ्युपेयत इति चेदुच्यते—ज्ञानस्य संस्काररूपत्वविषये एकमुदाहरणं गृहाण। वृक्षदर्शनानन्तरं वृक्षापगमेऽपि नेत्रव्यापारावरोधं कृत्वाऽपि कश्चिद् वृक्षं चिन्तयितुं शक्नोति। यदि वृक्षदर्शनानन्तरं ज्ञातुरन्तःकरणे वृक्षज्ञानानुरूपः कश्चिद् भावो विधृतो नाभविष्यत्, तर्हि कथं सन्निकर्षं विनाऽपि तच्चिन्तने प्रभुरभविष्यदिति विचार्यम्। अत इदमभ्युपेयं यद् वृक्षज्ञानानुरूपः कश्चिद् भावः (वृक्षज्ञानसंस्कारः) विद्यते, यमाश्रित्य नरो वृक्षादर्शनेऽपि वृक्षं चिन्तयितुं समर्थो भवति। निर्विषयिणी चिन्ता न भवितुमर्हति, अतो विषयसन्निकर्षाभावेऽपि यमाश्रित्य चिन्ता प्रवर्तते स भावश्चित्त आहितस्तिष्ठतीति तर्कलाघवतः स्वीकार्यम्। अतः संस्कारसिद्धिः सुस्थैव।

संस्कारादेवाभ्यासपाटवं भवतीत्युक्तं प्राक्। संस्कारेणेन्द्रियशक्तावनुकूलः परिणामो भवतीत्येव तस्य कारणम्। बहुधा लेखनक्रियाकरणे सति लेखनक्रिया सहजा द्रुता च भवति, तस्य कारणं खलु लेखनक्रियासंस्कारः। तेनेन्द्रियशक्तिरनुकूलतया परिणामिता भवति। संस्कारहेतुकक्रियाप्राबल्यविषये इदमपि विज्ञेयं यद् विपरीतक्रियासंस्कारे संजाते सति परस्पराभिभवप्रकर्षोऽपि भवति। यथाऽऽलस्यसंस्कारेण व्यायामसंस्कारो बाधितो भवति यथाबलम्। यदि परस्परविरुद्धसंस्कारा न जायेरन् तर्हि परस्परबाधोऽपि न भवेत्। व्यायामाभ्याससंस्कारो मिथ्याभाषणसंस्कारश्च परस्परं पृथग्भूतौ, न तु परस्परं विरुद्धौ। अत एकेनापरस्याभिभवो न भवति। तदिदं ज्ञानसंस्कारविषये यथा सत्यम्, तथा क्रियासंस्कारविषयेऽपि। न चैतन्मन्तव्यं यन्नास्ति क्रियासंस्कार इति। कस्मात्? अन्तःकरणे ज्ञानादीनामिवाङ्गचालनादिक्रियाणामपि संस्कारो भवति, अन्यथा क्रियापाटवमेव न स्यात्। अतो ज्ञानसंस्कारक्रियासंस्कारौ भवेतामेव। विभागोऽयं प्राधान्यमूलक इति प्रागेवोक्तम्। इदमप्यत्रानुगन्तव्यं यद् यथेच्छापूर्विकायाश्चेष्टायाः संस्कारो भवति, तथैव प्राणनक्रियारूपाया अपरिदृष्टचेष्टाया अपि संस्कारो भवति। सुखदुःखानुभवयोरपि संस्कारो भवतीति सर्वलोकसिद्धं मतम्। यदि क्रियात्मकः संस्कारो नाभ्युपेयते, तर्हि 'अनुरूपा क्रिया वारान्तरे कथं सहजतरा भवति' इति प्रश्नस्योत्तरं न समीचीनं भवतीत्युक्तमेव।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतेनेदं सिध्यति यज्जीवचेष्टासु संस्कारस्यापि कारणताऽस्ति। प्रबलसंस्कारविरोधिनी चेष्टा नाशु फलवती भवति, फलवत्यपि न सम्पूर्णफला भवति। पक्षान्तरे संस्कारानुरूपा क्रिया सहजाऽऽशुफलप्रदा च भवतीति प्रत्यक्षसिद्धम्।

यथा विषयभेदेन संस्कारस्य भेदा भवन्ति, तथा फलभेदेनापि भेदा भवितुमर्हन्ति। अनया दृशा पूर्वसूरिभिः संस्कारस्य द्वौ भेदौ परिकल्पितौ—वासना-कर्माशयभेदात्। पारिभाषिकाविमौ द्वौ शब्दौ, अतस्तत्स्वरूपमधिकृत्य किमपि लघु विचार्यते।

येन संस्कारेण तदनुरूपायाः स्मृतेरेवोत्पत्तिर्भवति, स स्मृतिफलकः संस्कारो वासना-शब्देनेहोच्यते। जात्यायुर्भोगानुभवैरयमुत्पद्यते। यः खलु त्रिविपाकः संस्कारः स एव कर्माशयनाम्ना व्यवह्रियते। यः संस्कारोऽभिसंस्कृतकरणशक्तिस्वरूपः सन् चेष्टारूपमापद्य-मानः करणप्रकृतेः परिवर्तनं विदधाति, स 'त्रिविपाक' इत्युच्यते। पुनरपि दृष्टान्तादिभि-र्विषयोऽयं स्वच्छीक्रियते।

कर्मफलभोगेन यः संस्कारो जायते, येन तस्य स्मृतिरेवोपतिष्ठते, तस्य संस्कारस्य नाम 'वासना' इति। तां स्मृतिमाश्रित्य नवीनकर्मफलानामभिव्यक्तिः, कर्माणि च भवन्ति। वासनया पूर्वानुभूतसुखादीनां स्मरणमेव भवति, तथा नवीनं सुखरूपं फलं नोदेति, पूर्वसुख-स्मरणमेव तया भवति। तां सुखस्मृतिमनुरागेणाश्रित्य कर्माणि पुनः क्रियन्ते, ततश्च नूतनानि सुखरूपाणि कर्मफलानि प्रजायन्ते। एतेनेदं सिध्यति—वासनायाः फलं स्मृतिरेव, न खलु सा जात्यायुर्भोगरूपफलत्रयवती।

अथेह कर्माशयस्वरूपं विचार्यते—कर्मसंस्कारेणाभिसंस्कृता करणशक्तिरेव कर्माशय इति। यद्वा करणकृतानां कर्मणां ये संस्कारा भवन्ति ते करणशक्तावाहितास्तिष्ठन्ति। तेभ्यश्च पुनः कर्माणि भवन्ति। अतः संस्कारवती कर्मशक्तिरेव कर्माशय इति। अयं संपिण्डितावस्थायामेव विद्यते, ततश्च तदनुरूपा जात्यायुर्भोगाः प्रजायन्ते।

एकेन दृष्टान्तेन वासनादीनां स्वरूपमुद्घाट्यते। यथा—यदि जलं खलु कर्मशक्ति-रूपेण चिन्त्यते, तर्हि घटादिषु स्थापिते जले जलस्य घटाकारादिपरिणामो भवति। तत् कर्म-शक्तिदृष्टान्तभूतमिति चिन्तयितुं शक्यते। यैर्घटादिभिः पात्रैर्जलाकारपरिवर्तनं भवति, वासनास्थानभूतानि तानि। अन्यदप्युदाहरणं गृहाण—कर्मशक्तिर्यदि द्रवधातुरूपेणाभ्युपेयते, तर्हि वासना खलु मुद्रारूपा भविष्यति, याभिर्मुद्राभिर्द्रवधातोराकृतिपरिवर्तनं विधीयते। मुद्राहतानेकाऽऽकृतिमत्यो द्रवधातुमूर्तयः खलु कर्माशयभूताः। किञ्च, वासनया शारीरयन्त्रस्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रकृतिपरिवर्तनं भवति, कर्माशयात्मकसंस्कारेण च शरीरस्य निर्माणवर्धनपोषणादीनि भवन्ति। कर्माशयेन वासनोद्बुद्धा भवति, कर्माशयश्च पुनस्तां वासनामाश्रित्य फलवान् भवतीति कर्माशयवासनाचक्रमनिशमावर्तते। तदेतद् विस्तरेण कर्मतत्त्वनामके वङ्गभाषामये ग्रन्थे श्रीहरिहरानन्दारण्येन विवृतम्।

कर्माशयेन जात्यायुर्भोगसिद्धिर्भवति। अत्रेदं विवेक्तव्यं यज्जातिहेतुकः कर्माशयः खलु देहधारणक्रियाशक्तिभूतः संस्कार एव। आयुर्हेतुकः कर्माशयो नाम देहस्थितसामर्थ्यात्मकः संस्कारः। भोगहेतुः कर्माशयो देहेन्द्रियक्रियाभिर्याऽनुकूला वा प्रतिकूला वा वेदनोपजायते, तस्याः शक्तिभूतः संस्कारः। कर्माशयविषये पुष्कलो विचारो योगभाष्यटीकासु द्रष्टव्यः।

संस्कारेण सह कर्मफलस्य नेदिष्ठः संबन्धोऽस्ति। अतो विषयोऽयमत्र समासतो निरूप्यते। देहग्रहणं कर्माशयमनुसृत्य भवति, अतः शारीरे वैशिष्ट्ये शारीरवेदनायां च कर्माशयप्रभावो बहुलं वर्तते। नहि सुखदुःखात्मकं फलं प्रति संस्कारस्य कारणताऽपलपितुं शक्यते, यद्यपि सुखदुःखक्षेत्रे बाह्यपरिस्थितिरपि कियदंशेन कारणतां भजते। दृश्यते हि संस्कारबलेनावशः सन् जीवः कर्माणि निष्पादयति, सुखं दुःखं च भुङ्क्ते; तथैवाऽऽत्मबाह्येन हेतुनाऽपि जीवोऽस्वतन्त्रः सन् कर्म करोति। बाह्यकारणोद्भूतानि सुखादिफलानि सदैवाऽनियमितानि भवन्ति। नहि जीवशक्तिरेतेषां नियमने समर्था भवति।[1]

संस्कारविचारेण सह स्मृतिस्वरूपविचारोऽप्यावश्यकः। यदि वयं 'स्मृतिः खलु संस्कारस्य बोध्यतापरिणामः' इति कथयामस्तर्हि नैतत् कथनमसंगतं भवति।

अत्रेदं विज्ञेयम्—यतो हि सर्वेऽनुभूता विषयाः संस्काररूपमापद्यमानाश्चित्ते विद्यन्ते, अत उपलक्षणे प्राप्ते सति पूर्वाधिगतानां विषयाणां स्मरणं भवति। यदा च विस्मृतेः कारणं भवति, तदा न स्मरणं जायत इति प्रत्यक्षमेव। बहूनि खलु विस्मृतेः कारणानि सन्ति। यथा—(१) अस्फुटोऽनुभवः, (२) दीर्घः कालः, (३) अवस्थान्तरपरिणामः, (४) ज्ञानशक्तेरपाटवम्, (५) उपलक्षणाभाव इति च।

१- कथमनियमितानीमानि बाह्यकारणोद्भूतानि सुखादिफलानीति चेदुच्यते—जीवस्य यथा अन्तःस्थं मनोऽस्ति, तथा स्वबाह्यजडद्रव्यनिर्मितं शरीरमप्यस्ति। यथा शरीरं कथञ्चिद् मनोऽधीनं भवति, तथा मनोऽपि कथञ्चित् शरीरतन्त्रं भवति। ततश्च बाह्या परिस्थितिरपि शरीरमनःक्रियाविषये स्वप्रभावेन तिष्ठति। अतः सुखादिफललाभविषये यथा जीवगतं कारणमस्ति, तथा जगद्गतं कारणमपि भवति। जगन्न जीवतन्त्रम्, अतो बाह्यकारणोद्भूतसुखादीनि जीवप्रयत्नदृष्ट्या न नियमितानि। किञ्च, जीवेषु देहात्मबोधात् शारीराणि सुखदुःखानि मनोऽपि सक्रियं करोति। एभिः सुखादिभिः सह संस्कारगताचरणस्य संबन्धो न विद्यते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संस्कारतत्त्वम्

स्मृतिसंस्कारविषये भगवान् योगसूत्रकारो बभाषे—"जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात्" [४।९]। सूत्रार्थस्तु—"न हि दूरदेशे बहुपूर्वकालेऽनुभूतस्य विषयस्य स्मृतिस्तावता कालेनोत्तिष्ठति, किन्तु निमित्तयोगे तत्क्षणमेवाऽऽविर्भवति देशकालजातिव्यवधानेऽपि" इति। विषयेऽस्मिन् युक्तिरियमनुसन्धेया—"कर्माशयस्य यो विपाकरूपो वृत्तिलाभो (व्यक्तता वा), तेनैव स्मृतिसंस्कारौ व्यक्तौ भवतः। यद्वा कर्माशये उद्बुद्धे सति स्मृतिसंस्कारावभिव्यक्तौ भवतः। निमित्तनैमित्तिकभावानुच्छेदात् कर्माशयवासनयोरानन्तर्यं सिद्ध्यत्येव। अत्र कर्माशयो निमित्तम्, वासनास्मृतिर्नैमित्तिकम्, यद्वा वासना निमित्तं तत्स्मृतिर्नैमित्तिकम्। यतो हि कर्माशयेन सह तदनुरूपस्मृतिमूलकवासनाया निमित्तनैमित्तिकसंबन्धो विद्यते, यतोऽनयोरभिव्यक्तिरेकस्मिन् काले भवति, अत उभयोर्मध्ये नान्तरालेन भवितव्यमिति योगाचार्या मन्यन्ते।

अथात्र संस्कारविषयकाः केचन प्रश्नाः समाधीयन्ते। कश्चिदाह—"संस्कारशेषं चित्तमिति योगशास्त्रे प्रवादो विद्यते, प्रत्ययं परित्यज्य केवलाः संस्काराः कथं चित्ते स्थातुमुत्सहन्ते? कथं परिदृष्टभावं विहायापरिदृष्टानां भावानां सत्ता स्वीक्रियेत" इति। उच्यते—चित्तस्थैर्यबलेनेदं स्यादेव, न त्वर्वाग्दर्शिभिरिदं कर्तुं शक्यते। निरोधप्रयत्नबलेन यदा वशी संयमी विषयज्ञानरोधं सम्यक् करोति, तदा विषयग्रहीतृत्वभावोऽपि संरुद्धो भवति। यत्कालानन्तरं स निरोधो भग्नो भवति, येनेदमनुमीयते यन्निरोधकाले प्रत्ययोत्थापनसंस्काराश्चित्ते आसन्, यैर्व्युत्थानसंस्कारैर्निरोधभ्रंशो विहितः। अत एव निरोधकालिकं चित्तं संस्कारोपगं भवतीति योगशास्त्रे प्रसिद्धम्।

संस्कारहेतुना पूर्वजन्मसत्तानुमानं पूर्वसूरिभिः दर्शितम्। तदेतदत्र विचार्यते। संस्कारसाक्षात्कारेण पूर्वजन्मज्ञानं भवतीति योगाचार्या मन्यन्ते। संस्कारसाक्षात्कारः खलु संस्कारस्मृतिरेव। यदि कश्चित् संस्कारश्चित्तेऽस्ति, तस्य हेतुभूतः प्रत्ययोऽपि स्यादेव। यदि पुनस्तत्प्रत्ययोत्पादकं कर्मास्मिन् जन्मनि नानुष्ठितम्, तर्हि जन्मान्तरे तत्कर्म कृतमेवेत्यनुमीयते। ननु यदि संस्कारेण स्मृतिरुपजायते, तर्हि पूर्वजन्मज्ञानं कथं न चित्ते सततमुदितं भवेत्? उच्यते—यथा बाल्येऽनुष्ठितानां कर्मणां स्मृतिर्वार्द्धके न भवति, तथैव पूर्वजन्मस्मृतिरपि नोदेति। विस्मृतेर्बहूनि कारणानि भवन्ति—(१) जीवनस्य बहुकर्मव्यापारः, (२) अन्तःकरणस्यावस्थान्तरप्राप्तिः, (३) शरीरादीनां नवीनं रचनम्, (४) दीर्घकालव्यवधानं चेति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संस्कारालोचनप्रसङ्गे संस्कारच्छन्दोऽप्यालोचनीयः। भवति चात्र सूत्रम्—"व्युत्थान-निरोधसंस्कारयोरभिभवप्रादुर्भावौ..." [योगसूत्रे, ३। ६]। एतेन विरुद्धसंस्कारयोरभिभव-प्रादुर्भावौ भवत इति विज्ञायते। संस्कारादन्यस्य कीदृशं स्वरूपमित्यत्र प्रदर्श्यते—

चित्तं खलु निरोधव्युत्थानधर्मकमिति प्रसिद्धमेव। कदाचिद् व्युत्थानप्राबल्यम्, कदाचिच्चाभ्यासबलेन निरोधप्राबल्यं भवति। अनयोः संस्कारयोः क्रमिकवृद्धिरपि भवति, क्रमिकह्रासश्च। निरोधसंस्काराभिभवं कृत्वैव व्युत्थानसंस्कारो वृद्धिमाप्नोति। नेदं मन्तव्यं यदुभयोः समबलयोः स्वत एव वृद्धिह्रासौ भवतः। वस्तुतो व्युत्थानधर्मक्षयानुसारेण निरोधधर्मवृद्धिक्रमो भवतीति तत्त्वाभ्यासिनामनुभवः। निरोधव्युत्थानसंस्कारयोरयं छन्दश्चित्तपरिणामभूत एव, एतयोश्चित्तधर्मत्वात्। अयं संस्कारद्वन्द्वव्यापारोऽलक्षितरूपेण विद्यते, चित्तस्थैर्यबलेन तस्य ज्ञानं भवति।

नन्वयं व्युत्थाननिरोधद्वन्द्वः किं संस्कारसंबद्ध एव? किमत्र प्रत्ययानां किमपि कार्यं नास्तीति? किञ्च, किमर्थमयं संस्कारद्वन्द्वोऽपरिदृष्टपरिणाम इत्युच्यते? उच्यते—व्युत्थान-संस्कारेण व्युत्थानोत्पत्तिर्भवति, अतो यदा व्युत्थानं न जायते, तदेदमभ्युपेयं यद् व्युत्थान-संस्काराभिभवः संजातः। किञ्च, निरोधः खलु संस्कारशेषरूपः, स खलु प्रत्ययहीनोऽपि संस्कारात्मक एव। अतो व्युत्थाननिरोधयोरभिभवप्रादुर्भावौ संस्कारक्षेत्रे भवतः। अत एव पतञ्जलिना ३।६ सूत्रे संस्कारपदं प्रयुक्तम्। यतोऽयं द्वन्द्वः संस्कारसंबद्धः, अतोऽयमलक्ष्यः। अनुभूयते च यन्निरोधप्रयत्नसंस्कारो व्युत्थानसंस्कारमभिभूय वर्तते। अयमपि चित्तपरिणाम एव, यतो हि निरोधो नाम चित्तधर्मविशेषः। यद्यपि सम्यङ् निरोधावस्थायां कश्चिदपि परिणामो न सुलक्षितो भवति, तथापि तत्र परिणामो भवति; यतो हि निरोध-संस्कारो वृद्धिं प्राप्नोति भ्रंशमेति च। यत्र यत्र भ्रंशवृद्धी तत्र तत्र परिणाम इति निरपवादो नियमः।

संस्कारद्वन्द्वविषये इदमपि विज्ञेयं यद् यज्जातीयः संस्कारस्तज्जातीयस्य प्रत्ययस्य चेद् निरोधो भवति, तर्हि तज्जातीयसंस्कारनिरोधो भवतीति न सार्वभौमो नियमः। बाल्या-वस्थायां नैकप्रकाराः प्रत्यया निरुद्धास्तिष्ठन्ति, परन्तु तेषां संस्काराणां न नाशो भवति, ते तु शिशुमनसि विद्यन्त एव। दृश्यते हि तैरेवालक्ष्यसंस्कारैर्यौवनकाले तदनुरूपाणां प्रत्ययानां संभवः। उदाहरणान्तरमपि—रागवृत्तिकाले क्रोधवृत्तिर्निरुद्धा तिष्ठति, एतेनेदं न सिध्यति यद् रागकाले क्रोधसंस्कारोऽपि न विद्यते। एतेन—"संस्कारस्य निरोधः संस्कारेणैव

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भवति" इति योगशास्त्रीयं मतं सिद्धं भवति। यथा व्युत्थानसंस्कारस्य निरोधो निरोधसंस्कारैरेव कर्तुं शक्यते, क्रोधसंस्कारोऽक्रोधसंस्कारेणैवाभिभूतो भवति, न त्वक्रोधप्रत्ययेन।

यथा कश्चित् संस्कारः संस्कारविशेषस्याभिभवं कर्तुं समर्थो भवति, तथैव संस्कारप्रतिबन्धी संस्कारोऽपि भवतीति स्पष्टमेव। तथा च सूत्रम्—"तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी" [योगसू० १।५०]। समाधिप्रज्ञाजातसंस्कारेण व्युत्थानसंस्काराशयो न केवलमभिभूयते, प्रत्युत निवार्यते; अथवा समाधिसंस्कारो व्युत्थानसंस्कारस्य बाधको नाशकारको वा भवति।

अत्रायं संशय उदेति—ज्ञानवृत्तिरूपाणां प्रत्ययानामेव संस्कारो भवितुमर्हति। निरोधः खलु न कश्चित् प्रत्ययः। कथं तर्हि निरोधस्य संस्कारः स्यादिति? उच्यते—तत्रापि प्रत्ययेनैव संस्कारो भवति। तथा हि—निरोधात् पूर्वक्षणे प्रत्ययप्रवाहो विच्छिन्नो भवति, अतस्तत्र व्युत्थानप्रवाहविच्छिन्नतारूपः प्रत्ययो भवत्येव, तस्य प्रत्ययस्य च संस्कारापत्तिर्भवति। (अत्र व्युत्थानशब्देनैकाग्रावस्था लक्ष्यते, न तु विक्षिप्तावस्था)। अनेन संस्कारेण सह प्रत्ययोद्भवसंस्कारोऽपि भवति, अतो निरोधसंस्कारः पूर्वोक्तद्विप्रकारविशिष्टस्य प्रत्ययस्य संस्कारः। प्रथमः प्रत्ययनिरोधसंस्कारः, द्वितीयस्तु निरोधभङ्गरूपप्रत्ययसंस्कारः। स एव विच्छिन्नप्रत्ययोत्थानरूपः संस्कार इत्युच्यते। न खलु निरोधसंस्कारशब्देन निरुद्धावस्थासंस्कारो गृह्यते, प्रत्युत निरोधसीमाद्वयरूपाणां प्रत्ययलयोदयानां संस्कार एव निरोधसंस्कार इत्युच्यते। तथैव निरोधवृद्धिशब्देनैतत्सीमाद्वयव्यवधानवृद्धिरेव गृह्यते। इयं वृद्धिस्तेनैव वैराग्यबलक्रमेण भवति, येन प्रत्ययप्रवाहस्य भङ्गो भवतीत्येतदन्यत्।

संस्कारद्वन्द्वप्रसङ्गेन संस्कारनाशोऽपि वर्णितः। अत्र तत्स्वरूपं विचार्यते। विषयेऽस्मिन् योगशास्त्रे यदेवोक्तं तदिह समासतो वक्ष्यते। पञ्चधा खलु संस्कारनाशक्रम इत्याचार्यचरणाः। यथा—

(१) निवृत्तिधर्मेण प्रवृत्तिधर्मो क्षीणो भवति।

(२) तेन कर्माशयः क्षीणो जायते, वासना निष्प्रयोजना भवति।

(३) ततश्च क्लिष्टसंस्कारः क्षीणः प्रजायते। आदौ ते सूक्ष्मीभूता भवन्ति, ततश्च दग्धबीजकल्पाः।

(४) दग्धबीजकल्पाः संस्कारा अपि निरोधसंस्कारेण नष्टा भवन्ति।

(५) ततश्च निरोधसंस्कारस्यापि चित्तलये आत्यन्तिकं प्रहाणं भवति।

[कापिलाश्रमीयपातञ्जलयोगदर्शनम्]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संस्कारस्यात्यन्तिकनाशात् प्राग् संस्कारशेषरूपा चित्तावस्था प्रजायते। व्यासपादाः संस्कारशेषमधिकृत्य आहुः—"सर्ववृत्तिप्रत्यस्तमये संस्कारशेषो निरोधश्चित्तस्य समाधिरसंप्रज्ञातः" [योगभाष्ये, १।१८]। यदा संस्कारशेषं चित्तमुच्यते, तदा संस्कारशेषम्=संस्कारमात्रम्। निरोधो न खलु काचिद् ज्ञानवृत्तिः (प्रत्ययः), स तु ज्ञानवृत्तिविच्छेदानां संस्कार एव। अतो निरोधकालिकी चित्तावस्था संस्कारशेषपदेनाभिधीयते। निरोधकालेऽपि व्युत्थानसंस्कार उपसर्जनभावेन वर्तते, यतो हि ततः पश्चात् प्रत्ययानामुदयो भवति।

अयं निरोधः परवैराग्यबलेनैव भवितुमर्हति, नान्येन केनचिदुपायेन। परवैराग्यस्वरूपवर्णनमत्राऽप्रासङ्गिकम्, अतो नात्रोच्यते।

निबन्धेऽस्मिन्नाचार्यचरणानां श्रीहरिहरानन्दस्वामिपादानां वचांसि बहुत्र उद्धृतानि, समासविस्तरतश्च व्याख्यातानीति तेभ्यः परःसहस्रं नमः॥

———

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सत्यसिद्धिसम्प्रदायः

स्व० श्रीमामराजदत्तः काविज्ञः, वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी।

स्थविरवादाद् हीनयानसंज्ञकाद् बौद्धसम्प्रदायविशेषाद् महायानप्रादुर्भावो भारतीयदर्शनस्यातीव महत्त्वपूर्णा घटना वर्तते। किन्तु खलु शाक्यसिंहस्य तत्रभगवतो गौतमबुद्धस्य मूलोपदेशरहस्यमासीदिति विषयमादाय बौद्धेषु महान् विवादः संजातः। विषयमधिकृत्य बुद्धानुचराणां परस्परं विवदमानानां मतैक्याऽऽभावादेवानेकेषां सम्प्रदायानां समुद्भवो जातः। भारतीयदर्शनस्य वैदिकसम्प्रदायाऽऽचार्याणां ग्रन्थेषु प्रायो वैभाषिक-सौत्रान्तिक-योगाचार-माध्यमिकसंज्ञकानां मतानां विवेचनमेव दरीदृश्यते। किन्तु हीनयानमहायानयोरन्तरालेऽनेके सम्प्रदायविशेषा आसन्, येषामाचार्य्यैर्महायानस्य सुविशालदार्शनिकविचारधाराया मार्गः प्रशस्तीकृतः। सम्यक्संबुद्धस्तु यत्र यत्र गतवान्, तत्र तत्र तद्देशीयभाषामाध्यमेन स्वप्रवचनमुपदिष्टवान्। नहि तथागतस्य भाषाज्ञानविस्तृतिं वयं सौकर्य्येणानुमातुं प्रभवामः। परीक्षका अभिमन्यन्ते यत्तथागतेन द्वानवतिसंख्याकासु प्रादेशिकभाषासु लोकाः समुपदिष्टाः। अर्हतो जीवनकाले तदुपदेशानां संकलनं कथमपि भिक्षुवर्य्यैर्नाभिनिर्वर्तितमिति नूनमस्माकं महद् दौर्भाग्यम्।

भगवतो निर्वाणादेकविंशतिदिनानन्तरं[1] प्रथमा बौद्धसंगीतिः समायोजिता। परमप्रेष्ठस्य तथागतशिष्यस्य आनन्दनामधेयस्य आस्थविरत्वोपलब्धेर्मासचतुष्टयमपेक्षितं जातम्। अतोऽस्याः सुविशालमधिवेशनं मासचतुष्टयानन्तरमेव प्रारब्धम्। अस्याः संगीतेरध्यक्षो महाकाश्यप आसीत्। तथागतशिष्येण आनन्देन धम्मपिटकाख्यांशस्य पाठः कृतः। उपालिश्चान्यः स्थविरो विनयपिटकस्य पाठं कृतवान्। अयं पाठक्रमः पञ्चशतस्थविरज्येष्ठानां सत्यनिष्ठानां समक्षं जात इति लङ्कादेशीयबौद्धपरम्परया समायाति। हीनयानस्य व्याख्या यथा लङ्कादेशे समुपलभ्यते, तत्रत्यहीनयानस्थविरैर्यथा च सा संरक्षिता जाता, तां प्रमाणीकृत्यैव वयं धम्मपिटकविनयपिटकविषये यत्किञ्चिदपि वक्तुं शक्नुमः। अस्यां संगीतौ कोऽपि मतभेदो देशनाविषये नासीत्। अस्याः संगीतेः स्थानं राजगृहं संरक्षकश्च मगधाधिपोऽजातशत्रुरिति।

---

१. द्रष्टव्यम्—विनयपिटकस्य चुल्लवग्गे पञ्चशतिकाखन्धकनाम पुस्तकम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बुद्धनिर्वाणाच्छतवर्षानन्तरं द्वितीया बौद्धसङ्गीती रैवतसाभापत्ये उत्तरविहारस्थायां वैशाल्यां नियोजिता। तस्यां सप्तशतिकायां सप्तशतभिक्षुभिः पाठसंशोधनं समाचरितम्।[१] दशनियमानधिकृत्यात्र विशेषेण मतभेदो जातः। ये तु विनयविषयकदशनियमानां स्वच्छन्दां व्याख्यामुररीकर्तुमिच्छन्ति स्म, ते तु बहिष्कृताः संजाताः। ते महासांघिका इति व्यपदेशेन सुप्रथिता जाता। अवान्तरकाल इमे विरोधिमतानुशायिन एव महायानसम्प्रदायस्य प्रवर्त्तका जाताः। सत्यसिद्धिसम्प्रदायोऽपि महायानात् प्राक्कालिक एव सम्प्रदायविशेषः। वयमस्य विवेचनमग्रतोऽनुव्याख्यास्यामः। अत्रेदमवधेयं यद् वर्तमानोपलब्धे पालित्रिपिटिके राजगृहसंगीतिवैशालीसङ्गीतिद्वयस्वीकृतं गौतमबुद्धोपदेशरूपमेव सन्निवेशितमुपलभ्यते। "पालित्रिपिटके" इत्यनेनाऽस्माकं तात्पर्यं "पालिधार्मिकग्रन्थाः" इति ग्रन्थमालायां प्रकाशितं त्रिपिटिकसंस्करणम्। अस्याः संगीतेः सविस्तरं वर्णनं कथावत्थुसंज्ञके पालिग्रन्थे समुपलभ्यते।

बुद्धनिर्वाणात् षट्त्रिंशदुत्तरशतद्वयवर्षानन्तरं (२३६ वर्षाणि यावत्) मौर्यसम्राजोऽशोकस्य संरक्षकत्वे मौद्गलिपुत्रतिष्यस्य साभापत्ये पाटलिपुत्रे तृतीया बौद्धसंगीतिः सुनियोजिता। अस्या उद्देश्यम्, यथा पूर्वासां सङ्गीतीनाम्, इदमेवासीद् यद् विरोधिविप्रतिपत्तीनां निराकरणं जायेत, बुद्धदेशनायाः प्रामाणिकं रूपं च प्राकट्यं लभेतेति। मौद्गलिपुत्रेण 'कथावस्तु' विरचितमिति तु नूनमधुना निर्विवादं मन्यते बुधैः। अवान्तरकालेऽयं ग्रन्थोऽपि त्रिपिटकस्याङ्गमेव जातः।

चतुर्थी संगीतिर्हि खलु महाधिपतिकनिष्केन पुरुषपुरे (इदानीन्तने 'पेशावर' इत्यभिधेये पाकिस्तानस्थनगरे) सम्प्रवर्तिता। इयं हि खलु गौरवदृष्ट्या पूर्विकाः सर्वाः संगीतीरतिशेते। कनिष्कस्य गौरवं सर्वास्तिवादिनां कृते तादृश एव यादृशोऽशोकस्य मौर्य्यकुलशिरोमणेः स्थविरवादस्य कृते वर्तते। चतुर्थसंगीतेराध्यक्ष्यपदं वसुमित्रोऽलञ्चकार। सुप्रथितनामधेयो दार्शनिकमहाकविशिरोमणिरश्वघोषमहाभागोऽप्यस्या बौद्धसंगीतेः साफल्याय बहु प्रयत्नं चकार। अत्रेदं स्मरणीयं यदस्याः संगीतेरध्यक्षस्तु स्वयमेवैकः स्थविरवादिमूर्धन्य आसीत्।

पाटलिपुत्रान्निष्कासिताः सर्वास्तिवादिनो मथुरासमीपे स्वोत्कर्षं लब्धवन्तः। तदनन्तरं ते कश्मीरदेशे प्रविश्य तत्र सर्वास्तिवादिक्षेत्रं विशेषेण संवर्धयन्ति स्म। अस्यां

---

१. चुल्लवग्गे सप्तशतिकाख्यं पुस्तकं द्रष्टव्यम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सत्यसिद्धिसम्प्रदायः

संगीतावश्वघोषसहायेन वसुमित्रेण बौद्धाचार्य्येण "उपदेशशास्त्रम्, विनयविभाषाशास्त्रम्, अभिधर्म्मविभाषाशास्त्रम्" चेति टीकात्रयं विरचितम्। आचार्य्यवसुबन्धुविरचितम् अभिधर्मकोशनामकं पुस्तकम् अभिधर्मविभाषाशास्त्रमधिकृत्यैव विरचितमिति निश्चप्रचम्। विभाषां प्रमाणीकृत्य स्वमतख्यापनात् खलु वैभाषिकाः स्वसंज्ञां लेभिरे। किन्तु मथुरादेशीयसर्वास्तिवादिभ्यः स्वकीयं वैशिष्ट्यं ख्यापयितुं ते "मूलसर्वास्तिवादिनः" इति नामधेयेनात्मानं प्रकटीचक्रुः।

पञ्चमसंगीतिर्भारताद् बहिर्लङ्काधिपतिवट्टगामणिनरेशेन लङ्कादेशस्य मध्यप्रदेशे अलुविहारसंज्ञके सुनियोजिता। इयं घटना वैक्रमाब्दारम्भात् त्रिषष्टिवर्षपूर्वं घटिता। तदानीं यावत् स्मृतिपारम्पर्येण संरक्षितं त्रिपिटकोपदेशजालं सिंहलीवर्णमालायां लेखबद्धं जातम्। षष्ठी संगीतिर्मिण्डननरेशेन ब्रह्मदेशे (१९०६-१९२४ वैक्र०) सुनियोजिता। ७२९ स्फटिकखण्डेषु सर्वे त्रिपिटकोपदेशाः संरक्षिता जाता। माण्डलेस्थिते कुथोडामन्दिर एते स्फटिकखण्डाः संरक्षिता वर्तन्ते।

सुतरां तावत् सत्यसिद्धिनामा सम्प्रदायो महायानप्रादुर्भावात् प्राग् एकः सम्प्रदायविशेष आसीत्। अस्य सम्प्रदायस्य प्रवर्तको हरिवर्मा बौद्धाचार्य्य आसीत्। तेन विरचितं सत्यसिद्धिशास्त्रं खल्वस्य सम्प्रदायस्य प्रधानं पुस्तकम्। तदिदं पुस्तकं संस्कृतभाषायां कुत्राऽपि नोपलभ्यते। कुमारजीवकृतानुवादे चीनीभाषायामिदं शास्त्रं निखिलं समुपलभ्यते। श्रीयामकामीसौजेनमहाभागा अभिमन्यन्ते यदस्य मूलसंस्कृतरूपं तु प्रायोऽपूर्त्यम्। सत्यसिद्धिशास्त्राभिधानादस्य सम्प्रदायविशेषस्य याथार्थ्यमभ्युपेयम्। सत्यसिद्धिशास्त्रे वयं महायानसम्प्रदायानां पूर्वभूमिकां लभामहे। अस्मिन् शास्त्रे सर्वास्तिवादिनां पञ्चस्कन्धसिद्धान्तोऽपि प्रत्याख्यातः। तथा हि—

पञ्चस्कन्धानामेकैकस्य स्कन्धस्य वस्तुसत्त्वम्, येन पञ्चस्कन्धसंघातमयोऽयमात्मा विनिर्म्मितो भवति, नित्यं प्रतिभाति। परन्तु वस्तुत एकैकस्य स्कन्धस्य वस्तुसत्त्वं शून्यमेवाभ्युपगन्तव्यम्। यतो हि खल्वयं प्रतिपदं विश्लेषणार्हम्। आत्मा, स्कन्धानां वस्तुसत्त्वं च द्वयमेव शून्यतेति बोद्धव्यम्।[१] अत्र स्कन्धानां वस्तुसत्त्वमिति धर्म्माणां परमार्थसत्त्वमिति तात्पर्यम्। सर्वास्तिवादिमतानुसारं पुद्गलनैरात्म्यमेव प्रतिपाद्यते। नहि किञ्चन आत्मेति नाम वस्तु, तच्छून्यत्वात्। किन्तु स्कन्धानां तत्त्वं वस्तुरूपेण सद्भवति। हरिवर्म्मा साग्रहं प्रतिपा-

१. सिस्टम्स आफ बुद्धिस्टिक थॉट, बाई यामकामी सौजेन, पृ० १७२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दितवान् यत्तेषामपि शून्यत्वं भवतीति। यथाऽऽत्मनस्तथैव बाह्यजगतोऽपि शून्यत्वं भवतीत्यभ्युपेयम्।

स्पष्टमेवात्र महायानसिद्धान्तस्य नैरात्म्यद्वयरूपस्य विवेचनमाद्यमुपलभ्यते।

अन्यच्च, आचार्यहरिवर्म्ममहाभागाः स्वकीये शास्त्रे परमार्थसत्यसांवृतिकसत्ययोर्भेदमङ्गीकुर्वन्ति। अस्य सत्यद्वयस्य माहात्म्यं महायानसम्प्रदाये निरतिशयं वर्तत इति सुविदितमेव सर्वेषां प्रेक्षावताम्। हरिवर्म्मणो मतानुसारं धर्म्माणां स्कन्धादीनां यत्सत्त्वं सर्वास्तिवादिभिः प्रतिपाद्यते, तत्तु सांवृतिकं सत्त्वम्, न तु पारमार्थिकं सत्त्वम्; परमार्थतस्तु तेऽपि शून्या एव। नहि हरिवर्म्मा स्वतो महायानमतानुयायी आसीत्, किन्तु केषाञ्चन मते स एवंविधेन व्यपदेशेन निर्दिष्टो जातः। सौजेनमहाशया मन्यन्ते[१]—हरिवर्म्मा सर्वास्तिवाद्यभिमतनिर्वाणस्वरूपप्रत्याख्यानं साग्रहं कुर्वन्नपि बुद्धकायविषयेऽतीव सङ्कीर्णां विचारशैलीं सूचयति, यतो हि तन्मते ऐतिहासिकबुद्धस्वरूपाभिनिवेशोऽनुवर्तते। नहि स धर्मकायं बुद्धस्वरूपं महायानमतानुसारिणं व्याख्यातुं प्रभवतीति।

कालार्कभक्षितो बहुज्ञानराशिर्नूनं भृशं दुःखाकरोत्यस्माकं चेतांसि। एवंविधं सत्यसिद्धिसम्प्रदायस्याऽऽधारभूतमतिगौरवान्वितं सत्यसिद्धिशास्त्रमद्यावधि हन्त! अनुपलब्धमेव विद्यते। *नाप्यस्य ग्रन्थस्य चीनीभाषाया अनुवाद आङ्गलभाषायामपि खल्वानुपूर्व्या प्रकाशितः॥

---

१. तत्रैव, पृ० १७४

* प्रो० एन० अय्यास्वामिशास्त्रिणाऽस्य ग्रन्थस्य संस्कृतानुवादः प्रकाश्यते। द्रष्टव्यम्—इण्डियन हिस्टोरिकल क्वार्टर्ली, भा० २२, अ० २–३, पृ० ३१६—सम्पादकः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मानाधीना मेयसिद्धिर्मेयाधीना वा मानसिद्धिः

चक्षुषा घटं प्रमिणोति, चक्षुषा घटं पश्यति, घ्राणेन जिघ्रति, रसनया रसयतीत्यादि-प्रत्ययो हि सार्वजनीनः। तत्र 'चक्षुषा', 'घ्राणेन', 'रसनया' इत्यादौ हि तृतीया, कुठारेण छिनत्तीत्यादाविव करणत्वार्थिकेति मन्ये न विप्रतिपत्तिविषयतामर्हति सताम्। करणत्वं च साधकतमत्वम्। साधकत्वं च तद्घटकं खलु सिद्धिहेतुत्वम्। तथा च सिद्धिर्हि हेत्वधीना भवतीति व्रजति सुस्पष्टताम्। तथा च चक्षुरादिमानाधीना घटादिमेयसिद्धिरिति समवगम्यते सारल्येन। अत एव हि सांख्याचार्येण तत्रभवता श्रीमदीश्वरकृष्णेन प्रतिपादितं सांख्य-कारिकायाम्—

"प्रमेयसिद्धिः प्रमाणाद्धि" इति।

परन्तु आचार्यवर्येण हि भगवताऽक्षपादेन न्यायदर्शनस्य द्वितीयाध्यायप्रथमपादे प्रमाणपरीक्षावसरे—"न चतुष्ट्वमैतिह्यार्थापत्तिसंभवाभावप्रामाण्यात्" [२।२।१] इत्युपक्रम्य सामान्यतः, विशेषतोऽभावस्य प्रामाण्यं परीक्षयता हि प्रोक्तम्—"नाभावप्रामाण्यं प्रमेयासिद्धेः" [२।२।७] इति। स्वतन्त्रतया प्रमेयस्य, अर्थादभावप्रमाणवेद्यस्य कस्यचन वस्तुनोऽभावात् किमर्थं प्रमाणता मान्या स्यादभावे? अतोऽभावस्य प्रमाणता न मान्येति तदर्थः। एतदुत्तरतया च पुनरुच्यते महर्षिणा तेनैव—"लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धिः" [२।२।८] इति। लक्षितेषु, अर्थात् रञ्जितेषु बहुषु पटेषु मध्ये निविष्टानाम् अलक्षितानां पटानामलक्षणेन, अर्थाल्लक्षणाभावेनैव लक्षितत्वाद् ज्ञातत्वात्, तत्प्रमेयसिद्धेरभावस्यापि प्रमाणतया विप्रतिपन्नस्य प्रमेयसिद्धेः प्रमातव्यसिद्धेरिति तदर्थः। यत्र हि सन्ति बहवः पटाः, येषु हि बहवो रक्तपीतादिरागरञ्जिताः, केचन च रञ्जकैर्हि कुसुम्भहरिद्रादिभिरस्पृष्टतया अरञ्जिताः। तत्र ह्यरञ्जितान् पटानानयेति कस्मिंश्चित् केनचित्स्पष्टमुपदिष्टे, उपदिष्टेन हि जनेनारञ्जिता एव पटाः समानीयन्त इति प्रत्यक्षसिद्धम्। तेन हि जनेन ते हि पटा रागाभावेनैव ग्राह्यतया निश्चीयन्ते। सति चैवं ग्राह्यपटज्ञापकतया रागाभावस्यापि तत्र प्रमाणता समभ्युपगम्यैव, ज्ञापकस्यैव प्रामाण्यादित्येतदुत्तरसूत्रभावार्थः। आभ्यां हि पूर्वोत्तरसूत्राभ्यां सुस्पष्टमवगम्यते यद् मेयाधीना हि मानसिद्धिर्भवतीति। अन्यथाऽभावस्य प्रमेयमेव किञ्चिन्नेति कथन-मनर्थकमेव स्यात्। किञ्च, सांख्यतत्त्वकौमुद्यां हि—"प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमान-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मांख्यातम् । तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु ॥'' इति कारिकाया व्याख्यावसरे प्रत्यक्षा-नुमानागमातिरिक्तप्रमाणनिराकरणप्रसङ्गेऽभावभूताया अनुपलब्धेरन्यैर्बहुभिर्दार्शनिकैः प्रमाण-त्वेनाभ्युपगतायाः सांख्यशास्त्रेऽपि कुतो न प्रामाण्याभ्युपगम इति जिज्ञासायामुक्तम्—"नास्ति प्रत्यक्षानवरुद्धो विषयः, यत्राभावाह्वयं प्रमाणमभ्युपेयम्'' इति । न हि भूतलस्य परिणामविशे-षात् कैवल्यलक्षणादन्यः कश्चन पदार्थो ननु घटाद्यभावः । प्रतिक्षणपरिणामिनो हि सर्वे भावाः, ऋते चितिशक्तेरिति सिद्धान्तात् । भूतलात्मकं च कैवल्यं चक्षुस्त्वग्भ्यामेव हि प्रमाणाभ्यामव-गम्यत इत्यनुपलब्धिग्राह्यस्य स्वतन्त्रस्य कस्यचन प्रमेयस्याभावात्, किमर्थमनुपलब्धेः स्वीक-रणीया प्रमाणता ? अतो नानुपलब्धिर्न प्रमाणमिति तदाशयः । एतेनापि स्पष्टमुपगम्यते यन्मेयाधीना मानसिद्धिरिति ।

अपरं च—प्रमाणभूतानि हीन्द्रियाणि, अतीन्द्रियाणि । अतो ध्रुवं तद्गृहीतेन रूपा-दिना विषयेणानुमेयानि भवन्ति तानि । तथा च पर्वतो वह्निमान् धूमादिति स्थले धूमस्य वह्निज्ञापकत्वमिव मेयस्य रूपादेरिन्द्रियज्ञापकत्वमप्यभ्युपेयमेव । ज्ञापकमेव हि वस्तु प्रोच्यते कैरपि मानप्रमाणादिशब्देन । तथा सति मेयाधीना मानसिद्धिः सुस्पष्टैव, इन्द्रियाणां मान-त्वाद्, रूपादीनां च मेयत्वात् । अपि च, माकरणं हि मानम् । तत्र मा च "मितिः सम्यक्-परिच्छित्तिः'' इत्युदयनवचनात् सम्यग् ज्ञानमेव । ज्ञाने सम्यग्त्वं च तद्वति तत्प्रकारकत्वं वा भवतु, स्वव्यधिकरणप्रकारावच्छिन्ना या या विषयता तदनिरूपकत्वमेव वा भवतु, "प्रमाणतो ऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्'' इति भगवद्वात्स्यायनवचनादर्थाव्यभिचारो वा भवतु, सर्वथा विषयविशेषनिबन्धनमेव । माया विषयभूतो हि मेय इति मेयाधीना हि मा । तत्करणतया हि किञ्चिदपि वस्तु मानशब्देन शक्यं वक्तुमिति भवति मेयाधीना मान-सिद्धिः । माऽपरपर्यायस्य ज्ञानस्य निर्विषयत्वाभावेनापि युक्तमिदं प्रतिभाति । यथोक्त-माचार्येणोदयनेन—

"अर्थेनैव विशेषो हि निराकारतया धियाम्'' इति ।

विषयात्मकार्थकृतं विशेषमाप्ताया ज्ञानापरपर्यायाया मायाः करणतयैव हि यदि किञ्चिदपि वस्तु मानमिति ज्ञायते, तर्हि कथं नापतति मेयाधीना मानसिद्धिरिति । प्रकृताया हि सिद्धेरुत्पत्तित्वपक्षे तु "नहि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति'' इत्यभियुक्तोक्त्या मेयाधीनैव मानसिद्धिरायाति सर्वथा । इदानीन्तना हि प्राणिविद्याविदः कथयन्ति यद् गभीरे विततघनान्धकारे समुद्रगर्ते वसतां प्राणिनां नोपलभ्यते चक्षुः । युक्तं चैतत्, जगति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रूपं नाभविष्यच्चेत् किमकरिष्यत्कोऽपि चक्षुषा ? इत्यस्मिन्पक्षेऽपि मेयाधीना मानसिद्धिरेवापतति ।

यदि कश्चिदत्र ब्रूयात्—अस्तु मानाधीना मेयसिद्धिः, मेयाधीना च मानसिद्धिरित्युभयमेवेति । तदपि न शक्यं वक्तुम्, अन्योन्याश्रयापत्तेः । अतः किमत्र तत्त्वमिति चेत्, अत्रोच्यते—मानाधीना मेयसिद्धिरित्येव तत्त्वम् । सिद्धिर्हि प्रतीतिः, न तूत्पत्तिः । मानमेयभावश्च न व्यवस्थितः । न खलु मेयं न गच्छति मानताम्, मानं वा न व्रजति मेयतामिति । अत एवाह भगवानक्षपादः—"प्रमेयता च तुलाप्रामाण्यवत्" [२।१।१६] इति । या हि तुला कस्यचिद्वस्तुनस्तोलनाद् ज्ञापकतया व्रजति मानताम्, सैव हि यदि तुलान्तरेण व्रजति तोलनीयतां, तदा तुलान्तरं प्रमाणीकृत्य गच्छति मेयताम्; तद्वदेवान्यत्रापि प्रमाणप्रमेयभावोऽव्यवस्थित एव बोध्य इति सूत्रार्थः । तथा सति यदा मेयभूतेन वस्तुना मानभूतं वस्तु ज्ञाप्यते, तदा ज्ञापकत्वादर्थात् प्रकाशकत्वाद् मेयं मानतां व्रजति, मानं च मेयतामिति । फलतो मानादेव मेयसिद्धिर्जाता न मेयान्मानसिद्धिरिति ।

"नाभावप्रामाण्यं प्रमेयासिद्धेः" इत्यनेन हि सूत्रेणाभावप्रामाण्याभ्युपगमस्य निष्प्रयोजनता शङ्किता । "लक्षितेष्वलक्षण..."त्यादिसूत्रे चाभावप्रामाण्याभ्युपगमप्रयोजनमात्रं दर्शितम् । न तूपादेयालक्षितपटद्रव्यं मानीकृत्य लक्षणाभावात्मकमानसिद्धिरुक्ता । "नास्ति प्रत्यक्षानवरुद्धो विषयो यत्राभावाह्वयं प्रमाणमभ्युपेयम्" इति तत्त्वकौमुद्यापि ह्यनुपलब्धेः प्रामाण्याभ्युपगस्य निष्प्रयोजनत्वमेव दर्शितम्, न तु मेयस्य तत्तादशायां ज्ञापकत्वरूपं मानत्वम्, मानस्य च तत्तादशायां ज्ञाप्यत्वरूपं मेयत्वमिति ।

या च 'अपरं च' इत्यादिनेन्द्रियानुमानचर्चा, तयापि न मेयाधीना मानसिद्धिरिति सिद्ध्यति । यतो हि न रूपेण चक्षुषः सिद्धिः, अपि तु रूपप्रमित्या । अत एवाह वाचस्पतिस्तत्त्वकौमुद्याम्—"रूपादिविज्ञानानां क्रियात्वेन करणवत्त्वमनुमीयते" इति । सत्कार्यविचारावसरेऽपि च तेनोक्तम्—"न च पटरूपेण कारणानां संबन्धः, तद्रूपस्याक्रियात्वात्, क्रियासंबन्धित्वाच्च कारकाणाम्" इति । तथा च मित्या हि मानासिद्धिः, न तु मेयेन । अतो न मेयाधीना मानसिद्धिः ।

यच्च 'अपि च' इत्यादिना "मितिः सम्यक्परिच्छित्तिः", "प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्", "अर्थेनैव विशेषो हि निराकारतया धियाम्" इत्यादिवचनजातमुपन्यस्य प्रमेयात्मकविषयाधीनायाः प्रमायाः करणतया मानस्य मेयाधीना मानसिद्धिरिति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रोक्तम्, तदपि न मनोरमम्। यतो हि—तद्वति तत्प्रकारकत्वं वा, स्वव्यधिकरणप्रकारावच्छिन्ना या या विषयता तदनिरूपकत्वं वा, अर्थाव्यभिचारी वा माया मात्वम्। तदधीनं भवति माने मानत्वम्। अतः परम्परयाप्यर्थात्मकमेयाधीनत्वं मानत्वस्य भवति, न तु मानस्य। न खलु मामात्वयोर्मानमानत्वयोश्च तादात्म्यम्, धर्मधर्मिणोर्भेदस्यान्ततो व्यावहारिकस्य व्यवहारवैचित्र्यानुपपत्तिभयेन सर्वैरुपेयत्वात्। सिद्धिर्हि प्रतीतिर्न तूत्पत्तिः। अतो न प्राक्विद्याविदामन्वेषकाणामिदानीन्तनानामपि कथनविरोध इति मानाधीना मेयसिद्धिरेव, न तु मेयाधीना मानसिद्धिरिति।

अयं हि विचारो मानशब्दस्य माकरणार्थकत्वमभ्युपगम्य विहितः।

अथेदानीं मितिर्मानं ज्ञानमिति मानशब्दस्य भावार्थकतामादाय तदधीनसिद्धिरित्यस्य चापेक्षामात्रार्थकतामभ्युपगम्य सुगभीरं चिन्त्यते। मानमेयौ हि ज्ञानतद्विषयौ। उभावप्येतौ सर्वेषां प्राणिनां व्यवहारायापेक्षितौ। तत्र द्वयोरेतयोर्मध्ये किमधीना किं सिद्धिरिति हि प्रकृतो विषयः। प्राच्येषु पाश्चात्त्येष्वपि च दार्शनिकेषु दृश्यते गृहकलहो विषयेऽस्मिन्।

प्राच्येषु दार्शनिकेषु मध्ये प्रथमं दृश्यताम्। योगाचारसम्प्रदायिनो हि बौद्धाः—"सहोपलम्भनियमादभेदो नीलतद्धियोः" इत्यादियुक्तिं प्रदर्शयन्तो विषयाणां हि बाह्यानां सर्वेषामान्तरस्य क्षणिकस्य तत्त्वभूतस्य विज्ञानस्याकारमात्रतां वदन्तः फेनस्य हि जलाकारविशेषमात्रस्य जलाधीनतामिव विषयाणां हि समारोपितबाह्यत्वानां मानाधीनतां वदन्ति। "नित्यं विज्ञानमानन्दं ब्रह्म", "सत्यं ज्ञानमनन्तं ब्रह्म", "नेह नानास्ति किञ्चन" इत्यादिश्रुतिगवीः पुरस्कृत्य चलन्तो हि ब्रह्माद्वैतवेदान्तिनोऽपि—"सति कुड्ये चित्रम्" इति न्यायेन शून्यत्वात् सुपरिरक्षितं ब्रह्मैव सत्, स्वप्रकाशतया विषयिमात्रभूतम्; विषयाश्च तत्र रज्जुसर्पादिन्यायेन समारोपिता एवेति वदन्तो मानाधीना मेयसिद्धिरित्येव वदन्ति।

किन्तु भूतचैतनिका हि चार्वाका अन्नानां मादकतामिव चेतनामपि भौतिकीमेव मन्यमाना विषयिण्या हि चेतनाया विषयाधीनतामेव स्वीकुर्वन्तो मेयाधीनैव मानसिद्धिरिति वदन्ति। ईश्वरकृष्णानुयायिनोऽपि च सांख्यसिद्धान्तिनः—"धर्मो ज्ञानं विराग ऐश्वर्यम्। सात्त्विकमेतद्रूपम्" इति कारिकानुसारमात्मभिन्नस्य हि व्यावहारिकस्यान्तःकरणवृत्तिरूपस्य ज्ञानस्य विषयात्मिकायाः परिणामिन्याः प्रकृतेरेव परिणामतां वदन्तो मेयाधीनमानसिद्धिपक्षपातिन एव समवलोक्यन्ते। अत एव योगिनोऽप्येतदनुयायिन एव। यद्यपि वेदान्तसिद्धान्तेऽपि वृत्याख्यस्य ज्ञानस्य विषयभूतमायापरिणामत्वमस्त्येव, तथापि तत्र वृत्तौ ज्ञानत्वस्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ह्यौपचारिकतयाऽऽत्मन्येव हि च तस्य मुख्यतयाऽऽत्मनश्च स्वप्रकाशतायाः स्वे महिम्नि प्रतिष्ठिततया च न सा सिद्धिर्मेयाधीनतामाप्नोति।

पाश्चात्या अपि हि द्वन्द्वात्मकभौतिकप्रधानवादिनो विषयतया मेयस्यैव देहस्यांशभूततया मेयमेव हि यज्ज्ञानतन्त्वपरपर्यायं मस्तिष्कं तस्य चलनात्मको विकास एव ज्ञानमिति वदन्तो मेयाधीनमानसिद्धिपक्षपातिन एव समवलोक्यन्ते।

तथा च, सत्यामेवं विप्रतिपत्तौ किमत्र तत्त्वमिति जिज्ञासायामुच्यते—अपेक्षा हि भवत्य-भिव्यक्त्युत्पत्त्योरन्यतरस्मिन् वा स्थितौ वा ज्ञप्तौ वा। तासु विषयविषयिणोर्हि मेयमानयोर्न प्रथमा द्वितीया वा संभविनी, 'अयं घटः' इत्यादिज्ञानस्थले ज्ञानघटयोर्मध्ये ज्ञानाद्घटस्य घटाज्ज्ञानस्याभिव्यक्त्युत्पत्त्योरभावात्। घटं विनापि च ज्ञानस्यान्यविषयकस्याऽऽत्मन्यन्तः-करणे वा, ज्ञानं विनापि च घटस्य भूजलादाववस्थितत्वात्। ज्ञप्तौ तु भवति मानमेययोः परस्परापेक्षा। यतो हि ज्ञानमित्युक्तौ भवति श्रोतॄणां 'कस्य' इति विषयाकाङ्क्षा, या हि घटस्येत्युक्तौ निवर्तते। एवं घटस्येत्युक्तौ भवति सर्वेषां किमिति क्रियाकाङ्क्षा, या हि ज्ञान-मित्युक्तौ निवर्तते। घटस्य ज्ञानमित्युक्तौ च न विषयभूतकर्माकाङ्क्षा, नापि क्रियात्मकविषया-काङ्क्षा। अत एव हि तार्किकैरक्षपादीयैर्मानमेययोर्विषयिविषयभावः संबन्धोऽभ्युपेयते। स्वीक्रियते च विषयित्वविषयत्वयोः परस्परं निरूप्यनिरूपकभावस्तार्किकैर्नव्यैः। अत एव हि—"विषयनिरूप्यं हि ज्ञानमिति ज्ञानवित्तिवेद्यो विषयः" इत्याद्यभियुक्तोक्तिः। अतो मानमेयोभयाधीना तावदुभयसिद्धिः। न चान्योन्याश्रयः, ज्ञप्तिवैचित्र्यात्। प्रामाणिक्या बीजाङ्कुरानवस्थाया इव प्रामाणिकस्य तस्य सह्यत्वसंभवाच्च। विषयाणां विज्ञानाकारता त्वेकस्मिन्नर्तकीभ्रूलताभङ्गे बहूनां प्रतिसंधानाभावापत्त्या बाधिता। समसत्ताकयोरेव विषय-विषयिणोः प्रकृतविचारविषयतया नित्यविज्ञानचर्चापि व्यर्थैव। चार्वाकमतमेकशरीरगत-चेतनबहुत्वनिमित्तकवैमत्यापत्तिनिरस्तम्। आधुनिकद्वन्द्वात्मकप्रधानवादिमतं तु प्रदर्शित-मस्तिष्कनिकटवर्तिनीव दूरवर्तिनि शरीरप्रदेशे बाह्यवस्तुसम्पर्कज्ञानतारतम्याभावनिरस्तम्। सत्यपि सर्वत्र व्याप्ते नाडीजाले साक्षात्परम्परासंसर्गकृतविशेषस्यौचित्याद् ज्ञानगतस्येति॥

श्रीआनन्दझा न्यायाचार्यः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(२)

"मानाधीना मेयसिद्धिः, मेयाधीना मानसिद्धिर्वा" इति विप्रतिपत्तिः। तत्र मानाधीना मेयसिद्धिरिति तत्त्वविदां विमर्शः। तथा हि—इह खलु विश्वस्मिन्नपि विश्वे प्रतिपिपादयिषितोऽर्थः प्रमाणेनैव प्रतिपादितश्चेद् भवति प्रेक्षावतामुपादेयः, प्रमाणमन्तरा प्रतिपादितं तु नहि कश्चित्तमर्थमुपादत्ते विपश्चित्। न वाऽप्रामाणिकं तं श्रद्धातुं कश्चित् पारयति। नापि तं कश्चिद् विश्वसितुमीष्टे कदाचित्। नो वा कश्चित्तत्र प्रवर्तते। प्रवर्तमानो वा कथञ्चित् नो सफलो भवत्येव। न वाऽधुनातनः प्राक्तनो वा कश्चिद् बुधजनः प्रमाणमन्तरा वास्तविकं किमपि वस्तुतत्त्वस्वरूपं यथायथं प्रतिपादयितुं समर्थः कथञ्चित्, क्वापि समर्थो वा न तावतैव प्रेक्षावतां श्रद्धेयो भवत्येवेति सर्वथाऽप्रामाणिकोऽर्थः समुपेक्ष्य एव भवति विपश्चितामिति न कथन्तालेशोऽप्यत्र समुल्लसति। किं बहुना, "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति नयेनाकीटब्रह्मस्तम्भपर्यन्तं यदा खलु न केषामप्युच्चावचानां तिरश्चामपि देहिनां प्रयोजनमन्तरेण क्वचिदपि प्रवृत्तिर्भवति, तदा किमुत वक्तव्यं सचेतसामिति न विदुषामविदितमेतत्। तद्धि परमं जीवनस्य प्रयोजनमैहिकं भवत्वापातरमणीयमामुष्मिकं वा किमपि परमपुरुषार्थभूतं, निरपायं निरतिशयं च सुखमात्यन्तिकदुःखोच्छेदो वा, परमिह तदपि प्रमाणं विना याथातथ्यतो नाधिगन्तुं पार्यते, पार्येत वा। नैव वा तद्दते—जानाति, इच्छति, यतत इति लोकशास्त्रमर्यादामुल्लङ्घ्य कश्चिदपि वस्तुतत्त्वमजानानोऽसमीहमानो वा क्वचिदपि प्रवर्तते। तथा च प्रमाणमन्तरा सकलसंसारव्यवहारोच्छेदापत्त्या प्रमाणादेव सकलव्यवहारनिर्वाहकात् प्रमेयस्य ज्ञप्तिर्न तु प्रमेयात् प्रमाणस्य ज्ञप्तिरिति मानाधीनैव मेयसिद्धिः, न तु मेयाधीना मानसिद्धिरिति।

तथा च प्रमाणं हि न किञ्चिद् वस्तु समुत्पादयति, अपि तु पूर्वसिद्धमेव वस्तुजातं केवलमिदमीदृशमित्येवं ज्ञापयति। तादृशं हि प्रमाणेन ज्ञापितं वस्तु प्रमाणसाध्यमित्युच्यते। यद्धि प्रमाणसाध्यं तदेव प्रमेयमिति निगद्यते। एवं च सिद्धिरित्यस्य ज्ञप्तिरित्येवार्थोऽत्र बोध्यो विद्वद्भिः। तच्च प्रमेयं चेतनाचेतनभेदेन द्विविधमिति त्वन्यदेतत्। तथा च प्रमाणापेक्षयैव वस्तु प्रमेयत्वमुपलभत इति सिद्धम्। दृष्टं चैतल्लोकेऽपि प्रदीपादिना पूर्वसिद्धो घटपटादिर्ज्ञाप्यत एव, न तूत्पाद्यतेऽपि। परमिह दीपादिमन्तरा पूर्वसिद्धस्यापि घटादेर्यथा स्वरूपप्रतिपत्तिर्न भवति, तथैव पूर्वसिद्धस्य पश्चाद्भाविनो वा प्रमेयजातस्य प्रमाणं विना न स्वरूपप्रतिपत्तिर्भवितुमर्हति कस्यापि प्रमातुरिति सिद्धान्तः। अत एव पदवाक्यप्रमाणप्रमेयप्रतिपादकेषु व्याकृतिमीमांसान्यायसांख्यवेदान्तशास्त्रेषु प्रधानतया प्रमेयप्रतिपादक-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मानाधीना मेयसिद्धिः

सांख्यप्रवर्तकेनापीश्वरकृष्णेन सांख्यकारिकायाम्—"प्रमेयसिद्धिः प्रमाणाद्धि" [४] इत्युक्तम्। इतरथा मेयाधीनमानसिद्धौ तदसङ्गत्यापत्तिः। अत एव न्यायभाष्यारम्भे—"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्" [१।१।१] इत्युपक्रम्य प्रमाण-प्रमेय-प्रमातृ-प्रमितिरूपेष्वर्थतत्त्वेषु प्रमाणस्यैव प्राधान्यं प्रतिपादितम्। उक्तं च तत्रैव—"प्रमाणे चार्थवति प्रमेयं प्रमाता प्रमितिरित्यर्थवन्ति भवन्ति" इति। अयमाशयस्तस्य—प्रमातुः प्रथमं प्रमाणेन पदार्थप्रमितिरुत्पद्यते, ततः प्रवृत्तिः, ततः फलोपलब्धिरिति क्रमः। तत्र प्रमाणेनार्थं प्रमायेष्टं चेदभीप्सति, अनिष्टं चेज्जिहासति। तादृशाभीप्सया जिहासया वा प्रयोजितः सन् प्रवर्तमानः पुरुषस्तमर्थमभीप्सन् वा जिहासन् वा इष्टं चेदाप्नोति, अनिष्टं चेज्जहाति। एवं च प्रमाणेनैव पदार्थप्रतिपत्त्या प्रवृत्तेरपि साफल्यं भवतीति पर्यवसितम्।

ननु प्रमाणतोऽर्थप्रतिपत्तौ सत्यां प्रवृत्तिसाफल्यम्, प्रवृत्तिसाफल्याच्च प्रमाणतोऽर्थप्रतिपत्तिरिति परस्परापेक्षित्वादुभयासिद्धिः। तथा हि—यदि तावत् पूर्वं प्रमाणतोऽर्थप्रतिपत्तिस्तर्हि प्रवृत्तिसाफल्यमन्तरेण कथं तथा प्रतिपद्यते? कथं वा पूर्वं प्रवृत्तिसाफल्यमनवधार्यार्थे प्रवर्तते? तस्मात् प्रवृत्तेः प्रमाणतोऽर्थप्रतिपत्तेश्च पूर्वापरीभावो नोपपद्यत इति चेन्मैवम्, बीजाङ्कुरवदस्य व्यवहारस्यानादितया प्रामाणिकत्वेन दोषाभावात्। अनादिरयं संसारः। आदिमति च संसार एव दोषः स्यात् किं पूर्वं प्रमाणतोऽर्थप्रतिपत्तिराहोस्वित् प्रवृत्तिसामर्थ्यमिति। संसारव्यवहारोऽयं दृश्यते—यथा लोकः खलु प्रवर्तमानश्चक्षुरादिनाऽर्थमवधार्य प्रवर्तते, स च तथा प्रवर्तमानः फलमश्नुते; तथा सर्वः प्रमाता प्रमाणेनार्थमवधार्य प्रवर्तमानः फलमुपलभते। तत्रेदं तत्त्वम्—किं प्रमाणतोऽर्थप्रतिपत्तिः समर्था? उताहो प्रवृत्तिरिति कथन्तायामुभयं समर्थम्, तन्नान्तरीयकत्वादिति बोध्यम्।

अथ "सति कुड्ये चित्रम्" इतिरीत्या प्रमाणप्रवृत्त्यर्थं पूर्वं प्रमेयस्य स्थितिरावश्यकी, तथा च तुल्ययुक्त्या प्रमेयाधीनैव प्रमाणव्यवस्था समायाता। किञ्च, प्रमाणापेक्षया पूर्वं प्रमेयसिद्धावेव प्रत्यक्षस्येन्द्रियार्थसन्निकर्षोत्पन्नत्वं संभवति, न तु प्रमेयापेक्षया पूर्वं प्रमाणसिद्धौ। प्रत्यक्षोत्पत्तिकालेऽसता प्रमेयेणेन्द्रियार्थसन्निकर्षासंभवादिति प्रमाणप्रमेययोः पूर्वापरभावानुपपत्तिः, प्रमेयापेक्षया यदि पश्चात् प्रमाणसिद्धिस्तदा प्रत्यक्षस्य प्रमेयेन्द्रियसन्निकर्षोत्पन्नत्वसंभवेऽपि प्रमाणापेक्षया पूर्वमेव मेयसिद्धेः "मानाधीना मेयसिद्धिः" इति नोपपद्यत इति सेयमुभयतः पाशारज्जुः। अपि च, प्रमाणप्रमेययोः सहभावोऽपि नोपपद्यते। यदि प्रमाणं च प्रमेयं च युगपद् भवतस्तर्हि गन्धादिष्विन्द्रियार्थेषु ज्ञानानां प्रत्यर्थनियतत्वस्य वक्तुमशक्यतया क्रमवृत्तित्वाभावापत्तिरिति चेदत्रोच्यते-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उपलब्धिहेतुभूतस्य प्रमाणस्योपलब्धिविषयस्य प्रमेयस्य च निम्नदृष्टान्तेन पूर्वापरसहभावनियमादर्शनेनोक्तदोषाभावात्। तथा हि—क्वचिदुपलब्धिहेतुः पूर्वं पश्चाच्चोपलब्धिविषयः, यथोत्पद्यमानानां पदार्थानां पूर्वं सूर्यप्रकाशः। क्वचिच्च पूर्वमुपलब्धिविषयः पश्चादुपलब्धिहेतुः, यथा पूर्वसिद्धानां घटपटादीनां प्रदीपः। क्वचित्तूपलब्धिहेतुरुपलब्धिविषयश्च सह भवतः, यथा धूमेनाग्नेर्ग्रहणम्। अनेन दृष्टान्तेन मानाधीनमेयसिद्धौ नोक्तानुपपत्तयः। प्रमाणापेक्षया पूर्वसिद्धस्य घटादिप्रमेयस्वरूपस्य प्रमाणानधीनत्वेऽपि प्रमाविषयत्वरूपप्रमेयत्वस्य प्रमाणाधीनत्वेनैवोपपन्नत्वात्। न ह्यसौ घटपटादिः प्रमाणप्रवृत्तिमन्तरा जात्वपि प्रमेयत्वमुपलब्धुमर्हो भवति। किञ्च, उपलब्धिमकार्षीत्, उपलब्धिं करोति, उपलब्धिं करिष्यतीत्युपलब्धिहेतुसमाख्यायास्त्रैकाल्ययोगात्। अनेन प्रमितोऽर्थः प्रमीयते प्रमास्यत इति प्रमाणम्, प्रमितं प्रमीयते प्रमास्यत इति प्रमेयमिति रीत्या प्रमाणप्रमेयसमाख्ययोस्त्रिकालप्रवृत्तत्वात् प्रमाणप्रमेययोः पूर्वपश्चाद्भावे तद्वैपरीत्ये वा न काप्यनुपपत्तिः। अन्यथा प्रवृत्तिनिमित्तस्य त्रैकाल्यानभ्यनुज्ञाने 'पाचकमानय' इत्यत्रापि पाककर्तृत्वस्य कालत्रयसंबन्धास्वीकारे तदानयनकाले पाककर्तृत्वाभावेन पाचकानयनादिव्यवहारानुपपत्तिः। अतः सर्वानुभवसिद्धतादृशव्यवहारदर्शनेनाकामेनापि सर्वैः प्रमाणादिष्वपि प्रवृत्तिनिमित्तस्य कालत्रयसंबन्धोऽभ्युपेतव्यः।

उक्तं च न्यायभाष्ये —"समाख्याहेतोस्त्रैकाल्ययोगात् तथाभूता समाख्या", "त्रैकाल्यानभ्यनुज्ञाने च व्यवहारानुपपत्तिः" इति [२।१।१२] इति। न च यथा प्रमाणसिद्धावनवस्थाभिया प्रमाणान्तरापेक्षा न भवति, तथा प्रमेयसिद्धावपि प्रमाणस्य नावश्यकता भविष्यति, तुल्ययुक्तेः। तदुक्तं न्यायसूत्रे—"प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धि प्रसङ्गः", "तद्विनिवृत्तेर्वा प्रमाणसिद्धिवत् प्रमेयसिद्धिः" [२।१।१७-१८] इति वाच्यम्; प्रदीपप्रकाशसिद्धिवत् तत्सिद्धेः। एतावता यथा घटादिभासकस्य प्रदीपप्रकाशस्योपलब्ध्यर्थं प्रकाशान्तरापेक्षा न भवति, तथा प्रमाणोपलब्ध्यर्थमपि प्रमाणान्तरापेक्षा न भवति; तस्य स्वप्रकाशत्वात्। प्रमेयस्य स्वप्रकाशत्वाभावेन प्रमाणेनैव प्रकाश्यत्वं संभवतीति तदर्थं प्रमाणस्यावश्यकत्वं सिद्धम्। यदा तु प्रदीपप्रकाशादीनामपि चक्षुरादिनोपलब्धिस्तदा प्रदीपप्रकाशस्य प्रमेयत्वमेव व्यपदिश्यते, न तु प्रमाणत्वमित्यन्यदेतत्। उक्तं च न्यायसूत्रे -"प्रमेयता च तुलाप्रामाण्यवत्" [२।१.१५]। एवं च प्रदीपादीनामापेक्षिकं प्रमाणत्वं प्रमेयत्वं चैकस्यैव पुरुषस्यापेक्षिकपितृत्वपुत्रत्ववन्न विरुद्धे भवतः। न च प्रदीपस्य स्वरूपमात्रेण प्रकाशान्तरापेक्षत्वं नास्ति, अपि तु स्वयंप्रकाशत्वेन। प्रमाणप्रमेययोस्तूभयोरेव स्वयंप्रकाशत्वाभावेन प्रमेयस्य प्रकाशाय प्रमाणापेक्षावत्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रमाणस्यापि प्रकाशाय प्रमाणान्तरापेक्षा स्यात्, उभयोस्तुल्यत्वात्; तथा चानवस्थापातः। उक्तं च—"क्वचिन्निवृत्तिदर्शनात् क्वचिदनिवृत्तिदर्शनाच्चानेकान्तः" [न्या० भा० २।१।१६] इति वाच्यम्; यथा प्रदीपस्य प्रकाशत्वादेव प्रकाशान्तरानपेक्षत्वं तथा प्रमाणस्याप्युपलब्धि-हेतुत्वरूपप्रकाशत्वाव्याहतत्वादिति तस्य प्रमेयोपलब्धिदशायां प्रदीपवत् प्रमाणान्तरानपेक्षत्वं प्रमेयस्य तु तद्दशायामपि प्रकाशकत्वाभावेन भवत्येव प्रमाणापेक्षत्वमित्यनवद्यम् ॥

श्रीशोभितमिश्रः, न्यायव्याकरणाचार्यः।

———

(३)

अत्र दिगम्बराः—स्वपरव्यवसायित्वे सति ज्ञानत्वं प्रमाणत्वम्। ज्ञायते प्राधान्येन विशेषो गृह्यतेऽनेनेति ज्ञानम्। राद्धान्ते वस्तुनः सामान्यविशेषात्मकत्वाद् यदा ग्राहकं ज्ञानं विशेषांशं गौणीकृत्य सामान्यांशं प्राधान्येन गृह्णाति, तदा तद्दर्शनपदेनाभिधीयते। यदा सामान्यांशं गौणीकृत्य विशेषांशं प्रधानरूपतया गृह्णाति, तदा तज्ज्ञानशब्देनोच्यते। एवं च स्वपर-व्यवसायि ज्ञानं प्रमाणमिति प्रमाणनयतत्त्वालोकोक्तं सूत्रम्। यस्य व्याख्यानं पूर्वं निर्दिष्टम्। एतेन प्रमाणाधीनप्रमेयसिद्धिरिति विज्ञायते। तन्मतेन ज्ञानमेव प्रमाणमिति निश्चित्येयं युक्तिरुक्ता यदभिमतानभिमतवस्तुस्वीकारतिरस्कारक्षमं हि प्रमाणमतो ज्ञानमेवेदम्। अयमाशयः—यद-भिमतमुपादेयम्, अनभिमतं हेयम्। अभिमतानभिमतवस्तुस्वीकारतिरस्कारक्षमत्वात् प्रमाणं ज्ञानमेव। यन्न ज्ञानं तन्नाभिमतानभिमतवस्तुस्वीकारतिरस्कारक्षमं यथा स्तम्भादि, तस्माज्ज्ञान-मेव प्रमाणमिति तेषां मतम्। किञ्च, भासर्वज्ञप्रणीते न्यायसारे प्रथमपरिच्छेदे प्रथमसूत्रम्—"सम्यगनुभवसाधनं प्रमाणम्" इति। साधनग्रहणात् कर्तृकर्मनिरासेन करणस्यैव प्रमाणत्वं सिद्ध्यति। तथाप्यव्यवहितफलत्वेन साधकतमत्वं ज्ञानस्यैवेति पूर्वोक्तलक्षणं न समीचीनम्, अपि तु स्वपरव्यवसायि ज्ञानं प्रमाणमिति तात्त्विकं लक्षणमिति स्याद्वादमञ्जर्यां बहुशः परी-क्षितमिति जैनसिद्धान्ते मानाधीनमेयसिद्धिरिति सुस्पष्टं सिद्धं भवतीति निष्कर्षः।

अत्र बौद्धाः। धर्मकीर्तिप्रणीतन्यायबिन्दौ—"तदेव च प्रत्यक्षं ज्ञानं प्रमाणफलमर्थ-प्रतीतिरूपत्वात्", "अर्थसारूप्यमस्य प्रमाणम्", "तद्वशादर्थप्रतीतिसिद्धेः" [१।१८ २०] एवं बहूनि सूत्राणि। तेषामयमाशयो यत्प्रमाणात् तत्फलं न भिद्यते, यतो हि ज्ञानमेव साधनम्, तदेव च साध्यम्। तथा हि सर्वं हि ज्ञानं परिच्छेदरूपमेवोत्पद्यते, न च परिच्छेदा-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इतेऽन्यद् ज्ञानफलम्, अभिन्नाधिकरणत्वात् । तेन मन्यामहे न सर्वथा प्रत्यक्षानुमानाभ्यां भिन्न फलमस्ति । एतन्मते मानमेययोरैक्याद् द्वयोः स्वातन्त्र्यम् । न क्वापि प्रयोजकता प्रयोज्यता वेति स्वीकरणीया । एतन्मतं तु सर्वथोपेक्षणीयम् । यदि तैः प्रमाणफलयोः कार्यकारणभावः स्वीक्रियते, स चैकान्ताभेदे न घटते । नहि युगपदुत्पद्यमानयोः सव्येतरविषाणयोरिव कार्यकारणभावो युक्तः । नियतप्राक्कालभावित्वात् कारणस्य, नियतोत्तरकालभावित्वात् कार्यस्य । किञ्च, "तद्वशादर्थप्रतीतिसिद्धेः" इति सूत्रं विवृण्वता भणितम्—"नीलनिर्भासं हि विज्ञानं यतस्तस्मान्नीलस्य प्रतीतिरवसीयते । येभ्यो हि चक्षुरादिभ्यो ज्ञानमुत्पद्यते न तद्वशात् तज्ज्ञानं नीलस्य संवेदनं शक्यतेऽवस्थापयितुम्, नीलसदृशं त्वनुभूयमानं नीलस्य संवेदनमवस्थाप्यते । न चात्र जन्यजनकभावनिबन्धनः साध्यसाधनभावः, येनैकस्मिन् वस्तुनि विरोधः स्यात्; अपि तु व्यवस्थाप्यव्यवस्थापकभावेन । तत एकस्य वस्तुनः किञ्चिद्रूपं प्रमाणं किञ्चित्प्रमाणफलं न विरुध्यते । व्यवस्थापनहेतुर्हि सारूप्यम्, तस्य ज्ञानस्य व्यवस्थाप्यं च नीलसंवेदनरूपम्" इति तदीयग्रन्थाक्षराणि ।

अत्रेदं विमृश्यते यद् बौद्धनये ज्ञानक्षणस्य निरंशता स्वीकृता । तस्मिन्नेव क्षणे व्यवस्थाप्यव्यवस्थापकत्वलक्षणस्वभावद्वयायोगात् कथं तादृशधर्मद्वयवत्त्वमिति विवेचनीयतामर्हति, व्यवस्थाप्यव्यवस्थापकत्वस्यापि संबन्धत्वेन द्विष्ठत्वादेकस्मिन्नसंभवात् । अथ चार्थसारूप्यमर्थाकारता । तच्च निश्चयरूपम्, अनिश्चयरूपं वा ? निश्चयरूपं चेत्तदेव व्यवस्थापकमस्तु, किमुभयकल्पनया । अनिश्चितं चेत्तदा स्वयमव्यवस्थितं कथं नीलादिसंवेदनव्यवस्थापने समर्थम् । ये हि साध्यसाधनभावेन प्रतीयेते ते परस्परं भिद्येते, यथा कुठारच्छिदिक्रिये । तस्मान्नेदं मतं युक्तिसिद्धमिति निष्कलङ्कितः पन्थाः ।

अपरमपि सौगतमतं परीक्ष्यते । तन्मतेऽर्थेन ज्ञानं जन्यते । तच्च ज्ञानं तमेव स्वोत्पादकमर्थं गृह्णाति । ततश्चार्थः कारणम्, ज्ञानं च कार्यमिति । एतदप्यविचारितरमणीयम्, यतो हि यस्मिन् क्षणेऽर्थस्य स्वरूपसत्ता तस्मिन्नद्यापि ज्ञानं नोत्पत्तुमर्हति, तदा स्वोत्पत्तिमात्रव्यग्रत्वात् । यत्र क्षणे ज्ञानं समुत्पन्नं तत्रार्थोऽतीतः । पूर्वापरकालभावनियतश्च कार्यकारणभावः, क्षणातिरिक्तं चावस्थानं नास्ति । कारणविलीनतायां ज्ञानोत्पत्तिः कथम्, समुत्पन्नेऽपि ज्ञाने निर्विषयत्वापत्तिः, सौगतनये कारणस्यैव ज्ञानविषयत्वाङ्गीकारात् । आकाशकेशज्ञानवन्निर्विषयं च ज्ञानमप्रमाणमेव । समकालभावित्वं तु कार्यकारणयोर्बाधितमेव । तस्मात्सौगतमतप्रक्रिया न साध्वीति ब्रूमः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मानाधीना मेयसिद्धिः

अत्र कापिलाः—सङ्गिरन्ते हि प्रतिवादिन उपमानादीन्यपि प्रमाणानि। तथापि दृष्टानुमानाप्तवचनेषु सर्वेषां प्रमाणानामन्तर्भावान्न प्रमाणाधिक्यमुररीकरणीयम्। न च प्रमेयव्युत्पादनाय प्रवृत्तं शास्त्रं सामान्यतो विशेषतश्च कस्मात् प्रमाणं लक्षयतीति वाच्यम्; प्रमेयावगतेः प्रमाणाधीनत्वात्। त्रिविधप्रमाणसिद्धौ सर्वप्रमाणानां प्रमेयव्यवस्थासिद्धेर्नाधिक्यसिद्धिः पृथक्प्रमाणत्वेन, त्रिविधप्रमाणेष्वन्येषामन्तर्भावादिति वृत्तिकारोऽनिरुद्धो महादेवश्च। त्रिविधप्रमाणसिद्धौ च सर्वस्यार्थस्य सिद्धेर्न प्रमाणाधिक्यं सिद्ध्यति गौरवादित्यर्थ इति विज्ञानभिक्षुः। "प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम्। त्रयं सुविदितं कार्यम्" इत्यादिकं मनुवचनमपि स्वोक्तौ प्रमाणयन्ति ते। एवं पूर्वोक्तवचनसन्दर्भैः प्रमाणाधीनप्रमेयसिद्धिरित्यसन्दिग्धम्।

अस्मिन् विषये न्यायभाष्यकाराः—"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्। प्रमाणमन्तरेण नार्थप्रतिपत्तिः, नार्थप्रतिपत्तिमन्तरेण प्रवृत्तिसामर्थ्यम्। प्रमाणेन खल्वयं ज्ञातार्थमुपलभ्य तमर्थमभीप्सति जिहासति वा। तस्येप्साजिहासाप्रयुक्तस्य समीहा प्रवृत्तिरित्युच्यते। सामर्थ्यं पुनरस्या. फलेनाभिसंबन्धः। समीहमानस्तमर्थमभीप्सन् जिहासन् वा तमर्थमाप्नोति जहाति वा। अर्थस्तु सुखं सुखहेतुः दुःखं दुःखहेतुश्च। सोऽयं प्रमाणार्थोऽपरिसंख्येयः, प्राणभृद्भेदस्यापरिसंख्येयत्वात्। अर्थवति च प्रमाणे प्रमाता प्रमेयं प्रमितिरित्यर्थवन्ति भवन्ति, अन्यतमापायेऽर्थस्यानुपपत्तेः। तत्र यस्येप्साजिहासाप्रयुक्तस्य प्रवृत्तिः स प्रमाता, येनार्थं स प्रमिणोति तत् प्रमाणम्, योऽर्थः प्रतीयते तत्प्रमेयम्, यदर्थविज्ञानं सा प्रमितिः। चतसृषु चैवंविधास्वर्थतत्त्वं परिसमाप्यते। यथा दर्शकेन दीपेन दृश्ये गृह्यमाणे तदिव यन्न गृह्यते तन्नास्ति, यद्यभविष्यदिदमिव व्यज्ञास्यत, विज्ञानाभावान्नास्तीति; एवं प्रमाणेन सति गृह्यमाणे तदिव यन्न गृह्यते तन्नास्ति यद्यभविष्यदिदमिव व्यज्ञास्यत, विज्ञानाभावान्नास्तीति। तदेवं प्रमाणं सतः प्रकाशकमसदपि प्रकाशयतीति"। तदेतद्भाष्यप्रघट्टकविमर्शेन मानाधीनमेयसिद्धौ न कस्यापि सन्देहजागरा।

अधुना कणादमतपोषकोपस्कारकारादयस्तावत्परीक्षणीयाः। "इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः" [३।१।२] इति वैशेषिकसूत्रम्। अत्रोपस्कारकाराः —"अर्थान्तरस्यात्मनः, इन्द्रियेभ्योऽर्थेभ्यश्च रूपादिभ्यस्तद्भिन्नस्य यदर्थान्तरमात्मा तस्य हेतुर्लिङ्गमित्यर्थः। यद्यपि ज्ञानमेव लिङ्गमिह विवक्षितम्, तथापीन्द्रियार्थप्रसिद्धे रूपादिसाक्षात्कारस्य प्रसिद्धतरतया ताद्रूप्येणैव लिङ्गत्वमुक्तम्। तथा हि—प्रसिद्धिः क्वचिदाश्रिता कार्यत्वाद् घटवत्, गुणत्वाद्वा,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रियात्वाद्वा। सा च प्रसिद्धिः करणजन्या; क्रियात्वात्, छिदिक्रियावत्। यच्च प्रसिद्धेः करणं तदिन्द्रियम्। तच्च कर्तृप्रयोज्यं करणत्वात् वास्यादिवत्। तथा यत्रेयं प्रसिद्धिराश्रिता, यो घ्राणादीनां करणानां प्रयोक्ता स आत्मा" इति।

विवृतिकारस्त्वित्थमाकलयाञ्चकार यदेतावतात्मनः किमायातमित्यत आह—इन्द्रियार्थेति। इन्द्रियार्थप्रसिद्धी रूपादिसाक्षात्कारः, इन्द्रियार्थेभ्य इन्द्रियेभ्य अर्थेभ्यश्च, अर्थान्तरस्य भिन्नस्यात्मनामकद्रव्यस्य, हेतुः साधिकेत्यर्थः। तथा च रूपादिसाक्षात्कारो द्रव्याश्रितो गुणत्वाद्रूपवदित्यनुमानेनेतरबाधसहकृतेनात्मनः सिद्धिरिति भावः। यद्यपि प्रसिद्धेः पक्षतया हेतुत्वकथनमसङ्गतम्, तथापि हेतुपदमत्रानुमितिजनकपरामर्शविशेष्यपरमिति न किञ्चिदनुपपन्नमिति। तथा चायं निर्गलितोऽर्थः—आत्मा घ्राणादीनि प्रयोजयति, ततश्चार्थः प्रसिद्ध्यति, तेन प्रमातृप्रमाणाभ्यां प्रमेयप्रमितिरिति तन्मते सिद्ध्यति।

अत्र श्रीमन्तो न्यायवार्त्तिककारश्रीभारद्वाजोद्योतकराचार्याः—"पुरुषा रागादिमन्तो वीररागाश्च। तत्र रागो विषयाभिषङ्गलक्षणः, स एषामस्ति ते रागादिमन्तः। वैराग्यं पुनर्भोगानभिष्वङ्गलक्षणम्, तद्येषामस्ति ते वीतरागाः। प्रवृत्तेर्द्वैविध्यं पुरुषभेदानुविधानात्। तेषां पुरुषाणां प्रवृत्तयस्ताः पुरुषभेदमनुविधीयमाना उभयरूपा भवन्ति। वीतरागप्रवृत्तिरेकधा, तत्र या वीतरागाणां प्रवृत्तिः सा खल्वेकरूपाऽनिष्टप्रतिषेधार्था, अनिष्टं हास्याम इत्येव ते प्रवर्तन्ते, न पुनरेषां क्वचिदभिष्वङ्गोऽस्ति। रागादिमत्प्रवृत्तिस्तु द्विरूपा—इष्टानिष्टविषयाधिगमप्रतिषेधार्था। इष्टमाप्स्यामीति सक्तः प्रवर्तते, अनिष्टं हास्यामीति द्वेषान्निवर्तते। समर्थासमर्थभेदाद्रागादिमत्प्रवृत्तेरपि द्वैविध्यम्। इष्टमाप्स्यामीति प्रवर्तमानो यदा प्राप्नोति तदा समर्था, अनिष्टं हास्यामीति प्रवर्तमानो यदा जहाति तदा समर्था, यदा विपर्ययस्तदाऽसमर्थेति। पुनः प्रवृत्तिद्वैविध्यं प्रमाणस्यार्थवदनर्थकत्वात्। प्रमाणं तावदर्थपरिच्छेदकं प्रमाणसामान्यात्प्रमाण प्रतिरूपकमपि प्रमाणमित्युपचर्यते। प्रमाणेनापि सामान्यं परिच्छिद्यते प्रमाणाभासेनापि। सोऽयं प्रमाता यदा प्रमाणेनावधार्य प्रवर्तते तदास्य प्रवृत्तिः समर्था भवति, यदा पुनः प्रमाणाभासेनार्थमवधार्य प्रवर्तते तदाऽसमर्था।...यदि प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यम्, प्रवृत्तिसामर्थ्यात् प्रमाणतोऽर्थप्रतिपत्तिः, किं पूर्वं किं पश्चादिति वाच्यम्; यदि तावत् प्रवृत्तिसामर्थ्यमन्तरेण प्रमाणतः पूर्वमर्थप्रतिपत्तिः किमिति प्रतिपद्येत, अथ पूर्वमेव प्रवृत्तिसामर्थ्यमनवधार्यार्थे किमिति प्रवर्तते। परस्परापेक्षित्वादुभयासिद्धिरिति चेन्न, अनादित्वात्संसारस्य। आदिमति संसारे स्यादेष दोषः, किं पूर्वं प्रमाणतोऽर्थप्रतिपत्तिराहोस्वित् प्रवृत्तिसामर्थ्यमिति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रमाणप्रवृत्त्योर्वा बलाबलजिज्ञासायां ...लोकः खलु प्रवर्तमानः प्रमाणेनावधार्य प्रवर्तते, स च तथा प्रवर्तमानः फलमुपलभते ।...लोकवृत्तानुवादो वा, सर्वः प्रमाता प्रमाणेनार्थमवधार्य प्रवर्तमानः फलमुपलभते—इति लोकवृत्तं प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाण-मिति वाक्येनानूद्यते । ...प्रमाणानि तावच्चत्वारि—प्रत्यक्षेणेन्द्रियसंबद्धः, इन्द्रियासंबद्धोऽ-नुमानेन, संज्ञासंज्ञिसंबन्धप्रतिपत्तिरुपमानेन, शब्दोल्लेखेनागमेनेति । विषयान्तरे व्यवस्थादर्श-नाच्च ।...तदेवं सतः प्रकाशकं प्रमाणमसदपि प्रकाशयति, तत्र स्वातन्त्र्येणासद्भेदा न प्रकाशन्ते इति नोच्यन्ते । चतुर्वर्गानन्तर्भावाद्वा भावप्रपञ्चवदभावप्रपञ्चोऽप्युद्दिष्टो वेदितव्य इति भावोपदेशादभावप्रपञ्च उद्दिष्टो भवतीति नोच्यते" इति ।

अत्र विशिष्टाद्वैतिनः—ते वेदापरिगृहीताः कणभक्षाक्षपादक्षपणकभिक्षुपक्षाः क्षपिता वेदितव्या इति । सूत्रनिबद्धं सर्वं विद्यास्थानमिति नियमो न दृष्टः । एकस्य विद्यास्थानस्य सूत्रकृदेक एव ऋषिरित्येव वा राजाज्ञा, अन्यैरपि च तत्करणदर्शनात् । प्रमाणशब्दस्य भावे करणे च व्युत्पत्तिः । अत्र च प्रमैव प्रमाणमिति जैनाः, प्रमाकरणमेवेत्यपरे, तयोरन्यतरदित्यन्ये । यथावस्थितव्यवहारानुगुणं ज्ञानं प्रमा, यदज्ञानात्संसारो यज्ज्ञानात्तन्निवृत्तिस्तत्प्रमेयम् । तद् द्विविधम्—द्रव्याद्रव्यभेदात् । एतस्यैवोपोद्बलकं वाक्यम्—"द्रव्याद्रव्यप्रभेदान्मितमुभय-विधं तद्विदस्तत्त्वम्" इति तत्त्वमुक्ताकलापेऽवगम्यते । आगन्तुकधर्माश्रयो द्रव्यम्, अतथाभूत-मद्रव्यम् । द्रव्यं द्वेधा—जडमजडमिति । जडं च द्वेधा—प्रकृतिः, काल इति । अजडं च तथा, प्रत्यक् परागिति । प्रत्यगपि द्विविधम्—जीव ईश्वर इति । परागपि तथा—धर्मभूतं ज्ञानं नित्यविभूतिश्चेतीति तेषां प्रक्रिया ।

अत्रेदं विचार्यते यत्प्रयोजनानुसारेणोद्देशविभागौ कर्तव्यावित्येव गौतमस्य भावः । तत्रेदं प्रमाणमिदमप्रमाणमिति प्रमाणव्यवस्था सिद्धा चेत्तदा प्रमाणस्य परीक्षात्मको विचारः कर्तव्यः, सैव नास्तीति वादिनं माध्यमिकं प्रति प्रमाणव्यवस्थां प्रकटयति यल्लौकिकपरीक्षक-व्यवहार एव प्रमाणाप्रमाणव्यवस्थासाधकः, प्रमाणाप्रमाणव्यवस्थाया अनङ्गीकारे साधकाभावात् सर्वशून्यत्वपरीक्षाऽपि तव दुर्घटिता स्यात्, प्रमाणाप्रमाणव्यवस्थारूपालम्बनाभावे सर्वेषां प्रवृत्तिनिवृत्तिरूपः सर्वोऽपि व्यवहारो भज्येत । ननु लौकिकादिव्यवहारादेव यदि प्रमाणा-प्रमाणसिद्धिस्तर्हि किमत्र परीक्षणीयमिति चेन्न; सामान्यतः प्रमाणाप्रमाणव्यवस्थायां सिद्धाया-मपि तयोः प्रमाणत्वाप्रमाणत्वे कुत इति परीक्षोपयुज्यत एव । न च सामान्यतो वस्तुसत्त्वाज्ञाना-भावे विशेषबुभुत्साधीना स्वाभिमतप्रमाणप्रतिपादनरूपा परीक्षा कथं प्रवर्ततामिति तदर्थं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सामान्यतो वस्तुसत्ताज्ञानमभ्युपगन्तव्यमेव। प्रमाणाप्रमाणव्यवस्था नास्तीति वदन् वादी सौगतः प्रष्टव्यः—किं सर्वस्याप्रमाणत्वादेवमुच्यते, उत सर्वस्य प्रमाणत्वात्, अथवा परस्परबाधात्, अथवा सर्वस्य सन्दिग्धत्वात्? सर्वस्याप्रमाणत्वे सर्वमप्रमाणमिति त्वत्प्रतिज्ञाया अप्यप्रमाणत्वं स्यात्। सर्वस्य प्रमाणत्वे त्वदुक्तिरप्रमाणमित्यस्मद्वाक्यस्यापि प्रामाण्यमिति प्रतिपन्नवचनबाधितस्तव पक्षः स्यात्। परस्परबाधादिति तृतीयपक्षोऽपि विचार्यताम्। परस्परबाधादित्यस्य कोऽर्थः—प्रमाणेन प्रमाणस्य बाधः, किं वाऽप्रमाणेन प्रमाणबाधः? प्रमाणेन प्रमाणबाध इति चेद् बाध्येन प्रमाणेन बाधकप्रमाणस्यापि बाधः किं न स्यात्। अप्रमाणेन प्रमाणबाध इति चेद् बाधकेनाप्रमाणेनाप्रमाणबाधः कुतो न, अविशेषात्। नापि चतुर्थः, सर्वस्यैव सन्दिग्धत्वे संशयोत्पत्तिः संशयगोचरनिर्णयश्च न स्याताम्। यद्यपि सौगतमतं प्राक् परीक्षितमासीत्तथापि पुनरपि किञ्चित्परीक्षितम्, किन्तु यथा यथा परीक्ष्यते तथा तथा विशीर्णतामाप्नोतीत्युपेक्ष्यते साम्प्रतम्।

विशिष्टाद्वैतमतप्रक्रिया प्राक्प्रतिपादिता साम्प्रतं विशेषतो विवेच्यते, अस्य मतस्य त्रिदण्डधारिणा विष्णुना रचितत्वात्। एतन्मते यथावस्थितव्यवहारानुगुणं ज्ञानं प्रमाणम्। यथापददानेनाऽयथाव्यवहारजनकस्य विपर्ययस्य व्यावृत्तिः। अवस्थितशब्देनानवस्थितव्यवहारकारणस्य संशयस्य व्यावृत्तिः। अन्यस्यान्यथाध्यवसायो विपर्ययः। स चायमनेकविधः, एकानेकविरुद्धविशेषस्फुरणात्। तत्रैकविशेषस्फुरणं पीतः शङ्ख इत्यादि। अनेकविशेषस्फुरणमेकमेव भिन्नमभिन्नं चेत्याद्यनैकान्तवादिनाम्, प्रपञ्चः सद्विलक्षणोऽसद्विलक्षणश्चेत्यद्वैतवादिनाम्। विवरणे त्वेवमुक्तम्—त्रिविधमज्ञानम्, स्वरूपाज्ञानमन्यथाज्ञानं विपरीतज्ञानमिति। स्वरूपाज्ञानं नाम वस्तुनोऽप्रतिपत्तिः। अन्यथाज्ञानं वस्तुनो वस्त्वन्तरतया भासनम्, यथा शुक्तिरूप्यम्। विपरीतज्ञानं तु यथावद्वस्तुनि भासमाने युक्तिभिस्तस्यान्यथोपपादनम्, यथा ज्ञातृतयाऽहन्त्वेन चात्मनि भासमानेऽपि कुयुक्तिभिरस्य भ्रान्तत्वोपपादनं कुदृशाम्। सामान्यधर्मिस्फुरणे सत्यप्रतिपन्नतद्विरोधप्रतिपन्नमिथोविरुद्धानेकविशेषस्फुरणं संशयः। यथोर्ध्ववस्तुमात्रग्रहणे सति तद्विरोधितयाऽननुसंधीयमानयोर्मिथः स्फुटविरोधयोः स्थाणुत्वपुरुषत्वयोः स्फुरणम्। प्रत्यक्षानुमानागमभेदात् त्रैविध्यं प्रमाणस्यैतन्मते। किमनेन बहुनोपपादनप्रकारेण प्रत्यक्षानुमानागमाख्यं प्रमाणजातमागमगम्यं च निरस्तनिखिलदोषगन्धमनवधिकातिशयासंख्येयकल्याणगुणगणं सर्वज्ञं सत्यसंकल्पं परं ब्रह्माभ्युपगच्छतां किन्न सेत्स्यति किन्नोपपद्यत इत्यादि।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उक्तं च—

प्रत्यक्षं चिदचिन्मयं जगदिदं यस्येत्यनुश्रूयते
यश्चानन्यधियामनन्तविभवः प्रत्यक्षतामश्नुते ।
यश्चैको युगपत्सदा स्वत इदं विश्वं दरीदृश्यते
प्राज्ञं तं प्रतिपन्नमोक्षणविधादक्षं दिदृक्षेमहि ॥ इति ।

अत्राद्वैतिनः । तत्र भगवद्भाष्यकाराः—तमेतमविद्याख्यमात्माऽनात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधि-निषेधमोक्षपराणि । कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति । उच्यते—देहेन्द्रियादिष्वहममभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः । नहीन्द्रि-याण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति, न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यवहारः संभवति, न चानध्यस्तात्मभावेन देहेन कश्चिद् व्याप्रियते, न चैतस्मिन् सर्वस्मिन्नसत्यसङ्गस्यात्मनः प्रमातृत्वमुपपद्यते, न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति; तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च, पश्वादिभिश्चाविशेषात् ।

अत्रेयं विचारणीया वार्ता यज्जगज्जीवेश्वरादेरविद्याकल्पितत्वे प्रमातृप्रमाणादेरपि तथात्वे शास्त्रादेरपि मिथ्यात्वे कथं तेभ्यः परमपदमतिरुपपद्यत इति चेद् विमृश्यताम् । अत्रेदं भवान् प्रष्टव्यः—किं प्रमात्रादेरसत्यत्वे ततः परमपदसिद्धिर्न भवतीत्युच्यते, किं वा भवन्त्यपि सा वास्तवी न बोभवीति; यदि स्वरूपस्फूर्तिलक्षणा सिद्धिः, किं वाऽविद्याप्रतिबन्धनिवृत्तिरूपा वा । नाद्यः, यतो हि सच्चिदानन्दरूपमात्मतत्त्वमेव प्रमितिर्यत्र स प्रत्यक्प्रमाणकः, तत्रान्येषा-मपेक्षाविरहात्तत्स्फुरणे बाधाभावात् । यद्यविद्याप्रतिबन्धनिवृत्तिरूपा तदा यक्षानुरूपो बलिरिति न्यायेनाऽवास्तवनिवृत्तिरूपस्याप्यवास्तवत्वान्न तत्र पारमार्थिकप्रमात्राद्यपेक्षा । एतदुक्तं भवति यत्स्वरूपस्य नित्यसिद्धतयाऽन्यानपेक्षत्वान्न तत्र प्रमाणमपेक्ष्यत इति भावः । किञ्च, रूपादिरूप-कार्यधर्महीने परमपदे न प्रत्यक्षप्रवृत्तिः, नापि तत्तद्व्याप्तिमूलकस्यानुमानार्थापत्त्यादेरसंभवात्, सामान्यतोदृष्टानुमानस्य च प्रमाणसिद्धे संभावनाहेतुत्वेऽपि स्वतो वस्तुतत्त्वनिश्चायकत्वानुपपत्तेः, जातिगुणक्रियादिशून्ये शब्दस्यापि प्रवृत्त्यभावात् कथञ्चिल्लक्षणयोपनिषद्वाक्येन तत्स्वरूप मावेद्यत इति सारांशः । तदुक्तं संक्षेपशारीरके—

प्रत्यक्प्रमाणकमसत्यपराक्प्रभेदं प्रक्षीणकारणविकारविभागमेकम् ।
चैतन्यमात्रपरमार्थनिजस्वभावं प्रत्यञ्चमच्युतमहं प्रणतोऽस्मि नित्यम् ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अप्रच्युतैकस्वभावं विष्णोः परमपदरूपं प्रत्यञ्चं प्रत्यगात्माभिन्नं नित्यम्, तद्विषये एव वाङ्‌मनःकायप्रणिधानं विधाय स्थितोऽस्मीत्यर्थः।

तत्रायं सर्वमतसंक्षेपः—प्रमाणं प्रधानमपि प्रमाणगतेः प्रमेयस्वरूपविवेचनपर्यवसानतया प्रमेयेऽपि न्यस्तपदं प्रवृत्तम्। इतरेतरविसंवादसंरब्धोद्धुरैरास्तिकैर्नास्तिकैश्च बहुधा वादिभिः स्वच्छन्दानुरोधेनान्यथा चान्यथा च प्रमेयं प्रतिपद्यमानैरितस्ततः परिकृष्यमाणानि प्रमाणान्यपि परावृत्तरूपतया लक्षणतो दुर्ग्रहाण्यभूवन्। मानाभासव्यामिश्राणि हि मानानि न सुकराणि विवेक्तुम्। तदेवं शास्त्रमेव पङ्किलीकृतं चक्षुरिव तिमिरोपसृष्टं विगलितार्थग्रहणपाटवं संवृत्तम्। अविपर्यस्तलक्षणप्रमाणवर्गं परिगृह्णद्भिरपि सौगतार्हतकापिलचार्वाकजैमिनीयादिभिरङ्गेष्ववान्तरभेदेषु च न्यूनातिरेकमास्थितैरनेकधोपयोगादनेकान्तीकृतमतयः कृतमतयोऽपि स्वस्वोपदेशपारम्परीप्रत्ययादेकतरं पक्षमभिमन्यमानाः स्वपरिग्रहावसादकातरतया पक्षान्तरेषु साभ्यसूयाश्चिरायापि गुरुकुलेषु परिश्रम्यालब्धबुद्धिप्रसादा विश्राम्यन्त एवानुभूयन्ते। अतः सर्वोपयोगाय दोषगुणहानोपादानाभ्यां शिक्षणीयस्यास्य न्यायविस्तरस्य पृथक् प्रस्थानं न्यायदर्शनं नाम सूत्रजातं गौतमेन मुनिना प्रथमं प्रणीतम्, यत्र प्रमाणाप्रमाणादिविवेचनया तत्त्वनिर्णयोपायास्तत्र च संभवन्तो गुणदोषाः कथासु च ग्राह्यपरिहार्यविभागाः सविशेषं प्रदर्शिताः।

तच्च न्यायदर्शनं प्रथमं प्रमाणप्रमेयादिसूत्रेण षोडशधा पदार्थान् विभज्य तत्परीक्षणेन चरितार्थम्। तत्र प्रमेयत्वस्य केवलान्वयिनः सर्वपदार्थसाधारणतया विभाजकत्वमनुपपद्यमानं मन्यमानेन कणादेन मुनिना कृत्स्नमेव प्रमेयजातं द्रव्यादिसप्तपदार्थपरिसंख्यानेनासंकीर्णं विभक्तम्। तत्र च सामान्यविशेषसमवायाभावान् वितथमेवापदार्थान् पदार्थयता तथाविधमेव चान्यदन्यदालपता ग्राह्यमगृह्णता त्याज्यं चात्यजता कणभक्षेण दूरमपथीकृतः शास्त्रपथ इति ब्रह्मसूत्रकारादिभिः प्रतिक्षिप्तो वैशेषिकः पक्षः।

न्यायपक्षस्तु शङ्क्यमानोपसर्गोऽपि कथञ्चिद्व्याख्यानाधेयसंस्कारतया नात्यर्थं परिवर्जनीय इति मन्यमानाः कतिपयसंस्कारसंस्कृतमिमं पक्षं परिगृह्य निबन्धान् निबन्धुः पूर्वे चित्सुखीत्यादिनिबन्धकारा आचार्याः। गौतमादिविहितरेखामात्रगृहीतरूपस्य सर्वोपजीव्यस्य न्यायविस्तरस्य विद्यास्थानस्य समस्तदोषरजःपरिमार्जनदर्शिताभिनवरूपा प्रत्यङ्गसंस्कारोपपादनप्रगुणा कृतसौभाग्या काचिदाचार्यशङ्करादिविरचिता भाष्यभामत्यादिस्वरूपा मूर्तिरिवाभाति। तदुक्तवन्त आत्मतत्त्वविवेक आम्नायाप्रामाण्यखण्डनप्रकरणे परममान्या उदयनाचार्याः—"अनात्मन्या-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्मग्रहो निदानं संसारस्य। मिथ्याज्ञानं च तत्त्वज्ञानान्निवर्तते, तच्च श्रवणमननादिक्रमेणोत्पद्यते। कारणनिवृत्तौ च कार्यं न जायते, उत्पन्नश्च धर्माधर्मप्रचयो भोगेन क्षीयते" इति। आम्नायसार-संक्षेपस्तु "अशरीरं वाव सन्तम्" इत्यादिः। पूर्वोक्तवाक्यसन्दर्भगवेषणया श्रीमदुदयनाचार्याणां मतमप्यद्वैतमेवाकलयति। वस्तुतस्तु प्रमेयेन प्रमाणसिद्धिरिति कथनेऽपि दोषः, प्रमाणेन प्रमेयसिद्धिरित्ययमप्यंशो न निर्दुष्टोऽनवस्थादिदोषघटितत्वात्। कुत्रचित् स्वप्रकाशताङ्गी-करणीया, स्वप्रकाशताऽपि शास्त्रसाहाय्येनैवोररीकरणीया। तच्च शास्त्रं नैकविधम्, न वा सर्वमान्यम्। तस्मादनिर्वचनीयतावादस्यैव सर्वश्रैष्ठ्यमिति॥

श्रीरामानुज ओझा।

---

(४)

यद्यपि प्रमां प्रति कारणानि प्रमातृप्रमेयादीनि बहूनि सन्ति, तथापि न तानि सर्वाण्यपि करणानि भवितुमर्हन्ति; किन्त्विन्द्रियार्थसंयोगादिरूपं प्रमाणमेव करणम्, तस्यैव साधक-तमत्वेन करणत्वात्।

प्रमाणस्य प्रमां प्रति साधकतमत्वं च प्रमाणस्य सत्त्वासत्त्वयोः सतोः कार्यरूपायाः प्रमायाः सत्त्वासत्त्ववत्त्वरूपम्। असति प्रमातरि प्रमेये वा प्रमा न भवति, सति तु भवति; न पुनः प्रमातरि प्रमेये वा सति प्रमा भवत्येव, किन्तु प्रमाणे सति भवन्ती प्रमा भवत्येव; इति सर्वानुभवात्। तस्मात्सोऽयमतिशयः साधकतमत्वरूपः।

असाधारणकारणता वा साधकतमत्वार्थः। प्रमाता सर्वप्रतिपत्तीनां साधारणं कारणम्। प्रमेयमपि तथाभूतमेव, किन्तु प्रमाणमसाधारणत्वात् प्रधानम्। प्राधान्याच्च साधकतमत्वेनाभिधीयते। तथा हि—चतस्रः खलु इमाः प्रत्यक्षादिप्रमितयो भिन्नबुद्धिव्यप-देशभाक्त्वेनानुभूयन्ते। न च प्रमातृप्रमेये बुद्धिभेदबीजे, तयोः साधारण्यात्। प्रमाणानि तु यथायथं चतसृषु वा मतान्तररीत्या तिसृषु वा प्रमितिष्वसाधारणानीति भिन्नबुद्धिव्यप-देशनिबन्धनानि भवन्त्येव। तदिदमेवासाधारण्यमतिशयरूपं साधकतमत्वम्। प्रमातृ-प्रमेयादीनां प्रमां प्रति साधकत्वाविशेषेऽप्यनेनैवोत्कर्षेणास्य प्रमाणस्य सर्वेभ्यः प्रमात्रादिभ्यो-ऽतिशयितत्वादतिशयितं साधकं साधकतमं तदेव हि करणमिति प्रमाकरणत्वेन प्रमाणं सुज्ञेयमभूत्। तेनेन्द्रियार्थसंयोगादिरूपमेव प्रमाकरणत्वात् प्रमाणम्, न कदाचिदपि प्रमा-त्रादिकं वस्तु प्रमाकरणत्वेनाङ्गीकार्यम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अत एव हि कश्चिदपि प्रमाता कदाचिदपि—अहं मया जानामि, घटेन घटं जानामीति न कर्तृकर्मणी विस्मृत्यापि करणत्वेन व्यपदिशति, किन्तु प्रत्यक्षादीनि प्रमाणान्येव करणत्वेन व्यपदिशति। प्रत्यक्षेण घटं पश्यामि, अनुमानेनाव्यक्तादिकं वस्तु जानामि, शब्देन धर्मादिकं पदार्थमनुभवामीत्यादिकं प्रतिपादनमपि संगच्छते।

अत एव च—"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" [१।१।१] इति गौतमीयसूत्रे प्रमाणस्य प्रमेयाद्यपेक्षया प्राधान्यात् प्रमां प्रति साधकतमत्वाच्च प्रमाणपदस्य प्रथममुपादानमपि सुसंगतं प्रतीयते। तथैव च—"प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत्प्रमाणम्, प्रमाणमन्तरेण नार्थप्रतिपत्तिः" इत्यादि न्यायभाष्यमपि संगच्छते। इत्थं च—

दृष्टमनुमानमाप्रवचनं च सर्वप्रमाणसिद्धत्वात्।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥४॥

इति सांख्यकारिका, तद्व्याख्यास्वरूपा—"अथ प्रमेयव्युत्पादनाय प्रवृत्तं शास्त्रं कथं प्रमाणं सामान्यतो विशेषतश्च लक्षयतीत्यत आह "प्रमेयसिद्धिः प्रमाणाद्धि" इति। सिद्धिः प्रतीतिः" इति महामहोपाध्यायश्रीवाचस्पतिमिश्रोक्तिः, तथा—"एवमेषां व्यक्ताव्यक्तज्ञानां त्रयाणां पदार्थानां कैः कियद्भिः प्रमाणैः केन कस्य वा प्रमाणेन सिद्धिर्भवति। इह लोके प्रमेयवस्तु प्रमाणेन साध्यते। यथा प्रस्थादिभिर्व्रीहयः, तुलया चन्दनादि; तस्मात्प्रमाणमभिधेयम्" इति श्रीगौडपादस्वामिकृतभाष्योक्तिश्चापि सुसंगता भवति।

एवंरीत्यैव—"अथैवं सूचितानां श्रीकृष्णतद्वाच्यवाचकतालक्षणसंबन्धतद्भजनलक्षणविधेयसपर्याऽभिधेयतत्प्रेमलक्षणप्रयोजनाख्यानामर्थानां निर्णयाय तावत्प्रमाणं निर्णीयते" इति तत्त्वसन्दर्भग्रन्थोऽपि संगतो भवति।

तथैव च—"तत्र तावद्भगवता व्यासेन शब्दस्यानपेक्षं प्रामाण्यं स्वीकृत्य चतुर्लक्षण्यां प्रथमे शब्दबलविचारेणैव प्रमेयनिर्णयः कृतः। ततः प्रमेयसाधनफलानि विचारितानि" इत्याचार्यैरपि तथैव सुबोधिन्यादौ निरूप्यते। उचितं चैतत्, "मानाधीना मेयसिद्धिः" इत्यन्यत्रापि तथाङ्गीकारेणाऽविप्रतिपन्नत्वात्। अतः—"तदेव (प्रमाणमेव) अत्रापि पूर्वं निरूपणीयम्। तत्र प्रमाणशब्दो भावव्युत्पन्नो रूढो वाऽबाधितज्ञाने वर्तते, बाधयोग्यव्यतिरिक्ते च। करणव्युत्पन्नस्तु तादृशज्ञानकरणे" इति प्रस्थानरत्नाकरग्रन्थस्यापि संगतिरस्ति।

एवं च—"अशेषचिदचित्प्रकारं ब्रह्मैकमेव तत्त्वम्। तत्र प्रकारप्रकारिणोः प्रकाराणां

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

च मिथोऽत्यन्तभेदेऽपि विशिष्टैक्यादिविवक्षयैकत्वव्यपदेशः, तदितरनिषेधश्च। अन्यथा समस्तप्रमाणसंक्षोभप्रसङ्गात्। इदमेव चेत्थंभूतं सामान्यतः प्रमाविषयतया विशेषतः प्रकर्षेण मेयतया च प्रमेयमुक्तम्" इति न्यायसिद्धाञ्जनग्रन्थोक्तप्रमाणप्राधान्यतात्पर्यमपि संगच्छत एव।

यद्यपि महापण्डितेन श्रीहर्षमहानुभावेनानिर्वचनीयतासर्वस्वाऽपराभिधे खण्डन-खण्डखाद्यग्रन्थे—"अथ कथायां वादिनो (भेदवादिनः) नियममेतादृशं मन्यन्ते—प्रमाणादयः सर्वतन्त्रसिद्धान्ततया सिद्धाः पदार्थाः सन्तीति कथकाभ्यामभ्युपेयम्, तदपरे (अभेद-वादिनः) न क्षमन्ते। तथा हि— किं तदनभ्युपगच्छद्भ्यां वादिप्रतिवादिभ्यां तदभ्युपगमसाहित्य-नियतस्य वाग्व्यवहारस्य प्रवर्तयितुमशक्यत्वात्? उत कथकाभ्यां प्रवर्तनीयवाग्व्यवहारं प्रति हेतुत्वात्? उत लोकसिद्धत्वात्? अथवा तदनभ्युपगमस्य तत्त्वनिर्णयविजयफलातिप्रसञ्जकत्वात्? न तावदाद्यः, तदनभ्युपगच्छतोऽपि चार्वाकमाध्यमिकादेर्वाग्विस्तराणां प्रतीयमानत्वात्, तस्यैव (चार्वाकादिवाग्व्यवहारस्यैव) वा निष्पत्तौ भवतस्तन्निरासप्रयासानुपपत्तेः। सोऽयमपूर्वः प्रमाणादिसत्तानभ्युपगमात्मा वाक्स्तम्भनमन्त्रो भवताऽभ्यूहितः" इत्यादिग्रन्थभागेन चतुर्भि-र्विकल्पैः कथायाः प्रमाणाद्यभ्युपगमाधीनत्वं खण्डितम्। तेन "मानाधीना मेयसिद्धिः" इति सिद्धान्तस्यैकदेशीयत्वमेव तदीयतात्पर्यतः फलितम्।

तथापि श्रीवेदान्ताचार्यापराभिधेन कवितार्किककेसरिणा सर्वतन्त्रस्वतन्त्रधिषणेन श्रीमद्वेङ्कटनाथदेशिकेन तत्त्वमुक्ताकलापाभिधे ग्रन्थरत्ने—

> कर्तव्यत्वेन यत्तु प्रमितिपरवशैः कल्पितं स्वेच्छया वा
> यच्चाकर्तव्यमेवं परिभवनपदं तत्प्रहाणग्रहौ स्तः।
> स्वाचारद्यूतसम्पत्प्रभृतिषु च तथा स्वीकृतेयं व्यवस्था
> नैनामीषद्वितण्डाऽप्यलमतिपतितुं साधनांशोज्झिताऽपि॥

इति कारिकया पूर्वोक्तखण्डनस्य खण्डनं विधायैतदेव सिद्धान्तया स्थापितं यद् वैतण्डिकेनापि कथायाः प्रमाणाद्यभ्युपगमाधीनत्वं नियमेनाङ्गीकर्तव्यम्। तथा हि—परस्परविरुद्धवादिनोर्व्यवहारः कथा। सा च त्रिविधा—वादजल्पवितण्डाभेदात्। तत्र वादे प्रमाणतर्कौ साधनम्, प्रयोजनं तत्त्वज्ञानम्, अधिकारी च वीतरागः पुरुषः। जल्पे तु जल्पाधिकारी जयार्थी पुरुष इति वादाद्विशेषः। उभयोरपि वादिनोः साधनवत्त्वे जल्पः। अन्यतरस्य स्वपक्षसाधनाऽसत्त्वे परस्य दूषणमात्रशरणत्वे वितण्डा। तत्रापि वैतण्डिकस्य दूषणसमर्थनं कर्तव्यम्, अन्यथा वैतण्डिकव्यवहारः प्रलापमात्रमेव स्यात्। अत एव वितण्डा-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यामपि वादिप्रतिवादिव्यवस्थानुपालनं कर्तव्यम्। तथा हि—उक्तशब्दस्य पुनरनभिधानम्, लुङः प्रयोगः कर्तव्यः, यङ् प्रयोगः, यक्प्रयोग इत्यादिकं शब्दविषयं कल्पनम्, अनुमानेनैव साधनमागमेनैव साधनं वक्रानुमानेनैव साधनं वैदिकागमेनैव साधनमित्यादिकं प्रमाणविषयं कल्पनम्, एवमन्यदपि वादिप्रतिवादिप्रौढिप्रकाशनार्थं कल्पनं द्रष्टव्यम्। एतत्परित्यागे निग्रह एव। ननु वादजल्पयोरेव पूर्वोक्ता सर्वा व्यवस्था न तु वितण्डायामपीति चेन्न, वितण्डायां स्वपक्षसाधनाभावेऽपि परपक्षीयदूषणसद्भावसमर्थनात् सर्वाऽपि व्यवस्था वैतण्डिकेनाप्यङ्गी-कार्यैवेति तदीयतात्पर्यम्।

इत्थमेत्र चान्येषां समेषां दार्शनिकसार्वभौमेशानां न्यायादिदर्शनभाष्यवार्त्तिकतात्पर्यादि-काराणामाचार्याणां माननीयं मतम्। तेन मानाधीनैव मेयसिद्धिः, नान्यथेति नियमतः सिद्धम्॥

श्रीरामलक्ष्मणाचार्यः।

---

(५)

"प्रमेयाधीनैव प्रमाणसिद्धिः" इति व्युत्पाद्यते। न ह्येकस्य विज्ञानस्यार्थद्वयम्, न चाप्येकस्यार्थस्य विज्ञानद्वयमिप्युपपद्यते। प्रमेयस्याव्यभिचारेणैव प्रमाणानां व्यवस्था। स्वलक्षण-सामान्यलक्षणाभ्यामपरं नास्ति प्रमेयम्। यस्माल्लक्षणद्वयकं प्रमेयम्, अतः प्रमाणद्वयमेव। नहि सामान्यविशेषात्मकमेकमन्यत् प्रमेयम्। परस्परं विशिष्टानामविशिष्टमभिन्नं रूपं नैव भवति। समानादसमानः स्वभावोऽवश्यमन्यः। अतश्च द्वे वस्तुनी स्याताम्, न त्वेकमेव द्विरूपम्। अतो नह्येकं प्रमाणं न चापि त्र्यादि। नहि पूर्वाधिगते ज्ञाने किञ्चिदधिकमाद-धदन्यदपि प्रमाणं भविष्यति, येनोपयोगभेदादपि प्रमाणभेदो भवेत्। येनैव हि ज्ञानेन प्रथममर्थोऽधिगतस्तेनैव पुरुषः प्रवर्तितः, तेनैव चार्थः प्रापितः। अत्रान्येन ज्ञानेन किमधिकं कार्यम्, आद्येनैव कर्तव्यस्य कार्यस्य कृतत्वात्। अत एव तदधिगतविषयं तत्सजातीयं विजातीयं वा प्रमाणं न भवति। अपि च किमपि स्थिरं वस्तु नास्ति, यत्रानेकानि प्रमाणानि संघटेयुः। न च सामग्रीभेदादपि प्रमाणभेदः। सामग्रीभेदेन च प्रमाणभेदे स्वीक्रियमाणे चक्षु-रादिज्ञानानामपि भेदः सामग्र्या एव, एवं तर्हि तावन्ति प्रमाणानि भवेयुः। अतः प्रमाण-संप्लवो नाम नास्त्येव।

प्रत्यक्षपरोक्षलक्षणो हि विषयभेदः प्रत्यक्षत एव सिध्यति। प्रत्यक्षेणाऽसदृशप्रतीतिः, परोक्षेण सदृशप्रतीतिः। सदृशासदृशप्रतीतिर्हि प्रतीतेरेव धर्मः। सा हि प्रतीतिः स्वसंवेदन-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रत्यक्षेणैव सिद्धा। न च प्रतीतिः स्वरूपे भ्रान्तिर्भवति। तत्रापि भेदभ्रान्तिस्तदा व्यवहार एव न प्रचलेत्। किञ्च, भ्रान्तानामपि ज्ञानानां प्रामाण्यं प्रवृत्तिनिवृत्तिलक्षणव्यवहारादेव भवतीति प्रतिपादयिष्यते।

स्वलक्षणं हि वस्तुनोऽसाधारणं तत्त्वमस्ति, यस्य यत् स्वं तत् तस्यैव; नान्यस्येति हेतोः। स्वलक्षणं यो न भवति, किन्तु ज्ञानविषयो भवति; तत् सामान्यलक्षणम्।

स्वलक्षणं सर्वतो व्यावृत्तत्वादसदृशं भवति। सर्वव्यक्तिसाधारणत्वात् सामान्यलक्षणं सदृशं भवति। शब्दस्य विषयः सामान्यम्, अविषयः स्वलक्षणम्। यत्र विषयातिरिक्तसाद्-गुण्यसंकेतग्रहणानां निमित्तानां सद्भावे बुद्धिर्भवति तत् सामान्यम्, यत्र तु न भवति तत् स्वलक्षणम्। एवं सदृशासदृशत्वेन, शब्दस्य विषयाविषयत्वेन, विषयातिरिक्तान्यनिमित्तेषु बुद्धेः सदसत्त्वेन प्रकारद्वयमेव विषयस्य।

स्वलक्षणस्य निर्विकल्पत्वात् तस्य ग्राहकं प्रत्यक्षमेव। सामान्यलक्षणस्य विकल्पत्वात् तस्य ग्राहकमनुमानमेव। नहि निर्विकल्पसविकल्पकावुभावपि प्रत्यक्षग्राह्यौ। तथा हि—प्रमाणस्य द्विविधो विषयो भवति—एको ग्राह्यः, अन्यश्चाध्यवसेयः। ग्राह्यता नाम हेतुता। कार्यं हि ज्ञानमनेकहेतुकमुदेति। तेषु हेतुषु बुद्धिर्यदाकारा भवति, तस्या बुद्धेस्तद् ग्राह्य-मुच्यते। ज्ञानेन यः प्रापणीयो भवति, सोऽध्यवसेयः। य एव गृह्यते स एव न प्राप्यते। प्रत्यक्षस्यैको हि क्षणः ग्राह्यः, अन्यश्चाध्यवसेयः। अध्यवसेयस्तूपादानोपादेयभावेन व्यवस्थितः सन्तानः। स एव प्रत्यक्षस्य प्रापणीयः। नहि केवलं प्रत्यक्षमेवान्यद् गृह्णाति, अन्यदध्यवस्यति; किन्त्वनुमानमपि।

एतेनेदं पर्यवस्यति—बुद्धिर्यदन्वयव्यतिरेकौ नानुकरोति तत् साक्षादप्रतिभासमानं केवलमध्यासविषयः सामान्यलक्षणम्। इदमेव सामान्यलक्षणं प्रमाणेनाध्यवसेयं प्रापणीयं काल्पनिकं कृत्रिममारोपणीयं च भवति। यस्यार्थस्य सन्निधानासन्निधानाभ्यां ज्ञानप्रतिभासभेदः तत् स्वलक्षणम्। इदमकृत्रिमम्, अनारोपणीयम्, असदृशम्। प्रत्यक्षस्य ग्राह्याकारसन्निधानात् स्फुटत्वम्। अप्रत्यक्षस्य च ग्राह्याकारस्यासन्निधानादस्फुटत्वम्। एवं स्फुटत्वास्फुटत्वाभ्यां ज्ञानप्रतिभासस्य भेदः।

यतोऽर्थक्रियासामर्थ्यादेव कस्यापि सत्त्वम्, अतः स्वलक्षणमेव परमार्थसत्। सामान्य-लक्षणं हि संवृतिसत्, कल्पनामात्रव्यवहार्यत्वात्तस्य। नहि सामान्यलक्षणं नाम प्रमेयम्। तद्धि नहि रूपादिरिव भावरूपतया ज्ञानविषयम्, किन्तु भाववासनाप्रबोधप्रसूतविकल्पकल्पितम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं ग्राह्यरूपरहितायामपि बुद्धौ सामान्येन विजातीयव्यावृत्त्युपकल्पिताभेदाकारेण यत् सामान्यं नाम व्यवस्थाप्यते, तदर्थभ्रान्तिरेव। अतः स्वलक्षणमेकमेव परमार्थसत्, तस्यैव रूपादिबुद्ध्युत्पादकत्वादर्थक्रियाकारित्वाच्च।

अत्र यद्युच्येत—परमार्थसत्तयैकमेव प्रमेयम्, तदा मेयाधीना मानसिद्धिरिति न्यायेन प्रमाणमेकमेव स्यात्। एवं च प्रमेयद्वित्वं प्रमाणद्वित्वमिति च प्रतिज्ञा व्याहता स्यादिति। सत्यम्, एकमेव प्रमेयम्, सामान्यलक्षणं चासदेव, तदनुग्राहकं च प्रमाणं भ्रान्तमेव; तथापि सामान्यलक्षणस्य प्रमेयत्वम्, अनुमानस्य च प्रमाणत्वं निराबाधं तिष्ठति। तथा हि—स्वलक्षणस्यैव स्वरूपेण प्रत्यक्षं भवति, पररूपेण चावस्तुना सामान्याकारेणानुमानं भवति। एवं स्वरूपपररूपाभ्यां स्वलक्षणस्यैव मेयद्वयता। स्वलक्षणस्य यदिदं पररूपेण ज्ञानं नाम, तद् यथाऽर्थोऽस्ति यथा वा स्वाकारस्तथा नाभिनिविशते, अपि तु स्वाकारं बाह्यं साधारणतया मन्यते। अत एव पररूपेण ज्ञानादनुमानं भ्रान्तिरिति सत्यम्, तथाप्यभिप्रायाविसंवादात् तस्य प्रमाणता नूनं सिध्यति।

अर्थक्रियार्थिभिर्ज्ञानगोचरतयाऽभिप्रायविषयीकृतस्यार्थक्रियासमर्थस्यार्थस्य संवादः क्रियते। अविसंवादि ज्ञानमेव च प्रमाणम्। अविसंवादनं चार्थक्रियाकारित्वम्। अत एव प्रामाण्यं व्यवहारेणैव सिध्यति। व्यवहारश्च भाविभूतरूपादिलक्षणानामेकत्वेन सर्वस्य संवादविषयः। साध्यसाधनयोश्चैकव्यक्तिदर्शने समस्ततज्जातीयतथात्वव्यवस्थानं संवादमवधारयन्ति व्यवहर्तारः। एवं सर्वत्र व्यवहारे विजातीयव्यावृत्त्याश्रयत्वेन दृश्यविकल्प्यैकत्वाध्यवसायादुपकल्पितं सामान्यं साधारणरूपमस्त्येव।

यथा भ्रान्तमप्यनुमानं प्रमाणं न तथा सर्वाऽपि भ्रान्तिः प्रमाणम्। यथा मणिप्रभायां प्रदीपप्रभायां च सरसीरुहरागमणिभ्रान्तिः परस्परं न विशिष्यते, अथापि मणिप्राप्तिकृतोऽस्त्येव कश्चिद् विशेषः, तद्वदनुमानतदाभासयोरपि प्रमाणता तदितरता चेति सर्वं समञ्जसम्। न च भ्रान्तिरित्यनेन समानता, सामग्रीविशेषतो विशेषात्। भ्रान्तिरपि संबद्धपदार्थजनिता प्रमाणोदयनिबन्धना भवति, भवति च समीहितप्रतिपत्तिहेतुः। वस्तुतस्तु सर्वथा भिन्नयोरपि प्रत्यक्षानुमानयोः स्वस्वप्रामाण्याय परस्परमपेक्षाऽस्त्येव, नह्यनुमानं प्रत्यक्षोदयमन्तरेण प्रमाणम्, न च प्रत्यक्षं विकल्पोदयं विना। यथैव हि प्रत्यक्षं सन्निहितरूपादिमात्रग्राहिविकल्पान्तरेणैकत्वाध्यासे सति प्रवर्तकम्, तथाऽनुमानं सुतरां सन्निहिततरस्य ग्राहकमिति तत्रापि विकल्पान्तरेणैव भाव्यर्थाध्यवसायात् प्रवर्तकत्वम्। प्रत्यक्षस्यापि येन

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रूपेण वस्तुसंस्पर्शः, न तेन रूपेण प्रामाण्यम्; तस्य प्रवर्तकत्वाभावात्। विकल्पजननद्वारेणैव यथा प्रत्यक्षस्य प्रवर्तकत्वम्, तथा भ्रान्तस्याप्यनुमानस्य प्रवर्तकत्वं प्रामाण्यं च।

अपि च, यद्यपि जातिः सर्वथा निःस्वभावा, तथापि न शशविषाणादेरपि जातिरूपता। शाबलेयाऽगोव्यावृत्त्योः परस्परमपेक्षाभावतस्तद्व्यावृत्तिरेव सामान्यम्, न शशविषाणादिः। नहि तस्यापेक्षा क्वचिदस्ति। अतद्व्यावृत्तिस्तु निःस्वभावाप्यनुगामिप्रत्ययहेतुः सामान्यम्, प्रागभावादिष्वभावत्वमिव, द्रव्यादिषु पदार्थत्वमिव। अत एव सामान्यस्य भावाश्रयत्वम्, अभावाश्रयत्वम्, उभयाश्रयत्वं च सिध्यति। उभयाश्रितत्वेन तस्य वस्तुसत्त्वं निरस्यते।

एतेनेदं पर्यवस्यति—एकस्यैव विषयस्य द्वैविध्यम्, प्रतिपत्तिप्रकारस्य द्वैविध्यात्। प्रतिपत्तिभेदादेव प्रमाणभेदः, स च विषयभेदनिबन्धनः। एवं मेययोर्मानयोरन्योऽन्यं व्यवच्छेदरूपत्वात् प्रमेयान्तराणां प्रमाणान्तराणां वा न राश्यन्तरम्। यतो हि यदा साक्षाज्ज्ञानजननं प्रति शक्तत्वेनार्थः प्रतीयते, तदाऽसौ स्वेन रूपेण लक्ष्यमाणत्वात् स्वलक्षणम्; यदा तु पारम्पर्येण प्रतीयते, तदा तस्य सामान्यरूपेणैव लक्ष्यमाणत्वात् सामान्यलक्षणत्वम्। उपमानादीनि च पारम्पर्येणाप्यशक्तानि, अतो न तानि प्रमाणानि। अत्र पारम्पर्येण शक्तिरेव पर्युदासवृत्त्या शक्त्यभाव उच्यते। तैमिरिकोपलब्धस्य केशादेः शाब्दाभ्युपलब्धस्य चार्थतत्त्वस्य न साक्षान्न वा पारम्पर्येण शक्तत्वम्। इतश्च प्रमेयद्वैविध्यमेव। मेयाधीना च मानसिद्धिर्यतः, अतः प्रमाणस्यापि द्वैविध्यमिति पर्यवस्यति।

प्रमाणानां संप्लववादिदर्शनैरप्यंशतः प्रमाणविप्लवः स्वीक्रियत एवेति मे निवेदनम्। तत्रोपपत्तिरेव प्रमाणम्। तथा हि—ये खलु भाट्टमीमांसका व्यवहारे च तदनुयायिनो वेदान्तिनोऽज्ञातार्थज्ञानसाधनमनधिगताबाधितज्ञानविषयत्वमिति वा प्रमाणमिच्छन्ति, ते धारावाहिकबुद्धिस्थले उत्तरोत्तरेषां कालांशानां तद्विशिष्टभावानां वा पूर्वज्ञानेनाज्ञातानामवगमादेव प्रामाण्यं स्थापयन्ति। अत्र यदि पूर्वक्षणविशिष्टाद् वस्तुन उत्तरक्षणविशिष्टं वस्त्वन्यदिति स्वीकृतं तर्ह्यवश्यमेव तैर्धर्म्यंशे कथमप्यभेदेऽपि धर्मांशे पूर्वस्माद् भेदोऽपि स्वीकार्य एव। अन्यथा संवादापेक्षं प्रमाणमिति खण्डयतां कुमारिलपादानामेषा वाचोयुक्तिः—

> यत्रापि स्यात् परिच्छेदः प्रमाणैरुत्तरैः पुनः।
> नूनं तत्रापि पूर्वेण सोऽर्थो नावधृतस्तदा॥

विहन्येत; अत्र पूर्वस्मात् प्रमेयादुत्तरस्य प्रमेयस्य भेदादेव पूर्वस्माद् मानात् परस्य मानस्य भेद इति स्वीकर्तव्यम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

किं बहुना, अतिचिरन्तनस्य बौद्धनयस्य प्रभावं स्वानुरूपं व्याख्यातुं प्रवीणेन वेदान्तिना व्यवहारे भाट्टनयं स्वीकुर्वताऽपि प्रमाणचिन्तायामनास्थां प्रकटयता या प्रमाणव्यवस्था कृता, सा प्रमेयाधीनव्यवस्थामेवालक्ष्य विहितेति प्रतिभाति। तथा हि—वेदान्तिनां नये एकमेव ज्ञानस्वरूपं ब्रह्मेति सुविदितमेव। इदं न प्रमाणगोचरमित्यपि सुविदितमेव। किन्त्वविद्यावद्विषयाणि शास्त्राणीत्यधिकृत्य प्रमाणचर्चायां कृतायां ज्ञानगतस्य प्रत्यक्षप्रमाणस्य लक्षणं तैश्चित्त्वमेव कृतम्, "यत् साक्षादपरोक्षाद् ब्रह्म" इति श्रुतिं चानुकूलतया व्याख्याय ब्रह्मणोऽपरोक्षत्वमेव प्रतिष्ठापितम्। अस्यौपनिषदपुरुषस्य सिद्धये श्रुतिरपि प्रत्यक्षमिति प्रतिष्ठापिता, बौद्धनये यथा परमार्थसत् प्रत्यक्षमेव भवति। वेदान्तिनये निर्विशेषं महासामान्यं परमार्थसदिति, बौद्धनये निःसामान्यं स्वलक्षणमेव परमार्थसदिति त्वन्या कथा। अपि च बौद्धनैयायिका बाह्यार्थवादिनः सौत्रान्तिका भवन्ति, अतस्तेऽन्यतो व्यावृत्तं निःसामान्यं स्वलक्षणमामनन्ति। अद्वैतवादिनो हि बौद्धाः प्रत्यक्षरूपामेव विद्ययाऽविद्याऽपनये जाते सर्वज्ञतावाप्तिं स्वीकुर्वन्ति। सर्वविषयकं ज्ञानम्, ब्रह्मविषयकं ज्ञानमित्यत्र बहुधा शब्दभेद एव। एतेन परमार्थतत्त्वस्य प्रत्यक्षत्वेऽनयोः साम्यम्। प्रत्यक्षसहितानि सर्वाण्यपि प्रमाणानि संवृतिसत्यानीति वेदान्तिनः। प्रत्यक्षमेकं परमार्थम्, तदतिरिक्तं संवृतिसत्यमिति बौद्धाः। वेदान्तिनाऽपि प्रत्यक्षप्रत्यक्षातिरिक्तयोरस्तित्वभेदः स्वीकर्तव्य एव, अन्यथाऽपरोक्षमेव ब्रह्म वेदान्तवाक्यजन्यापरोक्षज्ञानेनैवावाप्यते, नान्येनेति व्यवस्था न स्यात्।

किञ्च, वेदान्तिनां परिभाषामालम्ब्यापि यद्युच्येत तदापि प्रमाणस्य प्रमेयाधीनत्वं सिध्यति। तैरपरमार्थसत औपाधिकस्य ब्रह्मणो वाक्यजन्यापरोक्षज्ञानगोचरत्वस्य स्वीकृतत्वात्।

संप्लववादिभिर्गौतमीयैरपि धर्म्यभिप्रायेणैव प्रमाणानां संप्लवः कथ्यते, न धर्माभिप्रायेण। अत एव जयन्तः संप्लववादं संसाध्य न्यायमञ्जर्याम्—"बौद्धोदितदोषजातसम्पातभीतिः" इति प्रतिज्ञायापि "प्रत्यक्षत्वं परोक्षोऽपि प्रत्यक्षोऽपि परोक्षताम्। देशकालादिभेदेन विषयः प्रतिपद्यते ॥" इत्यनेन संप्लववादं समर्थ्याऽपि देशकालादिभेदेनैवेत्युक्तवान्। अत एव न्यायवार्त्तिककारा तात्पर्यटीकाकृतश्च संप्लववैयर्थ्येऽपि व्यवस्थायां न वैयर्थ्यमित्युक्तवन्तः। एतेन संप्लववादस्य ध्वजः स्वगृह एवार्धनमितः ॥

श्रीजगन्नाथ उपाध्यायः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ज्ञानस्य निराकारत्वेऽद्वैतवादिबाह्यार्थसत्त्व-वादिनोर्विशेषः

प्रायः सर्वं एव भारतीयदार्शनिका ज्ञानस्य निराकारत्ववादिनो भवन्ति। तत्र बाह्यार्थ-सत्त्ववादिषु सांख्या बाह्यार्थसत्त्ववादिषु शाङ्कराद्वैतवादिनश्च वृत्तिज्ञानस्य, बौद्धेषु च विज्ञान-परिणामवादिनो विज्ञानस्य साकारत्वमामनन्ति। यद्यप्येषु बुद्धेर्जडत्वमामनद्भिः सांख्यैः प्राकृतत्वात्तस्याः साकारत्वं स्वीकृतम्, तथापि निगुर्णायाश्चितेर्निराकारत्वमस्त्येव। एवमेव वेदान्तिमते निर्विशेषब्रह्मणः, विज्ञानवादे च अनास्रवाया विमुक्तिकायाया विज्ञप्तिमात्रताया निराकारत्वमपि सुस्थिरम्। एतस्मिन्निबन्धे प्रमाणभूतस्यैव ज्ञानस्याधिकृतत्वान्निर्विशेषं ज्ञानं नालोच्यते। अत एवंभूतस्यैव ज्ञानस्य निराकारत्वे बाह्यार्थसत्त्ववाद-तद्विरोध्यद्वैतवादयोः केचिद् विशेषा आलोच्यन्ते।

सर्वेषामेव बाह्यार्थसत्त्ववादिनां नये ज्ञानस्य निराकारत्वं संमतम्। किन्तु तत्र सांख्यः कश्चिच्च सौत्रान्तिको ज्ञानस्य साकारत्वमप्यङ्गीकुरुतः, बाह्यार्थसत्त्ववादिषु बाह्यमालम्बनं मन्वानो ब्रह्माद्वैतवादी वृत्तिज्ञानं साकारमेव स्वीकरोति। निरालम्बं च विज्ञानमामनद्भि-र्विज्ञानाद्वैतशून्याद्वैतवादिभिः प्रमाणज्ञानस्य साकारत्वमेवोपस्थाप्यते। संक्षेपेणेमे एव बाह्यार्थ-सत्त्ववाद्यद्वैतवादिनोः साधर्म्यवैधर्म्ये।

अनेन साधर्म्यवैधर्म्यपर्यालोचनेनेदं प्रतीयते यद् बाह्यार्थसत्त्वसिद्धये ज्ञानस्य निराकार-त्वम्, अद्वैतवादसिद्धये च ज्ञानस्य साकारत्वमत्यर्थमपेक्ष्यते। अत एकोऽन्तो बाह्यार्थवादिनां न्यायवैशेषिकवैभाषिकमीमांसकजैनानाम्, द्वितीयोऽन्तो ब्रह्माद्वैतविज्ञानाद्वैतादिवादिनाम्। द्वयोरन्तयोर्मध्यगाः सांख्याः सौत्रान्तिकाश्च। अत एव सांख्यानां ब्रह्माद्वैतवादेन सह सुलभः संवादः, सौत्रान्तिकानां च विज्ञानाद्वयवादेन सह। एतत्सर्वमेवार्थजातं संक्षेपेणोपपाद्यते।

ज्ञानेषु योऽयमाकारः प्रथते स ग्राह्यभूतस्यार्थस्य, ग्राहकस्य वा ज्ञानस्येति सन्देहे-ऽर्थस्यैवेति निराकारवादिनः। एवं ग्राह्यभेदाकारग्राहि यद् ग्राहकज्ञानं तत् साकारम्। ग्राह्यस्या-कारभेदो यत्र नास्ति तदनाकारं निराकारं वा ज्ञानमिति पर्यवस्यति। अर्थाकाराकारितत्वं ज्ञानस्य नास्ति, अस्ति च ग्राहकत्वमिति निराकारवादिनां सिद्धान्तः। न्यायसिद्धान्ते

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रत्यक्षज्ञानस्य सन्निकर्षजत्वमस्ति, सन्निकर्षश्च वृत्तिरेव। वृत्तिर्हि व्यापारः। स हि व्यापारश्चरमभावी धर्मभेदः। स च प्रत्यक्षे संयोगादिरूपः, अनुमानादौ च ज्ञानरूपः। नह्यर्थाकारधारित्वं ज्ञानस्य। उक्तं च तात्पर्यटीकायां वाचस्पतिमिश्रैः— "वृत्तिर्हि व्यापारः। स तु व्यापार उच्यते यः कारकैः फले जनयितव्ये चरमभावी धर्मभेदः फलोत्पादानुकूलोऽपेक्ष्यते। यथा पटे जनयितव्ये तन्तुभिश्चरमभाविनः संयोगभेदाः, स्वर्गे जनयितव्ये यागेनात्मधर्मः, तथेहापीन्द्रियादिना प्रमाणेन प्रमायां फले प्रवृत्तेन तदुत्पादानुकूलः सन्निकर्षो ज्ञानं वा चरमभावी धर्मभेदोऽपेक्ष्यते" इति। एतेनैव हि चरमभाविधर्मभेदेन घटादिज्ञानस्य भेदो भवति। अत एव नैयायिकेषु नार्थाहिताकारवेदनमर्थवेदनं भवति, अपि तु निराकारं ज्ञानमर्थं वेदयदप्यात्मनो भिन्नमर्थं गोचरयति। अत एव च निराकारज्ञानवादिनां नये सर्वार्थसाधारणी प्रतिपत्तिर्न भवति, चक्षुरादिवृत्त्या बोधस्य तत्र तत्र नियमितत्वात्। तत्रैव तदिन्द्रियं नियम्यत इत्यत्र वस्तुस्वभाव एव शरणम्। एतेन न सर्वार्थेषु तस्य नियतत्वम्। अत एवोक्तमुदयनाचार्यैः—

अर्थेनैव विशेषो हि निराकारतया धियाम्।
क्रिययैव विशेषो हि व्यवहारेषु कर्मणाम्॥ [कुसुमा० ४।४] इति।

वैभाषिकेण वसुबन्धुना—"ततोऽर्थाज्जातं विज्ञानं प्रत्यक्षम्" इत्युक्त्वा "यस्यार्थस्य यद् विज्ञानं व्यपदिश्यते, यदि तत एव तद् भवति तत्प्रत्यक्षम्" इति स्पष्टीकृतम्। अस्मिन् मते विषयः कारणम्, ज्ञानं च कार्यम्। वैभाषिका हि कालत्रयवादिनो भवन्ति। एतेषां मते सर्वं संस्कृतं वस्तु जातिजरास्थित्यनित्यतादिलक्षणेन लक्षितं भवति। अत एवैतेषां मते पदार्थानां न तथा क्षणभङ्गित्वं यथा सौत्रान्तिकानाम्। अस्मादेव कारणात् पूर्वस्थितादेवार्थाज्जातं विज्ञानं प्रत्यक्षमिति लक्षणं संगतमापद्यते। अर्थाज्जातमित्यनेनेन्द्रियविषयविज्ञानसन्निपातः संयोगविशेष एव। यतो हि—रूपस्कन्धे परिपठितानां सप्रतिघानामिन्द्रियाणां तद्विषयाणां च स्पर्शः प्राप्तिलक्षणः संयोगविशेष एव। एतेषां नये बोधो निराकारः, अर्थसहभावी, एकसामग्र्यधीनश्च भवति। अयमेव बोधः प्रमाणम्। अत्र ज्ञानस्यार्थाकारात्मकत्वं न युक्तम्, प्रमेयरूपत्वापत्तेः।

न च प्रमेयरूपमेव प्रमाणं भवितुमर्हति, प्रमाणस्य प्रमेयग्राहकत्वेन प्रतिभासनात्। पूर्वं वाचस्पतिना वृत्तिरूपं सन्निकर्षमभिधायेन्द्रियाणां नीलपीतादिज्ञाननियमाय चरमभावी धर्मविशेषो यथा उक्तः, तथात्रापि व्यापारेण स्वस्वनीलादिज्ञानकर्मणि ज्ञानं सव्यापारमिव भवति। अभिधर्मकोशे वसुबन्धुनोक्तम्—"चक्षुः पश्यति रूपाणि सभागं न तदाश्रितम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विज्ञानं दृश्यते रूपं न किलान्तरितं यतः ॥" इति । चक्षुरिन्द्रियमेव विषयादिसान्निध्याद् रूपादि पश्यति, किन्तु सभागं पश्यति । चक्षुराश्रितं विज्ञानं रूपादि न पश्यति । यदि विज्ञानं रूपं पश्येत्, तद्यनुत्पन्नमन्तरितं चापि पश्येत् । एतेन वसुबन्धुवचनेन नैयायिकानां प्रमाणभूतानामिन्द्रियाणामिवैतेषां मतेऽपीन्द्रियादौ प्रमाणत्वमापततीति प्रतिभाति । अत एव सौत्रान्तिकानामिवैतेषां नये ज्ञानमेव न प्रमाणं तदेव च न फलम् । अपि त्वन्यद् ज्ञानम्, अन्यच्च फलम् । एतेनैवास्य निराकारवादित्वमपि स्पष्टं भवति । यतो हि चक्षुर्विज्ञानं यदि रूपं पश्येत्, तदा तद्रूपेणाकारितमपि भवेत् । इन्द्रियं तु न तथा, जडत्वात् ।

भट्टमते आत्मा, ज्ञानस्वरूपम्, विषय इति त्रितयं प्रकाशते । अत्र विषयो हि प्राकट्याश्रय इत्येव च विषयलक्षणम् । प्राकट्यं च विषयव्यवस्थापकः सर्वद्रव्यवर्तिसामान्यगुणः । घटः प्रकाशते, घटो भाति, प्रकटो घट इत्यादयो व्यवहाराः प्राकट्यनिबन्धना एव । भूतभविष्यतोः पदार्थयोरपि प्राकट्यमुत्पद्यते, अयं हि प्राकट्यधर्मो ज्ञाततापदेनाऽप्यभिधीयते । इन्द्रियादिसन्निकर्षेणायं ज्ञातताज्ञप्तो घट एव प्रत्यक्षीक्रियते । एतस्मिन्मते प्राकट्यरूपप्रमाकरणेन ज्ञानस्य प्रमाणत्वमाहुः । अत्र बाह्यद्रव्येष्वेव ज्ञातताख्यधर्मस्वीकारेणार्थाकारस्य ज्ञान आपादनं सर्वथा निरस्तमेव । एतेनैव चैतेषां मते ज्ञाततालिङ्गेन ज्ञानमनुमीयते, न त्वदः प्रत्यक्षीक्रियते । यतो ह्येतस्मिन्मते ज्ञातताख्यो धर्मोऽत्यन्तं बहिरेवावतिष्ठते, तस्येन्द्रियादिना संयुक्ततादात्म्यसंबन्धेन प्रत्यक्षत्वम्; अतो नात्र ज्ञानेऽर्थगताकारतापरामर्शलेशोऽपि ।

एवं जैनमतेऽपि ज्ञानस्य निराकारत्वमेव । तत्र ज्ञानं स्वव्यवसायात्मकं भवति । यथार्थस्य घटादेरर्थोल्लेखितया प्रतिभासनं भवति, तथा ज्ञानस्यापि ग्राहकत्वेन व्यवसायो भवति । अयं हि स्वव्यवसायोऽज्ञानावरणतिरस्कारेणैव सम्पद्यते, एवमज्ञानावरणतिरस्कार एवेन्द्रियाणामुपयोगः । एतेनैव ज्ञानं संपद्यते ।

पूर्वमुक्तं यद् बाह्यार्थत्रादिषु सांख्याः साकारत्ववादिनो भवन्ति । तत्र बुद्धिस्त्रैगुण्यविकारः, त्रैगुण्यं चाचेतनम् । अचेतनं हीन्द्रियप्रणालिकयाऽर्थाकारेण परिणमते, चितिशक्तिश्च सर्वथाऽपरिणामिनी नित्यचेतना । तस्या एव सन्निधानादयस्कान्तमणिरिव तत्प्रतिबिम्बोद्ग्राहितया चैतन्यरूपतामापन्नेव बुद्धिरर्थाकारेण परिणता सत्यर्थं चेतयते । तेन योऽसौ नीलाकारः प्रत्ययः स बुद्धेः परिणामः, स एव वृत्तिरित्युच्यते । अत्र बुद्धिसंक्रान्तस्य यो बुद्ध्याकारनीलसंबन्धः स आत्मनो व्यापार इव भवति । अयमेव व्यापारो वृत्तिरित्याख्यायते । इदं च

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बुद्धितत्त्वं स्वयमप्रकाशमपि चिच्छायापत्त्या प्रकाशतेऽर्थांश्च प्रकाशयति । अस्मिन्मते स्पष्टमेवा-चेतनायाः प्रकृतेरेवार्थाकारेण परिणामः स्वीकृतः । अतोऽत्र ज्ञानस्य साकारत्वं स्पष्टम् ।

सौत्रान्तिका हि बाह्यार्थवादिनोऽथ च परमाणुवादिनो भवन्ति । संचिताः परमाणव एव ज्ञानजन्मनि निमित्ता उक्ताः । अर्थसारूप्यवशाद्ध्यर्थप्रतीतिः । तेषां मते ज्ञानगतश्च विशेषोऽर्थकृतः । अयमेव सारूप्यपदेनाभिहितः, अतीतानागतकालस्याऽस्वीकारादेते क्षण-भङ्गवादिनः । क्षणभङ्गस्वीकाराद् नैयायिकवैभाषिकादिवन्न ज्ञानजन्म हीन्द्रियादिभ्यः, अपि तु सारूप्यवशादेव । यद्यपि ज्ञानमनेकहेतुकमस्ति, तथापि यत्कारणमाकारद्वारेणानुकुर्वदुदेति, तद्रूपं तेन कारणाकारेण गृहीतमुच्यते । यथा पुत्रजन्मन्यनेककारणानां सत्त्वेऽपि पितृरूपं पुत्रेण गृहीतमिति कथ्यते । अत्र ज्ञानाकारार्पणक्षमत्वमेव कारणानां कारणत्वम् । तच्च सारूप्य-मेव । न प्रमाणजनकत्वेन प्रमाणत्वम्, तथा सति चक्षुरादेरपि ज्ञानत्वं स्यात् । अनेक-प्रागभावेभ्य उदीयमानमपि विज्ञानमर्थस्यैवाकारं बिभर्ति, नान्यस्येत्यनुभवसिद्धम् । एवमर्थोऽपि एवमाकार एव भवति । यद्यन्याकारो विषयः स्यात्, तदा विज्ञानमितरस्याकारधारि भवद् विज्ञानं जनयेत् । अतो ज्ञानस्येदमेव विषयसारूप्यं यत् तस्य विषयसमानाकारतयोत्पाद इति । उक्तं हि धर्मोत्तरेण—"येभ्यो हि चक्षुरादिभ्यो ज्ञानमुत्पद्यते न तद्वशात् तज्ज्ञानं नीलस्य संवेदनं शक्यतेऽवस्थापयितुम् । नीलसदृशं त्वनुभूयमानं नीलस्य संवेदनमवस्था-प्यते" इति । निराकारज्ञानवादे नीलपीतादिज्ञानस्य व्यवस्था न स्यादतो ज्ञानस्य निराकारत्वं नाभ्युपेयम् । अन्यथाऽनुभवमात्रतया सर्वत्र विषये सदृशमेव ज्ञानं स्यात्, प्रतिविषयं भेदेन व्यवस्थापयितुं न शक्येत । उक्तं हि धर्मकीर्तिना—

अर्थेन घटयत्येनां न हि मुक्त्वाऽर्थरूपताम् ।
अन्यः स्वभेदाज्ज्ञानस्य भेदकोऽपि कथञ्चन ॥ २।३०५ ॥

अतोऽस्मिन् मते ज्ञानस्य भेदरूपतैव प्रमाणम् । फलं च प्रमाणादर्थान्तरं न भवति । एवं सौत्रान्तिका निराकारज्ञानस्य नीलपीताद्यनेकविषयसाधारणत्वाद् जनकत्वस्य च चक्षु-रादावपि सत्त्वेनातिप्रसङ्गाद् विषयाकारकृतमेव ज्ञानस्य विषयनियामकत्वमित्यवगच्छन्तः साकारमेव विज्ञानं प्रमाणमिति प्रतिपेदिरे । किन्तु सौत्रान्तिकाभिमतोऽयं साकारवादो बाह्यार्थमेव सर्वथाऽपलपति । तथा हि नीलपीताद्याकारेण प्रत्यक्षसिद्धं प्रतिविषयनियतं वेदनमेवार्थसंविदित्यत्र न विवादः । एतद्ध्यनुभूयमानं प्रतिविषयनियतं स्वप्रकाशात्मकत्वात् स्ववेदनमेव सिद्ध्यति, न त्वर्थस्य वेदनम् । यद्युच्येतार्थसारूप्येण ज्ञानमेवार्थवेदनमिति, तन्न;

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ज्ञानस्य निराकारत्वेऽद्वैतवादिवाह्यार्थसत्त्ववादिनोर्विशेषः

द्विचन्द्रकेशोण्ड्रकज्ञानादावर्थमन्तरेणाप्याकारस्य सत्त्वेन तस्य व्यभिचरितत्वात्। अर्थसारूप्यं ज्ञानस्यानुभवनिबन्धनमपि नास्ति। यतो हि परस्परं भिन्ना अणवः स्थूलाकारं ज्ञानं कथं सरूपयिष्यन्ति। यदणुस्वरूपं तत् स्थूलं नास्ति, अतस्तन्न ज्ञानारूढं प्रतीयेत। यच्च ज्ञानारूढं स्थौल्यं तदणुषु नास्ति। तस्मात् सारूप्यज्ञानस्यार्थरूपता नास्ति। विज्ञानवादे नीलादिरनुभवात्मक एव। स चानुभवो नान्यस्य कस्यचिद् बाह्यस्य, अपि तु विज्ञानस्यैव; प्रत्यक्षेणैव प्रतिविषयवेद्यत्वस्वीकारात्, अतोऽनुभवस्यैवापरोक्षता। एवं ग्राह्यग्राहकत्वायोगेनानुभवादन्यो बाह्योऽनुभाव्यो नास्ति। तस्मात् ज्ञानमपरोक्षतयोत्पन्नं स्वयमेव प्रकाशते, नान्येन केनचित् प्रकाश्यते। उक्तं च धर्मकीर्तिना—

नान्योऽनुभाव्यस्तेनास्ति तस्य नानुभवोऽपरः।
तस्यापि तुल्यचोद्यत्वात् स्वयं सैव प्रकाशते ॥२।३२७॥

यथा प्रकाशः प्रकाशात्मकत्वात् परनिरपेक्ष एव प्रकाशमानः स्वरूपस्य प्रकाशकोऽभिमतः, तथा धीरपि परनिरपेक्षा सती प्रकाशात्मनोत्पन्ना प्रकाशमानाऽऽत्मवेदिनी भवति। तस्मादवेद्यवेदकाकारा बुद्धिः प्रकाशात्मनोत्पन्ना स्वयमेव प्रकाशते, न तु तत्र ग्राह्यस्य ग्राहकस्य चाकारोऽस्ति। यस्माद् बाह्योऽर्थो नानुभूयते, तस्मादेकमेव विज्ञानमविद्योपप्लुतत्वाद् द्विरूपं भवति—बोधरूपम्, नीलादिरूपं च। एवं ज्ञानस्याविद्योपप्लुत्वात् ग्राह्यस्य व्यवस्था जाता। अतोऽर्थशून्यमपि ज्ञानं सविषयं जातमेव। तथा च यो ज्ञानाकारस्यानुभवः, स एवार्थस्य निश्चयः। ततश्च विज्ञानवादेऽपि ग्राह्याकारं प्रमाणम्, अर्थसंवित् फलं सौत्रान्तिकवदेवाविरुद्धम्। किं बहुना, विज्ञानपरिणामवादिनाऽऽचार्यवसुबन्धुना—

आत्मधर्मोपचारो हि विविधो यः प्रवर्तते।
विज्ञानपरिणामोऽसौ

इत्युक्त्वा "सर्वं विज्ञप्तिमात्रकम्" इत्यनेन विज्ञानाद्वैतवादे प्रवेष्टुं द्वारमेवापावृतम्। अत एव स्थिरमतिनोक्तम्—"सर्वं विज्ञेयं परिकल्पितस्वभावत्वाद् वस्तुतो न विद्यते, विज्ञानं पुनः प्रतीत्यसमुत्पन्नत्वाद् द्रव्यतोऽस्तीत्यभ्युपेयम्। विनैव बाह्येनार्थेन विज्ञानं संचिताकारमुत्पद्यते। न च परमाणव एव संचिताः सन्तस्तस्यालम्बनम्, परमाणूनामतदाकारत्वात्। नह्यसंचितावस्थातः संचितावस्थायां परमाणूनां कश्चिदात्मातिशयः, तस्मादसंचितवत् संचिता अपि परमाणवो नैवालम्बनम्। एवं बाह्यार्थाभावाद् विज्ञानमेवार्थाकारमुत्पद्यते" इति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतदालोचनेनेदं स्पष्टमिव भवति यत् सौत्रान्तिकनये ज्ञानेऽर्थकृतं सारूप्यं स्वीकृत्य न केवलं तस्य सारूप्यविरोधिविज्ञानवादे, अपि तु विज्ञप्तिमात्रतावादे पर्यवसानमभूत्।

अद्वैतवेदान्तनये प्रमाणावच्छिन्नविषयावच्छिन्नचैतन्ययोरभेदेन ज्ञानगतस्य प्रत्यक्षत्वमुच्यते। "तैजसमन्तःकरणं चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते, स एव परिणामो वृत्तिरित्युच्यते" इति वेदान्तपरिभाषायामुक्तम्। वृत्त्यवच्छिन्नचैतन्यमेव प्रमाणचैतन्यम्। प्रमाणं चेदं मेययोगाद् विषयाकारं भवति। यथा व्यञ्जक आलोकः प्रकाश्यस्य घटादेराकारवत्तां प्राप्नोति, एवं धीरपि सर्वार्थव्यञ्जकत्वादर्थाकारा भवति। उक्तं च सुरेश्वराचार्येण—

मातुर्मानाभिनिष्पत्तिर्निष्पन्नं मेयमेति तत्।
मेयाभिसंगतं तच्च मेयाभत्वं प्रपद्यते॥ इति।

मानस्य मेयाभत्वापत्तिरेव मानस्य साकारत्वम्। यथा विज्ञानाद्वैतसिद्ध्यर्थं विज्ञानस्य साकारत्वं प्रतिपादितं विज्ञानाद्वैतवादिभिः, तथैव ब्रह्माद्वैतसिद्ध्यर्थं ज्ञानस्य साकारवादित्वमपेक्षितम्। उक्तं चाभियुक्तैः—

व्यवहारमनाश्रित्य परमार्थो न देश्यते।
परमार्थमनाश्रित्य निर्वाणं नाधिगम्यते॥ इति,
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते। इति,
अध्यारोपापवादाभ्यां प्रज्ञानं ब्रह्म संज्ञितम्। इत्यादि च।

सौत्रान्तिकनये सारूप्यं विषयकृतं ज्ञानगतं च प्रदर्शितम्। किन्तु पश्चाद् विज्ञानवादपरायणैर्यथा यथा ते प्रत्यया अर्थाश्च चिन्त्यन्ते, तथा तथा विशीर्यन्ते। यैनैव सारूप्येणाकारेण सौत्रान्तिकैर्बाह्यार्थवादः स्थापितस्तेनैव सारूप्यमाहात्म्येन विज्ञानवादे विज्ञाने बाह्यार्थस्यारोपं स्वीकृत्य सर्वमेव बाह्यार्थजातं विकल्पमिति ज्ञात्वा वस्तुस्वभाव एवापह्नुतः। इत्यभिप्रेत्यैवोक्तं प्रमाणवार्त्तिके—

"यथा यथाऽर्थाश्चिन्त्यन्ते विशीर्यन्ते तथा तथा" इति।

अताद्रूप्येऽपि ताद्रूप्यप्रतिभासनमर्थानां स्वयमेव यदा रोचते तदाऽऽसहमाना वयं किं निषेद्धुं प्रभवामः। अतः सारूप्यादिवशादवस्तु यदि प्रतिभासते एव, तर्हि तस्याऽऽलीक्यमेव व्यक्तं भवति। उक्तं च धर्मकीर्तिना—

यदीदं स्वयमर्थानां रोचते तत्र के वयम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ज्ञानस्य निराकारत्वेऽद्वैतवादिबाह्यार्थसत्त्ववादिनोर्विशेषः

एवमेकस्मिन् विज्ञानात्मनि ग्राह्यत्वं ग्राहकत्वं च विरुद्धद्वयं यदि न युक्तम्, तह्येकस्याभावेन द्वयमपि निरस्तं स्यात्। विज्ञानस्यापीदमेव परमार्थत्वं यद् ग्राह्यग्राहकाकारशून्यत्वमिति। ग्राह्यत्वग्राहकत्वलक्षणाभ्यां शून्यत्वात् सर्वे धर्मा निःस्वभावाः सिद्ध्यन्ति। अत एवावधारिताद्वयविवेकैर्लोकबुद्ध्यैव बाह्यार्थचिन्ता क्रियते। उक्तं च धर्मकीर्तिना—

तदुपेक्षिततत्त्वार्थैः कृत्वा गजनिमीलनम्।
केवलं लोकबुद्ध्यैव बाह्यचिन्ता प्रतन्यते॥ इति।

एवं सौत्रान्तिकनये यथा सारूप्यद्वारा बाह्यार्थसत्त्वं ख्यापितम्, विज्ञानवादे च तद्द्वारैव बाह्यार्थस्यारोपितसत्त्वं प्रकटितम्, तन्निरासेन च परमार्थमद्वैतं प्रकाशितम्; तथैव वेदान्तनयेऽपि मेयाभत्वेन मानस्य साकारत्वं प्रकल्प्य यथाकथञ्चिद् बाह्यसत्त्वं स्वीकृत्यापि तेनैव बाह्यस्याध्यात्मिकत्वं सिद्ध्यति, अथ च सूक्ष्मतया विचार्यमाणे तेनैव तस्य सर्वथाऽपवादोऽपि विहितः, परमार्थतत्त्वं च प्रकटितम्।

यथा बाह्यार्थसत्त्ववादिनः सौत्रान्तिकस्य निरालम्बविज्ञानाद्वयवादे पर्यवसानम्, तच्च साकारज्ञाननिमित्तम्; तथा बाह्यार्थसत्त्ववादिनः सांख्यस्यापि सदद्वैतवादे पर्यवसानम्, एतदपि साकारज्ञाननिमित्तकमेव। सांख्यादयः सत्कार्यवादिनः, अतस्तेषां नये उत्पादात्प्रागपि कार्याणां कारणे सत्त्वमस्त्येव। तन्तुषु वर्तमान एव पटस्तन्तुभ्यो जातः, अतस्तन्तव एव पट इति तेषां प्रतीतिः। तन्तुष्वातानवितानवन्तो महापटाः कथमुत्पन्ना इति सांख्यपक्षे विचार्यमाणे विवर्तवाद एव शरणं समाधानाय। एवं तन्तुषु यथा पटो विवर्तते तथैव नित्यायां चिति प्रकृतिरपि। एवं क्रमेणाद्वैतवाद एव सांख्यस्य विरामः। अत एवैकस्मिन् तन्तौ विज्ञाते सर्वमपि पटादिकं विज्ञातं भवति। विज्ञातायां चैकस्यां चितिशक्तौ सर्वमेव प्राकृतविलसितं विज्ञातं भवतीति॥

श्रीजगन्नाथ उपाध्यायः।

(२)

ननु प्रथमं ज्ञानस्य साकारत्वं संभवति न वेति विचारे कीदृगाकारः साकारत्वे, यदि विषयाकारस्तर्हि विषयात् पृथक्त्वं न सम्पद्येत, अनाकारत्वे भानासंभवः, साकारवतामेवानुभवविषयत्वादिति चेन्न; ज्ञानस्य गुणत्वेन क्रियावन्निराकारस्याप्यनुभूतेः संभवात्। अत्र प्रमाणम्-"क्रिया नामेयमत्यन्तापरिदृष्टा पूर्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितुम्" इति महाभाष्यमेव। यदि ज्ञानस्याकारोऽभ्युपगम्येत तर्हि प्रथितगुणाच्च्युतिः स्यात्, स्याच्च गुणानां

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्रव्यत्वम् ; गुणे गुणानङ्गीकारादिति सिद्धान्तभङ्गश्च । एवं मत्वैव समैरपि दार्शनिकैर्ज्ञानस्य निराकारत्वं सिद्धान्तितम् ।

यद्यप्यत्राद्वैतिपदेन कस्याद्वैतिनो ग्रहणमिति प्रश्ने स्फुटत्वं नास्ति । बाह्यार्थसत्त्ववादिनोऽप्यनेके, प्रश्ने चैकवचनमेव; तथाऽपि प्रसिद्धत्वादद्वैतिपदेन केवलाद्वैतिन एवेति प्रश्नहार्दम् । इयान् विशेषो बाह्यार्थसत्त्ववादिनैयायिकापेक्षया —

(१) परेषामिन्द्रियविषयसन्निकर्षेण ज्ञप्तिः प्रजायते, न च ज्ञप्तौ मनसो विषयाकारवृत्तेरपेक्षा; सिद्धान्तिमते ज्ञानेन्द्रियं द्वारीकृत्य विषयस्थलं गत्वा मनो विषयाकारेण परिणमते, ततश्चिच्छायापत्त्या ज्ञानं संभवति ।

(२) पिठरपाकवादिनः पीलुपाकवादिनश्च परमाणुद्वयसंयोगेन द्व्यणुकं ततस्त्र्यणुकमित्यादिः, सिद्धान्तिनः शबलब्रह्मण एव जगत उत्पत्तिः । न च स्वभावतः, विशिष्टदेशकालादिनिमित्तानामिहोपादानात् । कालस्वभावादयो ब्रह्मरूपास्तर्हि नाममात्रे विवादः । "जन्माद्यस्य यतः", "यतो वा इमानि भूतानि जायन्ते", "तस्मादात्मन आकाशः सम्भूत आकाशाद्वायुर्वायोरग्निः", "आकाशस्तल्लिङ्गात्", "अत एव प्राणः", "सर्वाणि वा भूतानि प्राणमेवाभिसंविशन्ति" इत्यादिसूत्रश्रुतिषु विभिन्नकारणताऽवलोक्यते, तथापि तत्राकाशप्राणादीनां ब्रह्मरूपतैव न लौकिकाऽऽकाशादिरूपता, तेषां जडत्वात् । "सैषा भार्गवी वारुणी विद्या परमेव्योमन् प्रतिष्ठिता", "ॐ कं ब्रह्म", "ॐ खं ब्रह्म", "यदा सुप्तः स्वप्नं न कञ्चन पश्यति, अथास्मिन्प्राण एवैकधा भवति, तदैनं वाक् सर्वैर्नामभिः सहाप्येति" इति विभिन्नसृष्टिक्रमोऽपि न दोषावहः, ब्रह्मकारणताया अव्यभिचारात् ।

(३) अद्वैतिनो ब्रह्मातिरिक्तसत्ताकत्वाभावः, परेषामाकाशादीनामपि परमार्थत्वम् ।

(४) सिद्धान्तिमते ब्रह्मोपासनयाऽपवर्गः, परेषां सप्तपदार्थानां षोडशपदार्थानां वा तत्त्वज्ञानान्निःश्रेयसाधिगमः ।

(५) सिद्धान्तिनो ज्ञानानां स्वतः प्रामाण्यम्, परेषां परतः ।

(६) अद्वैतिनः परमार्थदशायामात्मनोऽद्वैतत्वम् । परेषां द्वैविध्यम्—जीवात्मत्वं परमात्मत्वं च, "संख्यादिपञ्चकं बुद्धिरिच्छा यत्नोऽपि चेश्वरे" इत्यादिना परमेश्वरस्याऽपि सगुणस्योपपादितत्वात् । सिद्धान्तिमते तु "निर्गुणं निष्क्रियम्" इत्यादिना निर्धर्मकत्वस्यैवोपपादनात् ।

(७) सिद्धान्तिनः पदार्थप्रादुर्भावाद्भिन्नो नाशक्रमः । परेषां परमाणुक्रिययैव द्व्यणु-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कोत्पत्तिः, तत्क्रियायां सत्यां नाशः। 'अपरिग्रहाच्चात्यन्तमनपेक्षा'' इति सूत्रे भगवता शङ्कराचार्येण वैशेषिकमतस्य विस्तरेण खण्डितत्वाद् द्रव्यगुणकर्मसामान्यविशेषसमवायाभावादिव्यवहारः स्वसाङ्केतिकविषयो न सर्वसिद्धान्तसंमतः।

(८) न्यायविदो भ्रमस्थलेऽन्यथाख्यातिं मन्वते। तथा हि - शुक्तिशकले हट्टस्थरजतत्वस्य ज्ञानलक्षणप्रत्यासत्त्याऽऽरोपाद्रजतमिदमिति व्यवहारः। सिद्धान्तिमते आविद्यकरजतोत्पत्त्या रजतमिति व्यवहारः, स च प्रातिभासिकः। हट्टस्थरजते रजतमिदमिति व्यवहारो लौकिकः। "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे'' इति परमार्थदशायां ब्रह्मैव, ब्रह्मेतरेषामाविद्यकत्वात्। तदुक्तम्—"तदनन्यत्वमारम्भणशब्दादिभ्यः'' इति। परमार्थदशायां कार्यकारणयोरनन्यत्वाभ्युपगमात् - "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'' इति।

(९) अभावानां चतुष्टयत्वं स्वसङ्केतितमेव, तत्रापि प्रागभावस्य विनाशित्वे सत्यभावत्वम्, ध्वंसस्य च जन्यत्वे सत्यभावत्वम्। सर्वमेतत्फल्गुतमम्, विचारासहत्वात्। सिद्धान्तिमते त्वभावस्याप्यधिकरणरूपत्वेन ब्रह्मारिक्तत्वाभावात्।

नैयायिकमतापेक्षया कापिलमतमतिरिच्यते। कापिलाः पञ्चविंशतितत्त्वानामभ्यासान्मुक्तिमभिलषन्ति। ते च मूलप्रकृतितो जगतो जननं मन्वते। तेषां मते कार्यकारणयोरुभयोः सत्यत्वम्—"असदकरणादुपादानग्रहणात् सर्वसंभवाभावात्। शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्॥'' [सां० का० ९] इति। एषां मते पुरुषाणां च बहुत्वम्।

अत्रेदं विचार्यते—प्रकृतेः स्वातन्त्र्येण कारणत्वमाहोस्वित् चेतनाधिष्ठितत्वेन? यदि चेतनाधिष्ठितत्वेन तदा तु नाममात्रे विवादः, स्वातन्त्र्येण कारणत्वे रचनानुपपत्त्या तन्मतस्याऽपि विचारासहत्वात्। वत्सविवृद्ध्यर्थं क्षीरादीनां प्रवृत्तिः सा च गोरधीना, नद्यादिषु जलादीनां प्रचलनमप्युच्चावचभूम्यधीनमेव, "अक्षरात्परतः परः'' इति गीतोपनिषद्विरोधाच्च। किञ्च, सांख्याः क्वचित् सप्तेन्द्रियाण्यनुक्रामन्ति, क्वचिदेकादश। तथा क्वचिन्महतस्तन्मात्रसर्गमुपदिशन्ति, कुत्रचिच्चाहङ्कारादिति परस्परविरुद्धम्।

मोक्षमार्गोऽपि सांख्यशास्त्राभिमतो नामोदमावहति, तेषां मते तमसो नित्यत्वेन विवेकख्यात्याऽविवेकख्यातेर्वारयितुमशक्यत्वात्। कदाचिद्भूरिश्रमेण वारणेऽपि छिन्नबदरीव भूयो भूयो दूर्वाऽङ्कुरायत एव। अतो हेतोः सांख्योक्तमोक्षमार्गो न लोकहित इति।

अवशिष्टमिदं योगाचारादीनां मतम्। भगवतो बुद्धस्य चत्वारः शिष्याः। तत्र

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

च सौत्रान्तिकवैभाषिकयोस्तावद् बाह्यार्थविषयेऽस्तित्वप्रत्तिपत्तिः। तन्मते उभयहेतुकः समुदायोऽभिमतः, परन्तु सोऽनुपपन्नो भवति; समुदायिनामचेतनत्वेन समुदायस्य कथमपि वक्तुमशक्यत्वात्। संहन्तृपदार्थस्याङ्गीकारे तु नाममात्रेण विवादः। किञ्च, स्थिरस्य भोक्तुरभावे भोगो भोगार्थं एव स्यात्, मोक्षश्च मोक्षार्थः। मुमुक्षुकथायाः खपुष्पायमाणत्वं स्यात्। अवस्थायित्वे क्षणिकवादविरोधः, तस्मान्न तयोर्मतमनुकूलम्।

योगाचारो विज्ञानवादी। सोऽप्युपेक्षणीय एव। सर्वस्य ज्ञानाकारत्वे नीलज्ञानं पीतज्ञानमादिज्ञानविषये भेदज्ञप्तिरनुपपन्ना। किञ्च, कथञ्चिद्भेदस्योपपादनेऽपि भोगो भोगार्थं एव मोक्षो मोक्षार्थं एवेत्यादिदूषणानामव्यावर्तकत्वम्। सिद्धान्तिमतेऽपि सर्वस्य ज्ञानाकारता, परन्तु सा न योगाचारमतानुकूला "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुत्या ब्रह्मणो नित्यज्ञानरूपत्वेन परमार्थदशायां ज्ञानरूपत्वेऽपि तस्य मतस्य दूरत्यक्तत्वात्, व्यावहारिकायां सत्तायां विषयस्य तावत्कालपर्यन्तं सत्यत्वात्, घटोऽयं पटोऽयं घटज्ञानं पटज्ञानमित्यादिप्रतीतीनामसति बाधकत्वे रोद्धुमशक्यत्वाच्च। शून्यवादिमतं तु सर्वथा लोकविलक्षणत्वादुपेक्षणीयमेव।

किं बहुना, भक्तवरतुलसीदासेनाऽपि निर्गुणोपासनाया दुःसाध्यत्वेन निर्गुणपक्ष उपेक्षितः। संसारस्य मिथ्यात्वं तु विनयपत्रिकायां बहुषु स्थलेषूपपादितम्। यवनकविज्यायसिना पद्मावतीप्रकृतिरूपोपासनयाऽपि भारतीयसिद्धान्तः प्रदर्शितः। कबीरेण तु बहुषु स्थलेषु कण्ठत एव निर्गुणब्रह्मणः प्रतिपादनं विहितम्।

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि।
तद्विद्यादात्मनो मायां यथा ऽऽभासो यथा तमः॥

इत्यादिना श्रीमद्भागवतेऽपि जगतो मिथ्यात्वमुपपादितम्।

मुक्तकच्छानां मतापेक्षया विवसनसमयो भिन्नः। विवसना जीवाजीवास्रवसंवरनिर्जरबन्धमोक्षानामन्वते, संक्षेपतस्तु जीवाजीवौ, सप्तभङ्गीन्यायं च। सप्तभङ्गीन्यायेन सर्वस्य वस्तुजातस्यास्थिरत्वे स्वरूपस्याप्यस्थिरत्वे स्वात्मन्यप्यसन्देहाभावः, तथा च स्वरूपविस्मृतिः। स्वसिद्धान्तेऽस्थिरत्वे जैनमतस्य प्रविलापनं स्यात्, प्रत्यगात्मनः सदा सर्वदाऽबाध्यत्वेन तथा नेति वक्तुमशक्यत्वात्। तस्मादुपेक्षणीयं जैनमतमिति।

केवलनिमित्तकारणवादिनो मतमस्ति, तदपि न सिद्धान्तिसम्मतम्, "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" इतिसूत्रेण भगवता व्यासेन स्वयमेव प्रत्युक्तत्वात्। नारदपाञ्चरात्रानुयायिनः श्रीकृष्णस्य परब्रह्मत्वमभ्युपगम्य वासुदेवाच्च सङ्कर्षणाख्यो जीव उत्पद्यत इति कृष्णस्य परमात्म-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्वमुपनिषत्प्रतिपाद्यत्वं चाङ्गीकुर्वन्ति। "कृषिर्भूवाचकः शब्दो णश्च निर्वृत्तिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥" अत्र भूपदार्थस्य सत्पदार्थत्वात् निर्वृत्तेश्चानन्दरूपत्वेन सदानन्द-रूपत्वे सच्चिदानन्दरूपत्वं ब्रह्मणः संभवति, "आनन्दं ब्रह्मणो विद्वान् न बिभेति कदाचन" इति। अवताराश्च सर्वसम्मताः। केवलमत्र सङ्कर्षणाख्यो जीव उत्पद्यत इत्येवांशो विरुद्धः, जीवस्योत्पत्तेरभावात्। सर्वसत्त्वस्येश्वरत्वं किञ्चिज्ज्ञस्य जीवत्वमुपाधिसिद्धत्वं न त्वस्मदादि-वदुत्पत्तिमत्त्वम्। "एषोऽणुरात्मा चेतसा वेदितव्यः" इत्यादिषु जीवस्याणुत्वमुपपादितम्, तच्चोपाधिकृतमेव न तु वास्तवम्; "एकमेवाद्वितीयं ब्रह्म" इत्यादिसिद्धान्तविरोधात्, "तत् त्वमसि" इत्यत्र जीवात्मपरमात्मनोरभेदस्यैव दर्शनात्। शुद्धाद्वैतवादिभिः षष्ठीसमासमभ्युपगम्य जीवस्याणुत्वमुपपादितम्, तच्च केनकठानन्दवल्लीछान्दोग्याद्युपनिषद्विरोधान्न मोदावहम्। ब्रह्मातिरिक्तस्य मिथ्यात्वं श्रीमद्भागवते —

आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः।
योऽविद्यया युक् स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ॥ इति।

गीतोपनिषदा च जगतो मिथ्यात्वस्योपपादितत्वेनाद्वैतपथस्य परमरम्यत्वादिति ॥

श्रीमंछारामद्विवेदी।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दृष्टिसृष्टिवादः

प्रथमा व्यापिका दृष्टिसृष्टिः

दृष्ट्या भोग्यस्य विषयस्य जगतः सृष्टिः। उपभोगसाधनं विषयः। सर्वमपि कार्यजातं साक्षात्परम्परया वोपभोगं जनयतीति नैयायिकभणितिः। विषयता भोगजनकता विषयेषु दृष्टि-प्रयुक्ता। जीवानां सांसारिकपदार्थानां विलक्षणग्रहणमेवोपभोगजनकमिति यावत्। कार्य-जनकमदृष्टमपि दृष्टिद्वारेणैवोपभोगजनकम्। 'अज्ञातोऽपि वह्निर्दहति' प्रभृतिप्रवादोऽप्यापातत एव विरोधी; दाहदृष्टेः शरीरात्मदृष्टेश्च सत्त्वात्।

मूलम्

मूलमस्य नान्वेषणीयमास्ते, भारतीयसंस्कारेष्वस्य प्ररूढत्वात्। "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" इत्यस्य यन्मूलं तत्सर्वमस्य मूलम्। चार्वाकाणामाधुनिकमनोविज्ञान-प्रणयिनां मस्तिष्कवादो मनआत्मवादो वा स्यात्, नात्र जीवात्मस्वरूपविवेचनं प्रक्रान्तम्। यत्किञ्चिद्वाऽस्तु जीवस्वरूपम्, मनःसारत्वं तु तस्य सर्वत्र—"मनोमयो भारूपः", "प्राणबन्धनं हि सौम्य मनः" इत्यादिश्रुतेः, "मनआख्या जीवरूपता" इत्यादिशाङ्करभाष्याच्च।

जीवानां विषयेषु विलक्षणा अननुगम्या अनन्ता दृष्टयः। कासाञ्चिदेव दर्शनेष्वनु-गमः। भोगस्य सुखदुःखान्यतरसाक्षात्कारत्वेन यद्यप्यनुगमो वर्तते, तथापि सुखदुःखजनकत्वं दृष्टीनामननुगतमेव।

लौकिकव्यवहारे स्थानम्

लौकिकव्यवहारेषु सूक्ष्मेक्षिकयाऽयं दृष्टिसृष्टिप्रकारोऽवलोक्यताम्। चिरान्मित्रतां गतोऽपि कदाचन शत्रुर्भवति, तत्र मित्रत्वशत्रुत्वे प्रति निरूपकजीवदृष्टिं विना किं दृष्टं कारण-मित्यालोच्यताम्। विशेषाचरणमिति चेन्न, तत् सर्वत्र तथा करोति। आचारगताऽनुकूलता प्रतिकूलता वा जनिकेति चेत्, वेदनामन्तराऽनुकूलत्वादिकमनुगम्यताम्। नात्र विस्तरस्या-वसरः। साहसं क्रियताम्। मानसिकपदार्थप्रवेशमन्तरा शत्रुत्वमित्रत्वादिपरिष्कारे विफलतायां जीवेन मनसा दृष्ट्या वा सर्वमिदं सृष्टमित्यवधार्यताम्। एवमेव पुत्रत्वपितृत्वभ्रातृत्वादिकमपि दृष्टिसृष्टमालोचनीयम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

काव्यनाटकादिषु स्थानम्

काव्यनाटकादिषु रसास्वादप्रक्रियाऽपि दृष्टिविलसितैवावधार्यताम् । विभावादीनां शब्दार्थयोर्वा भावना दृष्टिप्रकार एव । साधारणीकरणव्यापारेणाप्यगम्यत्वप्रयोजिका दृष्टिरपसार्यते, रतिप्रयोजिका विलक्षणा दृष्टिः पुरस्क्रियते । आलोक्यतां पण्डितराजजगन्नाथस्य मानसिकनिश्चयघटित आलम्बनकान्तात्वादिपरिष्कारः ।

दर्शनेषु स्थानम्

सोऽयं दृष्टिसृष्टिवादः प्राच्यपाश्चात्त्यसकलदर्शनवनीविहरणशीलो दर्शनराज इति किञ्चित् सूचयामि । तत्र भारतीयदर्शनानां बन्धमोक्षविवेचनोद्देश्यतया प्रवृत्तेस्तत्रायं स्फुटमव भासेत, ममाल्पपरिचितेषु विभिन्नोद्देश्यतया प्रवृत्तेषु पाश्चात्त्यदर्शनेषु चात्यल्पमेव स्फुरेत् ।

तथा च न्यायवैशेषिकयोः—शरीरादिष्वात्मदृष्टिर्बन्धकारिणी, अनात्मदृष्टिश्च मोक्षहेतुः । शास्त्रोपदेशेन दृष्टिसृष्टमात्मत्वं विनाश्यते, अनात्मत्वं सृज्यते । न तत्त्वज्ञानेन शरीरादीनि जीवन्मुक्तस्य विनश्यन्ति, अपि तु पूर्ववदेव तिष्ठन्ति, केवलं दृष्टिसृष्टं परिवर्तते; एवमेव शरीरादिषु दुःखत्वभावनोपदिश्यते शास्त्रेण, तत्रानादिवासनावशसुखसाधनत्वदृष्टी रागादिदोषजनिकाऽपसार्यते, दुःखसाधनत्वदृष्टिश्च वैराग्यजनिका पुरस्क्रियते । अत एव विरक्तस्य तत्त्वज्ञस्य जीवन्मुक्तस्य शरीरादिस्वरूपं किञ्चिन्न परिवर्तते, केवलं वस्तुग्रहणस्वरूपमेव विलक्षणं जायते ।

सांख्येऽपि वाचस्पतेर्वचो विविच्यताम् एकैव नायिका सत्त्वपरिणामेन कञ्चित् सुखयति, राजसेन परिणामेनान्यं दुःखाकरोति, अपरं च तामसेन मुग्धं सम्पादयति । तत्रापि सात्त्विकत्वादिकं दृष्टिगतमेव वैजात्यं सुखादिप्रयोजकमन्तत आयाति ।

वेदान्तेऽप्यहंममादिविभिन्नाध्यास एव सर्वानर्थमूलम्, तत्तदध्यासनिवृत्तिश्च पुरुषार्थ इति स्फुटमेव । अध्यासश्च मिथ्यादृष्टिरेव ।

बाह्यास्तित्ववादिबौद्धानामपि "दर्शनहेयाः, भावनाहेयाः" इत्यादिना विविधाः क्लेशा वर्णिता सन्ति । तत्र हानं न संयोगादिसंबन्धविनाशेन पार्थक्यादिकरणं संभवति, अपि तु दृष्टिपरिवर्तनमेव । अत एव बुद्धस्य भगवतः केवलज्ञानात् प्राग् यथा संसारः प्रावर्तत, तथा केवलज्ञानानन्तरमपि । अत एवाज्ञजनान् वीक्ष्योपदेशाय करुणा समुदैत । केवलमयमेव विशेषो यत्प्राग्यथा प्रभावस्तस्य चेतसि जगतस्तथा न बोधानन्तरमिति दृष्टिविलास एव ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एषा च व्यापिका दृष्टिसृष्टिर्दृष्टिरेव भोगसृष्टिकरीत्यभिप्रायेण वर्णिता। बाह्यं जगत् प्राकृतिकमीशसृष्टं यथा साधारणम्, तथाऽस्तु विशेषभोगसंपादिका जीवदृष्टिरेव। यथा नानाविधपुष्पपल्लवादिपरिपूर्णविरुद्धिटपादिसमृद्धवाटिकायां साधारणरूपायां पृथग्जनस्य, वनस्पतिविज्ञानविज्ञस्य, कवेश्चावलोकने साधारणं नेत्रमालोकश्च, परं दृष्टिभेदोऽवश्यं जायते, ततश्चेतसि प्रभावविशेषश्च; तथैव साधारणे वस्तुनि जीवानां विभिन्ना दृष्टिर्नानाभोगं जनयति।

द्वितीया दृष्टिसृष्टिः

ततः परमिदमालोचनीयं यत् साधारणे वस्तुनि विशेषदृष्टिः कथमुदियात्? समानालम्बनतया समानैव युज्यते। विशेषालम्बनतया यदि विशिष्य दृष्टिस्तदा स विशेषः कस्य? यदि विषयस्य, तदा साधारण एव सर्वजनग्राह्यः कथं जीवभेदेन दृष्टिं विशेषयेत्? एवं समस्यायां द्विधा भारतीयदर्शनशैली—प्रथमा वेदान्तिवाचस्पतिमिश्रस्य। नाना जीवाः, जीव एव जगदुपादानम्, जीवभेदेन नाना जगत्, स्वसृष्टमेव स्वेन सृज्यते, दृष्टिभेदेन सृष्टिरिति दृष्टिसृष्टिः। विषयगत एव विशेषः, विशेषविषयालम्बना च विशेषदृष्टिः।

अस्योपपादनं तु ब्रह्मविषयकमज्ञानं जीवे, अज्ञानस्य परिणामो जगज्जीवे तिष्ठेत्। जीवनिष्ठविद्यया जीवगताज्ञानस्य ब्रह्मविषयकस्य विनाशात् तत्कृतसंसारविलयाद् बद्धमुक्तादिव्यवस्था, शुकादीनां मुक्तिश्रवणम्, "तद् यो यो देवानां प्रत्यबुध्यत स एव तदभवत्" इत्यादिश्रुतिश्च यथावदुपपद्यते। परमेश्वरकृतसृष्ट्युत्पादनपरकश्रुतीनां जीवगताज्ञानविषयतया जीवाधिष्ठानतया वा नेयता। क्वचित् सृष्टिपरकवाक्य आत्मपदं जीवपरमेव। स्वाप्निकसृष्टिर्यथा जीवोपादानिका, तथा जागरदृष्टिरपि। जीवस्य ज्ञेयताबोधिका अपि श्रुतयः—"न वाचं विजिज्ञासेद् वक्तारमेव विजानीयात्" इत्यादयः। याज्ञवल्क्यवाक्येऽपि जीवात्मैव द्रष्टव्यत्वेनोपदिश्यते, तस्यैव पत्नीपतिकामादिसंबन्धोपपत्तेः।

अत्र मूलं तु स्वप्नानन्तरं बोधे जीवात्मनः प्राणादिसकलप्रपञ्चसृष्टिश्रुतयः, "पुरत्रये क्रीडति जीव एष ततस्तु जातं सकलं विचित्रम्" इति श्रुतिः, "तस्यैव नित्यतृप्तस्य सदानन्दमयात्मनः। अविच्छिन्नस्य जीवस्य संसृतिः कथ्यते बुधैः॥" इत्यादिस्मृतयश्च। जीवसृष्टिपराण्याचार्यवचांसि प्रसङ्गत उदाहरिष्यमाणान्यप्यत्र योज्यानि। मनोमयसृष्टिपराण्यपि प्रमाणान्यत्र साधकानि।

यद्यपि कतिपयवेदान्तिभिरेकजीववादपक्ष एव दृष्टिसृष्टिवादः समुपपादितः, परमन्यैर्वादविशेषमपुरस्कृत्य जीवसृष्टिपक्षं वा पुरस्कृत्यायं वादः सामान्येन व्याख्यातः। मम च कस्मिन्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दृष्टिसृष्टिवादः

दर्शने कीदृशी दृष्टिसृष्टिरित्यन्वेषणे प्रवृत्तस्य सर्वत्रैव दृष्टिसृष्टिमालोचयतो नेदमप्रासङ्गिकं संभवति, जीवभेदेन प्रपञ्चनानात्वे दृष्टिसृष्टेरवश्यमुल्लासात्। नैयायिकैर्ग्राहकभेदेन द्वित्वादीनां नानात्वमङ्गीक्रियते, तदाऽपेक्षाबुद्धिजन्यत्वमपि स्वीक्रियते। अस्यैव नानाजीववादस्य व्याख्यातृणां नाना व्याख्या—एक एव प्रपञ्चः, नाना प्रपञ्चः, क्रमिकसृष्टिः, युगपत्सृष्टिरित्यादि; तथैव ममापि मतान्तरमवसेयम्। तथा चेयं द्वितीया दृष्टिसृष्टिः।

तृतीया दृष्टिसृष्टिः

नानाजीववादे विषयगत एव विशेषस्तदा विषयेण साकं समेषां पृथग्जनादीनां समाने सन्निकर्षे कथं न सर्वैः सकलो विशेषो गृह्यते। जीवेन स्वसृष्टमेव गृह्यते, न च सकलो विशेषो जीवैः सर्वैः सृष्ट इति चेद् जीवेन सृष्टं तद्बहिः सृष्टमिति कुत आयातम्? जीवेन स्वान्तरेव सृष्टमित्येव स्यात्, आन्तरस्य जीवस्य बहिः संबन्धासंभवात्; तथा च जीवेन स्वान्तरेव सृज्यते। जीवो दृष्टिर्बुद्धिर्वा। बुद्धिगत एव बौद्धो विशेषः। तस्याः सृष्टिश्च वासनाद्वारा विलक्षणदृष्टिसमुत्थापकत्वम्। वासना चातीन्द्रियो धर्मविशेषो योगाचाररीत्या दृष्ट्यन्तरं वा।

मन्यतां च युक्तमिदम्—समेषां पूर्वोक्तां वाटिकामवलोकयतां प्रणिहितमनश्चक्षुरालोकाः समानाः। को विशेषकः स्याद् दृष्टेर्विज्ञानविदः कवेर्वा, वासनाविशेष एव विशेषः स्यात्। मनसो वासनाया वा विशेषकत्वे बौद्ध एव विशेषः समायाति। तथा च दृष्टेरेव स्वेन स्वाकारस्य ग्रहणम्। दृष्ट्या दृष्टिगतैव सृष्टिरिति तृतीया दृष्टिसृष्टिः।

अत्र च दर्शने सर्वं प्रायो योगाचाररीत्या। योगाचारेण बहिर्वस्तु नाङ्गीक्रियते, सर्वं बौद्धमेव मन्यते। अत्र दर्शने च बहिरपि वस्तु वर्तते, आन्तरमपि। परं गृह्यते आन्तरमेव। बाह्यसंवादात् तस्य ग्रहणस्य प्रामाण्यमुपपद्यते, विसंवादाच्च भ्रमत्वम्। नात्र लघौ निबन्धे विस्तरस्य स्थानम्। नागेशभट्टकृतवैयाकरणसिद्धान्तलघुमञ्जूषायां बौद्धार्थनिरूपणे सम्यगुपपादितमास्ते। समानाधिकरणौ बौद्धावेव शक्तशक्यार्थौ। ज्ञानेच्छाकृतीनां बौद्धार्थसमानविषयकत्वेन कार्यकारणभावः। विकल्पज्ञाने बौद्धार्थ एव विषयीक्रियते। अतीतविषयकनलादीनां बौद्ध एव शक्तिग्रहो बोधश्चेति समुपपादितमास्ते।

अस्यास्तृतीयदृष्टिसृष्टेः पाश्चात्यकाण्टदर्शनेऽपि स्थानं पश्यामि। तथा हि—प्रत्ययवादि प्रत्यक्षवादि च वैक्रम्यामष्टादश्यामेकोनविंश्यां च शताब्द्यां वर्तमानं जर्मनदेशीयमिदं दर्शनम्। अस्ति ज्ञानातिरिक्तं वस्तुरूपमेकरसं तथाताशब्देनानूद्यमानम्। तथाशब्दात् तल्प्रत्ययेन तथाताशब्दः। तस्य ज्ञानं बोधो मानसम्। प्राथमिकं ज्ञानं देशकालावच्छिन्नं साक्षा-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

च्छब्देन व्यपदेश्यस्वरूपम्, तदनन्तरं च सविकल्पस्थानीयं हिन्द्यां समझशब्देन संस्कृतेऽव-गमादिशब्देन व्यपदेशार्हं ज्ञानान्तरम्, येन वस्तु ज्ञातमिति क्रियते व्यवस्थाप्यते। ज्ञातमपि वस्तु मानसमेव। व्यवस्थाव्यवस्थितो विशेषश्च मानस एव। पूर्वोक्तं वस्तु त्वज्ञेयमेव। अज्ञेयवादोऽ-ऽपि दर्शनस्य नामान्तरम्। व्यवस्थानामनुगमाय प्रथमं सामान्यतो गुणः परिमाणं प्रकारः संबन्ध इति चतस्रः प्रतिज्ञा उच्यन्ते। प्रत्येकं त्रिप्रकारतया ता द्वादश भवन्ति। गुणव्यवस्थया-स्तित्वनास्तित्वानन्तत्वानि संगृह्यन्ते, परिमाणेनैकत्वबहुत्वपूर्णत्वानि, प्रकारेण निश्चितत्वानिश्चित-त्वस्थिरत्वानि, संबन्धेन च वस्तुगुणयोः कार्यकारणयोः पारस्परिकश्च संबन्धविशेषः कवली-क्रियते। इमे सर्वे विशेषा मानसा एव। हिन्द्याः समीक्षकाणां लेखेषु कपिलमतसाम्यमस्य दर्शनस्येति पश्यन् कदाचन बुद्धिरूपं मनः परिणामशालि विषयाकारताग्राहीति कल्पयामि, परं स्फुटं वक्तुं सामग्रीं न लभे। अज्ञेयं वस्तु किमर्थमङ्गीक्रियत इति न जानामि। तथापि गुणपरि-णामादिविशेषा मानसा बौद्धा बाह्यास्तित्ववादिनाऽप्यङ्गीक्रियन्ते, तदा पूर्वभारतीयदर्शनसाम्यं बिभर्तीति दृष्ट्या जातां दृष्टिगतां सृष्टिमवद्योतयति, अत उदाहार्षम्।

चतुर्थी दृष्टिसृष्टिः

सृष्टं सृष्टिरिति बाहुलकात् कर्मणि क्तिन्। दृष्टिरेव सृष्टिः। सृष्टं वस्तु दृष्टिरूपमेव। न तु दृष्टिभिन्नं वस्तु सृज्यते सृष्टं वा। ज्ञानाकारमेव वस्तु न ज्ञानातिरिक्तम्। एकस्यैव ग्राह्यत्वं ग्राहकत्वं चाङ्गीक्रियते वास्तविकमिति योगाचारपथः। 'सत्त्वं ज्ञानतादात्म्यम्। सर्वं बुद्धिरूपम्, बुद्ध्या गृह्यमाणत्वात्। बाह्येण ग्राह्येणान्तरस्य ग्रहणस्य भिन्नदेशतया संबन्ध एव न संभवति, तदा कथं स्याद् बाह्यस्य ग्राह्यत्वम्। बाह्यवस्तुस्वीकारे यद्यान्तरेण ग्रहणं न संभवति, तदा तस्य स्वीकार एव मुधेति सर्वमान्तरमेव। वेदान्तिनो ज्ञानविषययोः संबन्धविषये बहुधा विचारयन्ति, न्यायसांख्ययोर्विषयविषयिभावं विषयाकारपरिणामादिकं खण्डयित्वा ज्ञाने विषयस्याध्यासिकं संबन्धमुररीकुर्वन्ति। तादृशं च चितोऽविद्यायाः परि-णामः, चितोऽधिष्ठानत्वम्, अध्यस्तस्यानिर्वचनीयत्वमित्यादिकल्पनायां गौरवाद् बुद्ध्यन्त-र्गतमेव सर्वो ज्ञानज्ञेययोस्तादात्म्यसंबन्ध इति बौद्धाः कल्पयन्ति।

पञ्चमी दृष्टिसृष्टिः

ततः परं ग्राह्यग्राहकत्वमेकस्य वास्तविकं न संभवति, कर्तृकर्मविरोधात्। काल्पनिकं यथा तथा वा स्यात्। ग्राहकस्य ग्राह्यत्वे जडत्वप्रसङ्गात्, प्रकाशाभावे जगदान्ध्यप्रसङ्गः। आन्तरस्य सतो बाह्यतया कथं भानम्? असन्नेव भासते बाह्यतयेति चेत्, एवमेव सर्वत्राङ्गी-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कार्यम्। आन्तरसतः काऽऽवश्यकता ? तथा च भासत इत्येव सत्, अन्यच्च सर्वमसदेव। भासमानं वस्तु भासरूपं पूर्वोक्तरीत्या न व्यवतिष्ठते। भासातिरिक्तं कीदृग्भवेत् ? परमाणुरूपं संघातरूपं वा ? नित्यमनित्यं वा ? सर्वेषां खण्डनान्न किञ्चित्, किञ्चिद् भवदपि भाससंबद्धं कथं स्यात् ? इत्यत्र सर्वे दार्शनिकाः पराक्रान्ताः। परस्परखण्डनान्न किञ्चिदवशिष्यते। भासश्च क्षणिकतया विश्रमशील इति शून्यतापर्यवसानम्।

माध्यमिकमते भासस्य परमार्थसत्तेति गवेषितं काशीहिन्दूविश्वविद्यालये वसद्भिः डा० चन्द्रधरविद्वद्भिः, तैश्च शुद्धं नित्यचैतन्यं माध्यमिकाभिमतं प्रदर्शितम्। संसारदशायां विषयोपप्लुता साकारतया भासमाना मोक्षदशायां शुद्धा क्षणिकी चित्सन्ततिरेवेत्यवगच्छाम्यहमद्यापि शून्यवादिमतम्।

वेदान्तिनः शुद्धं नित्यं विभु स्वप्रकाशं सर्वदैकरसं विविधोपाधिभिरनभिभूतं क्वचिदप्यनासक्तं वादिभिः कल्पनया बलादासञ्जितैरप्युपाधिभिरविक्रियमाणं चैतन्यं सारवस्तु परमार्थसदित्यामनन्ति। अन्यच्च सर्वं वैदिकं स्मार्तं व्यावहारिकं प्रस्थानपरम्परया वा कल्पितं सद् यथा तथा वाऽस्तु, तत्र न विद्वेषो रागो वेत्यादिकं गौडपादकारिकया खण्डनग्रन्थेन च निर्मथितम्। तथा च दृष्टिरेव सृष्टिरिति पञ्चमी दृष्टिसृष्टिः। दृष्टिश्च वृत्तिरूपा, वृत्त्यवच्छिन्नचैतन्यरूपा वा। शुद्धस्य निरुपाधिकस्य ब्रह्मणो वृत्तिविषयता नाङ्गीक्रियते, सोपाधिकस्य च मिथ्यात्वमिष्यत एव। यद्यपि चरमा वृत्तिः शुद्धब्रह्माकारा, तथापि तदा ब्रह्मणो निरुपाधिकत्वासंभवः। दृष्टिव्यतिरिक्तसृष्ट्यभावो वा, सृष्टदृष्टादिभेदव्यवहारस्तु दृष्टिसृष्टिवादमपश्यतोऽज्ञानिनः। दृष्टिव्यतिरेकेण सृज्यभावो वा, ज्ञातो न ज्ञानमिति व्यवहारस्तु भानांशस्य तिरोहितत्वात्। ज्ञातैकसत्त्वं विषयत्वसमानकालीनत्वाभ्यां दृष्टिविशिष्टत्वं वा, दृष्टिविभिन्नकाले सर्वेषामभावेनानायासेन मिथ्यात्वं सिध्यतीति वादोऽयं वेदान्तिभिः समाद्रियते। जन्यमात्रे सृष्टेर्व्यवहारात्, मोक्षदशायां दृष्टेः सृष्टेश्चाभावात्। असत्त्वापादकदोषप्रयुक्तत्वे सति दृष्टिविशिष्टत्वं जन्यत्वव्यापकं मिथ्यात्वोपयोगि द्रष्टव्यम्। अनादीनां मिथ्यात्वं तु दृश्यत्वादिनैव साधनीयमित्यादिकमन्यच्च ग्रन्थे लिखितमेवास्ते।

बृहदारण्यकजागरणविषयकया "तस्मादात्मनः सर्वे प्राणाः" इत्यादिश्रुत्या जागरितजीवात् प्राणादिप्रपञ्चसृष्टिप्रतिपादनात् प्राक्तनसुषुप्तिश्रुत्या च सुषुप्तौ सर्वलयबोधनाच्च जीवात् तज्ज्ञानदशायां सृष्टिः, दृष्टिविलोपे च लय इति पर्यवसानाद् दृष्टिसृष्टिवादः सूचितः। जीवा-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भिन्नात् सुषुप्ताधाराच्च ब्रह्मणो जाग्रत्प्रपञ्चोदयस्तु नायाति, प्राक्तन्या "क्वैष तदाऽभूत्" इत्यादि-श्रुत्या जीवस्यैव प्रश्नात् प्रक्रान्तत्वाच्च सर्वनाम्ना जीवस्यैव परामर्शात्।

गौडब्रह्मानन्द्यां श्रुतिप्रमाणेन जगतो मनःपरिणामत्वं साधितम्। ततश्च स्फुटो दृष्टिसृष्टिवादः। जीवादेव जगतो वैचित्र्यमुक्तम्। तत्रत्यवार्त्तिकेऽपि [२।८३] तथैवोक्तं वर्तते। संक्षेपशारीरकपद्ये उत्तमाधिकारिणां कृते व्यावहारिकेऽपि प्रातिभासिकत्वदृष्टिरेवोक्ता, सा च दृष्टिसृष्टावेव संभवति। तत्रैव २।२६ पद्ये बौद्धमतसाम्यं शाङ्करमतस्यापादितम्, परिहारस्तु विषयान्तरपुरस्कारेण कृतः। तेन चतुर्थी दृष्टिसृष्टिरपि वेदान्त्यभिमता भवति। वार्त्तिके जागर-सृष्टीनां जीवकर्तृकत्वं व्यवहारस्यापि काल्पनिकत्वमुक्तम्। यद्यपि तत्र ब्रह्मकर्तृकत्वमपि पद्या-न्तरेण वर्णितमास्ते, परन्तु तद् व्याख्यानान्तरं जीवब्रह्मणोरभेदात् प्रमाणस्य संकीर्णत्वाच्च। गौडपादकारिकायां तु स्फुटं सर्वस्य प्रातिभासिकत्वं चेतसा कल्पितत्वं मनःस्पन्दितत्वं च वर्णितं विद्यते। तत्र पञ्चमी दृष्टिसृष्टिर्विराजते। चतुर्थी दृष्टिसृष्टिस्तु योगवाशिष्टेऽप्यवलोक्यताम्।

पाश्चात्यदृष्टिसृष्टिवादः

प्रायः पश्चिमीयसमस्तप्रत्ययवादिदर्शनेषु कियताचिद् वैचित्र्येण दृष्टिसृष्टिवादः समु-ल्लसति। तत्रैकस्याष्टादशवैक्रमशताब्दीस्थितस्य आयर्लैण्डवासिनो वर्कलेजार्जस्य दर्शनेऽद्वैत-सिद्धिसदृशं दृष्टिसृष्टिवादमुपलभे। ज्ञातैकसत्त्वं समेषामङ्गीक्रियते। अज्ञेयस्य वस्तुत्वमेव नास्ति, मानसातिरिक्तं न किमप्युररीक्रियते। बाह्यस्याङ्गीकारेऽप्यान्तरेण संबन्धो न संभवति। एकमेव बाह्यतयाऽध्यवसितं वस्तु तेनैव पुरुषेण नैकरूपेण गृह्यते पुरुषान्तरस्य का कथा? अतो बाह्यं नियताकारं वस्तु न संभवति, कदाचनेच्छां विनापि जीवमनसि चिन्तनधाराऽभिनवा समुदेति, अतो विभु ईश्वरमानसमप्यङ्गीक्रियते, येन जीवचेतसि प्रेरणा मिलति, ईश्वरजीव-मनसोर्महाकाशघटाकाशवत् स्थितिः। ईश्वरमनसि सामान्यरूपेण सर्वाणि वस्तूनि सन्ति, तैश्च सामान्यैर्जीवमानसानां विशेषाणां संवादः प्रत्यभिज्ञादिव्यवस्था च। अद्वैतसिद्धावप्यनादिषु परसूक्ष्मेषु कारणात्मसु दृष्टिसृष्टिर्नोपेयते।

जार्मनेयलीब्नीजदर्शने उपलभ्यते— दृष्टेश्चेतनाद् दृष्टिरूपा चेतनमयी सृष्टिरिति। चेतनाः परमाणवः, तेभ्यः स्थूलजगतः समुत्पत्तिः। सर्वं चेतनम्। अधमं चैतन्यं पृथ्वीपाषाणा-दिषु, तत उत्कर्षक्रमेण जीवेषु, परमोत्कृष्टं चेश्वरचैतन्यम्। पृथ्वीपाषाणादिभ्यो वनस्पतिक्रमेण जीवचैतन्यं स्थूलं जायते। प्रकृतिमूका जीवाश्च वाचालाश्चेतना इत्याद्युपपादनं तत्र क्रियते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दृष्टिसृष्टिवादः

न्यायामृतकाराक्षेपसमाधानम्

न्यायामृतकाराणामाक्षेपाः कतिपये प्रसङ्गतः प्रागेव समाहिता विद्यन्ते। अधुनाऽपि संक्षेपेणेत्थमवगम्यताम्—स्थायित्वादिप्रत्यभिज्ञा मन्दाधिकारानुरोधेन भ्रान्तोपपादिता। काल्पनिकसामान्यमादाय वर्कलेरीत्या वा स्वर्गादिकार्यकारणभावः स्वाप्निककार्यकारणभाववत्, धर्मस्य सूक्ष्मतया तत्र दृष्टिसृष्टेरनङ्गीकाराद्वा। बाधाबाधौ स्वप्नजागरवस्तुनोर्भेदकौ। अन्यूनसत्ताकस्य बाधकत्वेन प्रातीतिकयोरपि बाध्यबाधकभावः, लघुचन्द्रिकारीत्या स्वतन्त्रबाध्यबाधकभावस्वीकाराच्च। दृष्टेः प्राक् शुक्तेरभावेऽप्यज्ञानस्य सत्त्वेन रजतदृष्टिसंभवः, प्रतिसुषुप्ति संसारलयेऽपि पुनर्विक्षेपजनकाज्ञानसत्त्वेन न मुक्तस्य पुनरावृत्तिः, सुषुप्तावपि सूक्ष्मतया कारणात्मना संस्कारसत्त्वान्न जागरणानुपपत्तिः। घटं पश्यामीत्यादौ चाक्षुषभेदो घटे विषयः।

गौरवलाघवप्रदर्शनम्

सृष्टिदृष्टिकल्पे स्रष्टव्यालोचनस्य कारणत्वम्, आवरणतद्भञ्जकवृत्त्यादिककल्पनम्, स्थिरघटादावनन्तसंयोगादिकम्, इन्द्रियसंयोगादीनां प्रत्यक्षहेतुत्वं प्रातीतिकव्यावहारिकयोर्भेदेन कारणत्वम्, ज्ञानस्य हेतुत्वमित्यादिगौरवम्, दृष्टिसृष्टिकल्पे च विषयस्यैव हेतुत्वमिति लाघवमिति॥

श्रीकेदारनाथ ओझा।

---

(२)

अद्वैतसिद्धान्तमते "तस्मादेतस्मादात्मन आकाशः संभूतः" इत्यादिश्रुत्याऽऽकाशादिनिखिलभूतभौतिकप्रपञ्चस्य ब्रह्म विवर्ताधिष्ठानतयाऽभिन्ननिमित्तोपादानकारणम्, माया तु परिणाम्युपादानकारणमिति प्रतिपादितमस्ति श्रुतिस्मृतिपुराणसूत्रभाष्यतद्व्याख्यादिषु बहुषु स्थलेषु। तन्मते च पारमार्थिक-व्यावहारिक-प्रातिभासिकभेदेन सत्तायास्त्रैविध्यं भवितुमर्हति। तत्र ब्रह्मणः पारमार्थिकी, व्यावहारिकस्य प्रपञ्चस्य व्यावहारिकी, शुक्तिरजतादेः स्वाप्नरथादेश्च प्रातिभासिकी सत्ताऽस्ति। अयमेव सिद्धान्तः सृष्टिदृष्टिवादपदेन व्यपदिश्यते।

सृष्टिप्रक्रियाऽपि सक्रमा क्वचित्, क्वचिदक्रमा तत्र तत्र प्रतिपादिताऽस्ति। सा चानपेक्षिततया नोपदर्श्यते। परमस्मिन् मते न निर्भरत्वं श्रुत्यादेः। एष च वादो मन्दाधिकारिणां कृत एवेति श्रुतौ गौडपादीयकारिकायामद्वैतसिद्धौ योगवासिष्ठे श्रीमद्भागवते च प्रतिपादिते दृष्टिसृष्टिवाद एव सर्वेषां निर्भरत्वम्। "विमतं मिथ्या, दृश्यत्वाज्जडत्वात्परिच्छिन्नत्वादन्तवत्त्वात्, शुक्तिरूप्यवत्" इत्यनुमानेन निखिलव्यावहारिकप्रपञ्चस्य मिथ्यात्वं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

साधयताऽपरशङ्कराचार्येण तत्रभवता मधुसूदनेनापि दृष्टिसृष्टिवादः समर्थित एव। एतद्वादावलम्बनेनैव प्रकृतानुमानं सामञ्जस्यमावहति।

एतन्मते प्रमाणमुपपत्तिश्च यथामति प्रकाश्यते। एतन्मते च द्विविधैव सत्ता व्यावहारिकी नास्ति, पारमार्थिकी प्रातिभासिकी च। तत्रात्मनः पारमार्थिकी, सकलप्रपञ्चस्य शुक्तिरजतस्वाप्नपदार्थसमशीलतया प्रातिभासिक्येव सत्ता वर्तते। अत एव यावद् दृष्टिर्ज्ञानं प्रतिभास इति यावत्, तावदेव सृष्टिः सर्गः स्थितिरिति यावत्; इत्यन्वर्थनामायं दृष्टिसृष्टिवादः। गौडपादकारिकातच्छाङ्करभाष्यादौ चायमजातवादशब्देन व्यपदिश्यते। अजातत्वं व्यावहारिकदृष्ट्या, माययाऽनिर्वचनीयरजतादेरुत्पत्तेः – "सतो हि मायया जन्म युज्यते न तु तत्त्वतः" इति कारिकया प्रातिभासिकस्य जातत्वमेवेति नापसिद्धान्तो नापि मतभेदः। सर्वथा चिराचिरकालस्थायी कल्पान्तःस्थायी वा पदार्थो नास्त्यस्मिन् मते। नित्यविज्ञानस्वरूपात्मनः पारमार्थिकी सत्ता, अत एव क्षणिकविज्ञानवादिबौद्धमतादयं भेदो यत्ते विज्ञानस्यैव क्षणिकत्वं सत्त्वं च स्वीकुर्वन्ति, न तु विज्ञानस्य स्थिरत्वमितरेषां च सत्त्वमभ्युपयन्ति। दृष्टिसृष्टिवादे च विज्ञानस्य नित्यत्वेन वृत्तिरूपविज्ञानस्यापि विरोधिवृत्त्युत्पत्तिपर्यन्तस्थायित्वेन धारावाहिकज्ञानस्य स्वमतेऽस्वीकृतत्वेन बहुक्षणपर्यन्तव्यापित्वेन च प्रातिभासिकानिर्वचनीयोत्पत्तिस्वीकारेण च भेदाद् बौद्धमते विज्ञानस्यैव नीलपीताद्याकारेणारोपः। ते यदि स्थिरविज्ञानं वेदान्तिवत् स्वीकुर्युस्तदा स्थिरवस्तुस्वीकारेण क्षणभङ्गभङ्गप्रसङ्गः स्यात्।

दृष्टिसृष्टिवादावलम्बनं विना चाद्वैतव्यवस्थापनमेव न संभवति। मिथ्यात्वानुमाने च दृष्टान्तदार्ष्टान्तिकयोर्व्यावहारिकघटप्रातिभासिकरजतयोर्वैषम्यादतो मिथ्यात्वानुमानान्यथानुपपत्त्या दृष्टिसृष्टिवादाभ्युपगम आवश्यकः। अयं च वादोऽशुद्धान्तःकरणैर्दुर्ज्ञेयः, अतो मन्दाधिकारिणां कृते सृष्टिदृष्टिवादः, उत्तमाधिकारिणां कृते च दृष्टिसृष्टिवादः।

एष एव च वादो भामतीकारमतसिद्धः, तन्मतेऽविद्याया जीवाश्रिततया जीवस्य चोपाधिभेदेन भिन्नतया च यदा यस्याविद्यावृत्तिरुदेति तदैव तस्य पुरुषस्य घटप्रतिभासः। अविद्याया ब्रह्माश्रितत्वेऽविद्याया एकत्वेन तन्मते प्रतिकर्मव्यवस्थाऽपि प्रयासेन प्रतिपादनीया भवति, नास्मन्मते तदर्थं प्रयासकल्पनं भवति पुरुषभेदेन संसारभेदात्। अस्या दृष्टिसृष्टेर्लक्षणं स्वज्ञानव्याप्यत्वम्, द्रष्ट्रन्तरावेद्यत्वे सति ज्ञातैकसत्त्वं वा, दोषप्रयुक्तत्वनिबन्धनज्ञातैकसत्त्वं वा; सुखादेर्ज्ञातैकसत्त्वेऽपि दोषप्रयुक्तत्वाभावान्नातिव्याप्तिः। अस्मिन् वादे चाविद्याया दोषतया कारणत्वस्वीकारेण प्रतिकर्मव्यवस्थाया सृष्टिदृष्ट्यभिप्रायकतया पुरुषभेदेन संसार-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भेदस्यावश्याभ्युपगन्तव्यत्वेनोपपद्यते घटादेर्द्रष्ट्रन्तरावेद्यत्वं तेन नाव्याप्तिः। यथा प्रातिभासिकरजतादीनां स्वाप्नरथादीनां च बाधज्ञानात्पूर्वं सत्तया प्रतीयमानत्वेन तुच्छवन्ध्यापुत्रादिभिन्नतया शुक्तित्वप्रकारिकयाऽविद्यया रजतं तदाकारा वृत्तिश्च युगपदेव जायते, बाधात्पूर्वं तदुदयाद्वाऽप्रतीयमानत्वेन दृष्टिसमकाल एव रजतादिसत्तास्वीकारेण ज्ञाननाशस्य तज्ज्ञानविषयस्यानिर्वचनीयस्य नाशस्य च स्वीकारेण लक्षणसमन्वयो भवति घटादौ, शुक्तिरजतादौ, स्वाप्नरथादौ चेति न काप्यनुपपत्तिः। एतन्मते प्रमाणानि च—"यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युचरन्ति, एवमेवैतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः" इत्यादिश्रुतिः सुप्तोत्थितजीवकर्तृकां सृष्टिमवबोधयन्ती भवति प्रमाणम्। पूर्वोत्पन्नस्य सृष्ट्यसंभवतया प्रकृतमताऽस्वीकारे तदानीं प्राणादेरवस्थितेरेव सत्त्वेन तस्याः सृष्टेरभावः, अतोऽन्यथानुपपत्त्याऽपि प्रकृतमत एव श्रुतेः सार्थक्यं संभवति। मतान्तरे च तदानीं प्राणसद्भावेन प्रकृतश्रुतिः "यजमानः प्रस्तरः" इतिवदुपचरितार्थैव वक्तव्या स्यात्। सति संभवे स्वार्थपरत्वमेवाश्रयितुं युक्तम्, जघन्यवृत्तिकल्पनाया अन्याय्यत्वात्, "न तु तद्द्वितीयमस्ति, ततोऽन्यद्विभक्तं यत्पश्येत्" इति श्रुत्या सर्वस्य प्रपञ्चस्य सुषुप्तावसत्त्वप्रतिपादनात्।

पूर्वोक्तमिथ्यात्वानुमानान्यथानुपपत्तिरपि प्रमाणम्। प्रपञ्चस्य मिथ्यात्वास्वीकारे च "एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति किञ्चन" इति श्रुतिरेवानुपपद्यतामाप्स्यति। श्रीमद्भागवतेऽपि—"ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रम्। विज्ञानमेकमुरुधेव विभाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः॥ यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः। नश्वरं गृह्यमाणं च विद्धि मायामनोमयम्॥" इति। योगवाशिष्ठेऽपि—"अविद्यायोनयो भावाः सर्वेऽमी बुद्बुदा इव। क्षणमुद्भूय गच्छन्ति ज्ञानैकजलधौ लयम्॥ तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः। इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः॥" इत्युक्तम्। अभियुक्तैरपि—"रज्जुसर्पादिवद् विश्वं नाज्ञातसदिति स्थितम्। प्रबुद्धदृष्टिसृष्टित्वात् सुषुप्तौ च लयश्रुतेः॥" इत्युक्तम्। एवं प्रमाणैर्लक्षणैश्च समर्थितो दृष्टिसृष्टिवादः। अत्रास्य वादस्य परीक्षार्थं पूर्वं साधकयुक्तयः प्रदर्श्यन्ते, तदनु बाधकयुक्तीनां समुद्धारश्चोपदर्शनीयः।

साधकयुक्तयो यथा—प्रपञ्चस्यादावन्ते चासत्त्वान्न मध्येऽपि तस्य सत्त्वं वन्ध्यापुत्रादिवत्। स्वापाङ्गनासङ्गमादेरपि सुखजनकत्वस्य सर्वानुभवसिद्धतया प्रातिभासिकस्यापि प्रपञ्चस्यार्थक्रियाकारित्वमविरुद्धमेव। तेन स्वाप्नजाग्रद्वस्तुनोः समानमेव वैतथ्यम्। अन्तःकरणादेरुपाधेरपि प्रातिभासिकत्वम्। गन्धर्वनगरादिवत्प्रपञ्चजातं दृष्टनष्टम्, तेन सर्वोऽपि लौकिको वैदिको

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वा व्यवहारश्चाविद्याविषय एव। पश्वादिभिश्चाविशेषादिति शारीरकाध्यासभाष्यभामतीग्रन्थैः सर्वस्यापि प्रमाणप्रमेयव्यवहारस्य लौकिकस्य, शास्त्रीयस्यापि चाविद्याविषयतैव प्रतिपादिता। अत एव—"न निरोधो न चोत्पत्तिः" इत्यादिगौडपादीयकारिकायाः सर्वोऽपि बद्धमुक्त्युत्पत्तिलयादिव्यवहारः प्रातिभासिक एव। एक एवाऽऽत्मा सन् सर्वप्रतिभासाधिष्ठानम्। एतत्तात्पर्येणैव—"नेह नानास्ति किञ्चन", "इन्द्रो मायाभिः पुरुरूप ईयते" इत्यादौ सकलस्य प्रपञ्चस्यासत्कल्पत्वमङ्गीकृतम्, असतः कदाप्यप्रतिभासादिति तस्मादस्य भेदः। "असतः सज्जायते" इति पक्षस्तु स्वभावतोऽसतः सत्त्वायोगान्न युक्तः, नहि वन्ध्यापुत्रोऽसन् कदाचिदपि सन् भवितुमर्हति। "सतः सज्जायते" इत्ययमपि न सामञ्जस्यं समश्नुते, सत आत्मनो जन्मासंभवात्। अतो द्वैतिनां मतं परस्परविरुद्धत्वादेव हेयम्। सृष्ट्यादिप्रतिपादकश्रुतीनां माययैव रथादिसृष्टिः, यथा स्वप्ने, तथैव तस्या उपपत्तेः। "नायं कुतश्चिन्न बभूव कश्चित्" इति श्रुत्या व्यावहारिकस्योत्पत्त्यसंभवात्। सतस्तु मायया जन्मोपपद्यते, न तु तत्त्वतः। नहि जातस्य जन्म संभवति, जातत्वादेव। स्वस्मात्परस्मादपि न किञ्चित् सदसद्वा जायते। नहि घटात्कदाचिदपि घटो जायते, नापि पटात्; तथैव वन्ध्यापुत्रादपि वन्ध्यापुत्रो न जायते, नाप्यन्यस्मादपि स जायते। नापि कुतश्चित् कारणात् सदसतोर्जन्म, विरोधात्। सर्वमेव ग्राह्यं ग्राहकं च विज्ञानस्पन्दितमेव। यथाऽलातचक्रे सारल्यकौटिल्यावभासस्तद्वत्। स्वाप्नरथादीनां यथा स्वावयवादिभिर्विनाऽप्युत्पत्तिः, चक्षुरादिना विनैव यथा चाक्षुषत्वप्रतिभासः; तथैव कारणसमुदायानां मतेऽस्मिन्नातीवोपयोगः, सर्वेषां प्रातिभासिकोत्पत्तिस्वीकारो वा।

अथ बाधकयुक्तीनां निराकरणम्। ननु क्षणभङ्गवादिबौद्धो भवता 'सोऽयं घटः' इति प्रत्यभिज्ञया निराक्रियते, स चाधुना नोपपद्यते प्रातिभासिकत्वस्वीकार इति चेन्न; दृष्टिसृष्टिवादिमते घटप्रत्यक्षकाले तत्सृष्टिस्वीकारेण पूर्वदृष्टघटादिनैक्यमपि प्रतिभासकाले समुत्पद्यते। किञ्च, प्रत्यभिज्ञया न वस्तुनो घटादेः स्थिरत्वं साधयितुं शक्यते, येन पुंसा पूर्वं घटो विलोकितः स एव कृतनिमीलनस्तत्रैवावस्थितः, तत्र कश्चिदपरं घटं तादृशमानीय स्थापितवान्, तदा स कृतोन्मीलनो घटं दृष्ट्वा प्रतिजानीते 'सोऽयं घटः' इति। तत्र घटान्तरेऽपि घटबुद्धिः समुत्पन्नेति न तया प्रत्यभिज्ञया तयोर्घटयोरैक्यं भवितुमर्हति। न च तन्तुवायनिर्मितो मैत्रदृष्टो देवदत्तक्रीतः पटो मयाऽऽसादित इति ज्ञानेन पटादेः स्थैर्यसिद्धौ नोपपन्नो दृष्टिसृष्टिवाद इति वाच्यम्; पूर्वोक्तज्ञानस्य भ्रमत्वस्वीकारेण न तेन चिरस्थायित्वं पटादेः। यथाऽन्धतमसे बहूनां रज्जौ सर्पभ्रमो जातस्तत्र तद्भयेन युगदेव पलायमानानां य एव सर्पो मया दृष्टः स एव चैत्रमैत्राभ्यां

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विलोकित इति भ्रमस्तद्वत् प्रकृतेऽप्युपपत्तेः। अत्र प्रातिभासिकस्य वस्तुनः प्रतिपुरुषभेदेन भिन्नतया यथैक्यभ्रमस्तथैव प्रकृतेऽपि किं न स्यात्, तेन न नः किञ्चिच्छिन्नम्। न च सर्वस्य प्रातिभासिकत्वे न कुत्रापि प्रामाण्यं स्यादिति वाच्यम्; स्वप्रकाशरूपे चिदात्मनि स्वतः प्रामाण्यसत्त्वात्। इतरेषां समेषां मायिकत्वं स्वीकुर्म एवेति का नो हानिः। न च तन्तुवायगृहे तुरीवेमादिसहितैस्तन्तुभिः पटो जायमानोऽनुभूयते सर्वैरपि, तच्च सहकारिणां यौगपद्यं न तेषां स्थायित्वं विनोपपद्यते। किञ्च, सर्वत्र कार्यकारणभावस्थले कारणानां नियतपूर्वकालवृत्तित्वं स्थिरत्वं विनाऽनुपपन्नमिति वाच्यम्; प्रत्येककारणज्ञानकाले तेषां प्रादुर्भावस्वीकारेण तत्यभावात्। सर्वत्र कार्यकारणभावस्थले वादेऽस्मिन् गतिरियमनुसर्तव्या। यथा स्वप्ने सर्वेऽपि समुत्पद्यमाना घटादयः स्थिरा अनेके विलम्बेन नोत्पत्तुमर्हन्ति, किन्तु समकालमेव समे समुत्पद्यन्ते, क्रमेणाक्रमेण वा विलीयन्ते च; तथैव सर्वेषां वस्तुनां सर्वेभ्यः स्वस्वकारणेभ्यः क्रमेणाक्रमेण वा जन्म सेत्स्यति किं नो गतम्। यथा च स्वप्ने कदाचित्स एव देवः, स एव मनुजः, स पशुः प्रतीयते; यथा च कश्चित् पदार्थः सादिरनन्तः, कश्चिच्चानादिरनन्तः, कोऽपि नित्यतया प्रतीयते; तथैव मन्मतेऽपि जागरपदार्थवैचित्र्यव्यवस्थितिः।

एतेन सर्वेषामाविद्यकत्वे पदार्थवैचित्र्यनिबन्धनव्यवहारविलोपापत्तिरिति प्रत्युक्तम्। न च स्वाप्नज्ञानस्य स्मृतित्वम्, येन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं समापतेत्। तस्य स्वाप्नज्ञानस्य स्मृतित्वस्वीकारे रथादिसृष्टिप्रतिपादिका श्रुतिः कदर्थिता स्यात्। तेन स्वाप्नस्य जागरस्य च ज्ञानस्य प्रत्यक्षावभासस्यैव स्वीकारेण विषयसद्भावावश्यंभावनियमात्। ननु सर्वस्य प्रातिभासिकत्वेन प्रवृत्त्यादिस्तेन तेन ज्ञानेन न स्यात्, अतोऽनुपपन्नोऽयं दृष्टिसृष्टिवाद इति चेन्न; रजतविभ्रमस्थलेऽपि प्रवृत्तिर्विशेषदर्शनात्पूर्वं भवत्येव, तत्प्रवृत्तेः सर्वसंमतत्वात्।

न च सर्वस्याविद्यकत्वे कार्यकारणयोः प्रत्येकं प्रतिनियमो न स्यादिति युक्तम्, अविद्ययैव सर्वं सेत्स्यति घटादौ तथैव दण्डादिजन्यत्वोपपत्तिस्वीकारेणादोषात्। यथा स्वप्ने प्रियतमायाश्चाक्षुषत्वाभावेऽपि चक्षुषा तां पश्यामीति प्रतीतिस्तथैव दण्डाजन्येऽपि घटे दण्डजन्यत्वज्ञानसंभवात्। न चाऽस्मिन्मते पुरुषभेदेन प्रपञ्चस्य भिन्नतया चैत्रमैत्रदेवदत्तादीनां प्रत्येकं घटोत्पत्तिकल्पनमावश्यकम्, अतो गौरवाधिक्यमस्मिन्मत इति वाच्यम्; स्थैर्यपक्षे तत्तत्पदार्थनिकराणां भूतभौतिकतत्तदारम्भकसूक्ष्माद्यवयवापरिमितविभुजीवाकाशादिसंयोगविभागादिकल्पनापेक्षया पूर्वोक्तकल्पनायामेव लाघवात्। न च पित्रादेरदर्शनकाले तदभावाद् मरणज्ञानेन पुत्रादेर्दुःखित्वापत्तिरिति वाच्यम्; यदा मृतो मे पितेति ज्ञानं तदा मरणम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न चादर्शनाच्चादृश्यं ज्ञानं कस्यापि समुदेति, तेन दोषाभावात् । पित्रदर्शनात्तदौदासीन्यं जायते । यथा स्वप्ने पूर्वपूर्वज्ञानानामुत्तरोत्तरज्ञानेन कुतो नाश इति प्रश्नो नोत्पद्यते, तथैव जागरेऽपि बहूनां पदार्थानां कथं नाश इति पर्यनुयोगानवकाशः । शून्यवादिमते निरधिष्ठानभ्रमाङ्गीकारेण मतेऽस्मिन्नविद्याया विषयतया ब्रह्मण एव तद्विवर्ताधिष्ठानत्वेन तन्मताद्विशेषः । नाप्यत्र निरन्वयो नाशः, पदार्थानां स्वकारणे सूक्ष्मरूपेण संस्कारसत्त्वात् । अयमपि बौद्धमताद्विशेषः । न च कारणे सूक्ष्मरूपेण कार्यसत्त्वस्वीकारे सत्कार्यवाद आपतित इति वाच्यम् ; तैः प्रपञ्चस्य पारमार्थिकसत्त्वमभ्युपेयते, तेन तस्मादस्य वादस्य भेदात् ।

ननु वेदस्यापि प्रातिभासिकत्वे तदप्रामाण्यं गले पतितमिति चेन्न; यदा यस्य पुंसो वेदाः प्रमाणमिति ज्ञानं तदा तस्य प्रामाण्यस्वीकारेणादोषात् । न च निखिलस्य प्रपञ्चस्य कल्पितत्व-स्वीकारे तस्य कल्पकः कोऽपि कल्पनीयः । स च निरुपाधिकः सोपाधिको वा आत्मा ? प्रथमे मुक्तात्मनामपि संसारित्वापत्तिः, द्वितीये चाविद्यारूपोपाधेरपि कल्प्यत्वेन तत्कल्पनात्पूर्वं कल्पक-सत्ता वक्तव्येति वाच्यम् । केचित्तु पूर्वपूर्वकल्पिताविद्योपहित उत्तरोत्तराविद्यायाः कल्पकः, कल्पनाप्रवाहस्यानादितया बीजाङ्कुरादिवदनवस्थाया दोषानाधायकत्वात् । अविद्याया अनादित्वं न स्यादिति न शङ्कनीयम्, स्वप्ने कश्चित् प्राक्तनः कोऽपि चाचिरोत्पन्नतया प्रतिभाति, तथैव जागरेऽपि कोऽपि सादित्वेन कश्चिच्चानादित्वेन प्रतीयत इत्यविशेषादित्याहुः ।

अद्वैतसिद्धिकारास्तु—"जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा । अविद्या तच्चितो-र्योगः षडस्माकमनादयः ॥" इत्युक्तेः षण्णामनादिदृश्यानां न दृष्टिसृष्टिवाद इत्यभ्युपगच्छन्ति । तेनाविद्याया अनादिदृश्यरूपतया तस्याः प्रातिभासिकत्वानभ्युपगमः । एतन्मते च प्रवाहा नाद्यदृष्टभावनादिविशिष्टान्तःकरणविषयसूक्ष्मावस्थाविशिष्टाया एवानादित्वम्, तेन न सम्प्रसादे मुक्त्यापत्तिः, भावनाया दृष्टिसृष्टिकल्पने सुप्तोत्थितपुरुषस्य पूर्वानुभूतस्मृत्यनुपपत्तेः । तथैवादृष्टस्य तत्स्वीकारे तदा कृतनाशाकृताभ्यागमावापद्येयाताम् । तेन भावनादृष्टादेर्दृष्टिसृष्ट्यनभ्युपगमः । नचैतन्मते भ्रमे यदा ज्ञानं तदा सृष्टिर्बाधज्ञाने चान्यैव शुक्त्यादिरुत्पद्यते, तेन भ्रमबाधयो-रैकविषयकत्वनियमो व्याहत इति वाच्यम्; स्वप्ने यथा रथादीनां कल्पना तथैवाधिष्ठाना-दीनां कल्पनास्वीकारेणादोषात् । न च "एतस्मादात्मन आकाशः संभूतः" इति श्रुतिर्निरा-लम्बनैवास्मिन्मते स्यादिति युक्तम्, निष्प्रपञ्चब्रह्मात्मैक्याश्रयायाः श्रुतेरध्यारोपापवादन्यायेन ब्रह्मा-वगतिसाधनतया श्रुत्यादिषु सृष्टिप्रलययोरुपन्यासात्, मन्दाधिकारिणमुद्दिश्य सृष्टिदृष्टितात्पर्येण वा सृष्टेरुपन्यासात् । तेन कर्मकाण्डवाक्यं यथा विद्वद्भिन्नाधिकारिपरकम्, तेन न यथा तस्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वैयर्थ्यम्; तथैव सृष्टिप्रतिपादकमपि वाक्यं मन्दाधिकारिपरकमतो नैतस्यापि वैयर्थ्यम्, तेन न तद्बोधकवेदाप्रामाण्यापत्तिः। न चात्मातिरिक्तस्य सर्वस्य प्रातिभासिकत्वे वेदस्यापि तदवश्य-मभ्युपेयम्, तथा च वेदप्रामाण्यं खपुष्पायमाणमिति वाच्यम्; दोषस्यासम्पर्को विषयाबाध्यत्वं च प्रामाण्यप्रयोजकम्, तच्चाबाधितब्रह्मतात्पर्यवति वेदेऽपौरुषेये विद्यत एव, तेन वेदस्याऽप्रामा-ण्यासंभवात्। एवमेव यागादिजन्यस्वर्गादिफलमपि संवादिस्वाप्नपदार्थतुल्यमेवेति न नः किञ्चि-त्परिहीयते। तथैव श्रवणादिविधिरपि स्वाप्नकार्यकारणभावसमो बोध्यः। नन्वेवं कर्मकाण्डोक्त-वाक्यस्य तन्मीमांसायाश्च श्रवणादिविधेस्तद्विचारस्य च स्वाप्नवाक्यार्थसमकक्षतया निःशङ्क-प्रवृत्त्याद्यनुपपत्तिरिति चेन्न, स्वाप्नविषयस्य बाधितत्वेन तत्र तत्र वाक्यार्थस्याऽबाधितत्वेन भेदाददोषात्।

ननु "ध्रुवा द्यौर्ध्रुवा पृथिवी" इत्यादिश्रुतौ पृथिव्यादेर्नित्यत्वश्रवणादयुक्तोऽयं वादः श्रुतिविरोधादिति चेन्न; सृष्टिदृष्टिवादपक्षेऽपि पृथिव्यादेः सावयवत्वस्य स्वीकृतत्वेनानित्यत्वं पृथिव्यादेः स्वीकृतमेव, तेनानित्यतया श्रुतेरन्यार्थकल्पनस्योभयमतसाधारण्यात्। तथा च— "यश्चोभयोः समो दोषः परिहारोऽपि तादृशः। नैकः पर्यनुयोक्तव्यस्तादृशार्थविचारणे॥" इति प्राचोक्तमनुकरिष्यति। न च शुक्त्यादेरधिष्ठानस्यापि दृष्टिसृष्टिस्वीकारेण भ्रमात्पूर्वं चासत्त्वेन कुत्राभासत्वं रजतादेः, किञ्चाध्यासं प्रति सन्निकर्षसंस्कारसादृश्यज्ञानानां कारणत्वेन निरुक्तत्रितय-हेतुजन्यत्वमध्यासस्य तटस्थलक्षणम्, सतो वस्तुनो मिथ्यावस्तुसंभेदावभास इति स्वरूपलक्षणं च न सेद्धुमर्हति, कार्यात् प्राक्सत्त्वं कारणानामपेक्षितमिति वाच्यम्; पूर्वोक्ताध्यासतटस्थलक्षणस्य सृष्टिदृष्टिवादाभिप्रायपरत्वेन नेतुं शक्यत्वान्मन्दाधिकारिपरत्वात्। अध्यासस्वरूपलक्षणे च्चेदंशावच्छिन्नचैतन्यस्यैवाधिष्ठानत्वस्वीकारेण तस्य च सत्यत्वेन मिथ्याभूतरजतस्य तत्रावभास-संभवात्, मन्मतेऽपि तथैव स्वीकारेणादोषात्। न च नेदं रजतमिति बाधस्यापि दृष्टिसृष्टि-त्वेन तेन कथं बाध उपपद्यते, तदधिकसत्त्ववत्ताभावादिति युक्तम्; बाधकज्ञानस्य तदधिक-सत्ताकत्वास्वीकारेण तदन्यूनसत्ताकत्वस्यैव बाधप्रयोजकत्वस्वीकारेणानुपपत्त्यभावात्। सृष्टि-दृष्टिवादे यथा व्यावहारिकेण घटाभावादिना व्यावहारिकस्यैव घटस्य बाधस्तथैव मन्मतेऽपि बाध्यबाधकज्ञानयोः प्रातिभासिकत्वं न दण्डवारितम्। न च दृष्टिसृष्टेरपि दृष्टिसृष्टिस्वीकारे पटादेर्न सा दृष्टिसृष्टिकल्पना कर्तुं शक्या, अनुव्यवसायात्मकज्ञानवादिमते पटज्ञानस्य ज्ञेयत्वेऽपि पटस्यापि ज्ञेयत्वं स्वीक्रियते यथा, तथैव पटविषयकदृष्टिसृष्टिदृष्टिसृष्टिकल्पनेऽपि घटविषयक-दृष्टिसृष्टिदृष्टिसृष्टिः पटदृष्टिसृष्टिः किन्न स्यात्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवं श्रुतिस्मृतिपुराणेतिहासादिप्रामाण्येन साधकयुक्तिमत्त्वेन बाधकयुक्तिसमुद्धरणेन च यावदेव दृष्टिस्तावदेव सृष्टिरिति सिद्धः स्थूणानिखननन्यायेन दृष्टिसृष्टिवाद इति न केषामपि विचिकित्सालेशः।

इत्थमत्र समालोच्यम् -- यद्यस्य मतस्य प्रामाणिकत्वं कथं न सर्वेषां विदुषामविदुषामपि स्वाप्नपदार्थवद् भानं भवति व्यावहारिकप्रपञ्चस्य। दृश्यते चैकस्यैव प्रासादक्षेत्रारामादेः पितृपिता-महप्रपितामहादिस्वामिकत्वं सर्वैरपि। किञ्च, सर्वोऽयं लोकव्यवहारः समुच्छिद्येत, न चोच्छिद्यते। तेनायमयुक्तो दृष्टिसृष्टिवादः। किञ्च, समुपस्थितबाधकयुक्तिनिरासार्थमनेकक्लिष्टकल्पनापेक्षया श्रुतिप्रतिपादितः सृष्टिदृष्टिवाद एव श्रेयान्। कृतवेदान्तपरिशीलनानामपि धीधनानां दृष्टिसृष्टि-वादोऽयं न बुद्धिपथमारोहति सम्यक्, किमत्र निदानम्? तेन नास्मिन्मते निर्भर इत्यादिदूषणं दृष्टिपथमध्यारोहति। परमेतेषां समुत्तरणं कृतमपि प्रकारान्तरेण पुनरुच्यते——प्रथममद्वैतसिद्धान्त एव श्रद्धा कियतामेव पुरुषधौरेयाणां कृतसुकृतानां समुदितशमादीनां जञ्जन्यते। तत्र किं निदानम्? यदविद्याविलासे सर्वोऽप्यैहिकपारत्रिकक्रियाकलापो भेदनिबन्धन एव प्रतीयते, तेन प्रसिद्ध्या च भेदस्य बालैरपि सुज्ञेयतया शास्त्रदर्शिभिरपि क्रमेण तं तमेव बालं शास्त्रीय-सिद्धान्तेऽवतितारयिषुभिर्भेददृष्ट्यैव व्यवह्रियते शास्त्रेऽपि। परं न ते परमार्थतो द्वैतवादिनः।

गौतमकपिलकणादादयोऽपि मन्दाधिकारिणं समुद्दिश्य शाखाचन्द्रन्यायेन पञ्चकोशादि-न्यायेन स्थूलारुन्धतीन्यायेन वा प्रथमं भेदमेवोररीकृत्य लोकवद् व्यवहरन्ति शास्त्रे, परं तेषां निष्पक्षपातिनां वेदान्ते पक्षपातः परमार्थतः। किञ्च, द्वैतस्थापनपरमाचार्यैरुदयनाचार्यैरपि स्वग्रन्थे-ऽद्वैतमाहात्म्यं भृशं तुष्टुवे। तथा हि—"न ग्राह्यभेदमवधूय धियोऽस्ति वृत्तिस्तद्बाधके जयिनि वेदनये जयश्रीः। नो चेदनीदृशमिदं पुनरेव विश्वं सत्यं तथागतमतस्य तु कोऽवकाशः॥" इति बौद्धाधिकारे शून्यवादिविज्ञानवादिमतखण्डनावसरे तैरिदमुक्तम्—घटपटादिज्ञेयभेदं तिर-स्कृत्य बुद्धेर्वृत्तिर्यतो न भवति, तेन घटपटादीनां सत्त्वं सिद्धं भवति; "अर्थेनैव विशेषो हि निराकारतया धियाम्" इति तैरेवोक्तत्वात्। तस्य घटपटादिप्रपञ्चस्य बाधके जाग्रति "नेह नानास्ति किञ्चन" इति श्रुत्या मद्वेदनये वेदान्त एव जयश्रीः समागता सिद्धेति यावत्। अन्यथा तेषां सत्त्वस्वीकारे न्याये जयः। भवन्मतस्य न कोऽप्यवकाश इत्यस्माकं वेदनये जयश्री-रिति कथनेन स्वीयत्वमद्वैतस्य दृढीकृतम्। अपरत्रापि तैरेवाद्वैततत्त्वप्रतिपादनावसरे—"के वयं तच्चिन्तने समर्थाः, आर्द्रवणिजः किं वहित्रचिन्तया" इति निदर्शनालङ्कारपरकवाक्येन स्वस्यार्द्रवणिक्तुल्यत्वं वेदान्तिनो वैदेशिकवणिक्तुल्यत्वप्रतिपादनेन चाद्वैते कियान् गौरवः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पक्षपातश्च प्रदर्शित इति समेषां प्रत्यक्षम्। चिन्तामणिकृद्भिरपि मङ्गलश्लोके—"गुणातीतोऽपीशस्त्रिगुणसचिवस्त्र्यक्षरमयः" इति प्रोक्तम्। न्यायमते गुणातीतत्वमीश्वरस्यासंभवि, वेदान्तमतेनैव गुणातीतत्वम्। तेन तत्र वेदान्ते तेषामतीव पक्षपातो व्यज्यते।

दीधितिकृद्भिरपि —"ॐनमः सर्वभूतानि विष्टभ्य परितिष्ठते। अखण्डानन्दबोधाय पूर्णाय परमात्मने॥" इति प्रोक्तं स्वमते बोधस्वरूपत्वं परमात्मनो न भवितुमर्हति, तेन ज्ञानस्वरूपस्वीकारे वेदान्ते पक्षपातः। गदाधरभट्टाचार्यैर्यद्यपि स्वमतेनापि समर्थितं परं तदक्षरानुगुणमिति प्रत्येमि। अतो वेदान्ते द्वैतिनामपि पक्षपातः, यतो हि तत्र सर्वेषां समन्वयो भवति। भेदप्रतिपादकश्रुतीनां लोकसिद्धभेदानुवादकतया—"अग्निर्हिमस्य भेषजम्" इतिवत् समन्वयादद्वैतप्रतिपादकश्रुतीनामनन्यपरत्वेन तस्य सर्वप्रमाणबलवत्त्वम्, तेनाद्वैते शास्त्रतात्पर्यम्। अत एव परमनैयायिकैरपि वाचस्पतिशङ्करमिश्रप्रभृतिभिस्तत्तन्मतपोषकटीकाकरणेन तत्रादरो दत्तः। बुद्धौ सम्यगनारूढत्वे कारणं व्यवहारे चोपासनादौ च सर्वत्र भेददर्शनमेव, परं निष्कामकर्मोपासनया क्षीणपापस्य साऽद्वैतभावनाऽवश्यमुदेति। अत एव खण्डने कथितम् —"ईश्वरानुग्रहादेषा पुंसामद्वैतभावना। महाभयकृतत्राणा द्वित्राणामेव जायते॥" इति। न तत्र शास्त्रस्य दोषः। स्वमतेऽपि मन्दाधिकारिकृते सृष्टिदृष्टिवाद उत्तमकृते चायं वादः। शास्त्रस्य योगस्य भक्तेर्वा यथोत्तरोत्तरा भूमिका श्रेयसी भवति, परं पूर्वा भूमिकापि चोत्तरत्र समारोहणार्थमतीवोपयुक्ता, तथैव प्रकृतेऽपि। अयमेवाशयो भाष्यकृताऽध्यारोपापवादन्यायेनोपदर्शितः। गौडपादाचार्यैरपि—"मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा। उपायः सोऽवताराय नास्ति भेदः कथञ्चन॥" इति प्रतिपादितम्। आसृष्टेरविद्यादोषकलुषितान्तःकरणतया झटिति बुद्ध्यारूढो न भवति, नैष शास्त्रस्य दोष इति दृष्टिसृष्टिवादे न कोऽपि विचिकित्साऽवसरः। शब्दस्य प्रामाण्यं सर्वतः प्रबलम्, अत एव प्रत्यक्षादृष्टे परमात्मनि शब्द एव प्रवर्तते। तेन शब्दप्रामाण्यात्सुदृढोऽयं वाद इति न नः किञ्चिदपक्षीयत इति॥

श्रीमहानन्दठक्कुरः।

(३)

विवर्तवादिनां वेदान्तिनां बहूनि मतानि सन्ति। तथा हि—केचनावच्छेदवादम्, कतिपये प्रतिबिम्बवादम्, कतिचनाभासवादं च वदन्ति। परं च कुशाग्रबुद्ध्या विचारयामस्तर्हि स्वान्ते एतदेवायाति यदवच्छेदप्रतिबिम्बाभासवादानां व्युत्पादने नात्यन्ताग्रहः, केवलं तेषां बालविनोदाय शास्त्रे प्रपञ्चो न ह्यन्यदिति। अपि तु ब्रह्मैवानादिमायावशाज्जीव-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भावापन्नः सन् विवेकेन मुच्यत इति। अत एव बृहदारण्यकभाष्ये स्वयमेव भगवत्पादैः प्रोक्तम् —"प्रतिबिम्बावच्छेदप्रक्रियां विहाय कौन्तेयस्यैव राधेयत्ववदविक्रियस्य नित्यशुद्धबुद्धमुक्तस्वभावस्यात्मनोऽनाद्यविद्यावशाद् जीवभावः। जीवभावापन्नस्यैव स्वाविद्यावशात् सर्वप्रपञ्चकल्पकत्वेनेश्वरोऽपि सह सर्वज्ञत्वादिधर्मैः स्वप्नोपलब्धमन्त्रवत् तेनैव स्वभिन्नः कल्प्यते। पश्चाच्च श्रवणादौ प्रवृत्तस्य तत्त्वमसीत्यादिमहावाक्यार्थबोधात् स्वरूपसाक्षात्कारेण मुक्तिः" इति। व्याधकुलसंवर्धितराजकुमारदृष्टान्तेन समर्थितं च। तस्योपरि वार्त्तिककृताप्युक्तम्—

राजसूनोः स्मृतिप्राप्तौ व्याधभावो निवर्तते।
तथैव चात्मनोऽज्ञस्य तत्त्वमस्यादिवाक्यतः॥

तथा चैतादृशज्ञानात्पूर्वं जीवेश्वरभेदो जीवपरस्परभेदो भासमानोऽप्यद्वितीयब्रह्मसाक्षात्कारानन्तरं न भासते, सर्वस्याऽपि जगतो मायागन्धर्वनगरवद् मिथ्यात्वेन प्रतीयमानत्वात्। तदुक्तम्—

बालान् प्रति विवर्तोऽयं ब्रह्मणः सकलं जगत्।
अविवर्तितमानन्दमास्थिताः कृतिनः सदा॥

ब्रह्मणः कारणाद् विषमसत्ताकतयोत्पद्यमानमिदं सकलं जगद् दृश्यजातं कार्यं बालान् स्वरूपानभिज्ञान् प्रति विवर्तोऽयम्। कारणविरुद्धसत्ताकतयोत्पद्यमानं कार्यं हि विवर्त इति। कृतिन आत्मविदस्तु —अविवर्तितमानन्दं ब्रह्मरूपानन्दमास्थिताः प्राप्ताः। निरुपाधिकस्वरूपानन्दानुभवो ज्ञानिनां सदैव वर्तत इति तस्मात् कारणादविद्यावत्पुरुषदृष्ट्यैवाविद्या तत्कार्यं च, न तु विद्वद्दृष्ट्येति बोध्यम्। तथा च श्रुतिः विद्वदनुभवे मानम् —

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥ इति।

अद्वैतमकरन्देऽपि—"आत्माज्ञानमहानिद्राजृम्भितेऽस्मिन् जगन्मये। दीर्घस्वप्ने स्फुरन्त्येते स्वर्गमोक्षादिविभ्रमाः॥" इति। अयमेवैकजीववादाख्यो मुख्यो वेदान्तसिद्धान्तः। एतच्च सर्वमनेकजन्मार्जितसुकृतस्य भगवदर्पणेन भगवदनुग्रहफलाद्वैतश्रद्धाविशिष्टस्य निदिध्यासनसहितश्रवणमननसंपन्नस्यैव पुरुषस्य चित्तारूढं भवति, न तु वेदान्तश्रवणमात्रेण निदिध्यासनादिशून्यस्य पाण्डित्यमात्रकामस्य पुरुषस्येति रहस्यम्। एतदेवापरोक्षानुभूतौ स्वयमेव भगवत्पादैः प्रोक्तम्—"कुशला ब्रह्मवार्तायां वृत्तिहीनास्तु रागिणः। तेऽप्यज्ञानतमं नूनं पुनरायान्ति यान्ति च॥" इति। यद्यप्येकैकस्मिन् कल्पेऽप्येकैकोऽपि जनोऽपव्रजेत्, तथाप्युच्छिन्नः संसारः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्यादिति, तथा च प्रवृत्तिरेव श्रेयसी न निवृत्तिरित्यादि प्रतिपादितमपि परास्तम्। श्रुतिस्मृतिसिद्धस्य मुक्तानुभवसिद्धस्य च मोक्षस्यानन्तरप्रवृत्तेनाऽसत्तर्केण बाधः कर्त्तुं नहि शक्यते, श्रुतिप्रमाणापेक्षयाऽनुमानादिप्रमाणानां दुर्बलत्वस्य शास्त्रे प्रसिद्धत्वात्; सर्वस्यापि श्रुतिस्मृतीतिहासपुराणाद्यखिलवाङ्मयस्य मोक्षप्रतिपादने पर्यवसन्नस्यानर्थक्यं च स्यादिति। अत एव दृष्टिसृष्टिवादिनामनुमानं चाज्ञानं तत्प्रयुक्तं दृश्यं च प्रातीतिकं स्वप्नवत्। यदा यदा विद्यते तदा तदा साक्षिरूपेण जीवेनैव प्रकाश्यते, न तु तत्रावरणं तद्व्यञ्जकमनोवृत्तिर्वा, तत्साधनमिन्द्रियं वा कल्पते। दृष्टिसृष्टिवादिमते सर्वस्य जाग्रत्प्रपञ्चस्य कल्पितत्वाभ्युपगमे कस्कः कल्पकः? किं निरुपाधिरात्मा, अविद्योपहितो वा? आद्यस्तु वक्तुं न शक्यते, कुतो हि मोक्षेऽपि साधनान्तरनिरपेक्षत्वस्य सत्त्वेन संसारापत्तिः। नापि द्वितीयो भवितुमर्हति, कुतो ह्यविद्याया अपि कल्पनीयत्वेन तत्कल्पनात्प्राक् कल्पकाभावादिति चेत्सत्यम्; परं च पूर्वपूर्वकल्पिताविद्योपहितः स उत्तरोत्तराविद्याकल्पकः। कल्पककल्पनाप्रवाहस्यानिदम्प्रथमत्वाच्च नानवस्थादोषः। अविद्याया अनादित्वस्वीकारे शुक्तिरजतादिवत् कल्पितत्वं न युज्यते, अथ चात्मनि सामान्यरूपेण सर्वाध्याससंभवे तु साद्यनादिविभागानुपपत्तिरिति चेत्; इत्यपि न, कुतो हि यथा स्वप्ने कल्प्यमाने गोपुरादिकं किञ्चित् पूर्वसिद्धत्वेन किञ्चित्तदानीमुत्पद्यमानत्वेन कल्प्यते, एवं च जागरेऽपि विभागोपपत्तेः। अथवा दृष्टिरेव सृष्टिरिति व्याख्येयम्, दृश्यस्य दृष्टिभेदे प्रमाणाभावात्। तथा चोक्तम्—

ज्ञानस्वरूपमेवाहुर्जगदेतद् विचक्षणाः।
अर्थस्वरूपं भ्राम्यन्तः पश्यन्त्यन्ये कुदृष्टयः॥
तस्मान्न विज्ञानमृतेऽस्ति किञ्चित्क्वचित्कदाचिद् द्विज वस्तुजातम्।
विज्ञानमेकं निजकर्मभेदविभिन्नचित्तैर्बहुधाऽभ्युपेयम्॥ इति।

केचित्त्वेवमपि प्राहुः—जीवेशयोः कथमभेदः, सर्वज्ञत्वादिविरुद्धधर्माध्यासात्। तथा हि—तत्पदवाच्य ईश्वरः "यः सर्वज्ञः सर्ववित्" इत्यादिश्रुत्या सर्वज्ञत्वेन प्रमितः, "तद्यथा महामत्स्य उदके" इत्यादिना अवस्थात्रयवैशिष्ट्येन च प्रमितो जीव इति। स च साकल्येन वैकल्येन स्वदेहादिकमपि न जानाति, किमधिकेनेत्यपि न कथनीयम्। कुतो हि केनचन देवानांप्रियेण दृष्टिसृष्टिवादिनं प्रति कालानुपपत्तिरुद्भाविता, परन्तु दृष्टिसृष्टिवादिमते हि यद् दृश्यते तदेव सर्वम्। तत्कर्तृत्वं च तस्याऽस्त्येवेति न सर्वज्ञसर्वकारणानुपपत्तिः। इतरेण मुक्तानन्दादेः साक्षात्कारस्य पुरुषान्तरेऽनुपपत्त्या कथं तत् स्यादित्यपि न वाच्यम्;

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सिद्धान्ते हि त्वदीयं रसं न जानामीति प्रतीत्या ज्ञानविषयत्वेन साक्षिभास्यत्वान्नोक्तानुपपत्तिः, भेदमात्रस्य नाङ्गीकारात्। एवं च श्रुतिस्मृतिसिद्धस्य सृष्टिप्रलयादेः कः कल्पक इत्यपि मा वादीः, अस्माकं मते न कोऽपि कल्पक इति राद्धान्तः।

तर्हि भवन्मते किमालम्बना "आत्मन आकाशः संभूतः" इति श्रुतिरिति चेत्, निष्प्रपञ्चब्रह्मात्मैक्याऽवलम्बनेत्यवेहि।

अध्यारोपापवादाभ्यां निष्प्रपञ्चब्रह्मप्रतिपत्तिर्भवतीति ध्येयम्। तत्प्रतिपत्त्युपायतया श्रुतिषु सृष्टिप्रलयोपन्यासो न तात्पर्येणेति भाष्याद्युद्घोषः। अन्यच्च जगत्सत्यत्ववादिनामपीश्वरस्य सृष्ट्यादौ प्रवृत्तिरनुपपन्नैव। सा च लोके सुखे दुःखाभावे तदुभयसाधने वा दृश्यते। ईश्वरस्य चाप्तकामत्वेन तदभावस्य स्वतः सिद्धत्वात्, "आप्तकामस्य का स्पृहा" इति श्रुतेः। तर्हि तात्पर्याभावे वियदादिसर्गतत्क्रमादिप्रतिपादकश्रुतीनां परस्परविरोधपरिहारप्रयत्नो व्यर्थ इत्यपि न वक्तव्यम्, कुतो हि न्यायव्युत्पत्त्यर्थं तात्पर्यमभ्युपेत्य तत्प्रवृत्तेः। अस्मिन् विषये शास्त्रदर्पणकृद्भिः प्रोक्तम्—"श्रुतीनां सृष्टितात्पर्यं स्वीकृत्येदमिहेरितम्। ब्रह्मैक्यात्मपरत्वात्तु तासां तन्नैव विद्यते॥" इति। इतरेतरविरुद्धद्वैतवादाः स्वबुद्धिविकल्पमात्रा अतत्त्वनिष्ठा इत्यपि वक्तुं शक्यते।

दृष्टिसृष्टिशब्दयोर्व्युत्पत्तिस्त्वनया रीत्याऽऽपादनीया, तथा हि—दृष्टिसृष्टिरित्यत्रोभयत्रापि भावे क्तिन्प्रत्ययः; तथा च दर्शनं दृष्टिः, सर्जनं सृष्टिरिति निष्पद्यते। दृष्टिरित्यनेन सामान्यज्ञानमादीयते, तथैव सृष्टिरित्यनेनापि सामान्यसर्जनं गृह्यते; तेन च सामान्यज्ञानं सामान्यसर्जनं च फलितं भवतीति बोध्यम्। एवं च यदा दृष्टिस्तदा सृष्टिः। नहि पूर्वं परं च केवलं ज्ञानकालमात्रे सृष्टिरिति सुधीभिर्ध्येयम्। एष एव सिद्धान्तो दृष्टिसृष्टिवादिनामिति। तथा चोक्तम्—"रज्ज्वां नास्ति भुजङ्गः सर्पभयं भवति हेतुना केन। तद्वद् द्वैतभ्रान्तिरविद्यया न सत्यमिदम्॥" इति। तत्र रज्ज्वां कालत्रयेऽपि निर्भ्रान्तदृष्ट्या सर्पो न भवितुमर्हति, किन्तु भ्रान्तस्यावश्यं जायते भयम्, किं क्रियते। तेन चैवं स्वीक्रियतां दृष्टिसृष्टिवाद इति निगद्य विरम्यते॥

श्रीनृसिंहदेवः शास्त्री।

— —

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आभासप्रतिबिम्बावच्छेदवादाः

द्वैतवादिभिस्तात्पर्यनिर्णायकोपक्रमादिषड्विधलिङ्गेषु चक्षुर्निमीलद्भिः श्रुतिमुख्य-तात्पर्यं प्रच्छादयद्भिस्तदनुयायिभिश्च वागाडम्बरविधायिभिर्दुस्तर्कतमसाच्छादिता न सम्यग्बोधाय पर्याप्तेति श्रुतिपरमतात्पर्यविद्भिर्वेदोद्धारधुरीणैर्जगद्गुरुभिः श्रीशङ्कराचार्यभगवत्पादैः शारीरक-मीमांसाभाष्यमभाषि।

तत्रात्मानात्मनोरन्योन्याध्यास एवानर्थहेतुत्वेन जीवानामनेकविधशोकदुःखादिनिदान-मिति व्यवस्थापितम्। समस्तोपाध्यनवच्छिन्नानन्तानन्दैकरसे स्वात्मनि नानाविधशोक-दुःखाद्युपेतान्तःकरणाद्यहितारोपेण प्रत्यगात्मा दुःखीभवति।

सोऽयमध्यासोऽनाद्यविद्यामूलक इत्यविद्याया एवोच्छेदाय सर्वे वेदान्ता उपनिषदपर-पर्याया जीवात्मसु शुद्धबुद्धमुक्तस्वभावसच्चिदानन्दाद्वैतब्रह्मतादात्म्यबोधनद्वारा प्रवृत्ताः, उपनिपूर्व-कस्य सदेर्निष्पन्नस्योपनिषच्छब्दस्यात्रैवार्थे व्युत्पत्तिलाभात्; उपनीयाद्वयं ब्रह्म निश्चयेन सवासनामविद्यां सादयतीत्युपनिषदर्थावगतेश्च।

सा चाविद्या जगदुपादानभूता मायाख्या प्रत्यगभिन्नपरमात्मब्रह्मणः शक्तिरेव। सा न सती, ब्रह्मबोधानन्तरं तस्या बाधितत्वात्; "तरति शोकमात्मवित्", "ब्रह्म वेद ब्रह्मैव भवति" इत्यादिश्रुतेः। नापि शशशृङ्गादिवदत्यन्तासती, जगदुपादानत्वानुपपत्तेः। किन्तु सत्त्वासत्त्वाभ्यामनिर्वाच्या, सत्त्वरजस्तमोरूपत्रिगुणात्मिका, भावरूपा च।

एतादृशीमेव तामविद्यामादाय नित्यनिर्मृष्टनिखिलधर्मिधर्मभावोऽपि परमात्मा निखिलजगदुपादानभावं भजमानो जीवेश्वरव्यवहारभाग्भवति, "इन्द्रो मायाभिः पुरुरूप ईयते", "मायाभासेन जीवेशौ करोति" इत्यादिश्रुतेः। तत्रेश्वरस्तामविद्याख्यां मायां विशुद्ध-सत्त्वां स्वायत्तीकृत्य सर्वज्ञः शक्तिमान् मायाकृतदोषानवच्छिन्नश्च भवति। जीवस्तु स्वयमेव तद्वशीभूतः सत्त्वाविशुद्धितारतम्याद् देवतिर्यगादिनानाशरीरेष्वभिमानवान् नानाविधान् सुख-दुःखमयान् भोग्याननुभवति। तथा च श्रुतिः—

> द्वा सुपर्णा सयुजा सखाया समाने वृक्षे परिषष्वजाते।
> तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति॥ इति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतेन क्लेशकर्मविपाकाशयैरपरामृष्टो नित्यज्ञानरूपः प्रधानांशसत्त्वगुणप्रतिफलिततया सर्वज्ञः प्रमाणवृत्तिप्रतिफलितत्वेनाल्पज्ञानवद्भ्यो जीवेभ्यो विलक्षण एवेश्वर इति पातञ्जलानां मतमप्युपनिषत्प्रतिपाद्याद्वैतात्मतत्त्वविरोधान्नातिरमणीयम्, जीवपरमात्मनोर्भेदे मानाभावात्।

न च नाहमीश्वर इत्यादिप्रत्यक्षं तत्र मानम्, गौरोऽहम्, स्थूलोऽहमित्यादिवत्तस्य भ्रमत्वात्। नाऽपि जीवो ब्रह्मणो भिन्नोऽसर्वज्ञत्वादित्याद्यनुमानं तत्र मानम्, व्यावहारिकभेदेन सिद्धसाधनत्वात्। उपमानं त्वनाशङ्कयमेव। न च "द्वा सुपर्णा" इति श्रुतिरेव मानमिति वाच्यम्, व्यवहारसिद्धभेदानुवादकत्वेनापूर्वार्थत्वाभावात्; "तत्सृष्ट्वा तदेवानुप्राविशत्", "नान्योऽतोऽस्ति द्रष्टा", "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति", "तत्त्वमसि", "अहं ब्रह्मास्मि" इत्येवंजातीयकेभ्यः श्रुतिशतेभ्यो जीवब्रह्मणोरभेद एव श्रुतितात्पर्य-सत्त्वाच्च। ननु भेदप्रतीतेरन्यथानुपपत्तिप्रसूतार्थापत्तिरेव प्रमाणं भवितुं युक्तमिति चेन्न, वास्तवभेदं विनाऽनुपपत्तेरेवाभावात्। तस्माच्छुद्धपरमात्मैव स्वशक्तितारतम्याज्जीवेशादि-भाग्भवति, न तत्र भेदगन्धोऽपीति निरवद्यमेव जीवब्रह्मणोरैक्यम्।

तदेवं "तत्त्वमसि" इत्यादिवाक्येन प्रतिपादितं जीवब्रह्मणोरेकत्वं वाक्यार्थज्ञाने पदार्थज्ञानस्य हेतुत्वात् तत्त्वमिति पदार्थभूतयोर्जीवेश्वरयोर्विभागमन्तराऽनुपपन्नमिति जीवेश्वर-विवेचनायैवाऽऽभासप्रतिबिम्बावच्छेदवादाः समुत्तिष्ठन्ते।

आभासवादः

तत्त्वमसीति वाक्ये तत्पदार्थ ईश्वरः, त्वमिति पदार्थो जीव इति गृह्यते। तत्र कः ईश्वरः, कश्च जीव इत्याकाङ्क्षायामाभासवादिनो वार्त्तिककाराः सुरेश्वराचार्यपादा आहुः— "कार्योपाधिर्भवेज्जीवः कारणोपाधिरीश्वरः" इतिश्रुतेर्जगदुपादानभूताज्ञानोपाधेर्दर्पणादिवत् स्वच्छत्वेन तत्र प्रतिबिम्बभावापन्नत्वात् तदन्तर्गतस्तत्तादात्म्यापन्नो यश्चिदाभासः = चित्प्रति-बिम्बः स स्वरूपतो मिथ्यापि बिम्बचैतन्याभेदमादायेश्वरः, सर्वेषां प्रेरकत्वेनान्तर्यामी, सर्वव्यव-हारौपयिकज्ञानस्वरूपत्वेन साक्षी, जगद्विवर्तोपादानत्वेन जगत्कारणमिति च कथ्यते।

न च जगत्कारणत्वेन जीवान् प्रत्यावृतत्वात् साक्षिरूपेणाप्यावृतत्वापत्त्या साक्षित्वानुप-पत्तिरिति वाच्यम्; अज्ञानप्रतिबिम्बत्वरूपसाक्षित्वविशिष्ट एवाहङ्काराध्यासस्य स्वीकृतत्वेन जीवान् प्रति साक्षिणोऽनावृतत्वात्। तत्र प्रमाणवृत्त्यभावकालेऽप्यहमज्ञ इति प्रत्ययाद् अहङ्कारविशिष्टस्यैव सुखदुःखादिसाक्षित्वेनाज्ञानसाक्षिणोश्वरत्वोपपत्तेः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

आभासप्रतिबिम्बावच्छेदवादाः

एवमज्ञानपरिणामभूता या बुद्धिरहङ्काररूपा तत्र प्रतिबिम्बितत्वेन तदन्तर्गतस्तत्तादात्म्यविशिष्टतया प्रतीयमानश्चिदाभासः = चित्प्रतिबिम्बः स्वरूपतो मिथ्याऽपि स्वबिम्बचैतन्याभेदेन जीवः, प्राणान् धारयिता, कर्ता, भोक्ता, प्रमाणजन्यज्ञानाश्रयत्वात् प्रमाता च गीयते।

अस्मिन् मते प्रतिबिम्ब उपाध्यन्तर्गतोऽनिर्वचनीयख्यात्यनुरोधेन कल्पित एव। अतो बिम्बचैतन्याभेदमादायैव जीवेश्वरत्वादिव्यवहारो यथायोगं भवति।

न च जीवस्याहङ्कारोपाधिकत्वस्वीकारे सुषुप्तावहङ्काराभावाज्जीवाभावप्रसङ्ग इति वाच्यम्; सुषुप्तावपि संस्काररूपेणाहङ्कारसत्त्वात्। प्रतिदेहमहङ्काराणां च भिन्नत्वात् तद्गतचिदाभासभेदेन तदविविक्तचैतन्यस्यापि भिन्नत्वेनावभासमानत्वाज्जीवभेदोपपत्तेर्न सुखदुःखयोरव्यवस्थानम्। अज्ञानस्य तु सर्वत्राभिन्नत्वात्तद्गतचिदाभासभेदाभावात् तदविविक्तसाक्षिचैतन्यस्य परमेश्वरस्य न कदाचिदपि भेदभानम्।

ननु सुखदुःखव्यवस्थार्थं प्रमातारो जीवा भिन्नाः साक्षी त्वेक एवेति यदुक्तं तन्न युक्तम्, स्मृत्यादिकार्याणामप्रमात्वेन साक्ष्याश्रितत्वेन स्मृतिजनकसंस्काराणामप्यविद्याया इव साक्षिकोटौ निवेशस्यावश्यकत्वेन तद्भेदेन साक्षिणोऽपि भेदापत्तेरिति चेन्न; स्मृतिं प्रत्यविद्याया एवोपादानत्वेन संस्काराणां च निमित्तत्वमात्राङ्गीकारेण साक्ष्याश्रितस्मृतिरूपकार्योपादानकोटौ संस्काराणामप्रवेशात्तद्भेदेन साक्षिभेदाभावात्। न च प्रमाया इव स्मृतेरप्यहङ्कारोपाधिकः प्रमातैवाश्रयः स्यात्, न त्वविद्योपाधिकः साक्षिचेतन इति वाच्यम्; अहङ्कारस्य प्रमाणजन्यज्ञानोपादानत्वनियमात्, अप्रमात्वावच्छेदेन चाविद्याया एव कारणत्वाङ्गीकाराच्च; अज्ञाताऽविषयकत्वेन स्मृतेरप्यप्रमात्वाच्च।

नन्वेवं प्रमास्मरणयोः सामानाधिकरण्याभावेन कार्यकारणभावोपपत्तिर्न स्यादिति चेन्न; साक्षिण एव मनःस्वरूपोपाधिविशिष्टस्य प्रमातृत्वेन सामानाधिकरण्यसंभवेन कार्यकारणभावोपपत्तेः। न चैकमनोगतस्य मनोन्तरावच्छिन्नसाक्षिण्यपि स्मृत्यापत्तिरिति वाच्यम्; तन्मनोगतप्रमाजन्यसंस्कारस्य मनोन्तरावच्छिन्ने विरहात्, तच्छरीरावच्छिन्ने स्मृत्यादौ तच्छरीराणामपि हेतुत्वाच्च।

एवं च जीवेशयोराभासरूपत्वेन तत्त्वमसीति वाक्ये जहल्लक्षणयैव तत्त्वमिति पदार्थयोः साभासाज्ञान-साभासाहङ्कारयोः परित्यागेन शुद्धचिद्बोधकत्वं सिद्ध्यति। आभासस्य जडाजडविलक्षणत्वेनानिर्वचनीयत्वाद् बिम्बचिद्भिन्नत्वेन न जहदजहल्लक्षणा संभवति। तदुक्तं संक्षेपशारीरककारैः—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

साभासाज्ञानवाची यदि भवति पुनर्ब्रह्मशब्दस्तथाहं-
शब्दोऽहङ्कारवाची भवति तु जहती लक्षणा तत्र पक्षे । इति ।

न चाभासस्यैव बद्धत्वात् केवलचैतन्यस्य च मुक्तत्वाद् बन्धमोक्षयोर्वैयधिकरण्यं स्वनाशार्थं प्रवृत्त्यनुपपत्तिश्चेति वाच्यम्; केवलचैतन्यस्यैवाभासद्वारा बद्धत्वाभ्युपगमात् । तदुक्तं वार्त्तिककारैः—

"अयमेव हि नोऽनर्थो यत्संसार्यात्मदर्शनम्" इति ।

तेन शुद्धचैतन्यस्याभास एव बन्धः, तन्निवृत्तिश्च मोक्ष इति । स्वीयवास्तवरूपताप्राप्तये बद्धस्वरूपवानाशार्थं प्रवृत्तेश्चौचित्यमेवेति न स्वनाशार्थं प्रवृत्त्यभावशङ्काऽपि । तथा चाहुर्विद्यारण्याः —

देवत्वकामा ह्यग्न्यादौ प्रविशन्ति यथा तथा ।
साक्षित्वेनाविनाशाय स्वविनाशं स वाञ्छति ॥ इति ।

ननु शुद्धचित एवाभासात्मकबन्धस्वीकारे शुद्धचित एव जीवत्वमप्यङ्गीकार्यमिति चेत्तदप्यस्तु, आभासाविविक्तचैतन्यमेव तत्त्वमित्यादिपदवाच्यम् । तथा च वाच्यैकदेशस्य साभासोपाधेः परित्यागात् शुद्धचितोऽपरित्यागाच्च जहदजहल्लक्षणैवेति वेदान्तप्रसिद्धप्रवादोऽप्यनुकूल एव । अयमेव पक्षः प्रतिबिम्बस्य स्वरूपतो मिथ्यात्वमिति प्रतिपादनपर आभासवाद इति गीयते संप्रदायविद्भिः ।

प्रतिबिम्बवादः

बिम्बस्यैव प्रतिबिम्बव्यवहारतत्कृतकार्यसंभवान्नातिरिक्ताभासकल्पनं युक्तं गौरवादित्यभिप्रायेण विवरणानुसारिणस्त्वज्ञानोपहितं बिम्बचैतन्यमेवेश्वरमाहुः, "विभेदजनकेऽज्ञाने नाशमात्यन्तिके गते । आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥" इति स्मृत्याऽज्ञानस्यैवैकस्य जीवेश्वरविभाजकोपाधित्वप्रतिपादनात् ।

एवं च कर्णशष्कुल्या श्रोत्रवदज्ञानोपाधिना परिचायकेन परिचितं चैतन्यमेव ग्रीवास्थमुखवदुपाध्यनन्तर्भूतमीश्वरः, साक्षीति व्यवह्रियते ।

तत्रैवाज्ञाने प्रतिबिम्बितं तदन्तर्गतत्वरूपारोपितधर्मविशिष्टं चैतन्यं बिम्बात्मकमेव जीवः। अज्ञानप्रतिबिम्बितस्याऽपि जीवस्याऽन्तःकरणमेव विशेषाभिव्यक्तिस्थानमित्यन्तःकरणोपाधिकत्वव्यवहारोऽपि । उपाधेः प्रतिबिम्बपक्षपातित्वेन पूर्णानन्दो नास्ति न भातीति व्यवहारमविद्या प्रतिबिम्बे जीव एव जनयति न बिम्बे, दर्पणादेः स्वगतमालिन्यसंसर्गस्य प्रतिबिम्बीभूत-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मुखादावेव जनकत्वदर्शनात्। एवं चाविद्यकव्यवहाराश्रयत्वेन जीवस्यैव प्रतिबिम्बित्वं न त्वीश्वरस्येति ज्ञेयम्। प्रतिबिम्बे बिम्बाद् भेदमात्रस्यैवाध्यस्तत्वेन स्वरूपेण प्रतिबिम्बस्याऽपि सत्यत्वाद् बन्धमोक्षयोः सामानाधिकरण्यमपि स्वरसत एवोपपद्यत इति विवरणानुसारिणामभिप्रायः।

"कार्योपाधिर्भवेजीवः कारणोपाधिरीश्वरः" इति श्रुतिविरोधान्नेयं कल्पना युक्ता; किन्त्वज्ञानप्रतिबिम्बितं चैतन्यमीश्वरः, अज्ञानपरिणामान्तःकरणप्रतिबिम्बितं चैतन्यमेव जीवः। जीवेश्वरयोरनुस्यूतमज्ञानोपलक्षितं चैतन्यं शुद्धं साक्षिस्वरूपमिति प्रतिबिम्बवादिन एव संक्षेपशारीरककाराः।

अन्तःकरणस्याप्यज्ञानपरिणामेनाज्ञानाविशेषान्न—"विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥" इति विष्णुपुराणवचनविरोधोऽपि। न चैवं वार्त्तिकमतादविशेष इति शङ्क्यम्; वार्त्तिकमते बिम्बातिरिक्तस्यैवाभासस्याङ्गीकारात्, अत्र तु वस्तुतो बिम्बस्यैवोपाध्यन्तर्गतत्वरूपधर्मारोपमात्रेण प्रतिबिम्बव्यवहारात्।

प्रतिबिम्बवादेऽपि प्रतिबिम्बस्य प्रतिबिम्बत्वधर्मविशिष्टत्वेन मिथ्यात्वेऽपि प्रतिबिम्बत्वोपलक्षितस्वरूपचैतन्यस्य पारमार्थिकत्वात् तत्त्वमादिपदयोर्वाच्यैकदेशप्रतिबिम्बत्वाद्यंशपरित्यागेन स्वरूपचैतन्यस्योपादानेन च जहदजहल्लक्षणैवेत्येकैव कूटस्थचिदुपाध्यन्तर्गतत्वाज्जीवेशव्यपदेशभागिति न भिद्यत आभासेनेति प्रतिबिम्बसत्यत्ववादी प्रतिबिम्बवादः।

अवच्छेदवादः

जीवस्यैव भ्रान्त्याश्रयत्वेनानुभूयमानत्वादीश्वरेऽज्ञानकल्पनमयुक्तम्, कार्यकारणयोः सामानाधिकरण्यनियमात्। किञ्च, रूपवत एव द्रव्यस्य प्रतिबिम्बो दृश्यते, चिदात्मा तु नीरूपत्वान्न प्रतिबिम्बितो भवेत्।

ननु रूपवत एव प्रतिबिम्ब इति नाऽस्ति नियमः, जानुदघ्नजले दूरविशालत्वादियुक्तगगनप्रतिबिम्बदर्शनादिति चेन्न; गगनस्य सवितृकरादिप्रतिबिम्बनद्वारा सलिले प्रतिबिम्बितत्वभ्रमात्। तस्मादज्ञानविषयीकृतं चैतन्यमेवेश्वरः साक्षी च। अज्ञानाश्रयीभूतं च जीव इति भामतीकारा आहुः।

बन्धमुक्तिव्यवस्थानुरोधेन जीवोपाधिभूताज्ञाननानात्वमपि स्वीकुर्वन्ति। एवं चाज्ञानानां नानात्वेन तत्कार्यभूतः प्रपञ्चोऽपि प्रतिजीवं भिन्न एव, अन्यथा कस्यचिद् विद्ययाऽज्ञानोच्छेदे प्रपञ्चोच्छेदापत्तेः। ननु प्रतिजीवं प्रपञ्चभेदस्वीकारे कथं यस्त्वया घटो दृष्टः स मयापीति प्रत्यभिज्ञेति चेन्न, युगपद्भ्रमसिद्धानेकसर्पादाविव तद्वृत्त्यसाधारणधर्मवत्त्वे प्रत्यभिज्ञोपपत्तेः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अयमेव जीवेशयोरविद्यावच्छिन्नानवच्छिन्नत्ववादोऽवच्छेदवादः। अस्मिन् मते घटाकाशमहाकाशयोरिव जीवेश्वरयोरपि काल्पनिक एव भेदः, न पारमार्थिक इति तत्त्वमसीति वाक्ये विषयत्वाश्रयत्वपरित्यागेन शुद्धचैतन्यबोधकत्वमुपपन्नमिति सर्वं भामत्यां [१।१।४] तत्तत्स्थलेषु स्पष्टं निरूपितम्।

अत्रेदं चिन्त्यते —जीवाश्रिताविद्यास्वीकारेऽन्योन्याश्रयः स्यादेव। तथा हि— अविद्याधीनो जीवविभागः, जीवाश्रया चाविद्येति। न चाविद्यायामनुपपत्तिरूपायामनुपपत्तिर्न दूषणमिति वाच्यम्, अविद्यायामनुपपत्त्यभावे मुक्तात्मनामप्यविद्यावत्त्वापत्तेः।

न च बीजाङ्कुरन्यायेन जीवाविद्ययोरनादित्वेन न दोष इति वाच्यम्, दृष्टान्तवैषम्यात्। तथा हि—नहि यतो बीजाद् योऽङ्कुरो जायते, तदेव बीजं तस्मादङ्कुराज्जायते; अपि त्वङ्कुरान्तरादेव जायते अत्र जीवाविद्याव्यक्त्योरेकत्वादेव कार्यकारणभावाभावाद् दृष्टान्त-वैषम्यमेवेति ब्रह्मण एवाविद्याश्रयत्वमप्यङ्गीकरणीयम्। तथाह संक्षेपशारीरककारः —

आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नाऽपि गोचरः॥ इति।

न च स्वतःस्फुरणात्मनि कथं ज्ञानाभावरूपमज्ञानं संभवतीति वाच्यम्; भावरूपस्यै-वाज्ञानस्यानिर्वचनीयस्य ज्ञानावरकत्वस्वीकारात्, "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" इति गीतोक्तेः। "मायाभासेन जीवेशौ करोति", "दृश्यते जलचन्द्रवत्" इत्यादिश्रुति-प्रमाणाद् ब्रह्मणः प्रतिबिम्बो भवत्येव। रूपवतो द्रव्यस्य प्रतिबिम्बत्वनियमस्तु चाक्षुषप्रतिबिम्ब-विषयक इति न ब्रह्मणः प्रतिबिम्बत्वनिवारक इति प्रतिबिम्बवादः समीचीनतर एव।

अवच्छेदमात्राज्जीवत्वस्वीकारे घटावच्छिन्नस्याऽपि जीवत्वं प्रसज्येत। बुद्धेः स्वच्छत्वा-त्तदवच्छिन्नस्यैव जीवत्वमिति चेत्, परिच्छेदे स्वच्छत्वास्वच्छत्वकृतविशेषानुपपत्तेः, प्रतिबिम्ब-ग्राहित्वमात्रविशेषोपलब्धिस्वीकारे हठात् प्रतिबिम्बवादस्वीकारापत्तेश्च।

अत एव भामत्यामपि जीवस्य प्रतिबिम्बकल्पत्वं तत्तत्स्थलेषु प्रतिपादितम्, "अविद्यो-पधानं च यद्यपि विद्यास्वभावे परमात्मनि न साक्षादस्ति, तथापि तत्प्रतिबिम्बकल्पजीवद्वारेण परस्मिन्नुच्यते" इति "अवस्थितेरिति काशकृत्स्नः" इति सूत्रे भामत्यामुक्तत्वात्। चेतनत्वेन लोकप्रतिबिम्बविलक्षणत्वात् प्रतिबिम्बकल्पत्वमुपपद्यत एवेति दिक्॥

श्रीत्रिलोधरद्विवेदी।

———

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चयनिका

विविधपत्रिकाभ्यः संचिता संस्कृतवाङ्मयसंबद्धा लेखसूची

व्रजवल्लभद्विवेदः, वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी।

आलोचना, व० ६, अ० १, जनवरी १९५७

डॉ० सत्यदेव चौधरी शास्त्री—संस्कृत काव्यशास्त्र और शृंगार रस।

श्रीरमाशंकर तिवारी—कवि की विशेषता।

इण्डियन फिलासफी एण्ड कल्चर, व० १, अ० ३ सितम्बर १९५६

डॉ० आर० नागराज शर्मा— गॉड इन वैष्णव थियोलॉजी (वैष्णवतत्त्वज्ञाने परमात्मनः स्थानम्)।

डॉ० एच० के० डे चौधुरी—जेनरल करेक्टर आफ इण्डियन फिलासफी (भारतीयदर्शनस्य सामान्यं स्वरूपम्)।

डॉ० ए० के० सिन्हा—फिलासफी ऑफ श्रीचैतन्य (श्रीचैतन्यदर्शनम्)।

डॉ० के० वैद्यनाथन्—सेल्फ-सरेण्डर (आत्मसमर्पणम्)।

श्रीएम० वी० वी० के० रङ्गाचारी—श्रीरामानुज एण्ड वैष्णविज्म (रामानुजाचार्यो वैष्णवदर्शनं च)।

डॉ० पी० एम० मोदी —कंसेप्शन आफ पुष्टि इन शुद्धाद्वैत स्कूल (शुद्धाद्वैतसम्प्रदाये पुष्टिस्वरूपम्)।

व० १, अ० ४, दिसम्बर १९५६

डॉ० आर० नागराज शर्मा—वैष्णव थियोलॉजी : दी ओन्ली वर्ल्ड-फिलासफी (वैष्णवतत्त्वज्ञानमेव केवलं जगद्दर्शनम्)।

डॉ० एस० सी० राय—फिलासफी एण्ड रिलीजन आफ दी गीता (गीताया दर्शनं धर्मश्च)।

डॉ० पी० एम० मोदी—कंसेप्शन ऑफ पुष्टि इन शुद्धाद्वैत स्कूल (शुद्धाद्वैतसंप्रदाये पुष्टिस्वरूपम्)।

पण्डितराज डी० टी० ताताचार्य—ह्वाट कांस्टिच्यूट्स गॉड (किंस्वरूप ईश्वरः)।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इण्डियन हिस्टोरिकल क्वार्टर्ली (बुद्धजयन्त्यङ्कः) व० ३२, अ० २-३, जून-सितम्बर १९५६

प्रो० फ्रेंकलिन एजर्टन—दी बुद्ध एण्ड लेंगवेज (गौतमबुद्धो भाषा च)।

डॉ० बी० जी० गोखले—दी बुद्धिस्ट सोशल आइडियल्स (बौद्धमतस्य सामाजिका आदर्शाः)।

प्रो० ई टी० लमोटे—बुद्धिस्ट कन्ट्रोवर्सी ऑवर दी फाइव प्रिपोजीशन्स (बौद्धदर्शने पञ्च-वस्तुसंबन्धिविवादः)।

डॉ० पी० एस० शास्त्री—सम बुद्धिस्ट थिङ्कर्स आफ आन्ध्र (आन्ध्रदेशीयाः केचन बौद्धविचारकाः)।

सुश्री सुधा सेनगुप्त—बुद्धिज्म इन दी क्लासिकल एज (विकासकालीनं बौद्धमतम्)।

श्रीकुंज गोविन्द गोस्वामी—बुद्धिज्म इन दी शुंग पीरियड (शुङ्गकाले बौद्धधर्मस्थितिः)।

प्रो० नलिनाक्ष दत्त—प्लेस आफ बुद्धिज्म इन इण्डियन थॉट (भारतीयविचारक्षेत्रे बौद्धमतस्य स्थानम्)।

श्रीव्रतीन्द्रकुमार सेनगुप्त—बुद्धिस्ट साइकोलॉजी (बौद्धदर्शनीयं मनोविज्ञानम्)।

डॉ० अजितरञ्जन भट्टाचार्य—ब्रह्मन् आफ शंकर एण्ड शून्यता आफ माध्यमिकाज (शङ्कराचार्यप्रतिपादितं ब्रह्म, माध्यमिकानां शून्यता च)।

डॉ० बी० भट्टाचार्य—साइण्टिफिक बैकग्राउण्ड आफ दी बुद्धिस्ट तन्त्राज (बौद्धतन्त्राणां वैज्ञानिकी आधारभित्तिः)।

प्रो० आर० सी० मजूमदार—बुद्धिज्म इन साउथ-ईस्ट एशिया (दक्षिणपूर्वीयैशिया-देशेषु बौद्धधर्मः)।

डॉ० बी० एन० पुरी—बुद्धिज्म इन एंश्येण्ट कम्बुजदेश (प्राचीने कम्बुजदेशे बौद्धधर्मः)।

प्रो० एन० अय्यास्वामी शास्त्री—हरिवर्मन्'स थ्योरी आफ कोग्नीशन (हरिवर्मसंमत-ज्ञानस्वरूपम्)।

श्रीहेरम्ब चटर्जी—बुद्धिस्ट व्यू री एटर्निटी आफ दी वेदाज (बौद्धदर्शनं वेदानां नित्यतां प्रतिक्षिपति)।

श्रीसुनीतिकुमार पाठक—ए नोट आफ दी आर्यधर्मधातुगर्भविवरण (आर्यधर्मधातुगर्भ-विवरणाभिधग्रन्थपरिचयः)।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चयनिका

इण्डो-एशियन कल्चर, व० ५, अ० १, जुलाई १६५६

डॉ० सुनीतिकुमार चटर्जी—अशोक एण्ड हिज इंस्क्रिप्शन्स (अशोकस्तस्य शिलालेखाश्च)।

प्रो० त्रिपुरारि चक्रवर्ती—दी मैसेज आफ दी महाभारत (महाभारतीयः संदेशः)।

डॉ० मनोमोहन घोष—इण्डिया'ज लिविंग बुद्धिज्म (भारतवर्षस्य जीवद् बौद्धमतम्)।

व० ५, अ० २, अक्टूबर १६५६

डॉ० के० एम० पणिक्कर—इण्डिया ओल्ड एण्ड न्यू (प्राचीनो नवीनश्च भारतः)।

श्री ए० एच० पोपले—दी तमिल शैवित सेन्ट्स (तमिलदेशीयाः शैवाचार्याः)।

डॉ० ए० एन० उपाध्ये—दी एथिक्स आफ दी जैन्स (जैनानां नीतिशास्त्रम्)।

प्रो० शिशिरकुमार मित्र—शालिहुण्डम् : ए बुद्धिस्ट शायरिन इन आन्ध्र (आन्ध्रप्रदेशीयं शालिहुण्डनामधेयं बौद्धदेवायतनम्)।

श्री ए० के भट्टाचार्य—दी किंग हू बिल्ट दी कोणार्क टेम्पिल (कोणार्कमन्दिरनिर्माता नृपतिः)।

डॉ० ए० डी० पुसलकर—दी हिस्टोरिकल लिटरेचर आफ दी एंश्येएट इण्डियन्स (प्राचीनभारतीयानामितिहासप्रदर्शकं साहित्यम्)।

इपिग्राफिया इण्डिका, व० ३०, अ० ३, जुलाई १६५३

श्री डी० सी० सरकार—इंस्क्रिप्शन्स फ्रोम बिहार (बिहारराज्यत उपलब्धाः शिलालेखाः)।

श्री एस० एल० कात्रे—अजयगढ रॉक इंस्क्रिप्शन आफ चंदेल कीर्तिवर्मन् (चंदेलकीर्तिवर्मणोऽजयगढप्रस्तरलेखः)।

श्री डी० सी० सरकार—भुवनेश्वर इंस्क्रिप्शन आफ प्रमादी; शक १०६४ (प्रमादिनृपतेः १०६४ शकवत्सरीयो भुवनेश्वरशिलालेखः)।

श्री एन० पी० चक्रवर्ती एण्ड बहादुरचन्द्र छाबड़ा—राजप्रशस्ति इंस्क्रिप्शन आफ उदयपुर (उदयपुरस्थो राजप्रशस्तिशिलालेखः)।

ईस्ट एण्ड वेस्ट, व० ७, अ० ३, अक्टूबर १६५६

ग्युसेप्पे दे लोरेंजो—इण्डिया इन दी लेटर्स ऑफ पेट्रो डेल्ला वल्ले (पेट्रो-डेल्लावल्लेपत्रेषु चर्चितं भारतम्)।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मारियो बुस्सागली—इण्डियन इवेन्ट्स इन त्रोगुसे पोम्पेयुस ('त्रोगुसे-पोम्पेयुस' इत्यस्य पुस्तके भारतीयानि वृत्तानि) ।

जर्नल आफ अमेरिकन ओरियण्टल सोसाइटी, व० ७६, अ० ३, जुलाई-सितम्बर १९५६

श्री जे० ए० बी० वान व्युतनन—स्टडीज इन सांख्य-१ (सांख्यशास्त्राध्ययनम्) ।

श्री टी० व्यूरो—दी मीनिंग आफ दी वेदिक वर्ड घोषाद (वैदिकघोषादशब्दस्यार्थः) ।

श्री अल्फ्रेड मास्टर—जोन्स एण्ड पाणिनि (सर-विलियन-जोन्सः पाणिनिश्च) ।

श्री पी० ई० डूमण्ट—ए नोट ऑन तैत्तिरीयब्राह्मण ३.२.८-१२ (तैत्तिरीये ब्राह्मणे ३.२.८-१२ स्थलीया टिप्पणी) ।

जर्नल आफ ओरियण्टल इंस्टीट्यूट वड़ोदा, व० ६, अ० १, सितम्बर १९५६

डॉ० सी० हूयकास—लक्ष्मण एट मलय कोर्ट्स (मलयराजप्रासादेषु लक्ष्मणः) ।

डॉ० एस० एन० घोषाल—डॉ० एच० याकोबी'ज इन्ट्रोडक्शन टू दी सनत्कुमारचरितम् (डॉ० एच० याकोबीविरचिता सनत्कुमारचरितभूमिका) ।

श्री एस० जी० कन्तवाला—दी कल्ट आफ मेन्स एज डिपेक्टेड इन दी मत्स्यपुराण (मत्स्यपुराणानुसारि पितृपूजास्वरूपम्) ।

डॉ० एस० एन० घोषाल—दी रामायण बाई डॉ० एच० याकोबी (डॉ० एच० याकोबी-कृतं रामायणाध्ययनम्) ।

मुद्राविचारप्रकरणं मुद्राविधिश्च—डॉ० प्रियबालाशाहसंपादितौ लघुग्रन्थौ ।

जर्नल आफ ओरियण्टल रिसर्च मद्रास, व० २५, अ० १ ४, सन् १९५६

डॉ० जे० फिलिओझत—एंश्येन्ट रिलेशन्स बिटवीन इण्डियन एण्ड फोरेन एस्ट्रोनोमिकल सिस्टम्स (भारतीयानामन्यदेशीयानां च ज्यौतिषशास्त्रसिद्धान्तानां प्राचीनः संबन्धः) ।

श्री ए० ईसेनबर्ग—अद्वैत वेदान्त (अद्वैतवेदान्तः) ।

श्री टी० एस० कुप्पन्ना शास्त्री—दी वाशिष्ठ सन एण्ड मून इन वराहमिहिर'स पञ्चसिद्धान्तिका (वराहमिहिरकृतपञ्चसिद्धान्तिकायां वाशिष्ठः सूर्यश्चन्द्रमा च) ।

डॉ० वी० राघवन्—दी नाटकलक्षणरत्नकोश आफ सागरनन्दिन् (सागरनन्दिकृतो नाटकलक्षणरत्नकोशः) ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्री वी० ए० रामस्वामी शास्त्री—भर्तृहरी'ज इएटरप्रिटेशन आफ 'अहं संमाष्टिं' एएड 'पशुना यजते' ('अहं संमाष्टिं', 'पशुना यजते' इत्यनयोर्वाक्ययोर्भर्तृहरिकृतं व्याख्यानम्)।

अवन्तिसुन्दरीकथासारः—श्री जी० हरिहरशास्त्रिणा संपादितः (ग्रन्थः)।

जर्नल आफ त्रावणकोर युनिवर्सिटी, व० ८, अ० ४, सन् १९५६

कामाक्षीस्तवः, अज्ञातकर्तृकः।

अभिज्ञानशकुन्तलचर्चा।

होराभिप्रायनिर्णयः, विवृत्युपेतः।

सीताराघवम् (नाटकम्), रामपाणिवादविरचितम्।

उषापरिणयप्रबन्धः।

त्रिपुरदहनम्, सव्याख्यम्।

जर्नल आफ दी विहार रिसर्च सोसाइटी, व० ४२, अ० १, मार्च १९५६

प्रो० राधाकृष्ण चौधुरी—कालिदास एएड गुप्त आर्ट (गुप्तकालीना कला कालिदासश्च)।

आचार्य परमानन्द शास्त्री—प्राचीन चीन में आयुर्वेद का प्रचार।

डॉ० टी० पी० भट्टाचार्य – ब्रह्मा कल्ट एएड जैनिज्म (परमेष्ठिपूजा जैनमतं च)।

डॉ० टी० पी० भट्टाचार्य – ब्रह्मा कल्ट एएड बुद्धिज्म (परमेष्ठिपूजा बौद्धमतं च)।

श्री एस० वी० सोहानी—टू पीकॉक्स इन दी क्लाउड मेसेंजर आफ कालिदास (कालिदासीये मेघदूते द्वौ मयूरौ)।

व० ४२, अ० २, जून १९५६

डॉ० बुद्धप्रकाश—ए रेफरेंस टू ईजिप्ट इन दी रामायण (रामायणे मिस्रदेशस्य चर्चा)।

प्रो० राधाकृष्ण चौधरी—कृष्णदत्त मैथिल एएड हिज वर्क्स (मैथिलः कृष्णदत्तस्तस्य ग्रन्थाश्च)।

श्री परमानन्द झा—राघवभट्ट का स्थितिकाल।

श्री टी० पी० भट्टाचार्य—ब्रह्मा कल्ट एएड बुद्धिस्ट आर्ट (परमेष्ठिपूजा बौद्धकला च)।

जर्नल आफ दी युनिवर्सिटी आफ बोम्बे, व० २५, अ० २ सितम्बर १९५६

डॉ० जी० एच० गोडबोले—इन्द्र इन दी ब्राह्मणस् (ब्राह्मणेष्विन्द्रवर्णनम्)।

डॉ० एम० डी० परदकर—फील्ड आफ ऑब्जर्वेशन आफ शंकराचार्य (शङ्कराचार्यस्य पर्यवेक्षणभूमिः)।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्री सदाशिव ए० दांजे—विप्रलम्भ इन दी उत्तररामचरित (उत्तररामचरितीयो विप्रलम्भः) ।

प्रो० हीरालाल आर० कापड़िया—इलस्ट्रेशन्स आफ लेटर-डायग्राम्स (खड्गमुरजादि-शब्दबन्धानां सचित्रोपपत्तिः) ।

जर्नल आफ रॉयल एशियाटिक सोसाइटी, लंदन, अ० ३-४, सन् १६५६

श्री डब्ल्यू० गुर्नर—नोट ऑन महाभारत २.२८ (महाभारतस्य २.२८. ४७-४६ स्थल-संबद्धा टिप्पणी) ।

नागरीप्रचारिणी पत्रिका, व० ६१, अ० ४ संवत् २०१३

डॉ० वासुदेवशरण अग्रवाल—अंगविज्जा ।

डॉ० बुद्धप्रकाश—शब्द और संस्कृति ।

डॉ० नीलकण्ठ पुरुषोत्तम जोशी—प्राचीन भारत में मल्लयुद्ध के प्रदर्शन ।

फिलासफिकल क्वार्टर्ली, व० २६, अ० २ जुलाई १६५६

श्री जी० आर० मलकानी—ऑन फिलासफी (दर्शनशास्त्रमुद्दिश्य किञ्चित्) ।

श्री आर० पी० सिंह—शंकर एण्ड भास्कर (शङ्कराचार्यो भास्करश्च) ।

श्री देवव्रत सिन्हा—दी फेनोमेनोलॉजकिल एप्रोच टू ए मेटाफिजिक आफ परसनालिटी (आत्मनः पारमार्थिकसत्तासंबन्धे प्रतिभासद्वाराऽवगतिः) ।

व० २६, अ० ३, अक्टूबर १६५६

श्री जी० आर० मलकानी—इम्मोर्टालिटी (अमरत्वम्) ।

श्री चन्द्रोदय भट्टाचार्य—दी एटरनिटी आफ दी सेल्फ (आत्मनो नित्यत्वम्) ।

श्री निरोदबरन चक्रवर्ती—प्लेस ऑफ रीजनिंग इन अद्वैत फिलासफी (अद्वैतदर्शने तर्कस्य स्थानम्) ।

बुलेटिन आफ दी डेक्कन कॉलेज रिसर्च इंस्टीट्यूट, पूना, व० १७, अ० ४, मार्च १६५६

श्री एम० जी० पंसे—ज्यौतिषरत्नमाला आफ श्रीपतिभट्ट (श्रीपतिभट्टविरचिता ज्यौतिषरत्नमाला) ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ब्रह्मविद्या (बुद्धजयन्त्यङ्कः) व० २०, अ०, ३-४, दिसम्बर १९५६

डॉ० एन्र्स्ट माल्तश्मित्—ए फ्रेगमेन्ट फ्रोम दी संयुक्तागम (संयुक्तागमस्य खण्डितो भागः)।

श्री एन० ऐय्यास्वामी शास्त्री—पञ्चवस्तुका विभाषा आफ भदन्त धर्मत्रात (भदन्त-धर्मत्रातविरचिता पञ्चवस्तुका विभाषा)।

श्री जी० क्वेदेस्—धम्मकाय (धर्मकायः, पालिग्रन्थः)।

श्रीमार्शेले लालू—फोर नोट्स ऑन वज्रपाणि (वज्रपाणिसंबद्धाश्चतस्रष्टिप्पण्यः)।

श्री ओ० एच० द ए० विजेसेकेर—ए पालि रेफरेंस टू ब्राह्मण-चरण्-स (ब्राह्मणचरण-संवद्धमेकं पालिग्रन्थस्योद्धरणम्)।

डॉ० वी० एस० अग्रवाल—बुद्धिस्ट आर्ट : इट्स फोर वेसेज (बौद्धकला, तस्याश्चत्वार आधाराः)।

श्री फ्रिथियोफ शुओन – आर्थोडाक्सी एण्ड ओरिजिनालिटी आफ बुद्धिज्म (बौद्धमते रूढिवादिता मौलिकता च)।

भारती, व० ६, अ० १२, आश्विनः, संवत् २०१३

श्रीकलानाथ शास्त्री—आयुर्वेदीयचिकित्साप्रणाली, यूनानीचिकित्सापद्धतिश्च।

व० ७, अ० १, कार्तिकः, संवत् २०१३

श्रीवासुदेवशास्त्री बागेवाडीकरः—कविप्रवरः शूद्रकः।

व० ७, अ० २, मार्गशीर्षः, संवत् २०१३

श्रीवासुदेवशास्त्री बागेवाडीकरः—मृच्छकटिकम्।

व० ७, अ० ३, पौषः, संवत् २०१३

श्रीवासुदेवशास्त्री बागेवाडीकर—शूद्रकरचितमृच्छकटिकनाटकस्य रसग्रहणम्।

व० ७, अ० ४, माघः, संवत् २०१३

श्रीहीरालालपाण्डेयः—मेघदूते देशप्रेम्णो गौरवम्।

श्रीकृष्णलालः—प्रतीकारः (एकाङ्किनाटकम्)।

व० ७, अ० ५, फाल्गुनः, संवत् २०१३

श्री एच० वी० भुजङ्गाचार्यः—प्रतिभाविलासः (एकाङ्किनाटकम्)।

श्रीरामेश्वरप्रसादशास्त्री—नलोदयटीकाकर्तुः परिचयः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भारतीय विद्या, व० १६, अ० १, सन् १६५६

डॉ० अशोक कुमार मजूमदार—दी राजतरंगिणीज एज सोर्सेज आफ दी हिस्ट्री आफ कश्मीर ड्यूरिंग दी सुल्तानेत (सुल्तानानां राज्यकाले कश्मीरेतिहाससंबन्धे राजतरंगिणीग्रन्थानामाकरभूतत्वम्)।

डॉ० आर० सी० हाजरा—वाज दी कालिकापुराण कम्पोज्ड ड्यूरिंग दी रेन आफ किंग धर्मपाल आफ कामरूप (कामरूपाधिपधर्मपालशासनसमये किं कालिकापुराणस्य रचना समजनि)।

श्री एस० के० रामचन्द्र राव—फाउण्डेशंस आफ इण्डियन लॉजिक (भारतीयतर्कशास्त्रस्य प्रतिष्ठा)।

मञ्जूषा, व० १०, अ० ११, जुलाई, सन् १६५६

श्रीक्षितीशचन्द्रचट्टोपाध्यायः—भारती कालिदासस्य।

श्रीचारुकृष्णदर्शनाचार्यः—वेदान्तविमर्शः।

श्रीकुमुदरञ्जनरायः—आयुर्वेदस्य वेदत्वम्, अचिन्त्यनिर्वचनत्वं च।

व० १०, अ० १२, अगस्त, सन् १६५६

श्रीचारुकृष्णदर्शनाचार्यः—वेदान्तविमर्शः।

श्रीगजानन-लक्ष्मण-रेगे—गीताध्यायसंगतिः।

श्रीक्षितीशचन्द्रचट्टोपाध्यायः—पाणिनिना स्वप्नेऽप्यसंभाविताः प्रत्याहाराः।

व० ११, अ० १, सितम्बर, सन् १६५६

श्रीक्षितीशचन्द्रशर्मा—देवीसूक्तदीपिका।

श्रीसुरेन्द्रमोहन-वेदान्तशास्त्री—प्रजापतेः पाठशाला।

श्रीचारुकृष्णदर्शनाचार्यः—वेदान्तविमर्शः।

व० ११, अ० २, अक्टूबर, सन् १६५६

श्रीचारुकृष्णदर्शनाचार्यः—वेदान्तविमर्शः।

श्रीसीतारामशास्त्री—क्रियाविशेषणतत्त्वम्।

व० ११, अ० ३, नवम्बर, सन् १६५६

उडुपिवेङ्कटकृष्णरायः—भगवद्भक्तिः।

श्रीअवधविहारी त्रिपाठी—वर्णविमर्शनम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व० ११, अ० ४, दिसम्बर, सन् १९५६

श्रीचारुकृष्णदर्शनाचार्यः—वेदान्तविमर्शः।

श्रीगजानन-लक्ष्मण-रेगे—गीतोपदिष्टो भक्तिमार्गः।

श्रीक्षितीशचन्द्रचट्टोपाध्यायः—नैषधप्रयोगविमर्शः।

मधुरवाणी, व० २, अ० ३-५, श्रावणः, संवत् २०१३

श्रीपण्ढरीनाथाचार्यो गलगली—लोकमान्यतिलकचरित्रम्।

व० २, अ० ६, भाद्रपदः, संवत् २०१३

श्रीए० एस० वी० भीमभट्टः—दैवीमीमांसा।

व० २, अ० ७, आश्विनः, संवत् २०१३

श्रीस० प० गानू—बुद्धचरितम्।

महर्षिदेवरातः—मध्वाचार्याणामृग्भाष्यम्।

व० २, अ० ८, कार्तिकः, संवत् २०१३

श्रीटी० जे० सिद्धप्पाराध्यः—संस्कृतसाहित्ये देशप्रेम।

श्रीके० राजन्नशास्त्री—माघकाव्यसमीक्षा।

व० २, अ० ९, मार्गशीर्षः, संवत् २०१३

श्रीपण्ढरीनाथाचार्यः—भारतीयकथानां विश्वविजयः।

श्रीपण्ढरीनाथाचार्यः—पुण्यश्लोकः पिप्पलादः।

व० २, अ० १०, पौषः, संवत् २०१३

श्रीवासुदेवशर्मा—रसोत्पत्तिः।

श्रीपण्ढरीनाथाचार्यः—श्रीवेङ्कटनाथाचार्यः।

श्रीपण्ढरीनाथाचार्यः—अक्षपादः।

श्रीकेशवशर्मा गलगली—रट्टमतम्।

व० २, अ० ११-१२, माघफाल्गुनौ, संवत् २०१३

श्रीपण्ढरीनाथाचार्यः—श्रीमान् नीलकण्ठमखीन्द्रः।

श्रीके० राजन्नशास्त्री—काव्यशास्त्रविनोदः।

श्रीकालीप्रसादशास्त्री—संस्कृते गूढभाषाया उपयोगः।

श्रीपण्ढरीनाथाचार्यः—साहित्याचार्यो मम्मटः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

राजस्थान भारती, व० ५, अ० २, नवम्बर १९५६

श्रीउदयवीर शास्त्री—सरस्वती (नदी)।

डॉ० दशरथ शर्मा—विमलमन्त्री के पूर्वज।

प्रो० विद्याधर शास्त्री—हितोपदेश की राजनीति का प्रधान आधार।

वेदवाणी, व० ६, अ० १-२ मार्गशीर्ष, संवत् २०१३

श्रीजगदीशचन्द्र शास्त्री—वेद में त्रैतवाद।

श्रीयुधिष्ठिर मीमांसक—वेदार्थ में स्वर-शास्त्र की आवश्यकता।

श्रीभगवद्दत्त वेदालंकार—वेदों के ऋषि।

श्रीभद्रसेन जी—वेद में भक्ति-रस

श्रीऋषिगोपालजी—न्यायशास्त्र का ऐतिहासिक अनुशीलन।

श्रीब्रह्मदत्तजी जिज्ञासु—निरुक्त के विषय में पाश्चात्य मत की मौलिक भूल।

व० ६, अ० ३, पौष, संवत् २०१३

डॉ० सूर्यकान्त—वैदिक पुरुष।

श्रीयुधिष्ठिर मीमांसक—वेदार्थ के साधन और उनकी उपेक्षा का रहस्य।

व० ६, अ० ४, माघ, संवत् २०१३

श्रीरामावतार पंचतीर्थ—सामवेद और ऋग्वेद।

व० ६, अ० ५, फाल्गुन, संवत् २०१३

डॉ० मंगलदेव शास्त्री—वैदिक धर्म की दार्शनिक भूमिका।

शोधपत्रिका, व० ७, अ० ४, आषाढ, संवत् २०१३

श्रीरामशंकर भट्टाचार्य—संस्कृत भाषा के अभिधानों की सहेतुकता।

श्रीरामशंकर भट्टाचार्य—लिङ्गपुराण के कुछ द्रष्टव्य स्थल।

व० ८, अ० १-२, आश्विन-पौष, संवत् २०१३

श्रीरामशंकर भट्टाचार्य—सांख्यीय ईश्वर-सत्ता पर शंकाओं का समाधान।

श्रीरतनचन्द्र अग्रवाल—महाराज भर्तृपट्ट द्वितीय का अप्रकाशित लेख।

श्रीअगरचन्द्र नाहटा—उपाध्याय गुणविनय और उनके ग्रन्थ।

संमेलन-पत्रिका, व० ४२, अ० ४, आश्विन, संवत् २०१३

डॉ० दशरथ ओझा—नाटक : प्रेक्ष्य और पाठ्य।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

डॉ० बुद्धप्रकाश—कालिदास और हूण–४

श्रीशिवशंकर अवस्थी—कवि और काव्य।

श्रीनर्मदेश्वर चतुर्वेदी—जैन धर्म का उदय।

व० ४३, अ० १, पौष, संवत् २०१३

डॉ० शान्तिकुमार नानूराम व्यास - रामायणकालिक पारिवारिक जीवन।

श्रीदामोदर शास्त्री—बाण के रूपरंग-वर्णन की विशेषता।

संस्कृतरत्नाकरः, व० १८, अ० ७-८, आश्विनकार्तिकौ, संवत् २०१३

श्रीकेदारनाथशर्मा सारस्वतः—महाकविर्गुणाढ्यः, बृहत्कथा च।

व० १८, अ० ९-१०, मार्गशीर्ष-पौषौ, संवत् २०१३

श्रीकेदारनाथशर्मा सारस्वतः—संस्कृतकवीनामुपनामानि।

श्रीरामशङ्करभट्टाचार्यः—स्कन्दपुराणस्याध्ययनम्।

श्रीद्विजेन्द्रनाथशास्त्री—रसचिकित्सायाः प्राचीनत्वम्।

व० १८, अ० ११-१२, माघ-फाल्गुनौ, संवत् २०१३

श्रीकेदारनाथशर्मा सारस्वतः—संस्कृतकवीनामुपनामानि।

श्रीइन्द्रविद्यावाचस्पतिः—कालिदासकाव्येषु करुणो रसः।

समाज, व० २, अ० २, जुलाई १९५६

डॉ० आई० पी० देसाई—भारत में संमिलित परिवार एक अध्ययन।

व० २, अ० ३, अक्टूबर १९५६

श्रीरामसूरतलाल—अध्यापकों की अनुभूतियाँ।

श्रीसत्यप्रकाश मित्तल—जातिप्रथा की समस्या।

———

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दर्शनपरिषदो लक्ष्यं कर्तव्यं च

*परमप्रमोदस्यायमवसरो यत् सरस्वत्याराधनपरिपूतान्तःकरणैः सारस्वतैः पाविते‌ऽस्मिन् विद्यामन्दिरेऽध्यात्मविद्यायामपूर्वमेकं दर्शनपरिषद्रूपं नवं स्कन्धमुन्नेतुमद्य वयं समवेताः स्मः। उपनिषदामाविर्भावकालेऽध्यात्मविद्या आध्यातुं महतीनां परिषदां संघटनं श्रूयते। बौद्धकाले ताः पूर्वतोऽपि परिवृद्धा अभूवन्। भारते तत्त्वाधिगमाय परिषदामियं परम्परा येन केनापि रूपेणेतः पश्चात्तनीः काश्चिच्छताब्दीर्यावदनुवृत्ताऽऽसीत्। आसां परिषदां तत्त्वबुभुत्सूनां सर्वविधज्ञानानां च द्वारं सर्वेषां कृतेऽनावृतमासीत्। पुरा नवनवानां दर्शनानामाविर्भावायैतादृशीनां परिषदां प्रभूतं महत्त्वमासीत्। अतो दर्शनानामाविर्भावसमकालमेव वादविधीनामपि प्रादुर्भावो जातः। अस्माभिः सा परिषत्परम्परा पुनरप्युज्जीवयितव्या, यस्यामार्षदर्शनानां तत्त्वानुशीलनम्, समाजस्य नव्यानामाकाङ्क्षाणां जिज्ञासानां च पूर्त्तये नवीनदार्शनिकसिद्धान्तानामुद्भावनं स्यात्, किं वा प्राचीनसिद्धान्ता एव नवोत्थशङ्कानिवृत्तयेऽभिनवसमाधानैर्व्याख्याताः संगृहीताश्च स्युः। पूर्वे ऋषयो वस्तुगत्या तत्त्ववेत्तार आसन्, यतो हि ते समाजस्य व्यक्तेश्च जिज्ञासासमाधये नव्यान् दार्शनिकसिद्धान्तान् समुदभावयन्, प्राचीनवचनानां नूतनं व्याख्यानं वाऽकुर्वन्। अत एव तैस्तैर्दर्शनैस्तत्र तत्र विभिन्ना आचारविचाराः प्रतिष्ठापिताः। तैस्तैश्च नूतनैराचारविचारैस्तदानीन्तना मानवाः पुरुषार्थसिद्धिमवाप्नुः। अतोऽस्माभिरपि नव्यानां जिज्ञासानां समाधये नव्यं तत्त्वज्ञानं यथा समुद्भवेत्तथा प्रयतनीयम्।

अतीतासु कासुचिदेव शताब्दीषु तत्त्वाधिगमस्येयं जागरूकपरम्परा कालक्रमेण सुप्तिं गता। एतेन विद्यानां विदुषां च क्षतिरभूत्। अन्ततस्तेनास्य राष्ट्रस्यापि महती क्षतिर्जाता। राष्ट्रमिदं चिराद् धर्मानुशिष्टमासीत्, किन्त्वध्यात्मतत्त्वाधिगमस्य शैथिल्यं धर्ममप्यशिथिलयत्। धर्मः प्रजा धारयति। धर्मश्चाध्यात्मविद्यया प्रशास्यते। यस्य राष्ट्रस्याध्यात्मिकं चिन्तनं नव्या जिज्ञासा न समाधत्ते तद् धर्ममपि निःशक्तिकं विधत्ते। अत एवाध्यात्मशास्त्रधर्मशास्त्रयोः परस्परं भेदेऽपि धर्मशास्त्रस्याध्यात्मविद्यानियन्तृतत्वमत्यर्थमपेक्षितम्;

---

* परिषद उद्घाटनसमारोहावसरे मन्त्रिणा श्रीजगन्नाथोपाध्यायेन पठितं भाषणमिदम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ चाध्यात्मविद्ययाऽपि मानवानां नव्यजिज्ञासासमाधये मनननिदिध्यासनाभ्यां तेजस्विन्या भाव्यम्। एवमेव दर्शनस्यापि धर्मशास्त्रप्रभावितत्वं विद्यते। स्वाभाविकं चैतत्, यतो हि सर्वाण्यपि दर्शनानि धर्मस्य पारम्परिकान् कतिपयान् संस्कारानादाय प्रवृत्तानि। अतः कदाचित् तेषां समर्थनेनैव दर्शनस्य साफल्यं मन्यन्ते दार्शनिकाः। अत एव केचन दार्शनिकाः स्वदर्शनप्रामाण्याय तस्य धर्मानुरूपत्वं प्रवदन्ति, वैपरीत्ये चागमबाधितत्वं वदन्ति। किं बहुना, तेषां मते तत्त्वग्राहकैः प्रमाणैरपि स्वप्रामाण्याय धर्मानुरूपैर्भाव्यम्। अत एव च केवलस्य तर्कस्य शुष्कतर्कत्वं ब्रुवते, धर्मवचनानां च नित्यत्वव्यवस्थापनादिभिस्तेषु परमं प्रामाण्यमादधति। एवं परस्परोपकारे सत्यप्यध्यात्मविद्याया एव धर्मस्थितिहेतुत्वेन प्राधान्यम्। वस्तुतस्तत्त्वानां प्राप्तये धर्मेण प्लवोपमेन भाव्यम्, येनार्ताः संक्लेशसागरं ससुखमुत्तरेयुः। तस्य प्रामाण्याय चाध्यात्मविद्यानुगामित्वमत्यर्थमपेक्षितम्। एवं धर्मशास्त्राध्यात्मविद्ययोः पारस्परिको विरोधो नैव भवेत्। नहि परमार्थसत्यव्यवहारसत्ययोः कश्चिदैकान्तिक आत्यन्तिको वा भेदः। जीवजगती, समाजव्यक्ती यथाऽविनाभूते अन्योऽन्यमपेक्ष्य च तिष्ठतस्तथैव परमार्थव्यवहारयोरप्यविनाभूतत्वं सापेक्षत्वं च निर्विवादम्। अध्यात्मविद्याया नीतिशास्त्रस्य च विधेयं व्यक्तेः परिष्कारः, समाजस्य व्यवस्था च। मोक्षेण भोगः परिष्क्रियते, नहि तयोः सर्वदा तमःप्रकाशवद् विरुद्धस्वभावत्वम्। अत एव तत्त्वविद्ययैका समाजव्यवस्थापि स्वानुरोधिनी नूनमुपस्थापयितव्या।

अध्यात्मविद्या हि मानवमनांस्येव मुख्यत्वेनाधिकरोति। चेतश्च प्रायेण सामाजिकसंस्काराणामेव परिणतिः। व्यक्तौ प्रतिभासमानं स्वातन्त्र्यमपि नात्यर्थं रहस्यात्मकम्, तत्तु संस्काराणां तीव्रः प्रकाश एव। अनेनैव कर्तृस्वातन्त्र्येण विश्लेषणविधिना च मनीषिभिः स्वीया स्थितप्रज्ञता दृष्टा,

मनःपूर्वंगमा धर्मा मनःसृष्टा मनोभवाः।
मनसा च प्रदुष्टेन भासते वा करोति वा ॥

इति सिद्धान्तोऽपि साक्षात्कृतश्च। व्यक्तेर्वासना प्रायशः सामाजिकी। तयैव समस्तं सत्त्वमावृतम्। वासनानां परिष्करणं विना ताभ्यो मुक्तिकल्पना तु दूरंगता, वस्तुत एषा रीतिरस्मान् दर्शनादपि बहिर्नयति। व्यक्तिः स्वातन्त्र्यप्रभावेण विवेकद्वारा विषयासक्तिपरिवर्धने समर्थः। व्यक्तेर्मुक्तिर्नाम एषणानां संस्काराणां च परिष्कृतिः। मुक्तिर्जीवनापेक्षिणी, जीवनोपकर्त्री। अतो जीवन्मुक्तिरेव मानवैः साध्या। मुक्तेर्वैयक्तिको लाभः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मनसो मनोभावस्य च परित्यागे नैवास्ति, प्रत्युत प्रज्ञाकरुणयोरुद्बोधन एव। प्रज्ञाकरुणे एव सामाजिकमनोविकारान् परिष्करिष्यतः, व्यक्तिं समाजं च दुर्वासनाभ्यो मोचयिष्यतः।

मानवस्य स्वार्जितया स्वतन्त्रया शक्त्या सभ्यतासंस्कृती सृष्टे विद्येते। मानवैरेव स्वजीवनसार्थक्याय काश्चन मानसशक्तयो धर्मरूपेण प्रतिष्ठापिताः। अतो व्यक्तेरेव वैयक्तिकयोः सामाजिकयोर्वा बन्धमोक्षयोर्मुख्यं दायित्वम्। व्यक्तौ समाजे च विवेकस्य साऽपूर्वा शक्तिर्निहितैव विद्यते, ययाऽसौ व्यक्तौ समाजे च कुशलशक्तिं पर्याप्तामुद्बोधयेत्, समाजं व्यक्तिं च निःश्रेयसं प्रापयेत्।

दृष्टिर्दर्शनम्। दृष्टयश्च संस्कारानुविद्धाः। संस्काराणां च सामाजिकत्वं निर्विवादम्। तस्य स्वयंसिद्धत्वं नास्ति। अतो दार्शनिकैः समाजस्य व्यक्तेश्च विवेचनमालोचनं च कर्तव्यम्। भारते प्राचीनदार्शनिकानां विश्लेषणपद्धतिर्व्यक्त्युन्मुखी आसीत्। साम्प्रतं तया समाजोन्मुख्याऽपि भाव्यम्। एतदर्थं जीवनस्याखण्डतायाः प्राक्तनः सिद्धान्त उपयुक्तः। तत्र समाजस्य परित्यागोऽनावश्यकः। अखण्डता नाम नानात्वेष्वेकत्वबोधः, संसारनिर्वाणयोरभेदबोधो वा, न तु नानात्वस्य विलोपः। संसारनिर्वाणयोर्दृष्टेरेव भेदो न तु वस्तुनः। दुःखं न केवलं वैयक्तिकम्, प्रत्युत सामाजिकमप्यस्ति। अतो दुःखोच्छेदो वैयक्तिक एव कथं भवेत् सर्वथा विहाय समाजम्।

संसारनिर्वाणयोर्विरोधस्वीकारेऽपि व्यावहारिकसत्यस्य निरालम्बत्वं दुर्घटम्। तस्यालम्बनं समाज एव। अस्मिंश्चालम्बनेऽस्त्यापेक्षिकं नित्यत्वम्, यतो हि समाजस्य धर्मकायो नित्यः। व्यक्तेरेषणानां वासनानां चोपरमणात्तस्या व्यक्तित्वं नश्येदपि, किन्तु समाजस्य धर्मकायो नश्वरो नास्ति। धर्मकायो नाम मानवानां नैतिकत्वम्, नीतिधर्मः। स च प्रवहन्नित्यः, न तु सिद्धः, मानवैः साध्यत्वात्। व्यक्तेरयं पुरुषार्थो यस्तु स्वाध्यवसायेन धर्मकायस्य साक्षात्कारः, समाजे च तस्य प्रतिष्ठापनम्। एवं स्थिते दार्शनिकानां तत्प्रधानं कर्तव्यं यत्ते समाजव्यवस्थान्तर्हितसिद्धान्तानां विश्लेषणमाकलनं च कुर्युः। न कोऽपि वास्तविको दार्शनिकः समन्तात् प्रसृतानां समस्यानां समाधानमकृत्वा स्वीयं दर्शनं परमार्थप्रापकत्वेन वक्तुं शक्नुयात्।

सुस्पष्टं चैतद् भारतवर्षस्य नवनिर्माणे संस्कृतिस्वरूपस्य धर्मस्य वाऽस्थिरत्वमनन्वितत्वं च भृशं बाधकम्। अस्यास्थिरत्वस्योन्मूलनायेदमावश्यकं यद् विद्वद्भिः समाजस्य प्रत्येकं व्यवस्था तत्त्वतश्चिन्तनीया। पूर्वोक्तेन प्रघट्टकेन नैतत्साध्यते समर्थ्यते वा यत् पुरा समाजव्यवस्थायाः कोऽपि स्पष्टो दार्शनिक आधार एव नासीत्, प्रत्युत सत्यमिदं प्रतिभाति यदद्य यावत् स्वीय-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विकलाध्ययनेन तस्येदन्तयेत्थंतया वा ज्ञानमेव कर्तुं न पारयामः। अतोऽधुना तस्य प्राक्तनस्य दार्शनिकाधारस्याकलनमन्वेषणं चावश्यकम्। विश्वस्यते —एतेनाकलनेन चिराद् विच्छिन्नाया भारतीयसमाजव्यवस्थायाः सिद्धान्तसूत्रस्य लाभः स्यादिति। तेन सिद्धान्तेनाधुनिक्यः सर्वा अपि समस्याः समाहिताः स्युः, तद्द्वारैव वाऽपूर्वं दर्शनमपि समुद्भवेत्, यस्य पवित्रायां यथार्थभूतायां च भूमिकायां नवीनः समाजः संस्थापितो भवेत्। अस्य विशिष्टकार्यभारस्य निर्वाहस्तु प्राचीनशास्त्राध्ययनसमर्पितसर्वस्वैर्विद्वद्भिः प्राथम्येन विधेयः। एतदर्थं तत्त्वचिन्तनस्य स्वतन्त्रा प्रवृत्तिर्नूनमुद्बोधयितव्या। अतः सामाजिकजीवनोपजीव्यदार्शनिकतत्त्वानामाकलनमुन्नयनं च परिषदोऽस्याः प्रथममुद्देश्यम्।

द्वितीयमुद्देश्यं दर्शनविशेषे प्रौढिसम्पादनाय दर्शनान्तरप्रमेयाणां परिचयाऽऽपादनमिति। जानन्त्येव विद्वांसो यज्जीवनविषयकाखण्डत्वस्य सिद्धान्तो यथा सत्यस्तथैव ज्ञानविषयेऽप्यनिवार्यः। चेतनायाः प्रत्येकं गत्या यथा जीवनस्यैकत्वं व्यज्यते, तथैव ज्ञानोदधेः प्रत्येकं तरङ्गेण साक्षात् परम्परया वा ज्ञानस्याखण्डत्वं प्रतीयते। सामान्यतः प्रत्येकं ज्ञानेन जीवनानुरोधिना भाव्यम्। प्राधान्येन तु दर्शनशास्त्रं जीवनस्य शास्त्रम्। अतस्तस्य जीवनानुरोधित्वमपरिहार्यम्।

जीवनस्य परनिरपेक्षखण्डेषु विभाजनमिव ज्ञानस्यापि परनिरपेक्षखण्डेषु विभागोऽपूर्णः। अतः कस्यचिदेकस्य ज्ञानस्य पूर्णत्वाय ज्ञानान्तरापेक्षा दुर्निवारा। यथा कश्चिदपि भौतिकः पदार्थो भूतान्तरापेक्षां विना नोत्पद्यते न वा तिष्ठति, तथैव किञ्चिदपि ज्ञानं ज्ञानान्तरापेक्षां विना नोत्पद्यते नावबुध्यते। इदानीं भारतीयदर्शनानां प्राचीनशिक्षाप्रणाल्यां कस्मैचिच्छात्राय पञ्चसु षट्सु वा हायनेषु वैदिकावैदिकद्वादशाधिकशास्त्रेषु मध्ये कस्याश्चिदेकस्याः शाखायास्तस्या उपशाखाया वा ज्ञानं दीयते, किन्तु अधीतोपशाखाया ज्ञानमपि शाखान्तराऽपेक्षितज्ञानं विनाऽपूर्णमेवावतिष्ठते।

समेषां भारतीयदर्शनानां मोक्ष एवैकं समानमुद्देश्यम्। किन्तु मोक्षस्वरूपस्य तत्प्राप्त्युपायस्य च भिन्नत्वात्तस्याऽनेके परस्परविरुद्धा भेदाः संभवन्ति। अतः प्रत्येकं दर्शनं यथा विशिष्टं विचारं प्रयच्छति, तदनुरूपमेव विशिष्टमाचारं विशिष्टामुपासनां च प्रस्तौति। भारतीयदर्शनानां कृते एतद्विशेषेण गौरवापादकं यत्तेषां पर्यवसानमेकस्य विशिष्टजीवनस्य निर्माणाय कल्पते। एतां दृष्टिमवष्टभ्य पुरा ज्ञानानां प्रस्थानेषु विभागः समजायत, किन्त्वद्यत्वे मानवजीवनस्याकाङ्क्षासु मन्तव्येषु च भिन्नत्वं समायातम्। एतत्समाधानाय विरोधाय च

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्राचीना आचारा विचाराश्चापर्याप्ता इत्युपेक्ष्यन्ते। एवं स्थिते दर्शनानामध्ययनाध्यापनयोः सम्प्रदायानुरोधित्वं विहाय विषयानुरोधित्वमपेक्षितम्। विषयानुरोध्यध्ययनं विना विराजो ज्ञानस्य विकासक्रमः पूर्णतया ज्ञातुं न शक्यते। शाङ्करमद्वैतमधिकृत्यैव क्षणं विचारयन्तु। उपनिषदामाविर्भावानन्तरं सार्धसहस्रतमेऽब्दे शाङ्करमद्वैतं सहसैव न समजनि, प्रत्युत मध्ये वैदिकावैदिकेष्वनेकानि दर्शनान्यद्वैतानुसन्धाने निरतान्यासन्। एवमन्तःपातिनां विभिन्न-दर्शनानां विकासपरम्पराया ज्ञानं विना शाङ्कराऽद्वैतस्य सम्यग् ज्ञानं दुष्करम्। शाङ्कर-मद्वैतज्ञानं सर्वेषामाधारभूतानां मध्यस्थानामद्वैतज्ञानानामध्ययनेनैव पूर्येत। एवं भारतीय-न्यायशास्त्रमपि जैन-बौद्ध-नैयायिक-वैशेषिकाणां पारस्परिकसंघर्षेणैव विकसितं विद्यते। अत एव भारतीयन्यायशास्त्रं पूर्वोक्तानां त्रयाणां न्यायानां ज्ञानमदधाति। उक्तन्यायेषु कस्याश्चिदेकस्याः शाखाया उपशाखाया वा ज्ञानादभीष्टं ज्ञानं भवितुं नार्हति। सम्प्रदायाऽ-सम्पृक्तशुद्धतद्विषयानुरोधिज्ञानेनायं दोषः शममेष्यति। एतस्याभीष्टस्यांशस्य पूर्तये दर्शना-न्तराणां प्रमेयज्ञानसम्पादनमस्याः परिषदो द्वितीयमुद्देश्यम्।

विगतासु कासुचिच्छताब्दीषु भारतीयदर्शनानां मौलिको विकासः प्रायोऽवरुद्ध इव दृश्यते। भारताद् बहिर्विद्वद्भिर्नव्यानां ज्ञानानामाविर्भावः कृतः। ज्ञानस्यास्य स्वरूपाकलनं विना कस्यचिदाधुनिकदर्शनस्य ज्ञानमपूर्णमेवावतिष्ठेत। अतः परिषत् तृतीयोद्देश्य-द्वाराऽर्वाचीनानां प्राच्यप्रतीच्यदर्शनानां तुलनात्मकमध्ययनमालोचनं च सम्पादयिष्यति।

पूर्वोक्तस्योद्देश्यत्रयस्य संसिद्धये इयं परिषत् पूर्वं स्वल्पेन कार्यक्रमेणाऽऽत्मन्येतादृशं गौरवमाधास्यति येनाग्रे देशस्य विदेशस्य च लब्धकीर्तीनां दर्शनपरिषदां श्रेण्यां स्थित्वा सरस्वत्याश्चरणयोरपूर्वं ज्ञानोपहारं समर्पयेत्।

परिषदा तात्कालिकं कार्यद्वयमिदं कर्तव्यं भविष्यति—दर्शनस्य विशिष्टविदुषामन्वेषण-प्रधानानां प्रमेयप्रधानानां वा निबन्धानां पाठः, पठितनिबन्धानां वार्षिकया पत्रिकया प्रकाशनं च। परिषदाऽग्र एकया सुचिन्तितकर्तव्ययोजनया लक्ष्यलाभो विधास्यते।

आशास्महे प्रक्रमयिष्यमाणेऽस्मिन् ज्ञानयज्ञे सहजकरुणावतां विदुषामाश्रवो मिलिष्यति। इदं च भृशं विश्वसिमो यदुत्तरप्रदेशीयं शासनमेतस्मिन्नायोजनेऽर्थदानप्रमुखं सहयोगं विधास्यतीति॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दर्शनपरिषदः कृतवृत्तम्

उद्घाटनसमारोहः

दर्शनपरिषद उद्घाटनं विद्वत्प्रवरैर्मुख्यमन्त्रिभिः डा०सम्पूर्णानन्दमहोदयैः कार्तिकशुक्लचतुर्दश्याम् एकादशोत्तरद्विसहस्रतमे (२०११) वैक्रमाब्दे—(२८-११-१९५५ ई०) सम्यक् विहितम्। विशिष्टेऽस्मिन् समारोहे काशीस्थाः प्रायः सर्वे एव दार्शनिका अन्ये च विख्याता विद्वांसः समवेताः समभवन्। वैदेशिका अपि विद्वांसश्छात्रा भिक्षवश्च प्रायः शतसंख्याकाः फ्रांस-जर्मन-इटली-तुर्की वर्मा-श्याम-लंका-चीन-तिब्बत-लद्दाखादिदेशवासिनः संसदि स्वोपस्थित्याऽन्ताराष्ट्रियां काञ्चित् परमां सुषमां समापादयन्। काशीस्थेष्वितरसमागतविद्वत्सु भिक्षुजगदीशकाश्यप (नवनालन्दामहाविद्यालयसञ्चालकः)-आनन्दकौशल्यायन-पद्मनाभजैनप्रभृतय आसन्। एतस्मिन् समारोहप्रसङ्गे मङ्गलमाचरितुं वेद-पुराणयोः, चीन-तिब्बत-लंका-ब्रह्मदेशीयबौद्धसूत्राणां च स्वस्वपद्धत्यनुसारं पाठो जातः। महदेतस्याः परिषद आनुरूप्यं यदस्याः प्रारम्भः पुण्यश्लोकस्याचार्यनरेन्द्रदेवस्य, महाविदुषो म० म० प० गोपीनाथकविराजमहाभागस्य, विद्वद्धौरेयस्य च श्रीको०अ०सुब्रह्मण्य-अय्यरमहोदयस्य (लक्ष्मणपुरविश्वविद्यालयकुलपतेः) परामर्शबलेनैव जातः। आदौ श्रीबदरीनाथशुक्लद्वारा एतैः संदिष्टाऽऽशीर्वचनपत्राणां पाठेन परिषदो माहात्म्यं कार्यगौरवं च सम्यक् प्राकाश्यमवाप। भिक्षुजगदीशकाश्यपश्च स्वयमुपस्थाय शुभाशंसनं प्राकाशयत्। मन्त्रिणा श्रीजगन्नाथोपाध्यायेन परिषदः स्थापनार्थं प्रस्तावमुपस्थापयता तस्या लक्ष्यं कर्तव्यं चोपपादितम् (एतच्च भाषणमत्रैव पूर्वं मुद्रितम्)। तदानीन्तनराजकीयसंस्कृतमहाविद्यालयप्रधानाचार्यश्रीकुबेरनाथशुक्लमहोदयानां स्वागतभाषणानन्तरं मुख्यमन्त्रिणां परिषदः शुभारम्भोत्सवभाषणं समजनि। मुख्यमन्त्रिभिर्वैदुष्यगभीरे स्वभाषण उक्तम्—

"दर्शनशास्त्रं खलु न केवलमध्ययनस्य विषयः, प्रत्युत सामाजिकीं व्यवस्थां परिवर्तयितुमपि तत् क्षममस्ति। इदानीमस्माकं देशोऽभिनवं रूपं गृह्णन्नास्ते। आशास्यते यद् वाराणसीतो भवन्त एतादृशीं दार्शनिकीं विचारसरणीं पुरस्करिष्यन्ति, यामनुगम्य एतत्सकलं निर्माणं शिवाय सत्याय च भविष्यति। संस्कृतभाषायास्तदुपलब्धपुस्तकानां

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वाऽध्ययनमात्रेण तावत् सकलमभिलषितं न सेत्स्यति, यावत् तेन मानवानामाध्यात्मिकी क्षुत् निवृत्ता न भवेत्। अस्यां दर्शनपरिषदि दर्शनस्य साङ्गोपाङ्गमध्ययनं भविष्यति, किन्तु तावन्मात्रेणास्याः साफल्यं न मन्तव्यम्। सम्यक् साफल्यायाऽद्यतनानां नवानां जिज्ञासानां समाधये यतितव्यम्।

"भारतीयं दर्शनं दर्शनेषु मूर्धन्यमस्तीति सम्यक्, किन्तु पुरातनदर्शनानामध्ययनेनेदानीन्तने नवयुगे न पूर्णो लाभः। बौद्धानामार्हतानां च वादं पूर्वपक्षीकृत्य यद् यद् प्राचीनग्रन्थेषु प्रतिक्षिप्तं तदध्ययनमात्रेणाद्यतनजिज्ञासानां समाधानं न सेत्स्यति। इदानीं कश्चिद् बौद्ध आर्हतो वा शङ्कापक्षमधिकृत्य नोपस्थितः, अपि त्वत्यन्तमभिनवो भौतिको वैज्ञानिकः। विज्ञानं प्रत्यक्षमस्ति। प्रत्यक्षस्योत्तरं प्रत्यक्षेणैव पार्यते न शास्त्रशतैस्तर्कशतैर्वा। यद्यपि भारतीयदर्शनानां सिद्धान्तस्त्रिकालाबाधितोऽस्ति, तथाप्यस्माभिः समयानुकूलं नवजिज्ञासानां समाधानानुरूपं च प्रतिपाद्य तल्लोकसमक्षमुपस्थापयितव्यम्। नवे युगे यो गणितशास्त्रं न जानीयात् स दर्शनशास्त्रं ज्ञातुमपि न प्रभवेत्। गणितं विना जगतो रहस्यं नैवानुमातुं शक्यते। पुरातनं शास्त्रं न पुरातन्या दृष्ट्या, अपि त्वाधुनिक्या दृष्ट्या विविच्य मन्तव्यम्। भौतिकज्ञानमालम्ब्यैवाद्यतना मङ्गलग्रहमाप्तुं प्रयतन्ते, न तदर्थं योगसिद्धिं कामयन्ते। योगशास्त्रेण शारीरं यज्ज्ञानं भवति तदद्यतन-'एलोपैथिक'-चिकित्सायाश्छात्राणां प्रथमवार्षिकज्ञानादप्यल्पतरमस्ति। एतत्सर्वमप्रियमिव मत्वा न हातव्यम्, एतन्नवज्ञानमालक्ष्य प्रयतितव्यम्। येषां पूर्वजैः पुरा नव्यानि दर्शनानि प्रकटितानि कथं न तैरिदानीमभिनवं दर्शनमाविष्कर्तुं पार्यते?

"संस्कृतस्याध्ययनाध्यापनयोः भारतीयसंस्कृतेश्च विकासे काश्याः स्थानं विशिष्टमासीत्। भारतीया संस्कृतिर्न जडा। सा समये समये नवं नवं विकासमापद्यमानैव जीवन्ती शक्तिमादधती शोभते। अस्मिन्नवयुगे तस्या नवो विकासो नूनमपेक्ष्यते।

"अनेकशताब्ध्यनन्तरमयं देशः स्वातन्त्र्यमवाप। अस्य स्वतन्त्रदेशस्य स्वरूपं किंविधं भवेदित्यद्याप्यचिन्तितप्रायमेवास्ति। मन्ये उद्घाटितयाऽनया परिषदा एतत्सर्वं कार्यं संपत्स्यते" इति।

अनन्तरं परिषद उपाध्यक्षेण कोषाध्यक्षेण च श्रीदेवदत्तशर्मोपाध्यायेन मुख्यमन्त्रिभ्यः समागतेभ्यश्च विद्वद्भ्यो नागरिकेभ्यश्च धन्यवादाः सबहुमानाः प्रदत्ताः। राष्ट्रगीत्यनन्तरं च समारोहः स व्यसर्जत।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दर्शनपरिषद्

निबन्धपाठो वादश्च

परिषदायोजित विद्वद्गोष्ठीषु 'मानाधीना मेयसिद्धिर्मेयाधीना मानसिद्धिर्वा', 'ज्ञानस्य निराकारत्वेऽद्वैतवादिबाह्यार्थसत्त्ववादिनोः को विशेषः', 'मनसः स्वरूपम्', 'प्रत्यक्षम्', 'दृष्टि-सृष्टिवादः', 'काणाद आस्तिको न वा' इत्यादिप्रधानविषयानवलम्ब्य निबन्धपाठाः, भाषणानि, तत्त्वबुभुत्सूनां चर्चाश्च सम्यक् सम्पन्नाः।

एतत्कार्यजातमधोलिखिता विद्वांसः प्राधान्येन समापादयन्। तेषु श्रीमन्तो म० म० गिरिधरशर्मचतुर्वेद-रामचन्द्रदीक्षितार-कमलाकान्तमिश्र-हरेरामशुक्ल - रामलक्ष्मणाचार्य-रामानुजौझा-राजारामशास्त्री-आनन्दझा-शोभितमिश्र-मञ्छारामद्विवेद-महानन्दठक्कुर-रघुनाथशर्म-बदरीनाथशुक्ल नृसिंहदेवशास्त्रि-त्रिलोकधरद्विवेद-देवदत्तशर्मोपाध्याय - सुरेन्द्रनाथशास्त्रि-विभूतिनाथत्रिपाठि-स्वर्गीयमामराजदत्तकपिल-रामकुमारचौबे-जगन्नाथोपाध्यायप्रभृतयो विद्वांसो युक्ताः।

छात्राणां वादः शास्त्रार्थप्रतियोगिता च

परिषदा छात्रेषु वादशास्त्रार्थाभिलाषसंवर्धनायाऽऽयोजितासु गोष्ठीसु 'ईश्वरकर्मणोरेकतरेणोभयेन वा जगद्व्यापारसिद्धिः', 'दर्शनानि धर्मानुरोधेन प्रवर्तन्ते स्वातन्त्र्येण वा', 'जीवब्रह्मणोर्भेदोऽभेदो वा', 'जगतो मिथ्यात्वस्वरूपम्' इत्यादिविषयानधिकृत्य भाषणानि वादाश्च समजनिषत। तत्र समये समये लब्धविजयाः श्रीमन्तः श्रीरामशङ्करभट्टाचार्य-हरिप्रसादोपाध्याय-दुर्गाप्रसाददवाडी-जगदीशहरि-पुरुषोत्तमश्रीवैष्णव - श्यामनारायणदीक्षित - शिवदत्तचतुर्वेद-रामशङ्करत्रिपाठि-श्रीपतित्रिपाठि-शिवनारायणशर्म-विद्यानन्दब्रह्मचारिप्रभृतयः।

स्मृत्युत्सवाः

परिषदायोजितोत्सवेषु गीताजयन्ती प्रतिवर्षमेधमानाऽस्ति। व्यास-बुद्ध-शङ्कर-रामानुजादिमहापुरुषाणामाचार्याणां च जयन्त्युत्सवाः स्मृत्युत्सवा वा सम्पादयिष्यन्ते।

विदुषां भाषणानि

भाषणायोजने विशिष्टविद्वत्सु भारतविख्यातस्य दादाधर्माधिकारिणः सर्वोदयदर्शनमधिकृत्य, महापण्डितराहुलसांकृत्यायनस्य दर्शनाध्ययनक्षेत्रमधिकृत्य, प्रसिद्धतत्त्वचिन्तकस्य अच्युतपटवर्धनस्य च दर्शनस्य सामाजिकोपयोग इति विषयमवलम्ब्य भाषणानि जातानि।

दर्शनपरिषदङ्कप्रकाशनम्

परिषदा विविधान् दर्शनविषयानधिकृत्य विदुषां गवेषणालोचनात्मकनिबन्धानां प्रकाशनमप्युपक्रम्यते। निबन्धानां दिङ्निर्देशार्थं कतिपयविषयाणामेकां सूचीं निर्माय सा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विदुषां समीपे प्रेषिता, विद्वांसश्च प्रार्थिता यदेषु निर्दिष्टविषयेषु कमप्येकविषयमवलम्ब्य सुलिखितं निबन्धं प्रेष्यतामिति। विदुषां कृपावशात् पञ्चाशत्परिमिता निबन्धा अस्माभिर्लब्धाः। तेषु द्वात्रिंशत्परिमिता विशिष्टा निबन्धा अस्मिन् दर्शनपरिषदङ्के प्रकाश्यन्ते।

निबन्धार्थं संस्कृत-पालि-प्राकृत-हिन्दीभाषाः स्वीकृताः सन्ति। विशिष्टविदुषां भारतीयविदेशीयभाषासु निबद्धा अपि निबन्धाः संस्कृतभाषायामनूद्य प्रकाश्येरन्।

कर्तव्यायोजनम्

परिषदः कृतवृत्तप्रकाशनप्रसङ्गे पूर्वं यद्विवरणमुपस्थापितमस्ति तत्परिषदा सामान्यतः करणीयमासीत्। तदतिरिच्य कालव्यापिविशिष्टकर्तव्यायोजनानि सन्ति। तदायोजनस्य सन्ति त्रयो भागाः—१. अनुसन्धानं तत्सहायकमन्यत् कर्म च, २. प्रकाशनम्, ३. महाधिवेशनं गोष्ठ्यश्च।

अनुसन्धानकर्मणि विभिन्नदर्शनानां पारिभाषिकशब्दकोशनिर्माणं प्रमुखं महत्त्वपूर्णमस्ति। पारिभाषिकशब्दानां दर्शनकोशानामभावे समस्तभारतीयदर्शनानां विशेषतोऽध्ययनाध्यापनेषूपेक्षितानामध्ययनेऽतीव काठिन्यमनुभूयते, तद्दूरीकर्तुं पारिभाषिकशब्दानां कोशनिर्माणमत्यावश्यकमालोच्य प्राथम्येन आगम (शैवशाक्तौ)-वैष्णववेदान्त (पाञ्चरात्रागमसहित)-बौद्धदर्शन (बौद्धन्याय)-जैनदर्शन-व्याकरणदर्शन-सांख्ययोगानां कोशा निर्मास्यन्ते।

येषां दर्शनानामध्ययनाध्यापनपरम्परा विलुप्ता विरला वा जाता, तत्पुनरुज्जीवयितुं तत्संबन्धिनिबन्धान् लेखयित्वा तेषां प्रकाशनमावश्यकम्। निबन्धार्थमधोलिखिता विषयाः प्राथम्येन वृताः सन्ति—आगम-वैष्णववेदान्त—बौद्धदर्शन—जैनदर्शन—प्राचीनन्याय-पाश्चात्त्यदर्शन-(प्राचीनमर्वाचीनं च)—सिद्धमत(अपभ्रंशहिन्द्योः)-मीमांसा(दर्शनमात्रम्)प्रभृतयः। इतरेषां दर्शनानां निबन्धास्त एव ग्रहीष्यन्ते येषामालोचनात्मकं मानमुत्कृष्टं भवेत्। नवीनदर्शनानां श्रीअरविन्ददर्शनप्रभृतीनां केषाञ्चित्प्राचीनदर्शनानामप्यभिनवदृशा व्याख्यातानां लेखाः साग्रहं ग्रहीष्यन्ते।

पाश्चात्यानामन्यदेशीयानां वा दर्शनानां परिचयप्राप्त्यर्थं तद्विशिष्टग्रन्थानामविकलोऽनुवादः संक्षिप्तं तात्पर्यसंकलनं वा करिष्यते। तत्र पाश्चात्त्येषु मध्यकालतः पूर्वतनानि, नवीनेषु मध्यकालतः पश्चात्तनानि, पौर्वात्येष्वारव्यपारसीकदर्शने, चीन-जापान-तिब्बतदेशीयानां च दर्शनान्यनुवादार्थं स्वीकरिष्यन्ते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दर्शनपरिषद्

भारतीयदर्शनानां ज्ञानमाधुनिकालोचनात्मकज्ञानेन सुसमृद्धं कर्तुं तत्तद्ग्रन्थेषु विशिष्ट-पत्रिकासु च प्रकाशितदार्शनिकनिबन्धानां सूची विषयानुसारं निर्मास्यते।

तत्र कार्यारम्भः

प्रकाशयिष्यमाणकोशग्रन्थान् निर्मातुमधोलिखिता विद्वांसः कार्यभारं गृहीतवन्तः — तत्र व्याकरणदर्शनकोशं प० देवदत्तशर्मोपाध्यायाः, वैष्णववेदान्तकोशं प० व्रजवल्लभद्विवेदाः, आगमकोशं सरस्वतीभवनस्थाः श्रीरघुनाथपाण्डेयाः, बौद्धदर्शनकोशं श्रीजगन्नाथोपाध्यायः, श्रीरामशङ्करत्रिपाठी च निर्मास्यन्ते।

महाधिवेशनम्

परिषदो द्विवार्षिकं महाधिवेशनमपि महत्त्वाधायकं कर्तव्यमस्ति। एतन्महाधिवेशन-क्रमेणाचिरादेवास्याः परिषद एवं विकासः कर्तव्यो येनेयं परिषद् अखिलभारतीयप्राच्यविद्या-परिषदो दर्शनपरिषदो वा संस्कृतक्षेत्रे वैकल्पिकं स्थानं प्राप्नुयात्। विख्याताखिलप्राच्यविद्या-परिषदाङ्गलभाषाया दुर्भेद्यावरणेनैवमावृताऽऽस्ते, यत्र संस्कृतपण्डितानां प्रवेश एव दुःशकः। वस्तुतः संस्कृतविदुषां शास्त्रविचारसरणिरन्यतः पृथगेवाऽस्ति। अतः प्राचीनपद्धतावेवैकाऽऽ-लोचनासरणिरेवं परिष्करणीया यया प्राचीनदर्शनानां पुनर्मौलिकं समीक्षणं विकसेत्, नवीन-दर्शनानां च परिचयबलेन नवीनजिज्ञासानां नवं समाधानमपि भवेत्। संक्षेपेणैतदेव परिषदो महाधिवेशनस्य प्रयोजनम्। अस्मिंश्च महाधिवेशने विभिन्नदर्शनानां गोष्ठ्यो भविष्यन्ति, यत्रा-नुसन्धानबहुला निबन्धा पठिष्यन्ते। नवीनेषु विषयेषु परस्परं वादोऽपि भविता। इदानीमार-प्स्यमाणमहाधिवेशनस्य स्वरूपमाकलितमस्ति, आशास्यते चाधिवेशनं शीघ्रमेव संपत्स्यत इति।

विद्वद्भ्यो निवेदनम्

श्रद्धेया विद्वांसः प्रार्थ्यन्ते यद् वाराणसेयसंस्कृतविश्वविद्यालये दर्शनपरिषदियं पूर्वतो-ऽप्यधिकं सामर्थ्यं लभमाना विदुषां पुरतो निरतिशयं कमपि सारस्वतमुपहारं तदा प्रस्तोतुं पारयिष्यति यदा तत्रभवतां विदुषामनवरतमहेतुकं च साहाय्यं लभेदिति। अत आशा-स्यते विद्वांसोऽधोलिखितविषयनामावलिनिर्दिष्टविषयेषु प्रायो नातिपरिचितेषु निबन्धान् लिखित्वा—"मन्त्री, दर्शनपरिषद्, वाराणसेयसंस्कृतविश्वविद्यालय, वाराणसी" इति संकेतेन प्रेषयिष्यन्ति।

विशेषेणेदं निवेदनं यद् विद्वांसः स्वनिबन्धेषु प्रमाणत्वेनोद्धृतानां ग्रन्थांशानां ग्रन्थ-स्थानसंस्करणानां निर्देशमवश्यं कुर्युरिति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निबन्धार्थं संस्कृत-पालि-प्राकृत-हिन्दीभाषाः स्वीकृताः सन्ति। इतरभारतीयभाषासु निबद्धा अपि निबन्धाः स्वीकृताः स्युः, परं तादृशाः संस्कृतभाषायामनूद्यैव प्रकाशयिष्यन्ते। वैदेशिकभाषानिबन्धा आङ्गलभाषायां हिन्दीभाषायां वाऽनूद्य प्रेषिता एव स्वीकृताः स्युः। हिन्दीभाषानिबन्धाश्च हिन्दीभाषायामेव प्रकाशयिष्यन्ते। इतरेऽनुवादाः संस्कृतभाषायां प्रकाशमेष्यन्तीति।

निबन्धयिष्यमाणनिबन्धनामावलिः

वैष्णवदर्शनम्

१. चतुर्व्यूहवादः

२. भक्तिप्रपत्तिमतभेदविचारः

[रामानुजसम्प्रदायमनुसृत्य उत्तरदक्षिणोभयसम्प्रदायदृष्ट्या भक्तिप्रपत्तिविषयकं मतभेदविवेचनम्।]

३. वैष्णवदर्शनेषु भक्तिस्वरूपविमर्शः

[दार्शनिकवैष्णवानामभिमतं भक्त्युद्भव-स्वरूप-प्रयोजन-विवेचनम्।]

४. पुष्टिभक्तेः रागभक्तेर्वा विवेचनम्

[वल्लभगौडीयसम्प्रदाययोर्दृष्ट्या पुष्टिरागभक्त्योरेकतरस्या विवेचनम्।]

५. नित्यलीलारहस्यालोचनम्

[वैष्णवानां विविधप्रस्थानैर्नित्यलीलारहस्यविवेचनम्।]

६. भागवततात्पर्यनिर्णयः

[वल्लभमतेन गौडीयमतेन वा श्रीमद्भागवततात्पर्यविवेचनम्]

७. वैष्णवदर्शनानां प्रसारो निगमागममूलकत्वं च

[वैष्णवदर्शनानां विकासः, परस्परं संबन्धः, कियती च निगमागमापेक्षे-त्यादिविवेचनम्।]

न्यायवैशेषिकदर्शनम्

१. न्यायसांख्याभिमतपाकपरिणामविचारः

[न्यायवैशेषिकाभिमतपाकप्रक्रियया सह सांख्यानुमोदितावस्थापरिणामस्य तुलनात्मकं विवेचनम्।]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दर्शनपरिषद्

२. व्याप्तिविचारः

[बौद्धसंमतान्तर्व्याप्तिं प्राचीननैयायिकदृष्ट्या पर्यालोच्य स्वसिद्धान्तव्यवस्थापनम् ।]

३. व्याप्तेः प्रसारक्रमः

[व्याप्तिलक्षणस्य न्यायवैशेषिकबौद्धसिद्धान्तानुसारी नव्यन्यायमतानुसारी च तत्त्वज्ञानसंबन्धिविकासः ।]

४. निर्विकल्पकसविकल्पकप्रत्यक्षविचारः

[निर्विकल्पकसविकल्पकप्रत्यक्षमधिकृत्य न्यायवैशेषिकबौद्धपूर्वमीमांसासिद्धान्तैः तुलनात्मकं विवेचनम् ।]

५. न्यायवैशेषिकयोर्भेदकतत्त्वानि

[न्यायवैशेषिकदर्शनयोः पृथक्त्वाधायको मौलिकज्ञानविषयकः क्रमिको विकासः ।]

६. अदृष्टवादः

[कालक्रमेणादृष्टशब्दस्य विभिन्नार्थप्रदर्शनं न्यायपूर्वमीमांसाभिमतादृष्टापूर्वयोस्तुलनात्मकं विवेचनं च ।]

७. गङ्गेशोपाध्यायानां मतवैशिष्ट्यम्

[प्राचीनन्यायतो विविच्य गङ्गेशोपाध्यायानां मतभेदप्रदर्शनम्, तस्य प्रयोजनाख्यानं च ।]

८. कणादो नास्तिको न वा

शाङ्करवेदान्तः

१. ब्रह्मस्वरूपनिर्णयः

[शङ्कराचार्यमण्डनमिश्रसिद्धान्तानुरूपब्रह्मस्वरूपनिर्णये साधर्म्यवैधर्म्यविचारः ।]

२. दृष्टिसृष्टिवादः

[वेदान्ताभिमतदृष्टिसृष्टिवादस्य विकासस्तत्र गौडपादविज्ञानवादिनोः प्रभावाकलनं च ।]

३. विज्ञानाद्वयब्रह्माद्वैतवादयोः साधर्म्यवैधर्म्यविचारः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

४. शिवाद्वयवादब्रह्माद्वैतवादौ
[आगमसंमतशिवाद्वयवादवेदान्तसंमतब्रह्माद्वैतवादयोः साधर्म्यवैधर्म्यनिरूपणम् ।]
५. सांख्ययोगसंबन्धिशाङ्करमतालोचनालोचनम्
६. न्यायवैशेषिकसंबन्धिशाङ्करमतालोचनालोचनम्
७. गीतोपनिषद्ब्रह्मसूत्राणां पृथक्प्रस्थानत्वालोचनम्
८. शङ्कराचार्यतः पूर्वमद्वैतवादस्य स्वरूपम्
९. आभासप्रतिबिम्बावच्छेदवादाः
[आभासप्रतिबिम्बावच्छेदवादेष्वेकतमस्य प्रयोजनोद्गमविकासानामवधारणम्, अन्यैः सह साधर्म्यवैधर्म्यविचारश्च ।]
१०. अद्वैतवेदान्तमते व्यक्तिसमाजयोः संबन्धविवेचनम्
११. अद्वैतवेदान्तमते समाजनिर्वाणयोः संबन्धः

आगमदर्शनम्

१. शुद्धाध्वस्वरूपविमर्शः
[आगमबौद्धदर्शनसांख्ययोगादिदर्शनेषु एकतमदृष्ट्या शुद्धाध्वस्वरूपस्य निर्णयः, प्रयोजनादिविषयको विचारः, अन्यदर्शनैः सह साधर्म्यवैधर्म्य-निरूपणं च ।]
२. साधनभूमिकाविमर्शः
[बोधिसत्त्वशुद्धविद्योत्तरशिवत्वप्रापकभूमिकयोरेकतरस्या विवेचनं तयोरापेक्षिकं साधर्म्यवैधर्म्यनिरूपणं च ।]
३. आम्नायभेदकतत्त्वानि
[आगमान्तर्गतपूर्वाद्याम्नायानां भेदकतत्त्वविवेचनम् ।]
४. बौद्धपौरुषज्ञानाज्ञानभेदविमर्शः
[आगमसंमतबौद्धज्ञानाज्ञानाभ्यामागमसंमतपौरुषज्ञानाज्ञानयोर्भेदप्रदर्शनम् ।]
५. अर्धमात्रारहस्यविचारः
६. मातृकास्वरूपनिर्णयः
७. नादवादस्फोटवादौ
[आपेक्षिकदृष्ट्याऽऽगमसंमतनादवादस्फोटवादयोरालोचनात्मकं विवेचनम् ।]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

८. आगमानुसारिभावभेदाऽऽचारभेदयोः संबन्धः
९. निगमागमसंबन्धस्वरूपविमर्शः
१०. निगमागमपरम्पराप्रभावः
[साम्प्रतिकहिन्दुधर्मे निगमागमाचारविचारपरम्पराप्रभावप्रदर्शनम्].
११. काश्मीरशैवमतम्

जैनदर्शनम्

१. चतुर्दशगुणस्थानविवेकः
२. केवलज्ञानस्य स्वरूपं तदवाप्त्युपायश्च
३. बौद्धजैनयोगयोः साधर्म्यवैधर्म्यालोचनम्
४. अद्वैतवादस्य जैनमतानुरूपं निरूपणम्

व्याकरणदर्शनम्

१. शाब्दज्ञानस्य परोक्षत्वापरोक्षत्वविवेकः
[शब्दजन्यज्ञानस्य केवलवैयाकरणसिद्धान्तानुसारि परोक्षत्वापरोक्षत्वविषयकं विभिन्नमतनिर्देशपूर्वकालोचनम् ।]

शब्दब्रह्मवादस्योद्गमो विकासश्च

[शब्दब्रह्मसिद्धान्तस्योद्गमविकासयोरालोचनम् , तस्य दर्शनान्तरैः साधर्म्यनिरूपणम् , तस्य मूलमागमिकं वैदिकं वेत्यादिचिन्तनं च ।]

३. व्याकरणस्य स्वतन्त्रदर्शनत्वालोचनम्

बौद्धदर्शनम्

१. बुद्धत्वस्वरूपस्य क्रमिको विकासः
[बुद्धत्वविषये पालिसाहित्यतत्परवर्तिसाहित्यगतानेकविशिष्टधर्मसंभारविषयकमालोचनम् ।]

२. शून्यवादविज्ञानवादयोरेकतरस्य व्यवस्थापनम्
[शून्यवादविज्ञानवादविषयकोदयनोक्तिं पर्यालोच्य बौद्धसिद्धान्तेन तयोरेकतरस्योद्धारः ।]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

३. सत्तावादस्वभाववादयोः साधर्म्यवैधर्म्यविचारः
[वेदान्ताभिमतसत्तात्रैविध्येन सह बौद्धाभिमतस्वभावत्रैविध्यस्य साधर्म्य-वैधर्म्यविवेचनम् ।]

४. बौद्धमतेन साधकस्याध्यात्मिको विकासः
[दशसंयोजननिवृत्तिपूर्वकमर्हत्वप्राप्तिबोधिचित्तोत्पादपूर्वकं बुद्धत्वसम्यक्संबुद्धत्वाभिव्यक्त्योरेकतरेण मार्गगतस्य सत्त्वस्याध्यात्मिकः क्रमविकासः ।]

५. बौद्धनयेषु आर्यसत्यानां स्वरूपम्

६. बौद्धनयेषु प्रतीत्यसमुत्पादवादस्योद्गमो विकासश्च

७. संघातवादारम्भवादयोर्वैशिष्ट्यम्
[बौद्धाभिमतसंघातवादस्य नैयायिकाभिमतारम्भवादस्य च परस्परं साधर्म्य-वैधर्म्यविचारः]

८. शून्यतासिद्धान्तस्योद्गमो विकासश्च

९. चित्तक्खणेन विथिचित्तसभावो
[विण्हु'ति पदं दस्सनसवणक्खणे वा, तस्स पदस्स अत्थं परिपुण्णं सुविञ्ञात-काले वा कतमानि विथि-चित्तानि उप्पज्जित्वा कितकानि चित्तक्खणानि च उप्पज्जन्ती'ति पकासितुं वट्टति ।]

१०. संसारचक्कस्स छिन्दितनयो
[सीता'ति सवणक्खणे कथं पटिच्चसमुप्पादचक्कं आवट्टति अथ खो तं अनावट्टनात्थाय कथं चक्कं छिन्दितब्ब'न्ति आतुं भब्बो ।]

११. किलेसविद्धंसननयो
[किलेसजातियो कतीपमाणा, कीदिसे किलेसे केन निवारितुं सक्का, केन उपायेन तायो तनुकं भावं आपज्जन्ति, केन विसुद्धापेतुं समत्थो'ति जानितुं अरहति ।]

१२. चित्तस्य लक्खणं चेव वित्थारं च

मनोविज्ञानम्

१. अन्तःकरणस्य स्वरूपम्
[पाश्चात्यमनोविज्ञानं भारतीयसांख्ययोगबौद्धदर्शनानि चापेक्ष्य तुलनात्मक-मालोचनम्]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दर्शनपरिषद्

२. चित्तवृत्तिनिरोधस्य स्वरूपं तस्य प्रयोजनं च

[अत्र पातञ्जलयोगपाश्चात्त्यमनोविज्ञानयोः संवादविसंवादाकलनम् ।]

३. प्रत्यक्षस्य स्वरूपम्

[भारतीयवैशेषिकदर्शनं पाश्चात्त्यमनोविज्ञानं चाधृत्येन्द्रियसन्निकर्षादारभ्य प्रमोत्पत्तिपर्यन्तं क्रियाव्यापाराणां तुलनात्मकमाकलनम् ।]

४. स्वप्नोत्पत्तेः कारणं प्रयोजनं च

[आयुर्वेद-ज्योतिष-पुराण-पाश्चात्त्यमनोविज्ञानान्याधृत्य विवेचनम् ।]

५. भावविभावाऽनुभावानां निष्पत्तिः, तेषां च वर्गीकरणम्

[भारतीयसाहित्यशास्त्रं पाश्चात्त्यमनोविज्ञानं चाधृत्याऽऽकलनम् ।]

सिद्ध एवं सन्तमत

१. घट रामायण का योगसिद्धान्त

२. कबीर तथा दादू और उनके शिष्यों के मत में परमार्थ का स्वरूप

३. वज्रयान तथा सहजयान की साधना और सिद्धान्त संबन्धी मतों का समीक्षण

४. सिद्धाचार्यों के दार्शनिक तथा योगसंबन्धी मत

[सामान्य रूप से सभी सिद्धाचार्यों की अथवा किन्हीं विशेष सिद्धों की वाणियों के आधार पर उनका दार्शनिक तथा यौगिक मत तथा उससे वज्रयानी सिद्धान्त और योग का भेदनिर्देश ।]

५. सन्तमत में शब्द-योग या अनहद-नाद का स्थान

६. गोरक्षसिद्धान्त के अनुसार पिण्डसंवित्ति

७. अवधूत मतों का सार-संकलन

८. योगियों के लक्ष्य

[लक्ष्यत्रय, व्योमपंचक तथा षोडश आधारों के स्वरूप आदि का विवेचन ।]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शुभाशंसनानि*

न्यू हैदराबाद
लखनऊ
२०-६-५५

प्रिय शुक्ल जी,

आपका कृपा पत्र मिला।

यह जानकर बड़ी प्रसन्नता हुई कि आपके यहाँ बनारस संस्कृत कालेज में दर्शन परिषद् की स्थापना होने जा रही है। इसके शुभारंभ में उपस्थित नहीं हो सकूंगा इसका मुझे दुःख है। दर्शन के अध्ययन के लिये दृष्टिकोण का उदार होना अत्यन्त आवश्यक है। यह खुशी की बात है कि इधर कुछ दिनों से संस्कृत कालेज में अन्य भारतीय दर्शनों के साथ बौद्ध दर्शन के अध्ययन के लिये प्रबन्ध किया गया है। भारतीय दर्शन एवं संस्कृति के विकास में बौद्ध और जैन दर्शनों ने महत्वपूर्ण योगदान किया है। इनके अध्ययन के विना भारतीय दर्शन का अध्ययन अधूरा है। हमको यह न भूलना चाहिये कि दर्शन और न्याय में बौद्धों की बहुत बड़ी देन है। जितने भारतीय दर्शन हैं—और इनमें मैं बौद्ध और जैन दर्शनों को भी शामिल करता हूँ - एक दूसरे को प्रभावित करते रहते हैं। इसलिए भारतीय दर्शन के विकास का क्रम जानने के लिए केवल आस्तिक दर्शन पर्याप्त नहीं है। हमको इसका गर्व होना चाहिये कि जिस प्रकार भारत राम और कृष्ण की जन्म-भूमि है, उसी प्रकार महावीर और गौतम बुद्ध की भी जन्म-भूमि है। बौद्ध और जैन दर्शन भी हमारे समान आदर के पात्र हैं। वर्तमान भारत का निर्माण उदार भाव के द्वारा ही होगा, साम्प्रदायिक बुद्धि उसमें बाधा उपस्थित करेगी। इतना विशाल देश, इतने विपुल प्राकृतिक साधन, इतनी विपुल जनसंख्या, इतनी प्राचीन उदार संस्कृति के होते हुए आज की संकीर्णता, एक क्षुद्र गड्ढे में आबद्ध रहने का बुरा अभ्यास बहुत खटकता है। विशाल देश के वासियों का हृदय भी विशाल होना चाहिये, नहीं तो उसकी भौगोलिक विशालता भी नष्ट हो जायगी। इस देश में विविध जातियों और विविध धर्मों के लोग बसते हैं। उनको एक सूत्र में ग्रथित करना अन्यथा असम्भव हो जायगा। पुनः हमको युगधर्म भी पहचानना चाहिए। यह युग समानता, राष्ट्रीयता और जनतन्त्र का है। आशा है, दर्शन परिषद् इस ओर उत्तरोत्तर प्रगति करेगी।

नरेन्द्रदेव

---

* दर्शनपरिषदः शुभारम्भोत्सवावसरेऽधिगतशुभाशंसनपत्रेषु त्रीणि—स्वर्गीयाचार्यनरेन्द्रदेव-विश्वविख्यातमनीषिमहामहोपाध्यायपं॰गोपीनाथकविराज - लक्ष्मणपुरविश्वविद्यालयोपकुलपतिप्रो॰को॰अ॰सुब्रह्मण्य-अय्यरमहोदयानां पत्राण्यत्र प्रकाश्यन्ते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शुभाशंसनानि

MAHĀMAHOPĀDHYĀYA
GOPINATH KAVIRAJ
M. A., D. LITT.

2/A SIGRA,
BANARAS
१७ ९-५५

श्रीमत्सु काशीस्थराजकीयसंस्कृतमहाविद्यालयाध्यक्षमहोदयेषु निवेदनम्—

भवद्भिः प्रेषितं सूचनापत्रमुपलब्धम् ।

काशिकराजकीयसंस्कृतमहाविद्यालयस्य दर्शनपरिषदः शुभारम्भः श्रीमद्भिर्मुख्यमन्त्रिमहोदयैः शुद्धभाद्रशुक्लद्वितीयायां विधास्यत इति ज्ञात्वा परिषदः परिकल्पितोद्देश्यानि विमृश्य च भृशं नन्दितोऽस्मि । विद्वद्भूयिष्ठा परिषदियं सूचनापत्रनिर्दिष्टं स्वार्थं सर्वथा सम्पाद्य जनशुभङ्करमर्थान्तरमपि जनचित्तोत्कर्षविधानप्रयत्नेन सम्यक् सम्पादयिष्यतीति मे दृढो विश्वासः । कल्याणीयं परिषत् चिरं जीवतु ।

कविराजोपाह्वगोपीनाथशर्मणः ।

FACULTY OF ARTS
LUCKNOW UNIVERSITY

शुद्धभाद्रशुक्लद्वितीयायां काशिकराजकीयसंस्कृतमहाविद्यालये माननीयमुख्यमन्त्रिडॉ०सम्पूर्णानन्दमहाभागैर्दर्शनपरिषदः शुभारम्भः करिष्यत इति श्रुत्वाऽतीव प्रसन्नोऽस्मि । समयानुगुणोऽयं दर्शनपरिषत्संस्थापनसमारम्भः । यथा यथा भारतीयदर्शनगतानां तत्त्वानामवबोधो वर्द्धते तेषु तेषु देशेषु, तथा तथा भारतीयप्रजासु भारतीयसंस्कृतौ चादरो वर्द्धते विदेशीयानाम् । एशीयाद्वीपान्तर्गततत्तद्देशनिवासिनीनां मनुष्यजातीनां संस्करणे भारतभूमिसमुत्पन्नेन बौद्धदर्शनेनाऽनेकवर्षशतानि यावत् कियान् प्रयत्नः कृतः क्रियते चाधुनापीतीदं तत्त्वं तेषु तेषु समुपलभ्यमानानां बौद्धधर्मस्य बौद्धदर्शनस्य च विशिष्टरूपाणां सम्यगध्ययनेनैवावगन्तुं शक्यते । अत आशासे यन्महाविद्यालयोऽयं वैदिकदर्शनानामिवाऽवैदिकबौद्धजैनादिदर्शनानामप्यध्ययनस्य केन्द्रं भवेदिति । काशिकराजकीयसंस्कृतमहाविद्यालये तिब्बत-चीन-ब्रह्म-सुम्म-सिंहलादिदेशेभ्यो दर्शनपरिषदा निमन्त्रितानां बौद्धदर्शननिष्णातानां विदुषां वाचः श्रवणं सुलभं भवत्विति प्रार्थयते—

को०अ०सुब्रह्मण्य-अय्यरः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सम्पादकीयम्

दर्शनाङ्कविषये किञ्चित्

अथेदानीं प्रकाश्येते एकादशवर्षस्य तृतीयचतुर्थाङ्कौ दर्शनाङ्क इति नाम्ना। काशिकराजकीयसंस्कृतमहाविद्यालये १९५५ ई० वत्सरे दर्शनपरिषदेका प्रतिष्ठापिता। तस्याः संक्षिप्त इतिहासः, कार्यविवरणलब्ध्यादिकं चात्रैवाङ्केऽन्यत्र विद्यते। तस्या द्वितीये विशिष्टाधिवेशनावसरे "सारस्वत्याः सुषमायाः" दर्शनाङ्कः प्रकाश्येतेत्यासीन्मनसि परिषत्संचालकानाम्। स दर्शनाङ्कोऽधुना प्रसिद्धिं प्राप्यते।

द्विप्रकारका अत्र निबन्धाः सन्ति। प्रथमे विभिन्नेषु दार्शनिकविषयेषु निबद्धाः, अपरे च विवादग्रस्तेषु केषुचित् पूर्वनिश्चितेषु विषयेषु पक्षविपक्षमवलम्ब्य ग्रथिताः। तत्राद्यैकविंशतिः प्रथमे विभागे, अन्तिमाश्चैकादशनिबन्धा द्वितीये विभागे समाविशन्ति। तदनन्तरं विविधानुसन्धानपत्रिकाभ्यः संचितानां लेखानां चयनिका दर्शनपरिषदः कार्यविवरणादिकं च वर्तेते। एवं विविधदार्शनिकसामग्रीसंवलितोऽयं दर्शनाङ्को विदुषां पाठकानां पुरतः समुपस्थाप्यते सार्द्धद्विशताधिकपृष्ठात्मकः।

तत्र प्रथमयोर्द्वयोर्निबन्धयो रामानुजमतेन भक्तिप्रपत्त्योः, तृतीये च वल्लभाचार्यसंमतायाः पुष्टिभक्तेर्विवेचनं विहितम्। चतुर्थे भागवतीयाद्यपद्यत्रयव्याख्यानमुखेन भागवतार्थनिर्णयस्तस्य प्रामाण्यं चोपनिषदादिवदेवेति स्थापितम्। इत्थमत्र चत्वारो निबन्धा वैष्णवदर्शनप्रतिपादकाः। पञ्चमश्च निबन्धः स्वतन्त्रमेव लिङ्गायतमतपरिचयं तत्तत्त्वज्ञानपद्धतिं च विशदीकरोति। तदनन्तरं त्रयो निबन्धाः शाङ्करवेदान्तसंबद्धाः। तेषु प्रथमे विज्ञानाद्वयब्रह्माद्वैतवादयोः साधर्म्यवैधर्म्ये निरूपिते, द्वितीये वेदान्तदर्शनं वैयक्तिकमेव न सामाजिकमित्याक्षेपसमाधानपूर्वकं व्यक्तिसमाजयोः संबन्धे सामञ्जस्यमापादितम्, तृतीये च शाङ्करदर्शने न्यायवैशेषिकदर्शनोद्भाविता शङ्काः समाहिताः। ततश्चतुर्षु निबन्धेषु न्यायवैशेषिकदर्शनसंबद्धेषु क्रमशो न्यायवैशेषिकदर्शनयोर्भेदजनकानि बीजानि, व्याप्तेः प्रसारप्रपञ्चः, रविभूम्योश्चलत्वाचलत्वसाधनार्थं पाश्चात्त्यज्योतिर्विद्भिरुपस्थापितानां प्रमाणानां साध्यसिद्ध्यसामर्थ्यम्; अवयविस्वरूपविचारश्च कृतः। ततो द्वौ निबन्धौ बौद्धदर्शनसंबद्धौ। तयोरेको बुद्धमार्क्सयोर्वादसाम्य-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मातनोति, अपरश्च पालिभाषामयस्त्रिविधक्लेशविध्वंसननयं निरूपयति। तदनन्तरयोर्द्वयोर्निबन्धयोः प्रथमे बौद्धदर्शनप्रभावितस्य सिद्धयोगस्य, अपरस्मिंश्च नाथयोगस्य प्रतिपादनं विद्यते। ततो भागवतपुराणप्रतिपादितं दर्शनम्, नानापुराणेषु निरूपितं सांख्यदर्शनं च विलोकनीयं निबन्धद्वये। ततश्च वर्तते सर्वज्ञविचारशीर्षको निबन्धः, यत्र सर्वज्ञत्वसिद्धिः पक्षविपक्षमुखेन कृता दृश्यते। ततोऽपि पश्चात्तने निबन्धे योगदर्शनपरिशीलितं संस्कारतत्त्वं व्याख्यातम्। प्रथमवर्गस्यान्तिम एकविंशतितमसंख्याके निबन्धे च पञ्चानां बौद्धसंगीतीनामितिहासः, संक्षेपेण च हरिवर्मसंस्थापितस्य सत्यसिद्धिसम्प्रदायस्य बौद्धावान्तरभेदस्य परिचयो वर्तते। अस्य सम्प्रदायस्य विशिष्टानां सिद्धान्तानां परिचयः "इण्डियन हिस्टोरिकल क्वार्टर्ली"-नामधेयायां पत्रिकायां (भा० २२, अ० २-३, पृ० ३१९) विशेषतो द्रष्टव्यः।

द्वितीये विभागे एकादशनिबन्धेष्वाद्याः पञ्च सन्ति "मानाधीना मेयसिद्धिर्मेयाधीना वा मानसिद्धिः" इति विषये एकतरं पक्षं स्वीकुर्वाणाः। आद्याश्चत्वारः "मानाधीना मेयसिद्धिः" इनि पक्षं साधयन्ति खण्डयन्ति चापरं पक्षम्। पञ्चमश्च निबन्धः "मेयाधीना मानसिद्धिः" इति पक्षं साधयति, प्रतिक्षिपति च मानाधीनमेयवादिपक्षम्। तदनन्तरं द्वौ निबन्धौ "अद्वैतवादिबाह्यार्थसत्त्ववादिदृष्ट्या ज्ञानस्य निराकारत्वे को विशेषः" इति विचारयतः। तत्र प्रथमो विज्ञानवादिबौद्धदर्शनमवलम्बते, अपरश्च शाङ्कराद्वैतवादमाश्रयति। ततो दृष्टिसृष्टिवादविचारकाः सन्ति त्रयो निबन्धाः, अन्तिमश्च आभासप्रतिबिम्बावच्छेदवादान् शाङ्कराद्वैतिभिः प्रवर्तितान् विवेचयति।

इत्थं विविधभारतीयदर्शनानां प्रमाणोपोद्बलिता क्वचन पाश्चात्यदर्शनेन कुत्रचिच्च नूतनयुगविचारधारया कृतसंगमा स्वच्छन्दतर्ककर्कशापि शास्त्रनियन्त्रिता बहुविधा सामग्री मनांस्यावर्जयेच्चेद्विदुषां पाठकानां सफलोऽत्र कृतः श्रमो भवेत्।

सोऽयं सम्भारो दर्शनपरिषदा विभिन्नभारतीदर्शनानां विशिष्टविषयसूचीमेकां विदुषां सकाशं संप्रेष्याधिगतः। भारते दार्शनिको चिन्ताऽतिचिरन्तनकालतः प्रवर्तते। ऋग्वेदे नासदीयसूक्ते (१०।१२९) ते प्रश्ना विद्यन्ते समुद्भाविताः, येषां समाधानाय हि दार्शनिकी चिन्तनधारा प्रवहति। उपनिषत्सु परवर्तिषु सर्वेष्वपि दर्शनेषु च तेषामेव प्रश्नानां समाधानाय महानायासो दृश्यते। महाभारतीयशान्तिपर्वतः पालिप्राकृतग्रन्थेभ्यश्च खीष्टसमयतः पूर्वमत्र भारते प्रचलितानां बह्वीनां दार्शनिकचिन्तनपद्धतीनां तत्प्रवर्तकानां च मङ्खलिगोशालाजिनकेशकम्बलिसंजयवासिष्ठीपुत्रप्रभृतीनां परिचयः समुपलभ्यते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यथा परवर्तियुगे वेदान्तन्यायदर्शनयोरासीदस्ति चाधुनाप्यतीव महत्त्वं विशालं वाङ्मयं च, तथा पूर्वं तत्स्थानमासीत् सांख्यदर्शनस्येति महाभारतपुराणादिषु वर्णितेन सांख्यसिद्धान्तेन सांख्यकारिकाया युक्तिदीपिकानाम्न्या टीकया च ज्ञातुं शक्यते। सन्ति च भूयो भागवतशैवशाक्ततन्त्रोपजीव्यानि दर्शनानि विशालवाङ्मयालङ्कृतानि सुधियां चेतः-समुल्लासकानि। अस्ति च किल पूर्वं पालिप्राकृताभ्यां ततश्च संस्कृतगिरा निबद्धयोर्बौद्ध-जैनदर्शनयोर्महान् ग्रन्थराशिः। सर्वमेतद् भारतीयं दर्शनम्। सर्वेषामेतेषां दर्शनानां विकासः परस्परसापेक्ष एव समजायत। "को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः" [ऋ० १०।१२९ ६] इति श्रुतिसमुद्भावितानां प्रश्नानां समाधानप्रवणा वर्तते स्वीया दृष्टिर्विभिन्नदर्शनानाम्। तद्दृष्टिमनुरुद्ध्यैव वरीवर्ति सम्पूर्णा तेषां विषय-प्रतिपादनपद्धतिः। सर्वाण्येव तानि दर्शनान्यध्ययनार्हाणि। तेषामध्ययनेन तत्त्वेन दर्शन-शास्त्रस्वरूपं किं तज्ज्ञायेत, प्रतिदर्शनं च रहस्यावगतिः स्यात्।

उत्तरप्रदेशमुख्यमन्त्रिणा माननीयेन मनीषिणा श्रीसम्पूर्णानन्दमहाभागेन दर्शन-परिषद उद्घाटनं कुर्वता भारतीयदार्शनिकानां विशेषतः संस्कृतज्ञानां समक्षं ये सामयिकाः प्रश्नास्तेषां समाधानसरणिश्च समुपस्थापिताः, तदनुरोधेन विद्वांसो दर्शनपरिषदा निर्दिष्टेष्वन्येषु च विषयेषु स्वाभिप्रायान् शास्त्रसिद्धान्तसंवलितान् आधुनिकजागतिकसमस्यासमाधानक्षमान् प्रकटयेयुश्चेत्तदाद्यत्वेऽपि भारतीयदर्शनस्य महत्त्वमक्षुण्णं विराजेत। आशास्यते विद्वांसोऽत्र सावहिता भवेयुः।

दर्शनपरिषदो नियममेकमनुरुद्ध्यात्र द्वौ निबन्धौ हिन्दीभाषायां निबद्धावपि प्रकाशितौ। तथैव पालिभाषानिबद्धः 'किलेसविद्धंसननयो' इतिशीर्षको निबन्धोऽप्येकोऽत्र प्रकाश्यते।

अस्याङ्कस्य सामग्रीसंकलने दर्शनपरिषद उपाध्यक्षेण श्रीदेवदत्तशर्मोपाध्यायेन, मन्त्रिणा श्रीजगन्नाथोपाध्यायेन च भूरि प्रयतितमिति ताभ्यां धन्यवादप्रदानपुरःसरममुं दर्शनाङ्कं प्राज्ञेभ्यः पाठकेभ्य उपहारीकुर्मः, अङ्कप्रकाशने संजातमतिवेलं कालविलम्बं धैर्येण तैर्यापितमित्यत्र क्षमापनवाचं च तान् व्याहराम इति शम्॥

S.J.V.J. PRATISHTHAN LIBRARY Jangamawadimath, Varanasi ACC. No

SRI JAGADGURU VISHWARADHYA JNANA SIMHASAN JNANAMANDAL LIBRARY Jangamwadi Math, Varanasi ACC. No. 8767

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रजिस्टर्ड न्यूज पेपर्स एक्ट के नियम के अन्तर्गत

विज्ञप्ति

१.	प्रकाशन का नाम	सारस्वती सुषमा
२.	प्रकाशन की तिथि	त्रैमासिक
३.	मुद्रक का नाम	अमलकुमार वसु
	राष्ट्रीयता	भारतीय
	पता	इण्डियन प्रेस (प्राइवेट) लिमिटेड मलदहिया, वाराणसी।
४.	प्रकाशक का नाम	क्षेत्रेशचन्द्र चट्टोपाध्याय
	राष्ट्रीयता	भारतीय
	पता	वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी।
५.	सम्पादक का नाम	कुबेरनाथ शुक्ल
	राष्ट्रीयता	भारतीय
	पता	वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी।
६.	स्वामित्व	वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी।

मैं क्षेत्रेशचन्द्र चट्टोपाध्याय घोषित करता हूं कि उपरि लिखित विज्ञप्ति मेरी जानकारी के अनुसार बिलकुल ठीक है।

हस्ताक्षर

क्षेत्रेशचन्द्र चट्टोपाध्याय

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारस्वती सुषमा

वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

१. एषा देशे विदेशे च लब्धप्रसारा त्रैमासिकी संस्कृतपत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठभाद्रमार्गशीर्षफाल्गुनपूर्णिमासु भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु मौलिकानुसन्धानप्रवृत्तेः समालोचना-प्रवृत्तेरुद्बोधनं प्रोत्साहनं चास्ति।

४. अस्यां सरस्वतीभवनस्य काशिकराजकीयसंस्कृतमहाविद्यालयस्य च विदुषामन्येषां च लेखकानां मौलिकविचारपूर्णा अनुसन्धानप्रधाना अन्य-विधाश्चोपयोगिनो निबन्धाः प्रकाश्यन्ते।

५. लेखकैः प्रकाशितनिबन्धस्य पञ्चविंशतिः प्रतिमुद्रणान्युपलब्धानि स्युः।

६. अस्यां पत्रिकायां विशिष्टानां हिन्दीसंस्कृताङ्गलग्रन्थानां समालोचना प्रकाश्यते।

७. अस्या वार्षिकं मूल्यं सप्त रूप्यकाणि, प्रत्यङ्कं च रूप्यकद्वयं वर्तते।

८. पत्रिकायाश्चतुर्थपञ्चमषष्ठवर्षीया अङ्का अर्धमूल्येन प्राप्तुं शक्यन्ते।

९. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः—"सम्पादक, सारस्वती सुषमा, वाराणसेयसंस्कृतविश्वविद्यालय, वाराणसी–२" इति संकेतेन विधेयः।

प्रकाशक—संचालक, अनुसंधान संस्थान, संस्कृत विश्वविद्यालय, वाराणसी।
मुद्रक—अमलकुमार वसु, इण्डियन प्रेस (प्राइवेट) लिमिटेड, वाराणसी शाखा।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi